१४४४ ग्रंथप्रणेता श्री हरिभद्रसूरि महाराज का
योगीओं को विशिष्ट उपहार

# हरिभद्रयोगभारती

: संपादक :
आचार्य विजयअभयशेखरसूरि

: प्रकाशक :
दिव्यदर्शन ट्रस्ट-धोलका

Jain Education International For Personal & Private Use Only www.jainelibrary.org

णमोत्थु णं समणस्स भगवओ महावीरस्स

विक्रमनी एकवीसमी सदीना पूर्वार्धमां
श्री जैन संघना अनन्य उपकारी
स्व. पू. गुरुदेव श्री भुवनभानुसूरीश्वरजी म.सा. नी
जन्मशताब्दीना उपलक्षमां

# हारिभद्रयोगभारती

आचार्य शिरोमणि तर्कसम्राट् श्रीहरिभद्रसूरि विरचित
चार योगप्रकरणों का समूह -

( १ ) योगविंशिका - टीका - उपा. श्री यशोविजयजी गणी
( २ ) योगशतक - स्वोपज्ञटीका
( ३ ) योगदृष्टिसमुच्चय-स्वोपज्ञ टीका
( ४ ) योगबिन्दु - आ. श्री मुनिचन्द्रसूरि प्रणीत टीका सह

: द्वितीय-तृतीयावृत्ति सम्पादक :
श्री विजयप्रेम-भुवनभानु-धर्मजित्-जयशेखरसूरिशिष्यः
**आचार्य विजयअभयशेखरसूरिः**


| : प्रथमावृत्ति : | : द्वितीयावृत्ति : | : तृतीयावृत्ति : |
| --- | --- | --- |
| वि.सं. २०३६ | वि.सं. २०५५ | वि.सं. २०६६ |

प्रकाशक : **दिव्यदर्शन ट्रस्ट**
३९, कलिकुंड सोसायटी, धोलका-३८७८१०

मूल्य : रूपये १००-००

मुद्रक : भरत ग्राफिक्स
न्यु मार्केट, पांजरापोळ, रिलीफ रोड, अहमदाबाद-१
फोन : ०७९-२२१३४१७६, ९९२५०२०१०६



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# प्रकाशकीय उद्गार

महामाहिम तर्कसम्राट आचार्य श्री हरिभद्रसूरि के रचे हुए योगप्रकरणों को सविवरण यहां एक समुदाय के रूप में प्रकाशित करते हुये हम आनंद महसूस कर रहे हैं ।

न्यायविशारद वर्धमान तपोनिधि पूज्यपाद स्व. आचार्यदेव श्रीमद् विजय भुवनभानुसूरीश्वरजी महाराज की हमारे पर महती कृपा रही और उन्हीं की प्रेरणा से यह ग्रन्थ की प्रथमावृत्ति प्रकाशित करने के लिये हम सशक्त बने थे ।

इस ग्रन्थ के प्रथम प्रकाशन में पूर्वमुद्रित जैन ग्रन्थ प्रकाशक सभा [अहमदाबाद] संस्था प्रकाशित योगदृष्टि और योगबिन्दु तथा ला. द. विद्यामंदिर, [अहमदाबाद] प्रकाशित 'योगशतक' का पूर्णरूप से उपयोग किया गया, उपरान्त ग्रन्थसंशोधन के लिये हेमचन्द्राचार्य जैन ज्ञानमंदिर-पाटण और ला. द. विद्यामंदिर की योगदृष्टि-योगबिन्दु आदि प्राचीनतर हस्तप्रतों का पर्याप्त उपयोग किया गया था । इसलिये उन सभी के प्रति हम कृतज्ञता व्यक्त करते हैं ।

पूज्यपाद आचार्यदेव की करुणा और शासनदेव की कृपा से आइन्दा श्रीसंघ की सेवा में अधिकाधिक उपयोगी मूल्यवान और प्राणवान प्रकाशन प्रस्तुत करते रहें यही शुभेच्छा और प्रार्थना ।

**શ્રી ઘાટકોપર જૈન શ્વેતામ્બર મૂર્તિપૂજક તપગચ્છ સંઘ,**
નવરોજીલેન. ઘાટકોપર (વે.)
પોતાના જ્ઞાનખાતામાંથી આ પ્રકાશનનો સંપૂર્ણ લાભ લેવા બદલ
ખૂબ ખૂબ ધન્યવાદ.

**लि.**
**संघसेवक कुमारपाल वि. शाह**
**आदि समस्त ट्रस्टीगण**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्री शंखेश्वरपार्श्वनाथाय नमः

श्रीप्रेम-भुवनभानु-जयघोष-धर्मजित-जयशेखरसूरीशेभ्यो नमः

# બીજી આવૃત્તિની પ્રસ્તાવના

સુગૃહીત નામધેય સૂરિપુરંદર શ્રી હરિભદ્રસૂરિ મહારાજ વિરચિત યોગવિંશિકા વગેરે યોગવિષયક પ્રકરણ ગ્રન્થોમાં યોગ અંગે સુંદર પ્રકાશ પાથરવામાં આવ્યો છે. જીવને મોક્ષની સાથે જે જોડી આપે તેવી સાધુ-શ્રાવક સંબંધી કોઈ પણ ધર્મક્રિયા એ યોગ છે.

દરેક ધર્મક્રિયા એ યોગ નથી, પણ મોક્ષ સાથે જોડી આપનારી ધર્મક્રિયા એ યોગ છે. એટલે જણાય છે કે ધર્મક્રિયા યોગરૂપ બને પણ ખરી, ક્યારેક ન પણ બને. છતાં જો યોગરૂપ બનશે તો ધર્મક્રિયા જ યોગરૂપ બનશે, હિંસાદિ પાપક્રિયાઓ નહીં. એટલે આ પણ જણાય છે કે જેઓ હજુ ધર્મક્રિયામાં જ જોડાયા નથી, અથવા જેઓ ધર્મક્રિયામાં જોડાયા હોવા છતાં એમાં હજુ એવા સ્થિર થયા નથી, (મનમાં આવ્યું તો કરે – ન આવ્યું તો ન કરે આવી હાલક ડોલક સ્થિતિવાળા છે...) એવા જીવોને યોગની વાતો કરવાનો કશો અર્થ નથી. જે ધર્મક્રિયા કરતો જ નથી, એવા જીવને 'તારી ધર્મક્રિયા યોગરૂપ તો જ બનશે જો એ પ્રણિધાનાદિ આશયોથી યુક્ત હશે' આવું કહેવાનો શો મતલબ ? એને તો પ્રથમ પગથિયા રૂપે એ પાપક્રિયાઓ છોડી ધર્મક્રિયાઓમાં જોડાય એ માટે ધર્મનો મહિમા ગાતી વાતો જ કરવાની હોય. જે ગામ આખામાં રખડ્યા કરે છે ને ધંધો વગેરે કશું કરતો નથી, એને 'જો ધંધો આ રીતે કરાય તો નફો થાય ને આ રીતે કરાય તો નફો ન થાય' વગેરે કહેવાનો શું મતલબ ? એને તો ધંધો કરવાથી આ લાભ ને ધંધો કરવાથી તે લાભ વગેરે કહી ધંધાનું આકર્ષણ પેદા કરવાનું હોય ને એના દ્વારા ધંધે લગાડવાનો હોય. આ રીતે એક વાર એ ધંધામાં સ્થિર થઈ જાય, એટલે એની ભૂમિકા ઊભી થઈ ગઈ, હવે એને કહેવું જોઈએ કે આ રીતે ધંધો કરવાથી નફો ને આ રીતે ધંધો કરવાથી નફો નહીં. આવું જ પ્રસ્તુતમાં જાણવું. એટલે જેણે ધર્મઆચારોને જીવનમાં સ્થિર કરી દીધા છે, એવા ધાર્મિકજીવોને જ, એમનો ધર્મ 'યોગ' રૂપ બને એ માટે માર્ગદર્શન આપવું આવશ્યક બને છે. એટલે જેઓ ધર્મમય જીવન જીવનારા છે, નવા જીવોને ધર્મમાં જોડવા માટે જેવો ઉપદેશ આપવો યોગ્ય હોય તેવો ઉપદેશ



Jain Education International For Personal & Private Use Only www.jainelibrary.org

જેમને આપવો આવશ્યક રહ્યો નથી, ધર્મને યોગમાં રૂપાંતરિત કરવા માટે આવશ્યકતાનુસાર કંઈક કડક શબ્દોમાં કહેવામાં આવે તો પણ જેઓ ધર્મ છોડી દે એવા નથી.... આવી બધી ભૂમિકાને નજરમાં રાખીને યોગ અંગેની આ પ્રસ્તુત વાતો છે એ બધા સુજ્ઞોએ નિર્ણય કરીને ગ્રન્થ પ્રવેશ કરવો હિતાવહ છે. આ ભૂમિકા નજર સામે છે માટે જ ગ્રન્થકાર ''જો પ્રણિધાનઆશય વગેરે રૂપ ભાવ નથી, તો બધી ધર્મક્રિયા દ્રવ્યક્રિયા છે, સ્વફળ(મુક્તિ)સાધક ન હોવાથી તુચ્છ છે...' આવું બધું બેધડક કહી શક્યા છે. નહીંતર, આવા આશય વિનાની ધર્મક્રિયા પણ, 'દુર્ગતિમાં પડતા જીવને ધારી રાખે- (દુર્ગતિમાં પડવા ન દે) તે ધર્મ' આવી ધર્મની વ્યાખ્યામાં, ધર્મનું દુર્ગતિવારણાત્મક જે કાર્ય જણાવ્યું છે, તે તો કરી જ આપતી હોવાથી સ્વફળસાધક પણ છે જ, ને તેથી તુચ્છ પણ નથી જ. ને તેથી જ, જીવોને નવા નવા ધર્મમાં જોડવા હોય, યા જોડાયા હોય તેઓને સ્થિર કરવા, હોય તો 'જો તમારે દુર્ગતિમાં ન જવું હોય તો તમારે ધર્મ જ કરવો જોઈએ. 'જો તમારે આલોક-પરલોકમાં સુખી થવું હોય તો તમારે ધર્મ જ કરવો જોઈએ...' વગેરે ઉપદેશ અપાય છે, જેમાં પ્રણિધાન આશય વગેરેની કોઈ વાતો હોતી નથી. ઉપદેશ તરંગિણીમાં તો ત્યાં સુધી કહ્યું છે કે ''રાજન્ ! ધર્મ તો સાંભળ્યો હોય, જોયો હોય કે અનુમોદ્યો હોય તો પણ સાત પેઢીને પવિત્ર કરી દે છે....' પ્રણિધાન આશય વગેરે ન હોવા છતાં પણ ધર્મને અહીં આટલો બધો પ્રભાવવંતો કહેવો, અને યોગગ્રન્થોમાં એને સાવ તુચ્છ કહેવો.... આવો તફાવત પડવાનું એક માત્ર કારણ શ્રોતાઓની વિભિન્ન ભૂમિકા છે. કશું ન કમાતો હોય એને હજાર રૂપિયાની કમાણી પણ મોટી સિદ્ધિરૂપે કહેવાય... ને લાખો કમાવાની ભૂમિકાવાળાને હજાર રૂપિયાની કમાણી સાવ તુચ્છ કહેવાય... તો એમાં શું આશ્ચર્ય છે ?

માટે જેઓ પાપપ્રવૃત્તિથી હટી ધર્મમાં જોડાયા છે - સ્થિર થયેલા છે. તેઓને મોક્ષમાર્ગ પર આગળ વધારવા માટે પ્રસ્તુત ગ્રન્થો છે, એ સ્પષ્ટ છે. એટલે જ ગ્રન્થકાર શ્રી હરિભદ્રસૂરિ મહારાજે યોગદૃષ્ટિ સમુચ્ચય ગ્રન્થની બીજી ગાથામાં बालानामुपकाराय એમ ન કહેતાં योगिनामुपकाराय એમ કહ્યું છે. આગળ ૨૦૯મી ગાથામાં પણ कुलप्रवृत्तचक्रा ये ते एवास्याधिकारिण: વગેરે કહ્યું છે. ૨૨૨માં શ્લોકમાં પણ આવી જ વાત કરી છે. એ જ રીતે યોગ બિન્દુના બીજા શ્લોકમાં 'યોગશાસ્ત્રના મધ્યસ્થ



Jain Education International For Personal & Private Use Only www.jainelibrary.org

જાણકારો માટે આ ગ્રન્થરચના છે.' એમ કહ્યું છે. આ બધા પરથી સૂચિત થાય છે કે યોગ સંબંધી આ ગ્રન્થોના કુલયોગી ને પ્રવૃત્તચક્રયોગી જીવો અધિકારી છે, એ સિવાયના જીવો અનધિકારી છે. અર્થાત્ યોગીઓના કુલમાં જન્મેલા હોય, યોગીઓના ધર્મનું સહજ પાલન કરનારા હોય, સર્વત્ર અદ્વેષી હોય, ઇન્દ્રિયનિગ્રહવાળા હોય વગેરે ગુણોવાળા કુલયોગી જીવો અને ઇચ્છા તથા પ્રવૃત્તિ કક્ષાની અહિંસા, સત્ય વગેરે જેમના જીવનમાં હોય એવા પ્રવૃત્તચક્રયોગી જીવો જ આ ગ્રન્થોના અધિકારી છે. આવા જીવોને જ દુર્ગતિવારણાત્મક ફળનો સાધક હોવા છતાં, પ્રણિધાનાદિ ન હોવાના કારણે મોક્ષાત્મક શ્રેષ્ઠફળનો અસાધક હોઈ પ્રણિધાનાદિ શૂન્ય ધર્મ દ્રવ્યક્રિયા રૂપ છે, તુચ્છ છે, એવું કહેવું, એ પ્રણિધાનાદિને કેળવવા માટે પ્રેરક બનતું હોવાથી હિતાવહ બને છે. જેઓ હજુ ધર્મમાં જોડાયા નથી, અથવા જોડાયા હોય તો પણ ડગુમગુ છે, તેઓને તો 'તમારી ધર્મક્રિયા તુચ્છ છે' એવી વાત પ્રણિધાનાદિ કેળવવાની પ્રેરણારૂપ તો નથી બનતી પણ ઉપરથી ધર્મ છોડી દેવાની દુર્બુદ્ધિ જગાડનારી બનવાની જ શક્યતા છે, માટે તેવા જીવો આ ગ્રન્થોના અધિકારી નથી, છતાં તેઓને જો આ વાતો કરવામાં આવે તો,તેમનું હિત નહીં, પણ અહિત થવાની જ નોબત આવી શકે છે.

એટલે, પ્રણિધાનાદિ આશય વિનાની ધર્મક્રિયા એ તુચ્છ છે વગેરે સાંભળવા છતાં જે ધર્મક્રિયાને તો ન જ છોડે એ જ આવી વાતો સાંભળવાનો અધિકારી છે. એ જ રીતે વિષાનુષ્ઠાન વગેરેની પ્રરૂપણા પણ, ઇહલૌકિક અપેક્ષા વગેરેને છોડવા માટે જીવ ચાનકવાળો બને એ માટે છે, નહીં કે એ ધર્મને જ છોડી દે એ માટે... એટલે જ ઘણું સમજાવવા છતાં પણ સંભૂતિમુનિ સ્ત્રીરત્નની ઇચ્છા મૂકવા તૈયાર ન થયા તો પણ ચિત્રમુનિએ એમને અનશન છોડી દેવાનું તો કહ્યું જ નથી. તેથી, એ પણ જણાય છે કે વિષાનુષ્ઠાન વગેરેની વાતો સાંભળવા છતાં જે ધર્મને તો ન જ છોડી દે એવા જ શ્રોતા આ ગ્રન્થના અધિકારી છે, કુલયોગી ને પ્રવૃત્તચક્રયોગી જીવો આવા હોય છે, ને માટે ગ્રન્થકારે તેઓને અધિકારી કહ્યા છે.

એટલે, '(આશયશુદ્ધિની ચાનક લાગે એ માટે) નિરર્થકતા કે વિપરીત ફલકતા કહેવા છતાં, આ શ્રોતાઓ ધર્મને તો નહીં જ છોડે' એવી સંભાવના પ્રતીત થઈ હોય તો જ સભામાં આ વાતો કરી શકાય, અન્યથા જે શ્રોતા માટે એવી આશા પ્રતીત હોય એને વ્યક્તિગત કરી શકાય.



Jain Education International For Personal & Private Use Only www.jainelibrary.org

ક્યારેક સભામાં પણ આ ગ્રન્થની સપ્રસંગ કેટલીક વાતો કરવાનો પ્રસંગ આવે ત્યારે ગીતાર્થ વ્યાખ્યાતાએ એવી રીતે રજૂ કરવી જોઈએ કે જેથી એ શ્રોતાઓ ધર્મને જ છોડી દેવા રૂપ ઊંધો અર્થ પકડીને ન જાય.

સહુ કોઈ અધ્યેતા આ ભૂમિકા સમજીને આગળ વધે એવી ભલામણ. સાબરમતી ચાતુર્માસ (૨૦૫૨) દરમ્યાન અનેક અધ્યેતાઓને શ્રીયોગદષ્ટિસમુચ્ચયનું અધ્યયન કરાવવાના અવસરે અનેક જ્ઞાનભંડારોમાંથી પ્રતિઓ મગાવી. એમાંની શ્રીયોગદષ્ટિ. અને શ્રીયોગબિન્દુની એક પ્રત એવી મળી જે **સ્વ.પૂ.કાન્તિવિજય મહારાજે** અનેક હસ્તપ્રતોને નજર સામે રાખી સંશોધિત કરી હતી. એ પ્રત પરથી હારિભદ્રયોગભારતીની પ્રથમ આવૃત્તિની એક નકલનું સંશોધન કરવામાં આવ્યું. એ નકલ મેં પૂ. પંન્યાસ **શ્રી જયસુંદર વિજય ગણિવર**ને મોકલી આપી જેથી બીજી આવૃત્તિના સંપાદન વેળા એનો ઉપયોગ થઈ શકે. પણ તેઓશ્રીએ પોતે વિવિધ રીતે સંશોધિત કરેલી પોતાની જુની નકલ મોકલી આપવા સાથે આ કાર્ય મને જ ભળાવ્યું. એટલે મને આ બીજી આવૃત્તિનું સંપાદન કરવાનું સૌભાગ્ય તેઓશ્રીની કૃપાથી સાંપડ્યું.

સ્વ.પૂ. કાન્તિવિજય મહારાજે ઉપયોગમાં લીધેલી હસ્તપ્રતોને જે સંકેત આપેલા તે જ આ પ્રકાશનમાં યથાવત્ રાખ્યા છે. આ માટે તેઓશ્રીએ જ કરેલી નોંધ નીચે મુજબ છે.

શ્રીયોગદષ્ટિસમુચ્ચય :-

| | |
|---|---|
| તા. તાડપત્રીય | एताः पञ्च प्रतीः सञ्चिन्त्य |
| भ. भक्तिविजयजी | शोधितोऽयं ग्रन्थ (એમ પૂ. |
| पा. पालीताणा | શ્રીકાન્તિવિજય મહારાજે નોંધ કરી છે. |
| मो. मोहनलालजी | |
| प. पद्मविजयजी | |

શ્રીયોગબિન્દુ - આ યોગબિન્દુનું સંશોધન નીચે જણાવેલી ત્રણ પ્રતિઓના આધારે કર્યું છે.

(૧) A સંજ્ઞકપ્રતિ - પાટણ ખેતરવસીનો પાડો - તાડપત્રભંડાર ડા.નં.૧ લ પત્ર ૧થી ૩૩૧. છેલ્લુ પાનું નથી. પ્રતિ અશુદ્ધ ઘણી છે.



Jain Education International For Personal & Private Use Only www.jainelibrary.org

(૨) B પ્રતિ - હે. જ્ઞા. પાટણ ડા-નં-૧૮૧ પ્રત નં - ૭૦૨૭.

પત્ર-૬૦. પ્રતિ અશુદ્ધપ્રાયઃ, ૧૫૧૭ વર્ષે ભાદ્રવા સુદિ-૨ શુક્રે શ્રી યોગબિન્દુવૃત્તિર્લિખિતા.

(૩) C પ્રતિ હે. જ્ઞા. પાટણ ડા.નં. ૬૭, પ્રતિ નં-૧૫૪૧.

પત્ર ૮૭. આ સંશોધનમાં A સંજ્ઞાવાળી આખી પ્રતિ મેળવી છે. અને B-C સંજ્ઞાવાળી પ્રતિઓનો માત્ર સંદિગ્ધસ્થાનોને શુદ્ધ કરવા પૂરતો જ ઉપયોગ કર્યો છે. ત્રણ પ્રતિઓ લગભગ અશુદ્ધ પ્રાયઃ છે. દ. **કાન્તિવિજય.**

૧૪૪૪ ગ્રન્થનિર્માતા શ્રી હરિભદ્રસૂરિના આ ચાર યોગગ્રન્થોનું અધ્યયન વર્તમાનમાં શ્રી સંઘમાં સારું એવું પ્રચલિત છે. એટલે આ પ્રકાશન સ્વાધ્યાય અને સ્વાધ્યાયજન્ય શુભ અધ્યવસાય વગેરેમાં પ્રબળ નિમિત્ત બનશે જ.

સિદ્ધાન્તમહોદધિ સચ્ચારિત્રચૂડામણિ **સ્વ. પૂ. આચાર્યશ્રી પ્રેમસૂરીશ્વરજી મ.સા.** વર્ધમાન તપોનિધિ સકળસંઘ હિતૈષી **સ્વ. પૂ. આચાર્યશ્રી ભુવનભાનુસૂરીશ્વરજી મ.સા.** સહજાનંદી અધ્યાત્મરસિક **સ્વ.પૂ.આ.શ્રી ધર્મજિતસૂરીશ્વરજી મ.સા.** શ્રી સૂરિમન્ત્રપંચ પ્રસ્થાન આરાધક પૂજ્ય ગુરુદેવ **શ્રી જયશેખરસૂરીશ્વરજી મ.સા.**

આ સુવિહિત ગુરુપરંપરાનું સ્મરણ ધન્યતાનો અનુભવ કરાવે છે.

આ પુસ્તકના મુદ્રણકાર્ય અંગે **શ્રી ગુણવંતભાઈ શાહ**નો સ્તુત્ય સહયોગ સાંપડ્યો છે. - ધન્યવાદ. મુદ્રણ પૂર્વે લગભગ આખા ગ્રન્થના ૬-૬ પ્રૂફ કઢાવવા છતાં, અમુક સુધારો થાય તો બીજો ફેરફાર ઊભો થઈ જાય... વગેરે કારણે ઠેઠ છેલ્લા પ્રૂફ બાદ પણ કેટલાક ફેરફાર ઈચ્છનીય લાગવા છતાં કરી શકાયા નથી.

યોગવિષયક આ ગ્રન્થોનું અધ્યયન કરીને અધ્યેતા મુમુક્ષુવર્ગ પોતાના ધર્માનુષ્ઠાનોને મોક્ષપ્રાપક યોગમાં રૂપાન્તરિત કરવા ઉદ્યમશીલ બનો એવી શુભેચ્છા સાથે....

**પંન્યાસ અભયશેખરવિજય.**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# प्रथमावृत्ति की प्रस्तावना

श्री तीर्थंकर परमात्मा के मूलस्रोत से बहती हुयी और श्री गणधर देवों के द्वारा उपवाहित की गयी ज्ञानगंगा की गहराई में उतर कर महामहीम तर्कसम्राट आचार्यदेव श्रीमद् हरिभद्रसूरि महाराज ने जो सेंकडों सुश्लिष्ट विद्वद्भोग्य ग्रन्थरत्नों का संकलन किया उनमें से समानविषयक चार योगग्रन्थों का यह उपहार चिर काल तक प्रबुद्ध विद्वानों के हृदय में आनंद भरता रहेगा ।

योगविंशिका-योगशतक-योगदृष्टिसमुच्चय और योगबिन्दु ये चारों ग्रन्थ का शरीर क्रमशः बृहद् बृहत्तर हैं । प्रत्येक में जैनयोग का ही भिन्न भिन्न शैली से प्रतिपादन किया गया है । प्रत्येक ग्रन्थ में विषय का भी प्रतिपादन उत्तरोत्तर गूढ गूढतर शैली से किया गया है । जैनशास्त्रों में सर्वाधिक प्रसिद्ध आध्यात्मिक उत्थान के 14 गुणस्थानकों की प्रक्रिया को केन्द्रस्थान में रख कर भिन्न भिन्न प्रकार से आध्यात्मिक उन्नति के सोपानपथ को इन ग्रन्थों में प्रतिफलित किया गया हैं । योगविंशिका के अतिरिक्त प्रत्येक में जैनेतर दर्शनों की भी पक्षपातहीन मीमांसा-आलोचना और यथाघटित समन्वय प्रस्तुत किये गये हैं ।

**'योगविंशिका'** यह **'विंशतिविंशिका'** नामक प्रकरणान्तर्गत एक योगविषयक २० श्लोकों की लघुकृति है । इसमें स्थान-ऊर्ण-अर्थ-आलंबन और अनालम्बन पांच प्रकार के योग का गहराई से प्रतिपादन है । स्थानादियोग के अधिकारी, स्थानादि गत इच्छा-प्रवृत्ति-स्थिर-सिद्धि इन चार उपभेदों, उनके हेतुभेद और कार्यभेद, चैत्यवन्दन के दृष्टान्त से स्थानादि की योजना, अविधि समर्थन में तीर्थोच्छेदादि आलम्बनग्रहण का अनौचित्य और प्रीति-भक्ति-आगम-असंग इन चार अनुष्ठानभेद इत्यादि विषयों का इस लघुकृति में समावेश किया है । इस कृति के भाव से हम अनभिज्ञ ही रह जाते, अगर महामहोपाध्याय श्रीमद् यशोविजयमहाराज ने इस पर विवरण न किया होता, यह विवरण अत्यन्त अर्थगम्भीर और मूल के भावस्पर्शी होने से हृदयंगम बन गया है । मूल ग्रन्थ के भावोन्मीलन उपरान्त भी प्रणिधानादि पाँच आशय इत्यादि अधिक विषयों का स्पष्टीकरण किया गया है ।

**'योगशतक'** ग्रन्थ के उपर मूलकर्ता ने ही स्फुट विवरण किया है । इस में सज्ज्ञान दर्शन और सच्चारित्र पीठिका में बताये गये हैं । तदनन्तर अपुनर्बन्धक आदि के लिङ्ग, मुनि को वासी-चन्दन की उपमा, उपदेशविधि, अकुशलकर्मोदय की चिकित्सा, कर्म और पुरुषकार का सम्बन्ध, कर्मोपक्रम के हेतु चतुःशरणादि, राग द्वेष-मोह तीन दोषों का स्वरूप, उनके प्रतिकार का उपाय, भावना योग, गुरुदेवता प्रणाम, पद्मासनादिस्थान और तद्विषयकचिन्ता, तत्त्वज्ञान, सर्वसम्पत्करी भिक्षा, लब्धि



Jain Education International For Personal & Private Use Only www.jainelibrary.org

का स्वरूप, दोषक्षय की द्विविधता, सामायिक की मोक्षांगता इत्यादि अनेक गहन विषयों का इस ग्रन्थ में स्पष्टीकरण पाया जाता हैं । अन्त में मरणकाल विज्ञान के उपाय भी बताये गये हैं । टीकागत एक उल्लेख से यह पता चलता है कि श्री हरिभद्र सूरिमहाराजने 'उपदेशमाला' ग्रन्थ पर भी टीका बनायी होगी ।

**'योगदृष्टिसमुच्चय'** इस ग्रन्थ में मुमुक्षु आत्माओं की आध्यात्मिक उन्नति का क्रम आठ योगदृष्टिओं के माध्यम से प्रस्तुत किया है । योग अध्येताओं को यह ग्रन्थ चिरकाल से प्रिय रहा है ।

प्रारम्भ में इच्छायोग, शास्त्रयोग, सामर्थ्ययोग, तीन प्रकार का प्रासंगिक प्रतिपादन है जो अग्रिम समग्र ग्रन्थ का भाव समझने में बहुत उपयोगी है । मित्रा तारा आदि आठ योगदृष्टि से बाह्य ओघदृष्टि के निरूपण के बाद प्रत्येक दृष्टिगत बोध का स्वरूप तृणाग्नि आदि की प्रभा के दृष्टान्त से बताया हैं । मित्रादि आठ दृष्टि में आठ यम, आठ दोषत्याग और आठ गुण इत्यादि की योजना बतायी गयी है जो इस प्रकार है -

(१) **मित्रादृष्टि** में दर्शन (बोध) तृणाग्नि प्रभा समान मंद होता है, अष्टांग में से प्रथम यम, खेद दोष का त्याग और अद्वेषगुण की सम्प्राप्ति होती है । इस दृष्टि में आत्मा जिनभक्ति, सद्गुरुसेवा, भव उद्वेग, द्रव्याभिग्रह पालन और सिद्धान्त के लेखन आदि योग बीजों का संचय करता है । इसी दृष्टि में तात्त्विक प्रथम गुणस्थान सम्प्राप्त होता है ।

(२) **तारादृष्टि** में दर्शन गोमय अग्नि प्रकाश समान होता है । दूसरा नियम अंग, उद्वेग दोष त्याग-जिज्ञासा गुण आदि यहां प्राप्त होते हैं । विशेषत योगकथाप्रेम-बहुमान, भव का अतिभय, औचित्य का आचरण और शिष्ट लोगों के प्रामाण्य का स्वीकार आदि इस दृष्टि के प्रमुख लक्षण हैं ।

(३) **बलादृष्टि** में काष्ठाग्नि कण प्रभा समान दर्शन होता है । तृतीय आसन अंग, क्षेप दोष त्याग, शुश्रूषा गुण की प्राप्ति होती है । तत्त्वगर्भित वचनों को सुनने की इच्छा यहां प्रबल बन जाती है । और वही उसके लिये तत्त्वज्ञान का बीज बन जाती है ।

(४) **दीप्रादृष्टि** में दीपप्रभा समान बोध प्रस्फुरित होता है । चतुर्थ योगांग प्राणायाम, उत्थान दोषत्याग, तत्त्वश्रवण गुण की यहां प्राप्ति होती है । इसी दृष्टि के विवरण में भवाभिनंदी के आठ लक्षण तथा वेद्यसंवेद्यपद और अवेद्यसंवेद्यपद का गम्भीर विवेचन है । प्रथम गुणस्थान इस दृष्टि में पराकाष्ठा प्राप्त हो जाता है और मिथ्या अभिनिवेश का विगलन हो जाता है ।

(५) **स्थिरा दृष्टि** में रत्नप्रभा तुल्य बोध का उदय होता है । पंचम योगांग



Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत्याहार, भ्रान्तिदोष का त्याग, सूक्ष्मबोध गुण प्राप्त होते हैं । इस दृष्टि में भवचेष्टा बालधूलिक्रीडा समान भासित होती है और धर्मजनित भोग में भी अनिष्टताबुद्धि का उदय होता है । अन्य योगाचार्यों ने जो निष्पन्नयोगी का लक्षण बताया है- ऋतम्भरा बुद्धि-वैरनाश-जनप्रियता आदि वे सब यहां सम्पन्न होते हैं ।

(६) **कान्ता दृष्टि** में तारा प्रकाश तुल्य बोध का उदय, छट्ठा योगांग धारणा, अन्यमुद् चित्तदोष का त्याग और तत्त्व मीमांसा गुण प्राप्त होते हैं । विषयभोग को मृगजल तुल्य समझकर यह योगी उसका अतिक्रमण कर जाता है-उसकी प्रगति में भोगादि रुकावट नहीं कर सकते ।

(७) **प्रभा दृष्टि** में सूर्यप्रभा समान बोध, सातवाँ योगांग ध्यान, रोग दोष त्याग और तत्त्वप्रतिपत्ति गुण प्राप्त होते हैं । चतुर्थ असङ्ग अनुष्ठान की यहां सम्प्राप्ति होती है ।

स्थिरा-कान्ता और प्रभादृष्टि मुख्यतया चतुर्थ, पंचम और षष्ठ गुणस्थानक में विद्यमान होती है ।

(८) सप्तम गुणस्थान से **परादृष्टि का** प्रारम्भ हो जाता है । यद्यपि उपचार से छठ्ठे गुणस्थान से उसका प्रारम्भ हो जाता है । इस दृष्टि में चन्द्रप्रभा तुल्य बोध, अष्टम योगांग समाधि, आसंग दोष का त्याग और स्वस्वभाव में प्रवृत्ति गुण प्राप्त होते हैं । केवलज्ञानादि इसी दृष्टि में प्रगट होते हैं । सर्व साधना यहां समाप्त होती है और योगी कृतकृत्य बन जाता है ।

आठ योगदृष्टि के विवरण उपरांत इस ग्रन्थ में बौद्ध के क्षणिकवाद की मीमांसा और योगी के गोत्र, कुल, प्रवृत्तचक्र और निष्पन्न योगी ये चार प्रकार और अवंचक योग के तीन प्रकार का उपवर्णन किया है ।

**योगबिन्दु ग्रन्थ** में मोक्ष साधक योग तत्त्व की मीमांसा की गयी है । ग्रन्थकार का परामर्श है कि सर्वत्र योग की मोक्षहेतुता मानी जाती है किन्तु योग का विषय उसका स्वरूप और उसका फल ये तीन में विसंवाद होने से उनकी मीमांसा लोक प्रतीति और शास्त्र दोनों से अविरुद्ध रीति से की जानी चाहिये । २९ श्लोक तक उसकी मीमांसा है । उसके बाद अध्यात्म-भावना-ध्यान-समता और वृत्तिसंक्षय पाँच प्रकार का योग मार्ग जो इस ग्रन्थ का प्रधान प्रतिपाद्य विषय है उसका प्रारम्भ होता है । तात्त्विक-अतात्त्विक, सानुबन्ध-निरनुबन्ध, सास्रव-अनास्रव योगभेदों के नाम निर्देश के बाद योगमाहात्म्य उद्भासित किया है-जिसके अन्तर्गत जातिस्मरणज्ञान के उपायों का भी निर्देश है । उसके बाद तत्त्वप्रतिप्रत्ति के लिये जरुरी अध्यात्म, उसकी दुर्लभता और भवाभिनंदीजीवों का लक्षण इत्यादि दिखाया गया है । योग के लिये उचित पूर्वसेवा स्वरूप गुरुदेवादिपूजन, चारिसंजीवनीचार न्याय से सब जीवों



Jain Education International For Personal & Private Use Only www.jainelibrary.org

की कल्याण कामना, मुक्ति के प्रति अद्वेष, विष-गर-अननुष्ठान-तद्धेतु-अमृत पांच प्रकार के अनुष्ठानों का स्वरूप आदि प्रतिपादन के बाद १७९ श्लोक से अपुनर्बन्धक, मार्गपतित, मार्गाभिमुख इत्यादि का स्वरूप बताया गया है । तदनन्तर विषयशुद्धि, स्वरूपशुद्धि, अनुबन्धशुद्धिः तीन प्रकार की अनुष्ठानशुद्धि का निरूपण है । २२१ श्लोक से शास्त्र की महत्ता का निदर्शन है । २५२ श्लोक से सम्यग्दृष्टि आत्मा के लिङ्गों का उपदर्शन है । २९४ श्लोक से जिन नाम कर्म आदि के बंधक महात्माओं की तत्त्व चिन्ता का स्वरूप निरूपण है । ३१८ श्लोक से दैव और पुरुषकार की अन्योन्य सापेक्षता, ३५२ श्लोक से चारित्रवान् के लक्षणों का निर्देश है । यहाँ से मुख्यतया अध्यात्मादि पाँच प्रकार का निरूपण प्रारम्भ होता है । उसके बाद उसी में तात्त्विक अतात्त्विक आदि भेदों का उपयोजन किया गया है ।

श्लोक ३८० से विशेषतः अध्यात्म का स्वरूप दिखाया गया है जिस में जप अध्यात्म, निजयोग्यतालोचनादि रूप अध्यात्म, देववन्दनादि रूप अध्यात्म प्रधान हैं । श्लोक ४०५ से वृत्ति संक्षय योग की विशेष मीमांसा है जिस में सम्प्रज्ञात और असम्प्रज्ञात अन्यमत प्रसिद्ध योग भेद का समन्वय उपदर्शित है । श्लोक ४३५ से सर्वज्ञता की मीमांसा में मीमांसक, सांख्य और बौद्ध मत की आलोचना प्रस्तुत है । श्लोक ४७८ से आत्मएकान्तनित्यता का निराकरण कर के परिणामी आत्मवाद की प्रतिष्ठा की गयी हैं ।

ग्रन्थ के अन्त भाग में विद्वत्ता का फल सद् योगाभ्यास, योग की गोचरादिशुद्धि, पुरुषाद्वैतवादमीमांसा एवं बौद्धमत मीमांसादि का निरूपण कर के ग्रन्थ समाप्त किया गया हैं ।

पूज्यपाद स्व. आचार्य देव श्रीमद् विजय **प्रेमसूरीश्वरजी** महाराज और उनके पट्ट विभूषक प. पू. न्यायविशारद आचार्य देव श्रीमद् विजय **भुवनभानुसूरीश्वरजी** महाराज की महती कृपा इस ग्रन्थ संपूट के सम्पादन में साद्यन्त अनुगत है और प. पू. स्व. शान्तमूर्त्ति मुनिपुङ्गव श्री **धर्मघोष विजय** महाराज के शिष्यसत्तम प. पू. गुरुदेव आगमविशारद पं. श्रीमद् **जयघोष विजय महाराज** की करुणागर्भित सहाय इस सम्पादन में सतत स्फुरायमाण रही हैं जो ग्रन्थसत्तापर्यन्त चिरस्मरणीय रहेगी ।

ग्रन्थ प्रकाशन सम्पादन और मुद्रण में जिन महानुभावों ने आर्थिक सहाय और हस्तप्रत प्रदान कर के महान् श्रुतभक्तिका लाभ उठाया हैं वे निःशंक धन्यवाद के पात्र है ।

ग्रन्थ सम्पादन में मुद्रणादि कारण वश जो कुछ भी अशुद्धियाँ रह गयी हो उन्हें परिमार्जित कर के अधिकारी मुमुक्षुवर्ग चिर काल तक इस का अध्ययनादि कर के निर्जरा और मुक्ति लाभ सिद्ध करे यही शुभेच्छा ।

**- मु. जयसुंदर विजय**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# विषयानुक्रम

## [१] योगविंशिका


| विषयः | |
|---|---|
| योगलक्षणमाद्यगाथायाम् | १ |
| परिशुद्धिप्रयोजकाशयभेदः | १ |
| प्राणिधानाशयलक्षणं | १ |
| प्रवृत्त्याशयलक्षणम् | २ |
| विघ्नजयलक्षणं विघ्नत्रैविध्याच्च तत्त्रैविध्यम् | २ |
| सिद्धिलक्षणम् | ३ |
| विनियोगलक्षणम् | ३ |
| पुष्टिशुद्धिमत् चित्तं धर्मः | ३ |
| विशेषतः स्थानादिगतो धर्मः | ३ |
| द्वितीयगाथायां तस्य पंचविधता | ४ |
| तत्र स्थानादिव्याख्या | ४ |
| कर्मयोगज्ञानयोगविभागः | ४ |
| तृतीयगाथायां कस्य भवतीति चिन्ता | ४ |
| चारित्रिणो सर्वतो योगः | ४ |
| योगबिन्दावपि चारित्रिणोऽध्यात्मादियोगः | ५ |
| अध्यात्मादियोगव्याख्या | ५ |
| अध्यात्मादीनां स्थानादावन्तर्भावः | ५ |
| निश्चय-व्यवहारयोर्योगस्वामित्व-विषयेऽभिप्रायः | ५ |
| तात्त्विकाऽतात्त्विकयोगभेदौ | ५ |
| चतुर्थगाथायां स्थानादीनामुपभेदाः | ६ |
| पंचम-षष्ठगाथायामिच्छाद्युपभेदव्याख्या | ६ |
| इच्छायोगस्वरूपम् | ६ |
| प्रवृत्तियोगस्वरूपम् | ६ |
| स्थैर्ययोगस्वरूपम् | ७ |
| सिद्धियोगस्वरूपम् | ७ |
| सप्तमगाथायामिच्छादियोगहेतूपदर्शनम् | ७ |
| क्षयोपशमभेदहेतुस्पष्टीकरणम् | ७ |
| अष्टमगाथायामिच्छादियोगस्य-अनुकम्पादिकार्यभेदाः | ८ |
| सम्यक्त्वलिंगानामिच्छादियोग-कार्यताकथनम् | ८ |
| शमादीनां पश्चानुपूर्व्या लाभक्रमहेतुः | ८ |
| नवमगाथायां चैत्यवन्दनदृष्टान्तयोजना | ८ |
| दशमगाथायां चैत्यवन्दन-दृष्टान्तातिदेशः | ८ |
| एकादशगाथायां शुद्धपदज्ञानं कस्येति चिन्ता | ९ |
| श्रद्धायुक्तस्य शुद्धपदज्ञानप्राप्तिः | ९ |
| सापाय-निरपाययोगभेदौ | ९ |
| अर्थादियोगरहितानां स्थानादियत्ने श्रेयः | ९ |
| द्वादशगाथायां योग्यानां चैत्यवन्द-नविन्यासहेतुः | १० |
| विष-गरानुष्ठानयोर्लक्षणम् | १० |
| अननुष्ठान-तद्धेत्वमृतानुष्ठानलक्षणम् | ११ |
| त्रयोदशगाथायां योगविन्यासानुरूपाः | ११ |
| देशविरतानां योगाधिकारः | ११ |
| व्यवहारादपुनर्बन्धकानामपियोगाधिकारः | १२ |
| अविध्यनुष्ठानादरणीयत्वशंका | १२ |
| चतुर्दशगाथायां तीर्थोच्छेदादिकदालम्ब-ननिषेधः | १२ |
| अविधिस्थापने मूलहानिः | १२ |
| पञ्चदशगाथायां सूत्रक्रियाविनाशदुरन्तता | १२ |
| अविधिक्रियायामुपदेशकदोषाभावाशंका | १३ |
| विधिप्ररूपणाभोगाभावेऽपि फलतो दोष एव | १३ |
| विधिस्थापने तीर्थोन्नतिः | १३ |
| बहुजनकृतकर्तव्यताशंका | १४ |
| षोडशगाथायां लोकसंज्ञात्यागाद्युपदेशः | १४ |
| साधुसमयसद्भावोपदर्शनम् | १४ |
| 'अविहिकया' वचनगतेराशंकापरिहारौ | १४ |
| सिद्धान्तविधिप्ररूपणादरविधानोपदेशः | १५ |
| सप्तदशगाथायां स्थानादियत्नवतां हित-प्राप्तिः | १५ |
| अष्टादशगाथायां प्रीत्यादिसदनुष्ठानभेदाः | १६ |
| प्रीति-भक्ति-अनुष्ठानव्याख्या | १६ |




Jain Education International For Personal & Private Use Only www.jainelibrary.org

वचन-असंगानुष्ठानव्याख्या १६
एकोनविंशगाथायां आलम्बन-
नअनालम्बनयोगद्वयम् १७
रूपि-अरूपि-आलम्बनभेदद्वयम् १७
आलम्बन-अनालम्बनभेदस्पष्टीकरणम् १८
अनालम्बनयोगस्य परतत्त्वदिदृक्षारूपत्वम् १८
तत्र रमणीयबाणोपमा १८
केवलिन आलम्बन-अनालम्बनयोगद्व-
याभावः १९
अप्रमत्तगुणस्थाने निरालम्बनध्यानाभा-
वशंका १९
संसार्यात्मनोऽपि निरालम्बनध्यानसम्भवः १९
विंशतितमगाथायां निरालम्बनध्यान-
फलोपदेशः १९
चरमयोगस्य विविधाः संज्ञाः २०

## [ २ ] योगशतकम्

श्रीमहावीरप्रणामो योगलेशप्रतिपादन-
प्रतिज्ञा च २१
मङ्गलाचरणप्रयोजनोपदर्शनम् २१
प्रथमगाथासूत्रावयवार्थाः २१
ग्रन्थरचनाप्रयोजनादिचतुष्टयनिर्बन्धः २२
द्वितीयसूत्रे निश्चयनयेन योगलक्षणम् २२
सान्वर्थः सज्ज्ञानादित्रयसंबन्धो योगः २२
तृतीयसूत्रे सज्ज्ञानादित्रयलक्षणम् २३
सज्ज्ञानादीनां तथाक्रमहेतुः २३
चतुर्थसूत्रे व्यवहारनयेन ज्ञानादिहेतुना-
मपि योगत्वम् २३
पञ्चमे योगस्य गुरुविनयादिस्वरूपम् २४
अविधिकृतयोगादकृतं वरम् २४
व्यवहारस्य निश्चययोगाङ्गतास्पष्टता २५
गुरुविनयादिमतो योगित्वम् २५
शक्तेरनुबन्धसाधकत्वेन प्राधान्यम् २५
अधिकारिणः सर्वत्रसिद्धिलाभः २५
अपुनर्बन्धकादियोगाधिकारी २६
अनिवृत्तप्रकृत्यधिकारस्यायोग्यता २६
तथास्वभावापगमतोऽधिकारादि २७
एकान्तस्वभाववादानापत्तिः २७
अधिकारदुर्विज्ञेयता २८
पापतीव्रभावाभावादीनि अपुनर्बन्धकलि-
ङ्गानि २९
सम्यग्दृष्टेः शुश्रूषादिलिङ्गानि २९
चारित्रिणो मार्गानुसारितादिलिङ्गानि २९
चारित्रस्य सामायिकादिभेदबहुलता २९
सामायिकस्य शुद्धिमालिन्ये २९
विशेषज्ञानात् सामायिकशुद्धिभावः ३०
माषतुषादेः सामायिकसद्भावाशंकानि-
वर्त्तनम् ३०
सामायिके सति भिक्षाटनादिक्रियोपपत्तिः ३०
पूर्वानुवेधतश्च क्रियोपपत्तिः ३१
मुनेः वासीचन्दनकल्पता ३१
गीतादौ प्रोक्तानि मुनिलक्षणानि ३१
अपुनर्बन्धकादौ सर्वमुचितानुष्ठानं योगः ३२
उचितानुष्ठानस्य योगत्वे हेतुत्रयम् ३२
अनुष्ठानप्रवृत्तौ बाह्याज्ञायोगहेतुता ३३
भूमिकानुरूप उपदेशः कर्त्तव्यः ३३
अपुनर्बन्धकस्योपदेशविधिर्लौकिकधर्म-
विषयः ३३
चारिचरकसञ्जीवन्यचरकन्यायेनमार्गाव-
तारणे तथा देशनायां न दोषः ३४
सम्यग्दृष्टेरुपदेशविधिः लोकोत्तरधर्मविषयः ३४
साधुधर्मोपदेशमन्तरा श्रावकधर्मोपदे-
शे हेतवः ३४
देशविरतस्योपदेशविधिः ३५
द्रव्यभावशुचित्वादिः जिनपूजाविधिः ३५
गृहिणो योगाऽसम्भवाशंकानिरासः ३६
चैत्यवन्दना-यतिविश्रामणा-धर्मश्रवणा-
दियोगः ३६
गृहिणोऽपि भावनायोगः ३६
भिन्नग्रन्थेर्मोक्षयोजकयोगसद्भावः ३७
यतीनां सामाचारीगतोपदेशः ३७
गुरुकुलवास-गुरुपरतन्त्रतादियतिगुणाः ३८
विपरीतोपदेशस्य बन्धहेतुता ३९
आचार्यस्य विपरीतोपदेशे दारुणविपाकः ३९
योगिगुणहीलनादयश्च तद्धेतवः ३९



Jain Education International For Personal & Private Use Only www.jainelibrary.org

उपदेशपरिणत्यनन्तरसाधारणकर्त्तव्यविधिः ३९
निजस्वभावालोचनादिषु प्रवर्त्तनम् ४०
गमनादिक्रियया योगशुद्धेरन्वेषणम् ४०
योगोचितकायादिज्ञाने मतान्तरम् ४१
मतान्तरस्य साधुतायां मीमांसा ४१
सद्गुरोः समीपे सविधि
गुणस्थानस्वीकारः ४१
अधिकगुणस्थानाङ्गीकारे विशेषविधिः ४२
तदनन्तरं अधिकगुणसहवासादिविधिपा-
लनम् ४२
उत्तरगुणबहुमानादिषु यत्नकरणम् ४३
भयादिषु शरणादेः पापकर्मोपक्रमः ४३
गुरुशरण-तपश्चर्या-स्वाध्यायैः भयादिवि-
लयः ४४
शरणादिषु यत्नेन प्रत्यवायाभावः ४४
कर्म-पुरुषकारविषयमीमांसा ४४
चतुःशरणादिना कल्याणावाप्तिप्रक्रिया ४५
घटमान-प्रवृत्तयोगिनोः योगसाधनोपायः ४६
प्रवृत्तस्य विशेषतः भावनाश्रुतपाठाद्युपायः ४६
राग-द्वेषादिदोषस्वरूपमीमांसा ४७
रागादिजनककर्मणः स्वरूपम् ४७
कर्मणः अतीतकालन्यायेनानादिप्रवाहता ४७
कर्मणः वियोगे उपायसद्भावः ४८
बन्धमोक्षसुखदुःखादीनामुपपत्तिः ४८
रागादिलक्षणानि आत्मप्रेक्षणञ्च ४८
रागादिविषयतत्त्वपरिणत्यादि-चिन्तनम् ४९
एकान्ते चिन्तनार्थं गुरुदेवप्रणामादिविधिः ४९
गुरु-देवताप्रणामादनुग्रहादिप्राप्तिः ४९
मन्त्ररत्नादिवत् प्राप्तिरनुग्रहादेः ५०
पद्मासनादेः कायनिरोधादिः ५०
तद्गताध्यात्मस्य गुणाः ५०
अधिकृततत्त्वभासनस्य तत्त्व-ज्ञानत्वादिः ५०
स्त्रीरागनिवारणोपायचिन्ता ५१
अचेतनविषयरागनिवारणचिन्ता ५१
द्वेषप्रतिपक्षभावना ५२
मोहप्रतिपक्षभावना ५२
तत्त्वचिन्तोपयोग्यनुभवयुक्तिस्वरूपम् ५२
उत्पादव्ययध्रौव्यसिद्धिः ५२
आज्ञाप्रधानचिन्तने तत्त्वावगमः ५४
एकान्ते चिन्तायां गुणाः ५४
उपयोगद्वारस्पष्टता उपसंहारश्च ५४
मैत्रीभावादिभावनाप्रकाशनम् ५५
मैत्रीभावादिक्रमोपपत्तिः ५५
सामान्यविधावाहारस्वरूपचिन्ता ५६
आहारगुणदोषचिन्ता व्रणलेपोपमया ५६
योगप्रभावादेवोचिताहारलाभः ५६
योगवृद्ध्या रत्नादिलब्धिप्राप्तिः ५७
ततश्च अशुभविलयादिभावः ५७
मंडूकचूर्णतद्भस्मसदृशदोषक्षयौ ५७
मृन्मयकनककलशद्वयतुल्यपुण्यम् ५८
बोधिसत्त्वानां कायपातित्वं न-
चित्तपातिता ५८
विजयादिसमाधिस्वरूपम् ५९
तत्त्वज्ञानप्रतिपक्षोऽभिनिवेशः ५९
योगवृद्ध्या सामायिकशुद्धिभावादिलाभः ५९
सामायिकस्य मोक्षांगताख्यापनं विस्तरेण ६०
तद्भवसिद्धिः विशिष्टस्थानोत्पादो वा योग-
फलम् ६१
इहजन्माभ्यस्तस्य भवान्तरे प्राप्तिः ६१
शुद्धयोगमार्गोचितसंयमवर्त्तनोपदेशः ६२
अन्तकाले देहत्यागविधिः ६२
मरणकालविज्ञानोपायाः ६२
अनशनशुद्धौ यत्नातिशयः ६३
आज्ञायोगत एवाराधकभावः ६४
योगशतकप्रकरणोपसंहारः ६४

## [ ३ ] योगदृष्टिसमुच्चयः

वीरप्रणामरूपमंगलाचरणम् ६६
अनुबन्धचतुष्टयोपदर्शनम् ६६
आद्यश्लोकावयवार्थः ६७
प्रासंगिकेच्छादियोगस्वरूपम् ६८
शास्त्रयोगसामर्थ्ययोगलक्षणे ६९
शास्त्रादेव सर्वसिद्धिहेतुज्ञाने दोषसन्ततिः ६९
प्रातिभज्ञानयोगस्वरूपमीमांसा ७०
सामर्थ्ययोगस्य प्रकारद्वयम् ७१



Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| धर्मसंन्यास-सामर्थ्ययोगकाल: | ७१ | भवाभिनंदिलक्षणम् | ९४ |
| योगसंन्यास-सामर्थ्ययोगकाल: | ७१ | कण्डूयनधीवद्भोगेच्छानुपरति: | ९५ |
| अष्ट मित्रादियोगदृष्टय: | ७२ | अवेद्यसंवेद्यपदविजयलिंगानि | ९७ |
| समेघामेघरात्र्याद्युदाहरणत ओघदृष्टि: | ७३ | कुतर्कस्यानर्थसन्तति: | ९८ |
| तृणाग्न्यादिप्रभोदाहरणत: सद्दृष्टि: | ७४ | परार्थकरणं श्रुतादिसम्पत्तिबीजम् | ९८ |
| मित्रादिदृष्टे: प्राशस्त्यहेतु: | ७५ | कुतर्काऽसारतायां हस्तिदृष्टान्त: | ९९ |
| खेदादिदोषाष्टक-अद्वेषादिगुणस्थानानि | ७६ | कुतर्कसमर्थनदृष्टान्तसुलभता | १०० |
| प्रस्तुते दृष्टिशब्दार्थाभिधानम् | ७६ | अतीन्द्रियार्थानामागमगोचरता | १०१ |
| दृष्टेरष्टविधत्वं बहुविधत्वं च | ७६ | आगमानुमानयोगाभ्यासैरुत्तमतत्त्वलाभ: | १०२ |
| प्रतिपातेतरादिभेदा दृष्टीनाम् | ७७ | सर्वज्ञस्य नामभेदेऽपि नानेकत्वम् | १०२ |
| निशि स्वापसमो दिव्यभव: | ७८ | सर्वज्ञाश्रये नृपतिदृष्टान्त: | १०३ |
| मित्रादृष्टिगतदर्शनयमादिनिरूपणम् | ७८ | संसारीतरदेवानां चित्राऽचित्रभक्ति: | १०४ |
| तत्र योगबीजानामुपादानम् | ७८ | इष्टापूर्तस्वरूपम् | १०५ |
| जिनेषु कुशलचित्तादियोगबीजानि | ७९ | अभिसंधिभेदे फलभेद: | १०५ |
| उपादेयमत्यादिशुद्धिप्रयोजकम् | ८० | बुद्धिज्ञानाऽसंमोहत्रैविध्यं बोधस्य | १०६ |
| आचार्यादिवैयावृत्त्यं योगबीजान्तरम् | ८१ | सदनुष्ठानलक्षणम् | १०७ |
| सहजभवोद्वेगादियोगबीजानि | ८१ | बुद्धि-ज्ञान-असंमोहपूर्वककर्मणां फलानि | १०७ |
| सिद्धान्तलेखनादि योगबीजम् | ८२ | परतत्त्वनिर्वाणस्वरूपादिविवरणम् | १०८ |
| प्रभूतभावमलक्षये योगबीजोपादानम् | ८२ | सर्वज्ञभेदाभावेऽपि देशनाभेदहेतु: | ११० |
| चरमावर्ते एव भावमलक्षय: | ८२ | नय-कालभेदाद्देशनाभेद: | ११० |
| दु:खितदयादि भावमलक्षयलाञ्छनम् | ८३ | अन्धविवादतुल्यस्य निरर्थकता | १११ |
| अवञ्चकयोगात् शुभनिमित्तियोग: | ८३ | अनुमानात् सम्यग्निश्चयाभाव: | ११२ |
| योगक्रियाफलाख्यमवञ्चकत्रयम् | ८३ | शुष्कतर्कग्रहत्यागोपदेश: | ११२ |
| सत्प्रणामादि अवञ्चकत्रयनिमित्तम् | ८४ | परपीडापरिहारादेरुपदेश: | ११३ |
| भावमलघनतायां तदभाव: | ८४ | स्थिरादृष्टिप्रतिपादनम् | ११४ |
| चरमयथाप्रवृत्तकरणस्यापूर्वता | ८५ | धर्मजनितभोगासारता | ११५ |
| तारादृष्टिगतदर्शनादिस्वरूपम् | ८५ | स्थिरायामलौल्यादिगुणा अन्यप्रोक्ता: | ११६ |
| योगकथाप्रेम-शुद्धयोगनियमादि | ८६ | कान्तादृष्टिस्वरूपम् | ११६ |
| शिष्टप्रामाण्यांगीकार: | ८६ | भोगानामत्र न भवहेतुत्वम् | ११७ |
| बलादृष्टिगतदर्शनादिस्वरूपम् | ८७ | प्रभादृष्टिस्वरूपम् | ११८ |
| तत्त्वगोचरशुश्रूषास्वरूपम् | ८८ | सुखदु:खयोर्लक्षणे | ११८ |
| क्षेपदोषाभाव: | ८८ | असंगानुष्ठाननामान्तराणि | ११९ |
| दीप्रादृष्टिगततत्त्वश्रवणादि | ८९ | परादृष्टिस्वरूपम् | ११९ |
| सूक्ष्मबोधलक्षणम् | ९१ | द्वितीयापूर्वकरणे धर्मसंन्यासयोग: | १२० |
| मित्रादिचतुर्दृष्टिष्ववेद्यसंवेद्यपदम् | ९२ | चन्द्रवज्जीवस्यावरणविगमात्सर्वज्ञता- | |
| स्थिरादिचतुर्दृष्टिषु वेद्यसंवेद्यपदम् | ९२ | दिप्राप्ति: | १२१ |
| वेद्यसंवेद्याऽवेद्यसंवेद्यपदयोर्लक्षणम् | ९३ | शैलेशीयोगान्निर्वाणलाभ: | १२१ |




Jain Education International For Personal & Private Use Only www.jainelibrary.org

सिद्धात्मनो व्याधिमुक्तनरोपमा १२२
एकान्तक्षणिकवादयुक्तिनिरासः १२३
एकान्तनित्यवादयुक्तिप्रतिक्षेपः १२५
कुलयोगिनश्चतुर्धा १२७
कुल-प्रवृत्तचक्रयोगिद्वयस्य योगाधिकारः १२७
कुलयोगिविशेषलक्षणानि १२८
अहिंसादयः पञ्च यमाः इच्छायमादिचतुष्कं च १२८
इच्छायमादिलक्षणानि १२९
योगावञ्चकस्वरूपम् १२९
क्रियावञ्चक-फलावञ्चकस्वरूपम् १३०
तात्त्विकपक्षपात-भावशून्यक्रिययोरन्तरम् १३०
योगदृष्टिसमुच्चयग्रन्थोपसंहारः १३१

## [ ४ ] योगबिन्दुः

वृत्तिकारमङ्गलाचरणम् १३३
मूलग्रन्थकारमङ्गलश्लोके शिवनमस्कारः १३३
विप्रतिपन्नयोगशास्त्रसंस्थापना-शंकानिरासः १३४
योगस्य मोक्षहेतुत्वमीमांसा १३५
गोचरस्वरूपफलानां घटमानत्वे सद्योगः १३५
कर्मसम्बन्धवियोगाभ्यामात्मनः संसारितामुक्ते १३६
अनुग्राह्यस्वभावतायामेव महेशानुग्रहः १३६
पुरुषाद्वैतमतनिराकरणम् १३६
काञ्चनदृष्टान्तेन तद्भावना १३७
कर्मसंयोगस्यानादिता १३७
महेशानुग्रहान्मोक्षवादनिराकरणम् १३८
कर्मणो योग्यभावे कर्तृव्यपदेशः १३९
उपचारस्यापि मुख्यपूर्वत्वम् १३९
आत्म-कर्म-संयोगाऽनुग्राहकनामभेदाः १४०
आत्मन एकान्तसत्त्वाऽसत्त्वयोर्विरोधः १४१
लोकशास्त्राऽविरोधेन योगस्य योग्यता १४२
दृष्टेष्टाबाधितवचनाद्योगसिद्धिः १४३
दृष्टबाधितागमाददृष्टप्रवर्तनमयुक्तम् १४४
दृष्टाद्यनुसारेण तत्त्वव्यवस्थासाधुता १४४
अध्यात्मादिः पञ्चविधो योगमार्गः १४६
तात्त्विकेतरसास्रवेतरयोगभेदाः १४६
योगमाहात्म्यनिरूपणम् १४७
योगप्रभावात् सत्स्वप्नादेः संशयनिवृत्तिः १४८
स्वप्ने सत्प्रेरणादायकदेवादिदर्शनम् १४९
स्वप्नस्य भूतमात्रनिमित्तत्वपरिहारः १५०
आत्मादेरनुमानविषयता १५२
योगात् स्थैर्यादेरुपलब्धिः १५३
ब्रह्मचर्यादेर्जातिस्मरणम् १५५
सामान्यतः सर्वेषां पूर्वस्मृतिः १५७
कथानकेषु जातिस्मरणोपलब्धिः १५८
तत्त्वप्राप्तौ वादग्रन्थानामनुपयोगः १५८
अध्यात्मादन्यो नास्ति सदुपायः १५९
अध्यात्मदुरापत्वभावना १६०
अचरमावर्तेषु तदभावः १६१
तत्स्वाभाव्यात् परिभ्रमणादि १६१
स्वभाववादापत्तिपरिहारौ १६२
कालादिवादव्यर्थतापत्तिक्षेपः १६३
सामग्रीवादसमर्थनम् १६४
भवाभिनन्दीनां सन्मार्गानवतारः १६५
भवाभिनन्दिजीवलक्षणानि १६५
लोकपंक्तिलक्षणम् १६६
लोकपंक्तिर्महामतेः कल्याणाङ्गम् १६६
अनिवृत्ताधिकारप्रकृतौ जिज्ञासानिवृत्तिः १७०
जिज्ञासासत्त्वेऽपि पापक्षयः १७०
नानारूपप्रकृतौ कुशलधीप्रभृतेर्युज्यमानता १७१
गुरुदेवपूजनादिपूर्वसेवोपक्रमः १७२
देवपूजाविधानम् १७४
चारिसञ्जीवनीचारकोदाहरणम् १७५
पात्र-दीनादिवर्गादिदानविधानम् १७७
विधिवद्दानस्वरूपम् १७८
सदाचारस्वरूपम् १७९
चान्द्रायणादि तपोविधानोपदेशः १८०
पापसूदनतपसि यमुनराजज्ञातम् १८२
मुक्त्यद्वेषस्वरूपाभिधानं १८२
मुक्त्यद्वेषाऽसम्भवपरिहारः १८२
मुक्त्यद्वेषवतां कल्याणावाप्तिः १८३
मुक्त्युपायमलनातोऽनर्थप्राप्तिः १८४
श्रामण्यदुर्ग्रहः परिणामदुरन्तः १८४



Jain Education International For Personal & Private Use Only www.jainelibrary.org

गुरुदोषवतः स्तोकमपि सच्चेष्टितं न १८६
भवाभिष्वङ्ग-अनाभोगलक्षणं १८७
कर्तृभेदेनानुष्ठानभिन्नता १८८
विषादिपञ्चानुष्ठानानि १८८
चरमावर्त्तभाजः तुरीयानुष्ठानं प्रायः १९१
सहजमलह्रासाभावे तदभावः १९१
योग्यतान्तरेण बन्धाभावनिरूपणम् १९२
कर्मबन्धयोग्यताया दर्शनभेदेन नामभेदः १९३
प्रत्यावर्त्तं बन्धयोग्यताक्रमह्रासः १९३
सत्साधकस्य बन्धबिभीषिकाऽभावः १९४
सिद्धेरासन्नभावे चेतसि प्रमोदोद्धरः १९४
अपुनर्बन्धकलक्षणानि १९५
मार्गपतितादिक्रमव्यवस्था १९६
अपुनर्बन्धकावस्थायां योगपूर्वसेवा १९६
धर्मार्हजीवस्य तात्त्विकप्रकृतिः १९७
शान्तोदात्तभावः शुभभावहेतुः १९८
शान्तोदात्तस्य भवबीजादिविषयोहः २००
प्रकृतिसंयोगवियोगाभ्यां संसारमुक्ती २०२
ईश्वरकृतानुग्रहनिग्रहप्रतिक्षेपः २०२
मार्गानुसारिणः प्रकृतिवियोगविषय ऊहः २०३
भिन्नग्रन्थेर्भावितो योगः २०५
विषयात्मानुबन्धैस्त्रिधा शुद्धानुष्ठानम् २०७
त्रिधानुष्ठानफलानि २०९
तृतीयात्सानुबन्धदोषविगमः २१०
परलोकविधौ शास्त्रप्राधान्यम् २११
धर्मेऽविधितोऽनर्थः २११
शास्त्रस्तवना २१२
शास्त्रानादरवतो गुणा उन्मादरूपाः २१३
आत्मगुरुलिङ्गतः प्रत्ययत्रैविध्यम् २१३
सिद्धेः सिद्ध्यन्तरानुबन्धिता २१४
आत्मादिप्रत्ययस्य सिद्धिदूततादि २१६
सद्योगभव्यस्य जनन्यौचित्यादि २१७
योगधर्माधिकारिणामौचित्यारम्भादि २१८
तत्र शिखिदृष्टान्तः २१८
विषयशुद्धानुष्ठानस्यापि संमतत्वम् २२०
सम्यग्दृष्टेर्लिङ्गानि शुश्रूषादीनि २२१
धर्मरागलिङ्गभावना २२२
तृतीयगुरुदेवादिपूजनलिङ्गभावना २२३
शक्त्यनुरूपप्रवृत्तिनियमः २२४
यथाप्रवृत्तादिकरणत्रयस्वरूपम् २२४
बोधिसत्त्वलक्षणसमन्वयः २२६
तथाभव्यत्वस्वरूपमीमांसा २२७
योग्यता एव तथाभव्यत्वम् २२८
ग्रन्थिभेदे जायमानानन्दः २२९
ग्रन्थिभेदानन्तरचिन्तनम् २३०
तीर्थंकर-गणधर-मुण्डकेवलि-
भावनाबीजम् २३१
चिन्तावैचित्र्ये तथाभव्यत्वहेतुता २३२
तीर्थकरत्वादिभेदहेतौ मतान्तरम् २३३
ईश्वरतत्त्वे संज्ञाभेदः २३६
अनादिशुद्धतादिभेदकल्पनानिरर्थकता २३६
भवकारणस्य अविद्यादिसंज्ञाभेदः २३८
अनुमानस्य सामान्यविषयता २३८
विपश्चितामयुक्तो भेदकुचितिकाग्रहः २३९
हस्तस्पर्शसमशास्त्रादतीन्द्रियार्थनिश्चयः २४२
दैवपुरुषकारयोस्तुल्यता २४२
तयोः परस्पराश्रयभावः २४३
तयोः दुर्बलेतरभावः २४५
तयोः बाध्यबाधकभावः २४६
दारुप्रतिमादृष्टान्तः २४७
दानादौ भावभेदात्फलभेदः २४७
चरमावर्त्ते दैवस्य पुरुषकारबाध्यता २४८
भिन्नग्रन्थेरौचित्यानुसारितादि २४९
भावो भावान्तरप्रवर्त्तकः २५१
तत्रोपदेशस्यापि सार्थकता २५१
सदनुष्ठानस्य सुवर्णघटतुल्यता २५३
भिन्नग्रन्थेः पल्योपमपृथक्त्वेन-देशविरतिः २५३
देशविरतस्य लिंगानि २५३
तस्य मार्गानुसारित्वभावना २५४
देशविरतादारभ्याध्यात्मादियोगसम्प्रवर्त्तनम् २५४
अध्यात्मयोगलक्षणम् २५५
अध्यात्मयोगस्य फलम् २५५
भावनायोगस्य लक्षणं फलं च २५५
ध्यानयोगस्य लक्षणं फलं च २५५



Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | |
|---|---|
| वृत्तिसंक्षययोगस्य लक्षणं फलं च | २५६ |
| तात्त्विकेतरयोगयोजना | २५७ |
| निश्चय-व्यवहारतोऽध्यात्मादियोजना | २५८ |
| चारित्रिणो ध्यानादियोगः तत्त्विकः | २५८ |
| कंटक-ज्वर-मोहत्रैविध्यं विघ्नस्य | २५९ |
| सास्रवानास्रवयोगद्वयम् | २५९ |
| निश्चयव्यवहारोभयत इष्टलाभः | २६० |
| अध्यात्म-वृत्तिसंक्षययोर्विशेषोक्तिः | २६० |
| द्रव्यादिभेदत अध्यात्मवैचित्र्यम् | २६१ |
| जपविधि-काल-विषयादि | २६१ |
| उपप्लवे जपत्यागफलम् | २६२ |
| अध्यात्मप्रकारान्तरमौचित्यालोचनादि | २६३ |
| देवादिवन्दनस्वरूपाध्यात्मम् | २६५ |
| प्रतिक्रमणे तृतीयौषधदृष्टान्तः | २६६ |
| मैत्र्यादिभावनोपेताध्यात्मम् | २६७ |
| वृत्तिसंक्षयविशेषाभिधानारम्भः | २६८ |
| स्थूलसूक्ष्मवृत्तयस्तद्बीजं च | २६८ |
| बीजभूतयोग्यताविभावनम् | २६८ |
| योगसिद्धेरुत्साहादि षडंगानि | २६९ |
| आगमादिर्निश्चयोपायः | २७० |
| तत्स्वभावताप्रभावचिन्तनम् | २७० |
| सति स्वभावे पुरुषकारसफलता | २७० |
| अकरणनियमात् वृत्तिरोधः | २७१ |
| प्रधानकरुणा अकरणनियमहेतुः | २७१ |
| सम्प्रज्ञातसमाधिरध्यात्मादियोगः | २७२ |
| असम्प्रज्ञातसमाधिस्वरूपम् | २७२ |
| समाधेर्धर्ममेघादिनामान्तराणि | २७३ |
| मंडूकभस्मन्यायेन कल्याणाप्तिः | २७३ |
| तीर्थकरादेर्देशनाप्रवृत्तिः | २७४ |
| मुक्त्यवस्थायां ज्ञानसद्भावः | २७४ |
| आत्मनो ज्ञस्वभावाऽविरहः | २७५ |
| सर्वार्थविषयकत्वाशंकानिरासः | २७६ |
| सर्वज्ञसद्भावसिद्धिः | २७७ |
| कुमारिलभट्टमतमीमांसा | २७८ |
| सर्वज्ञाऽनभ्युपगमयुक्तयः | २७८ |
| कुमारिलमतप्रतिक्षेपः | २८० |
| बुद्धिधर्मविज्ञानवादिसांख्यमीमांसा | २८० |
| सांख्यमतप्रतिकारः | २८१ |
| बुद्धिगतभोगनिराकरणम् | २८२ |
| आत्मविक्रियोपपादनम् | २८३ |
| मुक्तौ प्राकृतज्ञानापेक्षया निषेधः | २८४ |
| नैरात्म्यदर्शनान्मुक्तिवादिबौद्धमतम् | २८४ |
| नैरात्म्यवादप्रतिविधानम् | २८६ |
| सर्वथाऽऽत्माभावे हेतुफलचिन्ताव्यर्थता | २८६ |
| क्षणिकात्मवादनिराकरणम् | २८७ |
| क्षणिकात्मनि विकल्पत्रयनिरासः | २८८ |
| स्नेहस्यात्मदर्शनहेतुताप्रतिक्षेपः | २८९ |
| उपप्लवहेतुकप्रेमोत्पत्तिः | २९० |
| एकान्तनित्यात्मवादप्रतिक्षेपः | २९१ |
| एकान्तवादे कर्तृत्व-भोक्तृत्वासम्भवः | २९१ |
| एकान्तवादे भव-मोक्षानुपपत्तिः | २९२ |
| आत्मपरिणामित्वे योगमार्गादिसम्भवः | २९३ |
| पुनः तत्स्वभावतासमर्थनम् | २९४ |
| वृत्तिसंक्षयस्य परमसमाधिरूपता | २९५ |
| आत्मनः परिणामित्वम् | २९६ |
| मुक्तात्मावस्था योगफलं च | २९८ |
| योगगोचरशुद्धिविमर्शनोक्तिः | २९८ |
| विद्वत्तायाः फलं योगाभ्यासः | २९८ |
| विदुषां शास्त्राण्येव संसारः | २९९ |
| आत्मपरिणामित्वमते संगतिः | २९९ |
| द्वैताऽद्वैतवादमीमांसा | २९९ |
| एकरूपात्मन अंशावताराद्यसम्भवः | ३०० |
| अंश-अंशिभेदाभेदविकल्पौ | ३०० |
| प्रागभावादि विना भेद्यभेदकाभावः | ३०१ |
| कर्मतत्त्वाभावे बौद्धानां बन्धासंभवः | ३०२ |
| कल्पितवासनादेः बन्धासम्भवः | ३०२ |
| दृष्टेष्टाबाधितसिद्धान्तस्योपादेयता | ३०३ |
| आचार्यहरिभद्राणामन्त्यमाशिर्वचनम् | ३०४ |
| समस्तमूलश्लोकाकारादिक्रमः | ३०५ |

<<< >>>



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# शुद्धिपत्रक

| पेज | लाईन | अशुद्धि | शुद्धि |
|---|---|---|---|
| 13 | ३ | नअनाल... | अनाल... |
| 13 | ३१ | गुंरुवि... | गुरुवि... |
| 17 | ११ | प्रमोदोद्धारः | प्रमोदोद्भेदः |
| 18 | ४ | तत्त्विकः | तात्त्विकः |
| १३ | १० | श्रुतिकेव... | श्रुतकेव... |
| १७ | ४ | दण्डव्यपारा... | दण्डव्यापारा... |
| २४ | ५ | सम्यग्यदर्श... | सम्यग्दर्श... |
| २६ | १३ | एगंतणेव | एगंतेणेव |
| ३३ | ३ | अपनुर्ब... | अपुनर्ब... |
| | १४ | 'यथोचतिम्' | यथोचितम्' |
| ३४ | २२ | ...मुल्लङ्घ्यास्य | ...मुल्लङ्घ्यास्य |
| ४५ | ८ | निर्लोठिंत | निर्लोठितं |
| ५१ | ४ | ...देवाभधितुं | ...देवाभिधातुं |
| ५६ | ४ | अणणत्थओ | अण्णत्थओ |
| | ११ | प्रारंम्भस्य | प्रारम्भस्य |
| ६० | २४ | संशुद्धे शेंय... | संशुद्धेशैय... |
| ६७ | ४ | प्रकारणारम्भे | प्रकरणारम्भे |
| ७९ | २२ | कुशलादिचित्तम् | कुशलचित्तादि (?) |
| ८४ | ११ | कदाचिन्मि... | कदाचिन्म... |
| ८६ | २ | कथास्त्वलम् | कथास्वलम् |
| ९४ | १९ | मत्सरो | मत्सरी |
| १०० | १८ | सन्निकृष्ट | सन्निकृष्टः, |
| १०१ | ११ | सर्वत्रच | सर्वत्र च |
| १०३ | २२ | तथाधकिार... | तथाधिकार |
| १०९ | ३ | निवार्ण... | निर्वाण... |
| ११० | १६ | सर्वोषामु... | सर्वेषामु... |
| ११२ | २ | निश्चियोऽ | निश्चयोऽ |
| ११४ | ५ | निवार्ण... | निर्वाण... |
| | १३ | ...तर्द्दर्शनं | ...तद्दर्शनं |
| ११७ | १ | कन्तायां | कान्तायां |
| | ११ | मयाम्भ | मायाम्भ |
| | १३ | ...वर्जितोमाया | ...वर्जितो माया... |
| ११९ | २ | दुःखमेवैत् | दुःखमेवैतत् |



Jain Education International For Personal & Private Use Only www.jainelibrary.org

| पेज | लाईन | अशुद्धि | शुद्धि |
|---|---|---|---|
| १३९ | २५ | इत्यपिच... | इत्यपि... |
| १४४ | १८ | वस्तुत... | वस्तुत... |
| १४५ | २१ | ...वचनानुवव... | वचनानुव... |
| | २१ | योगमार्गे | योगमार्गो |
| १४६ | १९ | दीर्ध... | दीर्घ... |
| १५० | २ | नोपपप्लव... | नोपप्लव... |
| | २० | निमितं | निमित्तं |
| १५१ | ११ | वाच्य अप्सर:... | वाच्येऽप्सर:... |
| १५२ | २ | ...फलाव लोक... | फलावलोक... |
| १५५ | १४ | त्त्वन्तर... | त्त्वान्तर... |
| १६१ | ५ | ...त्याशङ्क्याह | ...त्याशङ्क्याह |
| | ७ | ...निवेशाच्चा, | ...निवेशाच्च, |
| १६२ | ८ | ...पुदगल... | ...पुद्गल... |
| १६३ | ४ | कारणतत्त्वे | कारणत्वे |
| १६६ | १० | ॥८१॥ | ॥८९॥ |
| १६७ | १४ | तत्प्रवृत्त्यादि... | द्वा.द्वात्रिंशिकाहस्तादर्शे अत्र 'तत्प्रकृत्यादि' पाठ: |
| १७५ | १४ | ...श्चार: | ...श्चार: |
| १७७ | १२ | ...नीयान्तम... | ...नीयान्तरम... |
| १८० | १५ | हापयेत | हापयेत् |
| | १७ | द्रव्यादि... | द्वयादि... |
| १८१ | ७ | ...कृर्च्छ्र... | ...कृच्छ्र... |
| १८७ | २१ | समुच्ये | समुच्चये |
| १८८ | ५ | एकमेवह्य... | एकमेव ह्य... |
| | १० | एतस्य | एकस्य |
| १९९ | ११ | भोगसुखानु... | भोगसुखानुष्ठान... |
| २०० | ७ | वा रुचि... | वाऽरुचि... |
| | १० | ...दार्ष्टन्तिक... | ...दार्ष्टान्तिक... |
| २०१ | ६ | ...बीजादि-गोंचरोवि... | ...बीजादि गोंचरो वि... |
| | १९ | प्रकृतिलक्षणस्याऽ | प्रकृति( भेद )लक्षणस्याऽ |
| | २० | प्रकृतिभेदेषु | प्रकृतिभेदे |
| | २१ | परणिाम... | परिणाम... |
| २०६ | ४ | ...करणं, | ...करणं |
| २१० | २१ | ...बन्धनानु... | ...बन्धानु... |
| २१६ | १९ | ...पारन्त्र्यमेव | ...पारतन्त्र्यमेव |



Jain Education International For Personal & Private Use Only www.jainelibrary.org

| पेज | लाईन | अशुद्धि | शुद्धि |
|---|---|---|---|
| २१७ | २५ | ...निवृत्तौ | ...निर्वृत्तौ |
| २२४ | ११ | 'स्त्फलं' | 'सत्फलं' |
| २२८ | १६ | योग्यताभेदः | योग्यताऽभेदः |
| २३२ | १ | ...नुष्ठनात् | ...नुष्ठानात् |
| २३४ | ११ | च, | प्रधानपरिणामपक्षे च, |
| २३८ | ३ | अदिश... | आदिश... |
| २४४ | १४ | तत्तद्व्यापा... | तत्तद्व्यापा... |
| २४५ | २३ | वा | निग्रहीतुं वा |
| २५० | १० | विपर्ययो महा... | विपर्ययमहा... (?) |
| २५२ | १३ | वैरस्य हेतुत्वात | वैरस्यहेतुत्वात् |
| २६० | १९ | ...नास्त्रत्वेन | ...नास्रवत्वेन |
| २६२ | ८ | द्दष्ट्या | द्दष्ट्या |
| | ९ | ...चिह्नतः | ...चिह्नितः |
| २६३ | ९ | मुनीन्दैः | मुनीन्द्रैः |
| २६५ | २४ | ...क्लिश्यामाना... | क्लिश्यमाना... |
| २७५ | २२ | तथा सर्वज्ञ... | तथाऽसर्वज्ञ... |
| २८६ | १२ | विकप्लितं | विकल्पितं |
| २९१ | १० | ...ममुभयं | ...मनुभयं |
| २९२ | १ | त्वे सम्भवो | त्वेऽसम्भवो |
| २९३ | १७ | प्रकीर्त्यतेऽ | प्रकीर्त्यते । |
| | १८ | ...नित्यसङ्कल्प... | ...नित्ये सङ्कल्प... |
| २९६ | १७ | चेद्यदिब्रूषे | स्वभावः स्वरूपं चेद्यदि ब्रूषे |
| २९७ | १३ | तथा | तथा न |

## તૃતીય આવૃત્તિની પ્રકાશન વેળાએ...

કોરા બુદ્ધિવાદ અને ઉપભોક્તાવાદના પુરસ્કર્તા આજના વિજ્ઞાન, શિક્ષણ અને સમાજરચનાની અસર હેઠળ સમ્યગ્જ્ઞાન અને સમ્યગ્આચારથી સેંકડો યોજનો દૂર ધસી રહેલી યુવાપેઢીને સમ્યગ્જ્ઞાન અને ક્રિયાના માર્ગે જોડનાર-આગળ વધારનાર અભિનવપ્રયોગ શિબિરના પ્રણેતા-આદ્ય વાચનાદાતા સ્વ. પૂજ્ય ગુરુદેવ આચાર્ય ભગવંત શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મ.સા.ના જન્મશતાબ્દી પ્રસંગે થયેલ આ તૃતીયાવૃત્તિનું પ્રકાશન સમસ્ત વિશ્વનું કલ્યાણ કરો.

- આ. અભયશેખરસૂરિ



Jain Education International For Personal & Private Use Only www.jainelibrary.org

સિદ્ધાન્તમહોદધિ સચ્ચારિત્રચૂડામણિ સુવિશાળ ગચ્છનિર્માતા
સ્વ. આ. દેવ શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મ.સા.ના પટ્ટધર
સર્વાંગીણ સાધનાનો તેજપુંજ...

**સ્વ. પૂજ્યપાદ આ.દેવ શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મ.સા.**

## જુદા જુદા વિદ્વાનોની કલમે...

- જીવનભર પ્રચંડ સાધનાનો મહાયજ્ઞ માંડીને લખલૂટ ગુણસમૃદ્ધિના સ્વામી બનેલા એક મહાન્ ગુણશ્રીમંત એટલે પૂજ્યપાદ આચાર્ય ભગવંત શ્રીમદ્ વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા. તેઓશ્રી પાસે ગુણનું પાકીટ નહોતું, પાઉચ નહોતું, પેટી નહોતી, પટારો નહોતો... પણ મોટો ભંડાર હતો. જીવનના ૮૨ વર્ષ તેઓશ્રીએ મુક્તિ ભણી દોટ જ લગાવી છે. અથાગપણે દોડ્યે જ ગયા છે અને કલ્પનાતીત વિરાટ અંતર આ નાનકડી જિંદગીમાં કાપી નાખ્યું હશે.
- પ્રમાર્જનાના નાનકડા લાગતા યોગથી લઈને સંઘકૌશલ્યના વિરાટ ફલક સુધી વિસ્તરેલું વિરાટ વ્યક્તિત્વ એટલે પૂજ્યપાદશ્રી...
- પૂજ્યપાદશ્રીના જીવનની એક એક પળ પ્રેરણાનો અમૃતકુંભ હતી, તેઓશ્રીના જીવનનો એક એક પ્રસંગ પ્રેરણાનો મહાધોધ હતો, તેઓશ્રીનું જીવન સાધક આત્માઓ માટે એક ઉત્કૃષ્ટ આલંબન હતું. તેથી તેઓશ્રી માત્ર સ્મૃતિનો વિષય નહિ પણ આલંબન અને પ્રેરણાનો વિષય હતા. તેઓશ્રીની સ્મૃતિઓ માત્ર સ્મારક નથી પણ પ્રેરક છે.
- પંચમ કાળનો અને છઠ્ઠા સંઘયણનો એક માનવી સાધનાના પંથ ઉપર કેવી હરણફાળ ભરી શકે છે, કેવું પ્રચંડ સત્ત્વ ફોરવી શકે છે, કેવી મહાન ગુણસિદ્ધિઓને આંબી શકે છે અને કેવા મહાન વિસ્મયો સર્જી શકે છે... એનું વાસ્તવિક દર્શન એટલે પૂજ્યપાદશ્રીનું જીવન...



Jain Education International For Personal & Private Use Only www.jainelibrary.org

# અધ્યેતાઓ માટે મધુર રસથાળ...



- **શતકનામે પાંચમા કર્મગ્રન્થના પદાર્થો...**

પાંચમો કર્મગ્રન્થ એટલે પદાર્થોનો ખજાનો...
અન્ય વિવેચનોમાં હેતુઓ ન મળે એવા ઢગલાબંધ તર્કપૂર્ણ હેતુઓના ઉદ્ઘાટન (જેમકે ખગતિનામકર્મને જીવવિપાકી પ્રકૃતિ કેમ કહી ? વગેરે) કરનારી - ઊંડાણભર્યા રહસ્યોને વ્યક્ત કરનારી ટીપ્પણો જાણવા માટે - અલ્પ સમયમાં વિશદબોધ મેળવવા માટે આ પુસ્તકના આધારે ભણવાં માટે ખાસ ભલામણ છે.

- **કર્મપ્રકૃતિ પદાર્થો ભાગ-૧, ભાગ-૨, કર્મપ્રકૃતિ ભાગ-૩ પ્રશ્નોત્તરી**

ગહન પદાર્થોને પણ ટૂંકમાં અને છતાં સરળતાપૂર્વક સમજવા માટે આ પુસ્તકોનો સહારો લેવો આવશ્યક છે. તથા અત્યંત ઊંડા રહસ્યોને ખોલી આપનાર પ્રશ્નોત્તરીના અધ્યયન વિનાનું કમ્મપયડી તથા પંચસંગ્રહનું અધ્યયન એટલે ઉપરછલ્લો બોધ. બોધને સૂક્ષ્મ અને તર્કપૂર્ણ બનાવવા માટે અવશ્ય આ પુસ્તકોને અવગાહવા.

- **યોગવિંશિકા**

આજ સુધીમાં પ્રકાશિત થયેલા અનેક વિવેચનોમાં સાવ અલગ તરી આવતું... શબ્દ-શબ્દને આરપાર વીંધીને યોગવિષયક અપૂર્વ રહસ્યોને પીરસતું... સૂરિપુરંદર

Jain Education International For Personal & Private Use Only www.jainelibrary.org

શ્રી હરિભદ્રસૂરિ મહારાજના યોગવિષયક વિચારોને વિશદ રીતે અને છતાં પૂર્વાપર વિરોધ વિના સ્પષ્ટ કરતું અદ્ભુત વિવેચન જાણવા-માણવા માટે પૂ. આ. શ્રી અભયશેખરસૂરિ મ. લિખિત આ વિવેચન ભણવું જ રહ્યું.

- **સિદ્ધિનાં સોપાન...**

પ્રણિધાન-પ્રવૃત્તિ વગેરે પાંચ આશયોનું અત્યંત વિશદ-વિસ્તૃત વિવેચન...

- **ન્યાયસિદ્ધાન્ત મુક્તાવલી ભાગ-૧, ભાગ-૨**

ન્યાયદર્શનના પાયાના આ ગ્રન્થને બહુ જ સ્પષ્ટ રીતે સમજવા માટે... ન્યાયશૈલિની હથોટી પામવા માટે... પારિભાષિક શબ્દોનો સરળ પરિચય મેળવવા માટે... પૂજ્ય આચાર્ય શ્રી લિખિત વિવેચનની સહાય લેવી ઘણી ઇચ્છનીય છે.

- **સત્પદાદિપ્રરૂપણા -**

ગતિ, ઇન્દ્રિય, કાય... વગેરે ૧૪ મૂળ માર્ગણાઓ... ત્રીજા કર્મગ્રન્થમાં આવતી એની ૬૨ પેટા માર્ગણાઓ...

એના કરતાં પણ ઊંડા ઉતરીને કુલ ૧૭૪ માર્ગણાઓનો સત્પદ, દ્રવ્યપ્રમાણ, ક્ષેત્ર... વગેરે દ્વારો દ્વારા વિચાર... અનેક ગ્રન્થોના આધારે સંચિત થયેલા પદાર્થસમુદ્રને અવગાહવાનો આનંદ માણવા નમ્ર વિનંતી...

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## દ્રવ્ય-ગુણ પર્યાયનો રાસ

દ્રવ્યાનુયોગના પદાર્થોને ઘણા સંક્ષેપમાં - ખૂબ ગહન રીતે પીરસતી પૂ. ઉપા. શ્રી યશોવિજય મ.ની ગૂર્જર કૃતિ... શાસ્ત્રવચનની સંગતિ કરવા ઊઠેલી તર્કપૂર્ણ વિચારણાથી પ્રાપ્ત થતા અર્થપર્યાય-વ્યંજનપર્યાય-સપ્તભંગી વગેરેના અસંદિગ્ધ-સ્પષ્ટ-સરળ બોધ માટે પૂ.આ.ભ. અભયશેખરસૂરિ મ.નું થયેલ વિવેચન (ભાગ-૧) અવશ્ય અવગાહવું રહ્યું.

## અનુયોગદ્વાર સટીક સટીપ્પણ

મૂળ સૂત્ર તથા ટીકાના વિષમપદ પર વિશદ ટીપ્પણો દ્વારા બોધને ચોક્કસ દિશા આપવાનો પ્રયાસ... પ્રેક્ષાવાન્ શ્રદ્ધાનુસારી હોય કે તર્કાનુસારી... બધાની પ્રવૃત્તિ માટે ગુરુપર્વક્રમ સંબંધ અને વાચ્યવાચક ભાવસંબંધ... બન્ને સંબંધ જરૂરી છે... વગેરે અપૂર્વ રહસ્યોદ્‌ઘાટન કરવાનો નમ્ર પ્રયાસ.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# સ્વોપજ્ઞવૃત્તિ-ભાવાનુવાદ સહિત ગ્રન્થો

(૧) **સપ્તભંગીવિંશિકા :-** સાત ભંગ શું છે ? ભંગ સાત જ કેમ ? વ્યંજનપર્યાય શું છે ? એના અંગે ભંગ બે જ કેમ ? ભાવો અંગે 'અનભિલાપ્યતા' અને તૃતીય ભંગગત 'અવાચ્યતા...' આ બન્ને શબ્દોનો અર્થ એક જ છે કે અલગ-અલગ ? વગેરે વાતો પર તર્કપૂર્ણ અપૂર્વ પ્રકાશ પામવા માટે આ ગ્રન્થનું અધ્યયન અતિજરૂરી છે.

(૨) **નિક્ષેપવિંશિકા :-** નિક્ષેપ શાના હોય છે ? શબ્દના ? અર્થના ? કે તદન્યના ? ચાર નિક્ષેપાઓની વ્યાપકતા જીવ વગેરેમાં પણ છે જ... કયો નય કયા અને કેટલા નિક્ષેપાઓ માને છે ? 'દ્રવ્ય-નિક્ષેપ' અને 'દ્રવ્યાર્થિક નય' આ બન્નેમાં રહેલા 'દ્રવ્ય' શબ્દનો અર્થ અલગ-અલગ છે અને તેથી નૈગમાદિ નયો ભાવનિક્ષેપ માનવા છતાં દ્રવ્યાર્થિક મટી જતાં નથી. આનું સચોટ સમાધાન મેળવવા માટે નિક્ષેપવિંશિકા ગ્રન્થને અવગાહવો જ રહ્યો.

(૩) **નયવિંશિકા :-** સાત નયો અંગે અપૂર્વ પ્રકાશ... નૈગમનયનો વિષય ઊર્ધ્વતા સામાન્ય છે... 'હું' એટલે શરીર નહીં, આત્મા પણ નહીં, પણ શરીરાનુવિદ્ધ આત્મા... સાત નયના ક્રમમાં હેતુઓ... પૂર્વ-પૂર્વ નયની ઉત્તર-ઉત્તરનયને શિખામણ... ઋજુસૂત્રનય દ્રવ્યાર્થિક પણ છે ને પર્યાયાર્થિક પણ, દ્રવ્યાર્થિક નયો ત્રણ તો પર્યાયાર્થિક નય એક જ કેમ ? 'ક્રિયમાણં કૃતં' નિશ્ચયનયનું વાક્ય છે કે વ્યવહારનયનું ? વગેરે અંગે તર્કપૂર્ણ વિશદબોધ પામવા નયવિંશિકા ગ્રન્થને ભણવાની સહુ કોઈને નમ્ર ભલામણ છે.



Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ अर्हम् ॥

श्रीमद्-हरिभद्रसूरि-संग्रथिता
श्रीमद्-यशोविजयोपाध्यायविरचितव्याख्याविभूषिता

# योगविंशिका

॥ ऐँ नमः ॥ अथ योगविंशिका व्याख्यायते—

**मुक्खेण जोयणाओ, जोगो सव्वो वि धम्मवावारो ।**
**परिसुद्धो विन्नेओ, ठाणाइगओ विसेसेण ॥ १ ॥**

'मुक्खेण' त्ति । 'मोक्षेण' महानन्देन योजनात् 'सर्वोऽपि धर्मव्यापारः' साधोरालयविहारभाषाविनयभिक्षाटनादिक्रियारूपो योगो विज्ञेयः, योजनाद्योग इति व्युत्पत्त्यर्थानुगृहीतमोक्षकारणीभूतात्मव्यापारत्वरूपयोगलक्षणस्य सर्वत्र घटमानत्वात् । कीदृशो धर्मव्यापारो योगः? इत्याह—'परिशुद्धः' प्रणिधानाद्याशयविशुद्धिमान्, अनीदृशस्य द्रव्यक्रियारूपत्वेन तुच्छत्वात् । उक्तं च—"*आशयभेदा एते, सर्वेऽपि हि तत्त्वतोऽवगन्तव्याः । भावोऽयमनेन विना, चेष्टा द्रव्यक्रिया तुच्छा ॥*" (षोडशक ३/१२) 'एते' प्रणिधानादयः सर्वेऽपि कथञ्चित्क्रियारूपत्वेऽपि तदुपलक्ष्या आशयभेदाः, अयं च पञ्चप्रकारोऽप्याशयो भावः, अनेन विना 'चेष्टा' कायवाङ्मनोव्यापाररूपा द्रव्यक्रिया 'तुच्छा' असारा, अभिलषितफलासाधकत्वादित्येतदर्थः ॥

अथ के ते प्रणिधानाद्याशयाः ? उच्यते—प्रणिधानं प्रवृत्तिर्विघ्नजयः सिद्धिर्विनियोगश्चेति पञ्च । आह च - "*प्रणिधि-प्रवृत्ति-विघ्नजय-सिद्धि-विनियोगभेदतः प्रायः । धर्मज्ञैराख्यातः, शुभाशयः पञ्चधाऽत्र विधौ ॥*" (षो. ३-६) इति । तत्र 'हीनगुणद्वेषाभावपरोपकारवासनाविशिष्टोऽधिकृतधर्मस्थानस्य कर्तव्यतोपयोगः' प्रणिधानम् । उक्तं च—"*प्रणिधानं तत्समये, स्थितिमत्तदधः कृपानुगं चैव । निरवद्यवस्तुविषयं, परार्थनिष्पत्तिसारं*

Jain Education International For Personal & Private Use Only www.jainelibrary.org

च ॥'' (षो. ३-७) 'तत्समये' प्रतिपन्नधर्मस्थानमर्यादायां 'स्थितिमत्' अविचलितस्वभावम्, 'तदधः' स्वप्रतिपन्नधर्मस्थानादधस्तनगुणस्थानवर्त्तिषु 'कृपानुगं' करुणापरम्, न तु गुणहीनत्वात्तेषु द्वेषान्वितम्, शेषं सुगमम् ॥

अधिकृतधर्मस्थानोद्देशेन तदुपायविषय इतिकर्तव्यताशुद्धः शीघ्रक्रियासमाप्तीच्छादिलक्षणौत्सुक्यविरहितः प्रयत्नातिशयः **प्रवृत्तिः** । आह च- *''तत्रैव तु प्रवृत्तिः, शुभसारोपायसङ्गतात्यन्तम् । अधिकृतयत्नातिशयादौत्सुक्यविवर्जिता चैव ॥''* (षो. ३-८) 'तत्रैव' अधिकृतधर्मस्थान एव शुभः-प्रकृष्टः सारो-नैपुण्यान्वितो य उपायस्तेन संगता ॥

**विघ्नजयो** नाम 'विघ्नस्य जयोऽस्मादि'ति व्युत्पत्त्या धर्मान्तरायनिवर्त्तकः परिणामः। स च जेतव्यविघ्नत्रैविध्यात्त्रिविधः, तथाहि-यथा कस्यचित्कण्टकाकीर्णमार्गावतीर्णस्य कण्टकविघ्नो विशिष्टगमनविघातहेतुर्भवति, तदपनयनं तु पथि प्रस्थितस्य निराकुलगमनसंपादकं, तथा मोक्षमार्गप्रवृत्तस्य कण्टकस्थानीयशीतोष्णादिपरीषहैरुपद्रुतस्य न निराकुलप्रवृत्तिः, तत्तितिक्षाभावनया तदपाकरणे त्वनाकुलप्रवृत्तिसिद्धिरिति कण्टकविघ्नजयसमः प्रथमो हीनो विघ्नजयः । तथा तस्यैव ज्वरेण भृशमभिभूतस्य निराकुलगमनेच्छोरपि तत्कर्तुमशक्नुवतः कण्टकविघ्नादधिको यथा ज्वरविघ्नस्तज्जयश्च विशिष्टगमनप्रवृत्तिहेतुस्तथेहापि ज्वरकल्पाः शारीरा एव रोगा विशिष्टधर्मस्थानाराधनप्रतिबन्धकत्वाद्विघ्नास्तदपाकरणं च *''हियाहारा मियाहारा''*. (पिंडनिर्युक्ति-गा. ६४८) इत्यादिसूत्रोक्तरीत्या तत्कारणानासेवनेन, ''न मत्स्वरूपस्यैते परीषहा लेशतोऽपि बाधकाः किन्तु देहमात्रस्यैव'' इति भावनाविशेषेण वा सम्यग्धर्माराधनाय समर्थ(त्व)मिति ज्वरविघ्नजयसमो मध्यमो द्वितीयो विघ्नजयः । यथा च तस्यैवाध्वनि जिगमिषोर्दिग्मोहविघ्नोपस्थितौ भूयो भूयः प्रेर्यमाणस्याप्यध्वनीनैर्न गमनोत्साहः स्यात्तद्विजये तु स्वयमेव सम्यग्ज्ञानात्परैश्चाभिधीयमानमार्गश्रद्धानान्मन्दोत्साहतात्यागेन विशिष्टगमनसंभवस्तथेहापि मोक्षमार्गे दिग्मोहकल्पो मिथ्यात्वादिजनितो मनोविभ्रमो विघ्नस्तज्जयस्तु गुरुपारतन्त्र्येण मिथ्यात्वादिप्रतिपक्षभावनया मनोविभ्रमापनयनादनवच्छिन्नप्रयाणसंपादक इत्ययं दिग्मोहविघ्नजयसम उत्तमस्तृतीयो

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विघ्नजयः । एते च त्रयोऽपि विघ्नजया आशयरूपाः समुदिताः प्रवृत्तिहेतवोऽन्यतरवैकल्येऽपि तदसिद्धेरित्यवधेयम् । उक्तं च *'विघ्नजयस्त्रिविधः खलु, विज्ञेयो हीनमध्यमोत्कृष्टः । मार्ग इह कण्टकज्वरमोहजयसमः प्रवृत्तिफलः ॥''* (षो. ३-९) इति ॥

अतिचाररहिताऽधिकगुणे गुर्वादौ विनयवैयावृत्त्यबहुमानाद्यन्विता हीनगुणे निर्गुणे वा दयादानव्यसनपतितदुःखापहारादिगुणप्रधाना मध्यमगुणे चोपकारफलवत्यधिकृतधर्मस्थानस्याहिंसादेः प्राप्तिः **सिद्धिः** । उक्तं च- *''सिद्धिस्तत्तद्धर्मस्थानावाप्तिरिह तात्त्विकी ज्ञेया । अधिके विनयादियुता, हीने च दयादिगुणसारा ।''* (षो. ३-११) इति ॥

स्वप्राप्तधर्मस्थानस्य यथोपायं परस्मिन्नपि संपादकत्वं **विनियोगः**, अयं चानेकजन्मान्तरसन्तानक्रमेण प्रकृष्टधर्मस्थानावाप्तेरवन्ध्यो हेतुः । उक्तं च- *''सिद्धेश्चोत्तरकार्यं, विनियोगोऽवन्ध्यमेतदेतस्मिन् । सत्यन्वयसंपत्त्या, सुन्दरमिति तत्परं यावत् ॥''* (षो. ३-११) 'अवन्ध्यं' न कदाचिन्निष्फलम् 'एतत्' धर्मस्थानमहिंसादि, 'एतस्मिन्' विनियोगे सति 'अन्वयसंपत्त्या' अविच्छेदभावेन 'तत्' विनियोगसाध्यं धर्मस्थानं सुन्दरम् । 'इतिः' भिन्नक्रमः समाप्त्यर्थश्च, यावत्परमित्येवं योगः, यावत् 'परं' प्रकृष्टं धर्मस्थानं समाप्यत इत्यर्थः ।

इदमत्र हृदयम्-धर्मस्तावद्रागादिमलविगमेन पुष्टिशुद्धिमच्चित्तमेव । पुष्टिश्च पुण्योपचयः, शुद्धिश्च घातिकर्मणां पापानां क्षये या काचिन्निर्मलता, तदुभयं च प्रणिधानादिलक्षणेन भावेनानुबन्धवद्भवति, तदनुबन्धाच्च शुद्धिप्रकर्षः संभवति, निरनुबन्धं च तदशुद्धिफलमेवेति न तद्धर्मलक्षणम्, ततो युक्तमुक्तम् *''प्रणिधानादिभावेन परिशुद्धः सर्वोऽपि धर्मव्यापारः सानुबन्धत्वाद् योगः''* इति । यद्यप्येवं निश्चयतः परिशुद्धः सर्वोऽपि धर्मव्यापारो योगस्तथापि 'विशेषेण' तान्त्रिकसंकेतव्यवहारकृतेनासाधारण्येन स्थानादिगत एव धर्मव्यापारो योगः, स्थानाद्यन्यतम एव योगपदप्रवृत्तेः सम्मतत्वादिति भावः ॥ १ ॥

स्थानादिगतो धर्मव्यापारो विशेषेण योग इत्युक्तम्, तत्र के ते स्थानादयः ? कतिभेदं च तत्र योगत्वम् ? इत्याह —

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**ठाणुन्नत्थालंबणरहिओ तंतम्मि पंचहा एसो ।**
**दुगमित्थ कम्मजोगो, तहा तियं नाणजोगो उ ॥ २ ॥**

'ठाणुन्नत्थे' त्यादि । स्थीयतेऽनेनेति स्थानं- आसनविशेषरूपं कायोत्सर्गपर्यङ्कबन्धपद्मासनादि सकलशास्त्रप्रसिद्धम्, ऊर्णः-शब्दः स च क्रियादावुच्चार्यमाणसूत्रवर्णलक्षणः, अर्थः-शब्दाभिधेयव्यवसायः, आलम्बनं बाह्यप्रतिमादिविषयध्यानम्, एते चत्वारो भेदाः, 'रहितः' रूपिद्रव्यालम्बनरहितो निर्विकल्पचिन्मात्रसमाधिरूप इत्येवं 'एषः' योगः पञ्चविधः 'तन्त्रे' योगप्रधानशास्त्रे, प्रतिपादित इति शेषः, उक्तं च-"*स्थानोर्णार्थालम्बनतदन्ययोगपरिभावनं सम्यक् । परतत्त्वयोजनमलं, योगाभ्यास इति समयविदः ॥*" (षो. १३-४) इति । स्थानादिषु योगत्वं च "मोक्षकारणीभूतात्मव्यापारत्वं योगत्वम्" इति योगलक्षणयोगादनुपचरितमेव।

यत्तु "*यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि योगस्य*" (पातं. यो. सू. २-२९) इति योगाङ्गत्वेन योगरूपता स्थानादिषु हेतुफलभावेनोपचारादभिधीयत इति **षोडशकवृत्तावुक्तं** तत् "*चित्तवृत्तिनिरोधो योगः*" (पा. यो. सू. १-२) इति योगलक्षणाभिप्रायेणेति ध्येयम् । अत्र स्थानादिषु 'द्वयं' स्थानोर्णलक्षणं **कर्मयोग** एव, स्थानस्य साक्षादूर्णस्याप्युच्चार्यमाणस्यैव ग्रहणाद् उच्चारणांशे क्रियारूपत्वात् । तथा 'त्रयं' अर्थालम्बननिरालम्बनलक्षणं **ज्ञानयोगः**, 'तुः' एवकारार्थ इति ज्ञानयोग एव, अर्थादीनां साक्षाद् ज्ञानरूपत्वात् ॥ २ ॥

एष कर्मयोगो ज्ञानयोगो वा कस्य भवतीति स्वामिचिन्तायामाह--

**देसे सव्वे य तहा, नियमेणेसो चरित्तिणो होइ ।**
**इयरस्स बीयमित्तं, इत्तु च्चिय केइ इच्छंति ॥ ३ ॥**

'देसे सव्वे य' त्ति । सप्तम्याः पञ्चम्यर्थत्वाद्देशतस्तथा सर्वतश्च चारित्रिण एव 'एषः' प्रागुक्तः स्थानादिरूपो योगः 'नियमेन' इतरव्यवच्छेदलक्षणेन निश्चयेन भवति, क्रियारूपस्य वाऽस्य चारित्रमोहनीयक्षयोपशमनान्तरीयकत्वात्, अत एवाध्यात्मादियोगप्रवृत्तिरपि चारित्रप्राप्तिमारभ्यैव ग्रन्थकृता **योगबिन्दौ** प्ररूपिता, तथाहि-"*देशादिभेदतश्चित्रमिदं*

Jain Education International For Personal & Private Use Only www.jainelibrary.org

*चोक्तं महात्मभिः । अत्र पूर्वोदितो योगोऽध्यात्मादिः संप्रवर्तते ॥ ३५७ ॥"* इति । 'देशादिभेदतः' देशसर्वविशेषाद् 'इदं' चारित्रं 'अध्यात्मादिः'- अध्यात्मं १ भावना २ आध्यानं ३ समता ४ वृत्तिसंक्षयश्च ५ । **तत्राध्यात्मं** उचितप्रवृत्तेर्व्रतभृतो मैत्र्यादिभावगर्भं शास्त्राज्जीवादितत्त्वचिन्तनम् १, **भावना** अध्यात्मस्यैव प्रतिदिनं प्रवर्धमानश्चित्तवृत्तिनिरोधयुक्तोऽभ्यासः २, **आध्यानं** प्रशस्तैकार्थविषयं स्थिरप्रदीपसदृशमुत्पातादिविषयसूक्ष्मोपयोगयुतं चित्तम् ३, **समता** अविद्याकल्पितेष्टत्वानिष्टत्वसंज्ञापरिहारेण शुभाशुभानां विषयाणां तुल्यताभावनम् ४, **वृत्तिसंक्षयश्च** मनोद्वारा विकल्परूपाणां शरीरद्वारा परिस्पन्दरूपाणामन्यसंयोगात्मकवृत्तीनामपुनर्भावेन निरोधः ५ । **अथैतेषाम**-ध्यात्मादीनां स्थानादिषु कुत्र कस्यान्तर्भावः इति चेद् ? उच्यते-अध्यात्मस्य चित्रभेदस्य देवसेवाजपतत्त्वचिन्तनादिरूपस्य यथाक्रमं स्थाने ऊर्णेऽर्थे च । भावनाया अपि भाव्यसमानविषयत्वात्तत्रैव । ध्यानस्यालम्बने । समतावृत्तिसंक्षययोश्च तदन्ययोग इति भावनीयम् । ततो देशतः सर्वतश्च चारित्रिण एव स्थानादियोगप्रवृत्तिः संभवतीति सिद्धम् ।

**ननु** यदि देशतः सर्वतश्च चारित्रिण एव स्थानादिर्योगः तदा देशविरत्यादिगुणस्थानहीनस्य व्यवहारेण श्राद्धधर्मादौ प्रवर्तमानस्य स्थानादिक्रियायाः सर्वथा नैष्फल्यं स्यादित्याशङ्क्याह—'इतरस्य'- देशसर्वचारित्रिव्यतिरिक्तस्य स्थानादिकं 'इत एव' देशसर्वचारित्रं विना योगसंभवाभावादेव 'बीजमात्रं' योगबीजमात्रं 'केचिद्'-व्यवहारनयप्रधाना इच्छन्ति ।"मोक्षकारणीभूतचारित्रतत्त्वसंवेदनान्तर्भूतत्वेन स्थानादिकं चारित्रिण एव योगः, अपुनर्बन्धकसम्यग्दृशोस्तु तद्योगबीजम्" इति निश्चयनयाभिमतः पन्थाः । व्यवहारनयस्तु योगबीजमप्युपचारेण योगमेवेच्छतीति व्यवहारनयेना-पुनर्बन्धकादयः स्थानादियोगस्वामिनः, निश्चयनयेन तु चारित्रिण एवेति विवेकः । तदिदमुक्तम्-*अपुनर्बन्धकस्यायं, व्यवहारेण तात्त्विकः । अध्यात्म-भावनारूपो, निश्चयेनोत्तरस्य तु* ॥ ३६९ ॥ (यो.बि.) अपुनर्बन्धकस्य उपलक्षणात्सम्यग्दृष्टेश्च 'व्यवहारेण' कारणे कार्यत्वोपचारेण 'तात्त्विकः', कारणस्यापि कथञ्चित्कार्यत्वात् । 'निश्चयेन'-उपचारपरिहारेण 'उत्तरस्य तु'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चारित्रिण एव । सकृद्बन्धकादीनां तु स्थानादिकमशुद्धपरिणामत्वान्निश्चयतो व्यवहारतश्च न योगः किन्तु योगाभास इत्यवधेयम् । उक्तं च- "*सकृदावर्तनादीनामतात्त्विक उदाहृतः । प्रत्यपायफलप्रायस्तथा वेषादिमात्रतः* ॥ ३७० ॥" (यो. बि.) सकृद्-एकवारमावर्तन्ते उत्कृष्टां स्थितिं बध्नन्ति ये ते सकृदावर्तनाः, आदिशब्दाद्द्विरावर्त्तनादिग्रहः, 'अतात्त्विकः' व्यवहारतो निश्चयतश्चातत्त्वरूपः ॥ ३ ॥

तदेवं स्थानादियोगस्वामित्वं विवेचितम्, अथैतेष्वेव प्रतिभेदानाह—

**इक्किको य चउद्धा, इत्थं पुण तत्तओ मुणेयव्वो ।**
**इच्छा-पवित्ति-थिर-सिद्धिभेयओ समयनीईए ॥४॥**

'इक्किको य 'त्ति । 'अत्र' स्थानादौ 'पुनः' कर्मज्ञानविभेदाभिधानापेक्षया भूयः एकैकश्चतुर्द्धा 'तत्त्वतः' सामान्येन दृष्टावपि परमार्थतः 'समयनीत्या' योगशास्त्रप्रतिपादितपरिपाट्या 'इच्छाप्रवृत्तिस्थिरसिद्धिभेदतः'-इच्छाप्रवृत्ति-स्थिरसिद्धिभेदानाश्रित्य 'मुणेयव्वो' त्ति ज्ञातव्यः ॥ ४ ॥

तानेव भेदान् विवरीषुराह—

**तज्जुत्तकहापीईइ संगया विपरिणामिणी इच्छा ।**
**सव्वत्थुवसमसारं, तप्पालणमो पवत्ती उ ॥ ५ ॥**
**तह चेव एयबाहगचिंतारहियं थिरत्तणं नेयं ।**
**सव्वं परत्थसाहगरूवं पुण होइ सिद्धि त्ति ॥ ६ ॥**

'तज्जुत्तकहा' इत्यादि । तद्युक्तानां - स्थानादियोगयुक्तानां कथायां प्रीत्या अर्थबुभुत्सयाऽर्थबोधेन वा जनितो यो हर्षस्तल्लक्षणया संगता-सहिता 'विपरिणामिनी' विधिकर्तृबहुमानादिगर्भं स्वोल्लासमात्राद्यत्किञ्चिदभ्यासादिरूपं विचित्रं परिणाममादधाना **इच्छा** भवति, द्रव्यक्षेत्राद्यसामग्र्येणाङ्ग-साकल्याभावेऽपि यथाविहितस्थानादियोगेच्छया यथाशक्ति क्रियमाणं स्थानादि इच्छारूपमित्यर्थः । **प्रवृत्तिस्तु** 'सर्वत्र' सर्वावस्थायां 'उपशमसारं' उपशमप्रधानं यथा स्यात्तथा - 'तत्पालनं -यथाविहितस्थानादियोगपालनम्, 'ओ' त्ति प्राकृतत्वात्, वीर्यातिशयाद् यथाशास्त्रमङ्गसाकल्येन विधीयमानं स्थानादि प्रवृत्तिरूपमित्यर्थः ॥ ५ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'तह चेव' त्ति । 'तथैव' प्रवृत्तिवदेव सर्वत्रोपशमसारं स्थानादिपालनमेतस्य -पाल्यमानस्य स्थानादेर्बाधकचिन्तारहितं **स्थिरत्वं** ज्ञेयम् । प्रवृत्तिस्थिरयोगयोरेतावान् विशेषः-यदुत प्रवृत्तिरूपं स्थानादियोगविधानं सातिचारत्वाद्बाधकचिन्तासहितं भवति । स्थिररूपं त्वभ्याससौष्ठवेन निर्बाधकमेव जायमानं तज्जातीयत्वेन बाधकचिन्ताप्रतिघाताच्छुद्धिविशेषेण तदनुत्थानाच्च तद्रहितमेव भवतीति । 'सर्वं' स्थानादि स्वस्मिन्नुपशमविशेषादिफलं जनयदेव परार्थसाधकं - स्वसन्निहितानां स्थानादियोगशुद्ध्यभाववतामपि तत्सिद्धिविधानद्वारा परगतस्वसदृशफलसंपादकं पुनः **सिद्धिर्भवति** । अतः एव सिद्धाऽहिंसानां समीपे हिंसाशीला अपि हिंसां कर्तुं नालम्, सिद्धसत्यानां च समीपेऽसत्यप्रिया अप्यसत्यमभिधातुं नालम् । एवं सर्वत्रापि ज्ञेयम् । 'इतिः' इच्छादिभेदपरिसमाप्तिसूचकः । अत्रायं मत्कृतः संग्रहश्लोकः "*इच्छा तद्वत्कथाप्रीतिः, पालनं शमसंयुतम्। पालनं (प्रवृत्तिः) दोषभीहानिः स्थैर्यं सिद्धिः परार्थता ॥ १ ॥*" इति ॥ ६ ॥

उक्ता इच्छादयो भेदाः, अथैतेषां हेतूनाह -

**एए य चित्तरूवा, तहाखओवसमजोगओ हुंति ।**
**तस्स उ सद्धापीयाइजोगओ भव्वसत्ताणं ॥ ७ ॥**

'एए य' त्ति । 'एते च' इच्छादयः 'चित्ररूपाः'-परस्परं विजातीयाः स्वस्थाने चासङ्ख्यभेदभाजः, 'तस्य तु' अधिकृतस्य स्थानादियोगस्यैव श्रद्धा-इदमित्थमेवेति प्रतिपत्तिः, प्रीतिः-तत्करणादौ हर्षः, आदिना धृतिधारणादिपरिग्रहः, तद्योगतः 'भव्यसत्त्वानां'-मोक्षगमनयोग्यानामपुनर्बन्धकादिजन्तूनां 'तथाक्षयोपशमयोगतः' तत्तत्कार्यजननानुकूलविचित्रक्षयोपशमसंपत्त्या भवन्ति, इच्छायोगादिविशेषे आशयभेदाभिव्यङ्ग्यः क्षयोपशमभेदो हेतुरिति परमार्थः । अत एव यस्य यावन्मात्रः क्षयोपशमस्तस्य तावन्मात्रेच्छादिसंपत्त्या मार्गे प्रवर्तमानस्य सूक्ष्मबोधाभावेऽपि मार्गानुसारिता न व्याहन्यत इति संप्रदायः ॥ ७ ॥

इच्छादीनामेव हेतुभेदमभिधाय कार्यभेदमभिधत्ते—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अणुकंपा निव्वेओ, संवेगो होइ तह य पसमु त्ति ।**
**एएसिं अणुभावा, इच्छाईणं जहासंखं ॥ ८॥**

'अणुकंप' त्ति । 'अनुकम्पा'-द्रव्यतो भावतश्च यथाशक्ति दुःखितदुःख-परिहारेच्छा, 'निर्वेदः' नैर्गुण्यपरिज्ञानेन भवचारकाद्विरक्तता, 'संवेगः' मोक्षाभिलाषः, तथा 'प्रशमश्च' क्रोधकण्डूविषयतृष्णोपशमः, इत्येते 'एतेषां' इच्छादीनां योगानां यथासङ्ख्यं अनु-पश्चाद् भावाः 'अनुभावाः'-कार्याणि भवन्ति । यद्यपि सम्यक्त्वस्यैवैते कार्यभूतानि लिङ्गानि प्रवचने प्रसिद्धानि तथापि योगानुभवसिद्धानां विशिष्टानामेतेषामिहेच्छायोगादिकार्यत्वमभिधीयमानं न विरुध्यत इति द्रष्टव्यम् । वस्तुतः केवलसम्यक्त्वलाभेऽपि व्यवहारेणेच्छादियोगप्रवृत्तेरेवानुकम्पादिभावसिद्धेः अनुकम्पादिसामान्ये इच्छायोगादिसामान्यस्य तद्विशेषे च तद्विशेषस्य हेतुत्वमित्येव न्यायसिद्धम् । अत एव शमसंवेगनिर्वेदानुकम्पाऽऽस्तिक्यलक्षणानां सम्यक्त्वगुणानां पश्चानुपूर्व्यैव लाभक्रमः, प्राधान्याच्चेत्थमुपन्यास इति **सद्धर्मविंशिकायां** प्रतिपादितम् ॥८॥ तदेवं हेतुभेदेनानुभावभेदेन चेच्छादिभेदविवेचनं कृतम्, तथा च स्थानादावेकैकस्मिन्निच्छादिभेदचतुष्टयसमावेशादेतद्विषया अशीतिर्भेदाः संपन्नाः, एतन्निवेदनपूर्वमिच्छादिभेदभिन्नानां स्थानादीनां सामान्येन योजनां शिक्षयन्नाह—

**एवं ठियम्मि तत्ते, नाएण जोयणा इमा पयडा ।**
**चिइवंदणेण नेया, नवरं तत्तण्णुणा सम्मं ॥ ९ ॥**

'एवं' इत्यादि । 'एवं' अमुना प्रकारेणेच्छादिप्रतिभेदैरशीतिभेदो योगः, सामान्यतस्तु स्थानादिः पञ्चभेद इति 'तत्त्वे' योगतत्त्वे 'स्थिते' व्यवस्थिते 'ज्ञातेन तु' दृष्टान्तेन तु चैत्यवन्दनेन इयं 'प्रकटा' क्रियाभ्यासपरजनप्रत्यक्षविषया 'योजना' प्रतिनियतविषयव्यवस्थापना, 'नवरं'-केवलं तत्त्वज्ञेन 'सम्यग्' अवैपरीत्येन ज्ञेया ॥ ९ ॥ तामेवाह—

**अरिहंतचेइयाणं करेमि उस्सग्गं एवमाइयं ।**
**सद्धाजुत्तस्स तहा, होइ जहत्थं पयन्नाणं ॥ १० ॥**
**एयं चऽत्थालंबणजोगवओ पायमविवरीयं तु ।**
**इयरेसिं ठाणाइसु, जत्तपराणं परं सेयं ॥ ११ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'अरिहंत' इत्यादि । "*अरिहंतचेइयाणं करेमि काउस्सग्गं*" एवमादि चैत्यवन्दनदण्डकविषयं 'श्रद्धायुक्तस्य'-क्रियास्तिक्यवतः 'तथा' तेन प्रकारेणोच्चार्यमाणस्वरसंपन्मात्रादिशुद्धस्फुटवर्णानुपूर्वीलक्षणेन 'यथार्थं'-अभ्रान्तं पदज्ञानं भवति, परिशुद्धपदोच्चारे दोषाभावे सति परिशुद्धपदज्ञानस्य श्रावणसामग्रीमात्राधीनत्वादिति भावः ॥ १० ॥

'एयं च' त्ति । 'एतच्च'-परिशुद्धं चैत्यवन्दनदण्डकपदपरिज्ञानम्, अर्थः-उपदेशपदप्रसिद्धपदवाक्यमहावाक्यैदंपर्यार्थपरिशुद्धज्ञानम्, आलम्बनं च-प्रथमे दण्डकेऽधिकृततीर्थकृद्, द्वितीये सर्वे तीर्थकृतः, तृतीये प्रवचनम्, चतुर्थे सम्यग्दृष्टिः शासनाधिष्ठायक इत्यादि, तद्योगवतः-तत्प्रणिधानवतः 'प्रायः'-बाहुल्येन 'अविपरीतं तु'-अभीप्सितपरमफलसंपादकमेव, अर्थालम्बन-योगयोर्ज्ञानयोगतयोपयोगरूपत्वात्, तत्सहितस्य चैत्यवन्दनस्य भावचैत्यव-न्दनत्वसिद्धेः, भावचैत्यवन्दनस्य चामृतानुष्ठानरूपत्वेनावश्यं निर्वाण-फलत्वादिति भावः । प्रायोग्रहणं सापाययोगवद्व्यावृत्त्यर्थम्। द्विविधो हि योगः-सापायो निरपायश्च, तत्र निरुपक्रममोक्षपथप्रतिकूलचित्तवृत्तिकारणं प्राक्कालार्जितं कर्म अपायस्तत्सहितो योगः सापायः, तद्रहितस्तु निरपाय इति, तथा च सापायार्थालम्बनयोगवतः कदाचित्फलविलम्बसम्भवेऽपि निरपायतद्वतोऽविलम्बेन फलोत्पत्तौ न व्यभिचार इति प्रायोग्रहणार्थः । 'इतरेषां-' अर्थालम्बनयोगाभाववतामेतच्चैत्यवन्दनसूत्रपदपरिज्ञानं 'स्थानादिषु यत्नवतां' गुरूपदेशानुसारेण विशुद्धस्थानवर्णोद्यमपरायणानामर्थालम्बनयोगयोश्च तीव्रस्पृहावतां 'परं'-केवलं श्रेयः, अर्थालम्बनयोगाभावे वाचनायां पृच्छनायां परावर्तनायां वा तत्पदपरिज्ञानस्यानुप्रेक्षाऽसंवलितत्वेन 'अनुपयोगो द्रव्यम्' इतिकृत्वा द्रव्यचैत्यवन्दनरूपत्वेऽपिस्थानोर्णयोगयत्नातिशयादर्थालम्बन-स्पृहयालुतया च तद्धेत्वनुष्ठानरूपतया भावचैत्यवन्दनद्वारा परम्परया स्वफलसाधकत्वादिति भावः ॥ ११ ॥ स्थानादियत्नाभावे च तच्चैत्यवन्दनानु-ष्ठानमप्राधान्यरूपद्रव्यतामास्कन्दन्निष्फलं विपरीतफलं वा स्यादिति लेशतोऽपि स्थानादियोगाभाववन्तो नैतत्प्रदानयोग्या इत्युपदिशन्नाह—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**इहरा उ कायवासियपायं अहवा महामुसावाओ ।**
**ता अणुरूवाणं चिय, कायव्वो एयविन्नासो ॥ १२ ॥**

'इहराउ'त्ति । 'इतरथा तु'–अर्थालम्बनयोगाभाववतां स्थानादियत्नाभावे तु तत् चैत्यवन्दनानुष्ठानं 'कायवासितप्रायं'–सम्मूर्च्छनजप्रवृत्तितुल्यकाय चेष्टितप्रायं मानसोपयोगशून्यत्वात्, उपलक्षणाद्वाग्वासितप्रायमपि द्रष्टव्यं, तथा चाननुष्ठानरूपत्वान्निष्फलमेतदिति भावः । 'अथवा'–इति दोषान्तरे, तच्चैत्य-वन्दनानुष्ठानं महामृषावादः, "स्थानमौनध्यानैरात्मानं व्युत्सृजामि" *(ठाणेणं मोणेणं झाणेणं अप्पाणं वोसिरामि)* इति प्रतिज्ञया विहितस्य चैत्यवन्दन-कायोत्सर्गादेः स्थानादिभङ्गे मृषावादस्य स्फुटत्वात्, स्वयं विधिविपर्ययप्रवृत्तौ परेषामेतदनुष्ठाने मिथ्यात्वबुद्धिजननद्वारा तस्य लौकिकमृषावादादतिगुरुत्वाच्च, तथा च विपरीतफलं तेषामेतदनुष्ठानं सम्पन्नम् । येऽपि स्थानादिशुद्धम-प्यैहिककीर्त्यादीच्छयाऽऽमुष्मिकस्वर्लोकादिविभूतीच्छया वैतदनुष्ठानं कुर्वन्ति तेषामपि मोक्षार्थकप्रतिज्ञया विहितमेतत्तद्विपरीतार्थतया क्रियमाणं विषगरानुष्ठानान्तर्भूतत्वेन महामृषावादानुबन्धित्वाद्विपरीतफलमेवेति ।

विषाद्यनुष्ठानस्वरूपं चेत्थमुपदर्शितं पतञ्जल्याद्युक्तभेदान् स्वतन्त्रेण संवादयता ग्रन्थकृतैव योगबिन्दौ –*"विषं गरोऽननुष्ठानं, तद्धेतुरमृतं परम् । गुर्वादिपूजानुष्ठान- मपेक्षादिविधानतः"* ॥ (१५५ श्लो.) ॥ 'विषं'–स्थावर-जङ्गमभेदभिन्नम्, ततो विषमिव विषम्, एवं गर इव गरः, परं गरः कुद्रव्यसंयोगजो विषविशेषः, 'अननुष्ठानं' अनुष्ठानाभासं, 'तद्धेतुः' अनुष्ठानहेतुः, अमृतमिवामृतं अमरणहेतुत्वात्, अपेक्षा–इहपरलोकस्पृहा, आदिशब्दादनाभोगादेश्च यद् विधानं–विशेषस्तस्मात् ॥

*"विषं लब्ध्याद्यपेक्षातः, इदं सच्चित्तमारणात् । महतोऽल्पार्थनाज्ज्ञेयं लघुत्वापादनात्तथा"* ॥ (१५६ श्लो.) ॥ लब्ध्यादेः–लब्धिकीर्त्यादेः 'अपेक्षातः' स्पृहातः 'इदं' अनुष्ठानं विषं 'सच्चित्तमारणात्' परिशुद्धान्तःकरणपरिणा-मविनाशनात्, तथा महतोऽनुष्ठानस्य 'अल्पार्थनात्'–तुच्छलब्ध्यादिप्रार्थनेन लघुत्वस्यापादनादिदं विषं ज्ञेयम् ॥ *"दिव्यभोगाभिलाषेण, गरमाहुर्मनीषिणः । एतद्विहितनीत्यैव, कालान्तरनिपातनात्"* ॥ (१५७ श्लो.) ॥ 'एतद्'

Jain Education International　　For Personal & Private Use Only　　www.jainelibrary.org

अनुष्ठानं, ऐहिकभोगनिस्पृहस्य स्वर्गभोगस्पृहया गरमाहुः 'विहितनीत्यैव' विषोक्तनीत्यैव, केवलं कालान्तरे-भवान्तररूपे निपातनात्-अनर्थसम्पादनात् । विषं सद्य एव विनाशहेतुः, गरश्च कालान्तरेणेत्येवमुपन्यासः ॥

*''अनाभोगवतश्चैतदननुष्ठानमुच्यते सम्प्रमुग्धं मनोऽस्येति, ततश्चैतद्यथोदितम्''* ॥ (१५८ श्लो.) ॥ 'अनाभोगवतः' कुत्रापि फलादाव-प्रणिहितमनसः 'एतद्' अनुष्ठानं 'अननुष्ठानं' अनुष्ठानमेव न भवतीत्यर्थः । सम् इति समन्ततः प्रकर्षेण मुग्धं सन्निपातोपहतस्येवानध्यवसायापन्नं मनोऽस्य, 'इतिः' पादसमाप्तौ । यत एवं ततो यथोदितं तथैव ॥

*''एतद्रागादिदं हेतुः, श्रेष्ठो योगविदो विदुः । सदनुष्ठानभावस्य, शुभभावां- शयोगतः ॥''* (१५९ श्लो.) ॥ 'एतद्रागात्' सदनुष्ठानबहुमानात् 'इदं' आदिधार्मिककालभावि देवपूजाद्यनुष्ठानं ''सदनुष्ठानभावस्य' तात्त्विक-देवपूजाद्याचारपरिणामस्य मुक्त्यद्वेषेण मनाग् मुक्त्यनुरागेण वा शुभभाव-लेशयोगात् 'श्रेष्ठो' अवन्ध्यो हेतुरिति योगविदो 'विदुः' जानते । *''जिनोदितमिति त्वाहुर्भावसारमदः पुनः । संवेगगर्भमत्यन्तममृतं मुनिपुङ्गवाः''* ॥ (१६० श्लो.) ॥ जिनोदितमित्येव 'भावसारं' श्रद्धाप्रधानं 'अदः' अनुष्ठानं 'संवेगगर्भं'-मोक्षाभिलाषसहितं 'अत्यन्तं' अतीव अमरणहेतुत्वा- दमृतसंज्ञमाहुः 'मुनिपुङ्गवाः' गौतमादिमहामुनयः ॥ एतेषु त्रयं योगाभासत्वा- दहितम् । द्वयं तु सद्योगत्वाद्धितमिति तत्त्वम् । यत एवं स्थानादियत्ना- भाववतोऽनुष्ठाने महादोषः 'तत्' तस्मात् 'अनुरूपाणामेव'-योग्यानामेव 'एतद्विन्यासः'-चैत्यवन्दनसूत्रप्रदानरूपः कर्तव्यः ॥१२॥ के एतद्विन्यासानुरूपा इत्याकाङ्क्षायामाह—

**जे देसविरइजुत्ता, जम्हा इह वोसिरामि कायं ति ।**
**सुच्चइ विरईए इमं, ता सम्मं चिंतियव्वमिणं ॥१३॥**

'जे' इत्यादि । ये 'देशविरतियुक्ताः' पञ्चमगुणस्थानपरिणतिमन्तः ते इह अनुरूपा इति शेषः । कुतः ? इत्याह—यस्मात् 'इह' चैत्यवन्दनसूत्रे ''व्युत्सृजामि कायम्'' इति श्रूयते, इदं च विरतौ सत्यां संभवति, तदभावे कायव्युत्सर्गासम्भवात्, तस्य गुप्तिरूपविरतिभेदत्वात्, ततः सम्यक्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चिन्तितव्यमेतत् यदुत "कायं व्युत्सृजामि" इति प्रतिज्ञान्यथानुपपत्त्या देशविरतिपरिणामयुक्ता एव चैत्यवन्दनानुष्ठानेऽधिकारिणः, तेषामेवागम-परतन्त्रतया विधियत्नसम्भवेनामृतानुष्ठानसिद्धेरिति । एतच्च मध्यमाधिकारिग्रहणं तुलादण्डन्यायेनाद्यन्तग्रहणार्थम्, तेन परमामृतानुष्ठानपराः सर्वविरतास्तत्त्वत एव । तद्धेत्वनुष्ठानपराः अपुनर्बन्धका अपि च व्यवहारादिहाधिकारिणो गृह्यन्ते, कुग्रहविरहसम्पादनेनापुनर्बन्धकानामपि चैत्यवन्दनानुष्ठानस्य फलसम्पा-दकतायाः **पञ्चाशकादिप्रसिद्धत्वा**दित्यवधेयम् । ये त्वपुनर्बन्धका-दिभावमप्यस्पृशन्तो विधिबहुमानादिरहिता गतानुगतिकतयैव चैत्यवन्दना-द्यनुष्ठानं कुर्वन्ति ते सर्वथाऽयोग्या एवेति व्यवस्थितम् ॥ १३॥

नन्वविधिनाऽपि चैत्यवन्दनाद्यनुष्ठाने तीर्थप्रवृत्तिरव्यवच्छिन्ना स्यात्, विधेरेवान्वेषणे तु द्वित्राणामेव विधिपराणां लाभात् क्रमेण तीर्थोच्छेदः स्यादिति तदनुच्छेदायाविध्यनुष्ठानमप्यादरणीयमित्याशङ्कायामाह—

**तित्थस्सुच्छेयाइ वि, नालंबणमित्थ जं स एमेव ।**
**सुत्तकिरियाइ नासो, एसो असमंजसविहाणा ॥१४॥**

'तित्थस्स' इत्यादि । 'अत्र' अविध्यनुष्ठाने 'तीर्थोच्छेदाद्यपि नालम्बनं' तीर्थानुच्छेदायाविध्यनुष्ठानमपि कर्तव्यमिति नालम्बनीयम् । 'यद्'-यस्मात् 'एवमेव' अविध्यनुष्ठाने क्रियमाण एव 'असमञ्जसविधानात्'-विहितान्य-थाकरणादशुद्धपारम्पर्यप्रवृत्त्या सूत्रक्रियाया विनाशः, 'स' एष तीर्थोच्छेदः । न हि तीर्थनाम्ना जनसमुदाय एव तीर्थम्, आज्ञारहितस्य तस्यास्थिसंघातरूप-त्वप्रतिपादनात्, किन्तु सूत्रविहितयथोचितक्रियाविशिष्टसाधुसाध्वीश्रावकश्राविका समुदायः । तथा चाविधिकरणे सूत्रक्रियाविनाशात्परमार्थतस्तीर्थविनाश एवेति तीर्थोच्छेदालम्बनेनाविधिस्थापने लाभमिच्छतो मूलक्षतिरायातेत्यर्थः ॥१४॥

सूत्रक्रियाविनाशस्यैवाहितावहतां स्पष्टयन्नाह—

**सो एस वंकओ चिय, न य सयमयमारियाणमविसेसो ।**
**एयं पि भावयिव्वं, इह तित्थुच्छेयभीरूहिं ॥ १५ ॥**

'सो एस' त्ति । 'स एष' सूत्रक्रियाविनाश : 'वक्र एव' तीर्थोच्छेदपर्यवसायितया दुरन्तदुःखफल एव । ननु शुद्धक्रियाया एव पक्षपाते

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्रियमाणे शुद्धायास्तस्या अलाभादशुद्धायाश्चानङ्गीकारादानुश्रोतसिक्या वृत्त्याऽक्रियापरिणामस्य स्वत उपनिपातात्तीर्थोच्छेदः स्यादेव, यथाकथञ्चिदनुष्ठानावलम्बने च जैनक्रिया- विशिष्टजनसमुदायरूपं तीर्थं न व्यवच्छिद्यते, न च कर्तुरविधिक्रियया गुरोरुपदेशकस्य कश्चिद्दोषः, अक्रियाकर्तुस्तस्य स्वपरिणामाधीनप्रवृत्तिकत्वात्, केवलं क्रियाप्रवर्तनेन गुरोस्तीर्थव्यवहाररक्षणाद् गुण एवेत्याशङ्कायामाह - 'न च स्वयं मृतमारितयोरविशेषः, किन्तु विशेष एव' स्वयं मृते स्वदुष्टाशयस्यानिमित्तत्वात्, मारिते च मार्यमाणकर्मविपाकसमुपनिपातेऽपि स्वदुष्टाशयस्य निमित्तत्वात्, तद्वदिह स्वयमक्रियाप्रवृत्तं जीवमपेक्ष्य गुरोर्न दूषणम्, तदीयाविधिप्ररूपणमवलम्ब्य श्रोतुरविधिप्रवृत्तौ च तस्योन्मार्गप्रवर्तनपरिणामादवश्यं महादूषणमेव । तथा च श्रुतिकेवलिनो वचनम् *'जह सरणमुवगयाणं, जीवाण सिरो निकिंतए जो उ । एवं आयरिओ वि हु, उस्सुत्तं पण्णवेंतो य* [उपदेशमाला- ५१८]। न केवलमविधिप्ररूपणे दोषः, किन्त्वविधिप्ररूपणाभोगेऽ( ? प्य)विधिनिषेधासम्भवात् तदाशंसनानुमोदनापत्तेः फलतस्तत्प्रवर्तकत्वाद्दोष एव । तस्मात् ''स्वयमेतेऽविधिप्रवृत्ता नात्रास्माकं दोषो, वयं हि क्रियामेवोपदिशामो न त्वविधिम्'' एतावन्मात्रमपुष्टालम्बनमवलम्ब्य नोदासितव्यं परहितनिरतेन धर्माचार्येण, किन्तु सर्वोद्यमेनाविधिनिषेधेन विधावेव श्रोतारः प्रवर्तनीयाः, एवं हि ते मार्गे प्रवेशिताः, अन्यथा तून्मार्गप्रवेशनेन नाशिताः । एतदपि भावयितव्यमिह तीर्थोच्छेदभीरुभिः -विधिव्यवस्थापनेनैव ह्येकस्यापि जीवस्य सम्यग् बोधिलाभे चर्तुदशरज्ज्वात्मकलोकेऽमारिपटहवादनात्तीर्थोन्नतिः, अविधिस्थापने च विपर्ययात्तीर्थोच्छेद एवेति । यस्तु श्रोता विधिशास्त्रश्रवणकालेऽपि न संवेगभागी तस्य धर्मश्रावणेऽपि महादोष एव, तथा चोक्तं ग्रन्थकृतैव षोडशके - *'यः शृण्वन् सिद्धान्तं, विषयपिपासातिरेकतः पापः । प्राप्नोति न संवेगं, तदापि यः सोऽचिकित्स्य इति ॥ १ ॥ नैवंविधस्य शस्तं, मण्डल्युपवेशनप्रदानमपि । कुर्वन्नेतद् गुरुरपि, तदधिकदोषोऽवगन्तव्यः ॥ २ ॥* - (१० षो. १४-१५) - मण्डल्युपवेशनं सिद्धान्तदानेऽर्थमण्डल्युपवेशनम् । 'तदधिकदोषः'- अयोग्यश्रोतुरधिकदोषः, पापकर्तुरपेक्षया तत्कारयितुर्महादोषत्वात् । तस्माद्विधिश्रवणरसिकं श्रोतारमुद्दिश्य विधिप्रापणेनैव गुरुस्तीर्थव्यवस्थापको

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भवति, विधिप्रवृत्त्यैव च तीर्थमव्यवच्छिन्नं भवतीति सिद्धम् ॥१५॥ ननु किमेतावद्गूढार्थगवेषणया ? यद्बहुभिर्जनैः क्रियते तदेव कर्तव्यं, 'महाजनो येन गतः स पन्थाः' इति वचनात्, जीतव्यवहारस्यैवेदानीं बाहुल्येन प्रवृत्तेस्तस्यैवाऽऽतीर्थकालभावित्वेन तीर्थव्यवस्थापकत्वादित्याशङ्कायामाह–

**मुत्तूण लोगसन्नं, उड्ढूण य साहुसमयसब्भावं ।**
**सम्मं पयट्टियव्वं, बुहेणमइनिउणबुद्धीए ॥१६॥**

'मुत्तूण' त्ति । मुक्त्वा ('लोकसंज्ञां') –'लोक एव प्रमाणं' इत्येवंरूपां शास्त्रनिरपेक्षां मतिं 'उड्ढूण य' त्ति वोढ्वा च 'साधुसमयसद्भावं' समीचीन- सिद्धान्तरहस्यं 'सम्यग्'- विधिनीत्या प्रवर्तितव्यं चैत्यवन्दनादौ 'बुधेन' पण्डितेन 'अतिनिपुणबुद्ध्या' अतिशयितसूक्ष्मभावानुधाविन्या मत्या । साधुसमयसद्भावश्चायम्–*'लोकमालम्ब्य कर्तव्यं, कृतं बहुभिरेव चेत् । तदा मिथ्यादृशां धर्मो, न त्याज्यः स्यात्कदाचन* (ज्ञानसारे २३-४), *स्तोका आर्या अनार्येभ्यः, स्तोका जैनाश्च तेष्वपि । सुश्राद्धास्तेष्वपि स्तोकाः, स्तोकास्तेष्वपि सत्क्रियाः ॥ २ ॥ श्रेयोऽर्थिनो हि भूयांसो, लोके लोकोत्तरे च न । स्तोका हि रत्नवणिजः, स्तोकाश्च स्वात्मशोधकाः ॥ ३ ॥* (ज्ञानसारे २३-५) *एकोऽपि शास्त्रनीत्या यो, वर्तते स महाजनः । किमज्ञसार्थैः? शतमप्यन्धानां नैव पश्यति ॥ ४ ॥ यत्संविग्नजनाचीर्णं, श्रुतवाक्यैरबाधितम् । तज्जीतं व्यवहाराख्यं, पारम्पर्यविशुद्धिमत् ॥ ५ ॥ यदाचीर्णमसंविग्नैः, श्रुतार्थानवलम्बिभिः । न जीतं व्यवहारस्तदन्धसंततिसम्भवम् ॥ ६ ॥ आकल्पव्यवहारार्थं, श्रुतं न व्यवहारकम् । इतिवक्तुर्महत्तन्त्रे, प्रायश्चित्तं प्रदर्शितम् ॥ ७ ॥ तस्माच्छ्रुतानुसारेण, विध्येकरसिकैर्जनैः । संविग्नजीतमाल-म्ब्यमित्याज्ञा पारमेश्वरी ॥ ८ ॥"*

ननु यद्येवं सर्वादरेण विधिपक्षपातः क्रियते तदा – *'अविहिकया वरमकयं, असूयवयणं भणंति सव्वन्नू । पायच्छित्तं जम्हा, अकए गुरुयं कए लहुअं ॥ १ ॥'* इत्यादि वचनानां का गतिः ? इति चेत्, नैतानि वचनानि मूलत एवाविधिप्रवृत्तिविधायकानि, किन्तु विधिप्रवृत्तावप्यनाभोगा-दिनाऽविधिदोषश्छद्मस्थस्य भवतीति तद्भिया न क्रियात्यागो विधेयः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रथमाभ्यासे तथाविधज्ञानाभावादन्यदापि वा प्रज्ञापनीयस्याविधिदोषो निरनुबन्ध इति तस्य तादृशानुष्ठानमपि न दोषाय, विधिबहुमानाद् गुर्वाज्ञायोगाच्च तस्य फलतो विधिरूपत्वादित्येतावन्मात्रप्रतिपादनपराणीति न कश्चिद्दोषः । अवोचाम **चाध्यात्मसारप्रकरणे** – *'अशुद्धापि हि शुद्धायाः, क्रिया हेतुः सदाशयात् । ताम्रं रसानुवेधेन, स्वर्णत्वमुपगच्छति ॥ १ ॥'* (२-१६ श्लो.) यस्तु विध्यबहुमानादविधिक्रियामासेवते तत्कर्तुरपेक्षया विधिव्यवस्थापनरसिक-स्तदकर्ताऽपि भव्य एव तदुक्तं **योगदृष्टिसमुच्चये** ग्रन्थकृतैव – *'तात्त्विकः पक्षपातश्च, भावशून्या च या क्रिया । अनयोरन्तरं ज्ञेयं, भानुखद्योतयोरिव ॥ १ ॥'* (२२१ श्लो.) इत्यादि । **न चैवं** तादृशषष्ठसप्तमगुणस्थानपरिणति-प्रयोज्यविधिव्यवहारा- भावादस्मदादीनामिदानीन्तनमावश्यकाद्याचरणम-कर्तव्यमेव प्रसक्तमिति **शङ्कनीयम्**, विकलानुष्ठानानामपि *'जा जा हविज्ज जयणा, सा सा से णिज्जरा होई ।'* इत्यादिवचनप्रामाण्यात् यत्किञ्चिद्विध्यनुष्ठानस्येच्छायोगसंपादकतदितरस्यापि बालाद्यनुग्रहसम्पादकत्वे-नाकर्तव्यत्वासिद्धेः । इच्छायोगवद्भिर्विकलानुष्ठायिभिर्गीतार्थैः सिद्धांत-विधिप्ररूपणे तु निर्भरो विधेयस्तस्यैव तेषां सकलकल्याणसम्पादकत्वात्, उक्तं च **गच्छाचारप्रकीर्णके**– *'जइ वि ण सक्कं काउं, सम्मं जिणभासियं अणुट्ठाणं । तो सम्मं भासिज्जा, जह भणियं खीणरागेहिं ॥ १ ॥ ओसन्नो वि विहारे, कम्मं सोहेइ सुलभबोही य । चरणकरणं विसुद्धं, उववूहंतो परूविंतो ॥ २ ॥* (गाथा २३-२४) इति । ये तु गीतार्थाज्ञानिरपेक्षा विध्यभिमानिन इदानीन्तन- व्यवहारमुत्सृजन्ति, अन्यं च विशुद्धं व्यवहारं संपदायितुं न शक्नुवन्ति ते बीजमात्रमप्युच्छिन्दन्तो महादोषभाजो भवन्ति । विधिसम्पादकानां विधिव्यवस्थापकानां च दर्शनमपि प्रत्यूहव्यूहविनाशनमिति वयं वदामः ॥ १६ ॥

अथेमं प्रसक्तमर्थं संक्षिपन् प्रकृतं निगमयन्नाह –

**कयमित्थ पसंगेणं, ठाणाइसु जत्तसंगयाणं तु ।**
**हियमेयं विन्नेयं, सदणुट्ठाणत्तणेण तहा ॥ १७ ॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'कथमित्थ' त्ति । 'कृतं' पर्याप्तं अत्र 'प्रसङ्गेन'- प्ररूपणीयमध्ये स्मृतार्थविस्तारणेन 'स्थानादिषु' प्रदर्शितयोगभेदेषु 'यत्नसंगतानां तु' प्रयत्नवतामेव 'एतत्' चैत्यवन्दनाद्यनुष्ठानं 'हितं-' मोक्षसाधकं विज्ञेयम्, चैत्यवन्दनगोचर-स्थानादियोगस्य मोक्षहेतुत्वे तस्यापि तत्प्रयोजकत्वादिति भावः । 'तथा' इति प्रकारान्तरसमुच्चये । 'सदनुष्ठानत्वेन'- योगपरिणामकृतपुण्यानुबन्धि-पुण्यनिक्षेपाद्विशुद्धचित्तसंस्काररूपया प्रशान्तवाहितया सहितस्य चैत्यवन्दनादेः स्वातन्त्र्येणैव मोक्षहेतुत्वादिति भावः । प्रकारभेदोऽयं नयभेदकृत इति न कश्चिद्दोषः ॥ १७ ॥

सदनुष्ठानभेदानेव प्ररूपयंश्चरमतद्भेदे चरमयोगभेदमन्तर्भावयन्नाह -

**एयं च पीइभत्तागमाणुगं तह असंगयाजुत्तं ।**
**नेयं चउव्विहं खलु, एसो चरमो हवइ जोगो ॥ १८ ॥**

'एयं च' त्ति । 'एतच्च'-सदनुष्ठानं प्रीतिभक्त्यागमाननुगच्छति तत् प्रीतिभक्त्यागमानुगं - प्रीत्यनुष्ठानं, भक्त्यनुष्ठानं, वचनानुष्ठानं चेति त्रिभेदं तथाऽसंगतया युक्तं असंगानुष्ठानमित्येवं चतुर्विधं ज्ञेयम् । एतेषां भेदानामिदं स्वरूपम् -यत्रानुष्ठाने प्रयत्नातिशयोऽस्ति परमा च प्रीतिरुत्पद्यते शेषत्यागेन च यत्क्रियते **तत्प्रीत्यनुष्ठानम्** । आह च - *'यत्रादरोऽस्ति परमः प्रीतिश्च हितोदया भवति कर्तुः । शेषत्यागेन करोति यच्च तत्प्रीत्यनुष्ठानम् ।'* (षो.१०-३) ॥ एतत्तुल्यमप्यालम्बनीयस्य पूज्यत्वविशेषबुद्ध्या विशुद्धतरव्यापारं **भक्त्यनुष्ठानम्**। आह च - *गौरवविशेषयोगाद् बुद्धिमतो यद्विशुद्धतरयोगम् । क्रिययेतरतुल्यमपि, ज्ञेयं तद्भक्त्यनुष्ठानम् ॥* (षो. १०-४) ॥ प्रीतित्वभक्तित्वे संतोष्यपूज्यकृतकर्तव्यताज्ञानजनितहर्षगतौ जातिविशेषौ। आह च-अत्यन्तवल्लभा खलु, पत्नी तद्वद्धिता च जननीति । तुल्यमपि कृत्यमनयोर्ज्ञातं स्यात्प्रीतिभक्तिगतम् ॥ (षो. १०-५) 'तुल्यमपि कृत्यं' - भोजनाच्छादनादि 'ज्ञातं' उदाहरणम् । शास्त्रार्थप्रतिसंधानपूर्वा साधोः सर्वत्रोचितप्रवृत्ति-**र्वचनानुष्ठानम्**, आह च - *'वचनात्मिका प्रवृत्तिः सर्वत्रौचित्ययोगतो या तु । वचनानुष्ठानमिदं चारित्रवतो नियोगेन'* (षो.१०-६) ॥

व्यवहारकाले वचनप्रतिसंधाननिरपेक्षं दृढतरसंस्काराच्चन्दनगन्धन्याये-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नात्मसाद्भूतं जिनकल्पिकादीनां क्रियासेवन**मसंगानुष्ठानम्,** आह च- *'यत्त्वभ्यासातिशयात् सात्मीभूतमिव चेष्टयते सद्भिः । तदसंगानुष्ठानं, भवति त्वेतत्तदावेधात्'* (षो.१०-७)' 'तदावेधात्' - 'यथाऽऽद्यं चक्रभ्रमणं दण्डव्यपारादुत्तरं च तज्जनितकेवलसंस्कारादेव तथा भिक्षाटनादिविषयं वचनानुष्ठानं वचनव्यापाराद्, असंगानुष्ठानं च केवलतज्जनितसंस्कारादिति विशेषः' आह च *'चक्रभ्रमणं दंडात्तदभावे चैव यत्परं भवति । वचनासंगानुष्ठानयोस्तु तज्ज्ञापकं ज्ञेयम् ॥'* (षो.१०-८) इति ॥

'खलु' इति निश्चये । एतेष्वनुष्ठानभेदेषु 'एषः'- एतदः समीपतरवृत्तिवाचकत्वात्समीपाभिहिताऽसङ्गानुष्ठानात्मा चरमो योगोऽनालम्बनयोगो भवति, सङ्गत्यागस्यैवानालम्बनलक्षणत्वादिति भावः ॥ १८ ॥

आलम्बनविधयैवानालम्बनस्वरूपमुपदर्शयन्नाह-

**आलंबणं पि एयं, रूवमरूवी य इत्थ परमु त्ति ।**
**तग्गुणपरिणइरूवो, सुहुमो अणालंबणो नाम ॥ १९ ॥**

'आलंबणं पि' त्ति। आलम्बनमपि 'एतत्'-प्राकरणिकबुद्धिसंनिहितं 'अत्र'-योगविचारे 'रूपि' समवसरणस्थजिनरूपतत्प्रतिमादिलक्षणम्, 'च'- पुनः 'अरूपी परमः'-सिद्धात्मा इत्येवं द्विविधम् । तत्र तस्य- अरूपिपरमात्मलक्षणस्यालम्बनस्य ये गुणाः-केवलज्ञानादयस्तेषां परिणतिः- समापत्तिलक्षणा तया रूप्यत इति तद्गुणपरिणतिरूपः सूक्ष्मोऽतीन्द्रि- यविषयत्वादनालम्बनो नाम योगः, अरूप्यालम्बनस्येषदालम्बनत्वेन 'अलवणा यवागूः' इत्यत्रेवात्र नञ्पदप्रवृत्तेरविरोधात् । "सुहुमो आलंबणो नाम" त्ति क्वचित्पाठस्तत्रापि सूक्ष्मालम्बनो नामैष योगस्ततोऽनालम्बन एवेति भाव उन्नेयः, उक्तं चात्राधिकारे **चतुर्दशषोडशके** ग्रन्थकृतैव-*"सालम्बनो निरालम्बनश्च योगः परो द्विधा ज्ञेयः । जिनरूपध्यानं खल्वाद्यस्तत्तत्त्वगस्त्वपरः ॥ १ ॥"* सहालम्बनेन चक्षुरादिज्ञानविषयेण प्रतिमादिना वर्तत इति सालम्बनः । आलम्बनात्-विषयभावापत्तिरूपान्निष्क्रान्तो निरालम्बनः, यो हि छद्मस्थेन ध्यायते न च स्वरूपेण दृश्यते तद्विषयो निरालम्बन इति यावत् । जिनरूपस्य- समवसरणस्थस्य ध्यानं खलु 'आद्यः'-सालम्बनो योगः । तस्यैव-जिनस्य

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्त्वं-केवलजीवप्रदेशसंघातरूपं केवलज्ञानादिस्वभावं तस्मिन् गच्छतीति तत्त्वगः, 'तुः' एवार्थे, 'अपरः' अनालम्बनः, अत्रारूपितत्त्वस्य स्फुटविषयत्वा-भावादनालम्बनत्वमुक्तम् । अधिकृतग्रन्थगाथायां च विषयतामात्रेण तस्यालम्बन-त्वमनूद्यापि तद्विषययोगस्येषदालम्बनत्वादनालम्बनत्वमेव प्रासाधीति फलतो न कश्चिद्विशेष इति स्मर्तव्यम्। अयं चानालम्बनयोगः *"शास्त्रसंदर्शितोपाय-स्तदतिक्रान्तगोचरः । शक्त्युद्रेकाद्विशेषेण सामर्थ्याख्योऽयमुत्तमः ॥५॥"* (योग.समु.) इति श्लोकोक्तस्वरूपक्षपकश्रेणीद्वितीयापूर्वकरणभाविक्षायोपश-मिकक्षान्त्यादिधर्म संन्यासरूपसामर्थ्ययोगतो निस्सङ्गानवरतप्रवृत्ता या परतत्त्वदर्शनेच्छा तल्लक्षणो मन्तव्यः। आह च-

*'सामर्थ्ययोगतो या, तत्र दिदृक्षेत्यसङ्गशक्त्याढ्या ।*
*साऽनालम्बनयोगः, प्रोक्तस्तददर्शनं यावत् ॥ (षो. १५-८) ॥*

'तत्र' परतत्त्वे द्रष्टुमिच्छा दिदृक्षा 'इति' एवंस्वरूपा असङ्गशक्त्या-निरभिष्वङ्गाविच्छिन्नप्रवृत्त्या आढ्या-पूर्णा 'सा' परमात्मदर्शनेच्छा अनालम्बनयोगः, परतत्त्वस्याऽदर्शनं-अनुपलम्भं यावत्, परमात्मस्वरूपदर्शने तु केवलज्ञानेनानालम्बनयोगो न भवति, तस्य तदालम्बनत्वात् । अलब्धपरत-त्त्वस्तल्लाभाय ध्यानरूपेण प्रवृत्तो ह्यनालम्बनयोगः, स च क्षपकेन धनुर्धरेण क्षपकश्रेण्याख्यधनुर्दण्डे लक्ष्यपरतत्त्वाभिमुखं तद्वेधाविसंवादितया व्यापारितो यो बाणस्तत्स्थानीयः, यावत्तस्य न मोचनं तावदनालम्बनयोगव्यापारः, यदा तु ध्यानान्तरिकाख्यं तन्मोचनं तदाऽविसंवादितत्पतनमात्रादेव लक्ष्यवेध इतीषुपातकल्पः सालम्बनः केवलज्ञानप्रकाश एव भवति, न त्वनालम्बन-योगव्यापारः, फलस्य सिद्धत्वादिति निर्गलितार्थः । आह च *"तत्राऽप्रतिष्ठि-तोऽयं; यतः प्रवृत्तश्च तत्त्वतस्तत्र । सर्वोत्तमानुजः खलु, तेनानालम्बनो गीतः ॥९॥ द्रागस्मात्तद्दर्शनमिषुपातज्ञातमात्रतो ज्ञेयम् । एतच्च केवलं तत्, ज्ञानं यत्तत्परं ज्योतिः ॥१०॥"* (षो. १५) । 'तत्र' परतत्त्वे 'अप्रतिष्ठितः' अलब्धप्रतिष्ठः सर्वोत्तमस्य योगस्य-अयोगाख्यस्य अनुजः-पृष्ठभावी ॥ 'तद्दर्शनं' परतत्त्वदर्शनं, 'एतच्च' परतत्त्वदर्शनं 'केवलं' स पूर्णं 'तत्' प्रसिद्धं यत् तत् केवलज्ञानं 'परं' प्रकृष्टं ज्योतिः ।। **स्याद् अत्र कस्यचिदाशङ्का-**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इषुपातज्ञातात्परतत्त्वदर्शने सति केवलज्ञानोत्तरमनालम्बनयोगप्रवृत्तिर्मा भूत्, सालम्बनयोगप्रवृत्तिस्तु विशिष्टतरा काचित्स्यादेव, केवलज्ञानस्य लब्धत्वेऽपि मोक्षस्याद्यापि योजनीयत्वात् । **मैवम्**-केवलिनः स्वात्मनि मोक्षस्य योजनीयत्वेऽपि ज्ञानाकाङ्क्षाया अविषयतया ध्यानानालम्बनत्वात्क्षपकश्रेणिकालसम्भविविशिष्टतरयोगप्रयत्नाभावादावर्जीकरणोत्तरयोगनिरोधप्रयत्नाभावाच्चार्वाक्तनकेवलिव्यापारस्य ध्यानरूपत्वाभावादुक्तान्यतरयोगपरिणतेरेव ध्यानलक्षणत्वात् । आह च **महाभाष्यकारः**-

*'सुदढप्पयत्तवावारणं णिरोहो व विज्जमाणाणं । झाणं करणाण मयं ण उ चित्तणिरोहमित्तागं ॥१॥'* (विशेषावश्यक-गाथा ३०७१) इति । **स्यादेतद्**, यदि क्षपकश्रेणिद्वितीयापूर्वकरणभावी सामर्थ्ययोग एवानालम्बनयोगो ग्रंथकृताऽभिहितस्तदा तदप्राप्तिमतामप्रमत्तगुणस्थानानामुपरतसकलविकल्पकल्लोलमालानां चिन्मात्रप्रतिबन्धोपलब्धरत्नत्रयसाम्राज्यानां जिनकल्पिकादीनामपि निरालम्बनध्यानमसंगताभिधानं स्यादिति । **मैवम्**-यद्यपि तत्त्वतः परतत्त्वलक्ष्यवेधाभिमुखस्तदविसंवादी सामर्थ्ययोग एव निरालम्बनस्तथापि परतत्त्वलक्ष्यवेधप्रगुणतापरिणतिमात्रादर्वाक्तनं परमात्मगुणध्यानमपि मुख्यनिरालम्बनप्रापकत्वादेकध्येयाकारपरिणतिशक्तियोगाच्च निरालम्बनमेव । अत एवावस्थात्रयभावने रूपातीतसिद्धगुणप्रणिधानवेलायामप्रमत्तानां शुक्लध्यानांशो निरालम्बनोऽनुभवसिद्ध एव । संसार्यात्मनोऽपि च व्यवहारनयसिद्धमौपाधिकं रूपमाच्छाद्य शुद्धनिश्चयनयपरिकल्पितसहजात्मगुणविभावने निरालम्बनध्यानं दुरपह्नवमेव, परमात्मतुल्यतयाऽऽत्मज्ञानस्यैव निरालम्बनध्यानांशत्वात्, तस्यैव च मोहनाशकत्वात् । आह च-*''जो जाणइ अरिहंते, दव्वत्तगुणत्तपज्जयत्तेहिं । सो जाणइ अप्पाणं, मोहो खलु जाइ तस्स लयं'* ॥ प्र.सा. १-८० ॥'' इति । तस्माद्रूपिद्रव्यविषयं ध्यानं सालम्बनं अरूपिविषयं च निरालम्बनमिति स्थितम् ॥१९॥ अथ निरालम्बनध्यानस्यैव फलपरम्परामाह-

**एयम्मि मोहसागरतरणं सेढी य केवलं चेव ।**
**तत्तो अजोगजोगो, कमेण परमं च निव्वाणं ॥२०॥**

'एयम्मि' त्ति । 'एतस्मिन्'-निरालम्बनध्याने लब्धे मोहसागरस्य

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दुरन्तरागादिभावसंतानसमुद्रस्य तरणं भवति । ततश्च 'श्रेणिः'-क्षपकश्रेणिर्निर्व्यूढा भवति, सा ह्यध्यात्मादियोगप्रकर्षगर्भिताशयविशेषरूपा । एष एव **सम्प्रज्ञातः** समाधिस्तीर्थान्तरीयैर्गीयते, एतदपि सम्यग्-यथावत् प्रकर्षेण सवितर्कनिश्चयात्मकत्वेनात्मपर्यायाणामर्थानां च द्विपादीनामिह ज्ञायमानत्वादर्थतो नानुपपन्नम्,ततश्च 'केवलमेव' केवलज्ञानमेव भवति । अयं **चासम्प्रज्ञातः** समाधिरिति परैर्गीयते, तत्रापि अर्थतो नानुपपत्तिः, केवलज्ञानेऽशेषवृत्त्यादिनिरोधाल्लब्धात्मस्वभावस्य मानसविज्ञानवैकल्यादसम्प्रज्ञातत्वसिद्धेः । अयं चासम्प्रज्ञातः समाधिर्द्विधा-सयोगिकेवलिभावी अयोगिकेवलिभावी च, आद्यो मनोवृत्तीनां विकल्पज्ञानरूपाणामत्यन्तोच्छेदात्सम्पद्यते । अन्त्यश्च परिस्पन्दरूपाणाम्, अयं च केवलज्ञानस्य फलभूतः । एतदेवाह-'ततश्च' केवलज्ञानलाभादनन्तरं च 'अयोगयोगः'-वृत्तिबीजदाहायोगाख्यः समाधिर्भवति । अयं च '**धर्ममेघः**' इति पातञ्जलैर्गीयते, '**अमृतात्मा**' इत्यन्यैः, '**भवशत्रुः** इत्यपरैः '**शिवोदयः**' इत्यन्यैः, '**सत्त्वानन्दः**' इत्येकैः, '**परश्च**' इत्यपरैः । 'क्रमेण'-उपदर्शितपारम्पर्येण ततोऽयोगयोगात् 'परमं'-सर्वोत्कृष्टफलं निर्वाणं भवति ॥२०॥

॥ इति महोपाध्यायश्रीकल्याणविजयगणिशिष्यमुख्यपण्डितश्रीजीतविजयगणिसतीर्थ्यपण्डितश्रीनयविजयगणिचरणकमलचञ्चरीकपण्डितश्रीपद्मविजयगणिसहोदरोपाध्याय**श्रीजसविजयगणि**समर्थितायां **विंशिकाप्रकरण**व्याख्यायां योगविंशिका-विवरणं सम्पूर्णम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ जयन्तु वीतरागाः ॥

याकिनीमहत्तरासूनुश्रीहरिभद्रसूरिविरचितं
स्वोपज्ञटीकया समलङ्कृतम्

# योगशतकम्

॥ ॐ नमः सर्वज्ञाय ॥

योगशतकस्य व्याख्या प्रस्तूयते। इह चाऽऽदावेवाऽऽचार्यः शिष्टसमयप्रतिपालनाय विघ्नविनायकोपशान्तये प्रयोजनादिप्रतिपादनार्थं चेदं गाथासूत्रमुपन्यस्तवान् –

**णमिऊण जोगिणाहं सुजोगसंदंसगं महावीरं ।**
**वोच्छामि जोगलेसं जोगज्झयणाणुसारेणं ॥ १ ॥**

तत्र शिष्टनामयं समयः, यदुत शिष्टाः क्वचिदिष्टे वस्तुनि प्रवर्तमानाः सन्त इष्टदेवतानमस्कारपूर्वकं प्रवर्तन्ते । अयमप्याचार्यो न हि न शिष्ट इत्यतस्तत्समयप्रतिपालनाय, तथा श्रेयांसि बहुविघ्नानि भवन्तीति, उक्तं च —

*श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ।*
*अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायकाः ॥ इति*

इदं च योगशतकं सम्यग्ज्ञानहेतुत्वात् श्रेयोभूतं वर्तते, अतो मा भूद् विघ्न इति विघ्नविनायकोपशान्तये 'णमिऊण जोगिणाहं सुजोगसंदंसगं महावीरं' इत्यनेनेष्टदेवतास्तवमाह ।

प्रेक्षापूर्वकारिणश्च प्रयोजनादिशून्ये न प्रवर्तन्त इति प्रयोजनादिप्रतिपादनार्थं च 'वोच्छामि जोगलेसं जोगज्झयणाणुसारेणं' इत्येतदाह । एष तावद् गाथाप्रस्तावः समुदायार्थश्च । अधुनावयवार्थ उच्यते –

'नत्वा' प्रणम्य । कम् ? इत्याह– 'योगिनाथं'– योगः सज्ज्ञानादिसम्बन्धरूपो वक्ष्यमाणलक्षणो निश्चयादिभेदभिन्नः, स विद्यते येषां ते योगिनः– मुनयः, तेषां नाथो योगिनाथः, तथा च भगवान् वीतरागादीनां पश्चानुपूर्व्या अपुनर्बन्धकावसानानां तथातथोपकारकरणपालनाद् नाथः, तम् । अयमेव

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विशेष्यते – 'सुयोगसन्दर्शकं' शोभनो योगः– औचित्यादिविशेषरूपतया एकान्ततः सानुबन्धफलहेतुः चित्रभेदो गुरुविनयादिरूप इति, तस्य संदर्शकः सम्यग् आसेवनोपदेशद्वारेण दर्शकः सन्दर्शकः, तथा च भगवांश्चरमदेहतया कर्मवशितायामपि तथाविधविनेयानुग्रहाय जानानोऽपि विचित्रानभिग्रहानासेवितवान् इति, तम् । कमेवम्भूतम् ? इत्याह – 'महावीरं' 'शूर-वीर विक्रान्तौ' इति कषायादिशत्रुजयाद् महाविक्रान्तो महावीरः । "ईर गतिप्रेरणयोः" इत्यस्य वा विपूर्वस्य विशेषेणेरयति कर्म याति वेह शिवमिति वीरः, महांश्चासौ वीरश्च महावीरः– वर्तमानतीर्थेश्वरस्तम् । एवं नत्वा किम्? अत आह– वक्ष्ये अभिधास्ये। किम्? इत्याह 'योगलेशं–योगैकदेशम्, तत्त्वतो व्यापकत्वेऽप्यस्य ग्रन्थाल्पतया एवं व्यपदेशः कर्पूरादिलेशवदविरुद्ध एव । कुतो वक्ष्ये ? किं स्वमनीषिकया ? न, – इत्याह 'योगाध्ययनानुसारेण' –योगाध्ययनं प्रवचनप्रसिद्धम्, तदनुसारेण–तन्नीत्या ।

एवं चेह ग्रन्थकारस्य योगलेशाभिधानमनन्तरप्रयोजनम्, योगलेश एवाभिधीयमानोऽभिधेयम्, साध्य–साधनलक्षणश्च सम्बन्धः । श्रोतृणां तु योगलेशज्ञानमनन्तरप्रयोजनं, (परम्पराप्रयोजनं) तु द्वयोरपि मुक्तिरेव, तत्त्वज्ञानपूर्विकत्वाद् मुक्तेः । न चास्य योगं मुक्त्वा अपर उपाय :। यथोक्तम्

*"वादांश्च प्रतिवादांश्च वदन्तोऽनिश्चितांस्तथा ।*
*तत्त्वान्तं नैव गच्छन्ति तिलपीलकवद् गतौ ॥६७॥*
*अध्यात्ममत्र परम उपायः परिकीर्तितः ।*
*गतौ सन्मार्गगमनं यथैव ह्यप्रमादिनः ॥६८॥*
मुक्त्वाऽतो वादसङ्घट्टमध्यात्ममनुचिन्त्यताम् ।
*नाविधूते तमस्कन्धे ज्ञेये ज्ञानं प्रवर्तते ॥६९॥*
*औचित्याद् वृत्तयुक्तस्य वचनात् तत्त्वचिन्तनम् ।*
*मैत्र्यादिसारमत्यन्तमध्यात्मं तद्विदो विदुः ॥३५८॥*
*अतः पापक्षयः सत्त्वं शीलं ज्ञानं च शाश्वतम् ।*
*तथानुभवसंसिद्धममृतं ह्यद एव तु ॥३५९॥*
*योगबिन्दुः॥"* इत्यादि।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अध्यात्मं च योग इति यथोदितप्रयोजनसिद्धिः । पर्याप्तं प्रसङ्गेन । इति गाथार्थः ॥ १ ॥

इह योगो द्विधा- निश्चयतो व्यवहारतश्चेति । अस्य लक्षणमाह -

**निच्छयओ इह जोगो सण्णाणाईण तिण्ह संबंधो ।**
**मोक्खेण जोयणाओ णिद्दिट्ठो जोगिनाहेहिं ॥ २॥**

'निश्चयतः' -निश्चयेन-अक्षेपफलं नियमफलं वाऽङ्गीकृत्य तद्भावेन । 'इह'- लोके प्रवचने वा । 'योगः' -धर्मविशेषः 'सज्ज्ञानादीनां' -सज्ज्ञानस्य सद्दर्शनस्य सच्चारित्रस्य च। सद्ग्रहणं मिथ्याज्ञानादिव्यवच्छेदार्थम्, एतेषां त्रयाणां 'सम्बन्धः' -मीलकः, एकात्मन्यवस्थानमित्यर्थः। त्रयाणामिति च न्यूनाधिकसंख्यानिरासार्थम्, त्रयाणामेव सम्बन्धो निश्चयतो योगः । कुतः ? इत्यन्वर्थमाह- 'मोक्षेण योजनात्'-कृत्स्नकर्मक्षयो मोक्षः, अपुनर्बन्धकत्त्वेना-ऽऽत्मन आत्मन्येवावस्थानम्, तेन 'योजनाद्'- घटनात्, कारणात् । नेदं स्वमत्युत्प्रेक्षितं योगलक्षणमित्याह- 'निर्दिष्टो योगिनाथैः'- निर्दिष्टः-प्रतिपादितः, योगिनः -मुनयस्तन्नाथैः-वीतरागैरर्हद्भिरिति। अनेन मुक्तबा-हुल्यमाह । तदद्वैते योगनैरर्थक्यप्रसङ्गात्, सदन्तरस्य सदन्तरत्वानुपपत्तेः तत्रैव लयासम्भवात् । इति गाथार्थः ॥२॥

सज्ज्ञानादिलक्षणमाह-

**सण्णाणं वत्थुगओ बोहो, सद्दंसणं तु तत्थ रुई ।**
**सच्चरणमणुट्ठाणं विहि-पडिसेहाणुगं तत्थ ॥३॥**

'सज्ज्ञानं' -सम्यग्ज्ञानं 'वस्तुगतः' वस्त्वाव (स्त्वा)लम्बनः बोधः'-परिच्छेदः, निरालम्बनस्य बोधस्यासम्भवात्, सम्भवेपि सज्ज्ञानत्वायोगात्, मरुमरीचिकादिबोधे तथादर्शनात्, अन्यथा अस्य सदितरत्वाभाव इति । तथा 'सद्दर्शनं तु'-सम्यग्दर्शनं पुनः 'तत्र'-वस्तुनि 'रुचिः'- श्रद्धा *"तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्"* (तत्त्वार्थ १-२) इति वचनात्, अन्यथा चेयं ज्ञानात्, आवरणभेदेन क्वचित् तद्भावेप्यभावादिति। तथा 'सच्चरणं' सम्यक्चारित्रम् 'अनुष्ठानं' क्रियारूपं 'विधि -प्रतिषेधानुगं' विधि-प्रतिषेधावनुगच्छति, आगमानुसारीत्यर्थः। 'तत्र' -इति वस्तुन्येव, अस्य महाव्रतरूपत्वात् तेषां

Jain Education International For Personal & Private Use Only www.jainelibrary.org

च बाह्यविषयत्वात्, *"पढमम्मि सव्वजीवा"* (आव.नि. ७९१) इति वचनात्, अन्यथा अस्याभाव इति भावनीयम् । क्रमश्चायमेषाम्, निश्चयत इत्थमेव भावात् । तथाहि- नाज्ञाते श्रद्धा, अश्राद्धस्य वाऽनुष्ठानमिति । उक्तं च *"यदि जानात्युत्पन्नरुचिस्ततो दोषान्निवर्तते ।"*

अन्यत्र तु सम्यग्यदर्शनोपन्यास आदौ व्यवहारमतेन कर्मवैचित्र्यात् तथा भावतोऽविरुद्ध एव । इति गाथार्थः ॥३॥

एवं निश्चयसारत्वाद् योगस्याऽऽदौ तन्मतेन लक्षणमभिधायाधुना व्यवहारमतेनाभिधातुमाह-

**ववहारओ एसो विन्नेओ एयकारणाणं पि ।**
**जो संबंधी सो वि य कारण कज्जोवयाराओ ॥४॥**

'व्यवहारतस्तु'-सामान्येन फलं प्रति योग्यतामधिकृत्य 'एष'-प्रस्तुतो योगः 'विज्ञेयः'-ज्ञातव्यः । किम्भूतः ? इत्याह- 'एतत्कारणानामपि' सज्ज्ञानादिकारणानामपि गुरुविनयादीनाम् अपिशब्दात् सज्ज्ञानादीनामपि सर्वनयभावाङ्गीकरणेन यः सम्बन्धः सोऽपि च योगो विज्ञेयः । चशब्दादनन्तरोदितश्च । कथम् ? इत्याह - 'कारणे कार्योपचाराद्'-योगकारणे-अनन्तर-परम्परभेदभिन्ने कार्योपचाराद्-योगोपचारात् । दृष्टश्चायं प्रयोगो यथा-आयुर्घृतम्, तण्डुलान् वर्षति पर्जन्यः । इति गाथार्थः ॥४॥ प्रस्तुतयोगमेव स्वरूपत आह-

**गुरुविणओ सुस्सूसाइया य विहिणा उ धम्मसत्थेसु ।**
**तह चेवाणुट्ठाणं विहि-पडिसेहेसु जहसत्तिं ॥५॥**

'गुरुविनयः' पादधावनादिः, 'शुश्रूषादयश्च' शुश्रूषा-श्रवण-विज्ञान-धारणोहाऽपोहतत्त्वाभिनिवेशाश्च, 'विधिना तु'- विधिनैव स्थानशुद्ध्यादिना, अविधेः प्रत्यवायहेतुत्वात्, अकृतोऽविधिकृतयोगाद् वरम्, असच्चिकित्सोदाहरणादिति भावनीयम् । क्वैवं शुश्रूषादयः ? इत्याह-'धर्मशास्त्रेषु'-आचारोत्त-मश्रुतादिष्वित्यर्थः । तथैव 'अनुष्ठानं'- क्रियारूपं 'विधि-प्रतिषेधयोः'-धर्मशास्त्रोदितयोः कथम् ? इत्याह -'यथाशक्ति' -करणाऽकरणयोः शक्त्यनुल्लंघनेन । इति गाथार्थः ॥५॥ कथं पुनरस्य निश्चययोगाङ्गता ? इत्याह-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एत्तो च्चिय कालेणं णियमा सिद्धी पगिट्ठरूवाणं ।**
**सण्णाणाईण तहा जायइ अणुबंधभावेण ॥६॥**

'अत एव'-गुरुविनयादेः 'कालेन' गच्छता 'नियमात् सिद्धिः'-अवन्ध्यकारणत्वेनावश्यन्तया निष्पत्तिः । केषाम् ? इत्याह- 'प्रकृष्टरूपाणां' क्षायिकाणां सज्ज्ञानादीनाम् तथा जायते ।'तथा'- इति औचित्यप्रतिपत्तिपुरस्सरया सदाज्ञाराधनया तद्वृद्धिभावात् । तथा चाह 'अनुबन्धभावेन'-तदुत्तरोत्तराक्षेपेण, मार्गानुसार्याज्ञाविशुद्धानुष्ठानस्य सदनुबन्धत्वात् । इति गाथार्थः ॥६॥

एवं च कृत्वा गुरुविनयादिमतोऽपि योगिव्यपदेशो न्याय्य एवेत्यत आह-

**मग्गेणं गच्छंतो सम्मं सत्तीए इट्ठपुरपहिओ ।**
**जह तह गुरुविणयाइसु पयट्टओ एत्थ जोगि त्ति ॥७॥**

मार्गेण-प्रापकपथा तात्त्विकेन गच्छन् 'सम्यक्' शकुनादिमाननादिना प्रकारेण शक्त्या गमनसामर्थ्यरूपया 'इष्टपुरपथिकः' यथाभिलषितपुराध्वगो यथा प्राप्त्यविसंवादेनोच्यते तथा 'गुरुविनयादिषु' प्रागुपन्यस्तेषु प्रवृत्तः सन् विधिना "अत्र" प्रक्रमे योगीत्युच्यते इष्टयोगप्राप्त्यविसंवादेन । इह च व्यवहितगाथायामत्र च विधिग्रहण-सम्यग्ग्रहणाभ्यां गृहीतमपि भेदेन शक्त्यभिधानं तत्प्राधान्यख्यापनार्थम्। दृष्टश्चायं न्यायः, यदुत "सामान्यग्रहणे सत्यपि प्राधान्यख्यापनार्थं, भेदेनाभिधानम्, यथा ब्राह्मणा आयाता वशिष्ठोऽप्यायातः" इति । प्राधान्यं तु सर्वत्र शक्तेरनुबन्धसाधकत्वेन यथोक्तम् *"शक्तिः सफलैव सम्यक्प्रयोगात्"* इति गाथार्थः ॥७॥

एवं योगपीठमभिधायाधिकार्यादिनिरूपणार्थमाह-

**अहिगारिणो उवाएण होइ सिद्धी समत्थवत्थुम्मि ।**
**फलपगरिसभावाओ विसेसओ जोगमग्गम्मि ॥८॥**

'अधिकारिणः' योग्यस्य 'उपायेन' तत्साधनप्रकारेण भवति 'सिद्धिः' कार्यनिष्पत्तिः 'समस्तवस्तुनि' सेवादौ फलप्रकर्षभावात् मुक्तिसाधनत्वेन 'विशेषतः' विशेषेण 'योगमार्गे' प्रस्तुते अधिकारिण उपायेन सिद्धिः इति गाथार्थः ॥८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यत एवमतोऽत्राधिकारिणमाह –

**अहिगारी पुण एत्थं विण्णेओ अपुणबंधगाइ त्ति ।**
**तह तह णियत्तपगई अहिगारो णेगभेओ त्ति ॥९॥**

'अधिकारी' पुनः 'अत्र'–योगमार्गे 'विज्ञेयः' ज्ञातव्यः 'अपुनर्बन्धकादिः' य इह परिणामादिभेदादपुनर्बन्धकत्वेन तांस्तान् कर्मपुद्गलान् बध्नाति स तत्क्रियाविष्टोप्यपुनर्बन्धक उत्कृष्टस्थितेः । आदिशब्दात् सम्यग्दृष्टिश्चारित्री चाभिगृह्यते, इह प्रकरणे एतदन्येषां सकृद्बन्धकादीनामभणनात् । अत एवाऽऽह–'तथा तथा'–तेन तेन प्रकारेण तज्जीवग्रहणसम्बन्धयोग्यतापगमलक्षणेन निवृत्तः–अपगतः प्रकृतेः–कर्मवर्गणारूपायाः अधिकारः–विशिष्टविचित्र-फलसाधकत्वलक्षणो यस्य स निवृत्तप्रकृत्यधिकारः अनेकभेदः इति गाथार्थः ॥९॥

अयमेवाधिकारी, नान्य इत्याह–

**अणियत्ते पुण तीए एगंतणेव हंदि अहिगारे ।**
**तप्परतंतो भवरागओ दढं अणहिगारी त्ति ॥१०॥**

'अनिवृत्ते' पुनः 'तस्याः'–प्रकृतेः 'एकान्तेनैव'–सर्वथैव हन्दि इत्युपप्रदर्शने 'अधिकारे'–उक्तलक्षणे 'तत्परतन्त्रः'–प्रकृतिपरतन्त्रः 'भवरागओ' त्ति संसाररागाद् 'दृढम्'– अत्यर्थं सर्वतद्भेदप्राप्तेः अनधिकारीति । उक्तं चान्यैरपि योगशास्त्रकारैर्भगवद्गोपेन्द्रैः

*"[1]अनिवृत्ताधिकारायां प्रकृतौ सर्वथैव हि ।*
*न पुंसस्तत्त्वमार्गेऽस्मिन् जिज्ञासाऽपि प्रवर्तते ॥*
*क्षेत्ररोगाभिभूतस्य यथाऽत्यन्तं विपर्ययः ।*
*तद्वदेवास्य विज्ञेयस्तदावर्तनियोगतः ॥*
*जिज्ञासायामपि ह्यत्र [2]कश्चिन्मार्गो निवर्तते ।*
*नाक्षीणपाप एकान्तादाप्नोति कुशलां धियम् ॥*

---

१ एतत् पञ्चश्लोकात्मकमुद्धरणं गोपेन्द्राचार्यीयं इति श्रीहरिभद्रसूरयः स्वयमेव योगबिन्दौ प्राहुः । तथाहि–"तथा चान्यैरपि ह्येतद् योगमार्गकृतश्रमैः । सङ्गीतमुक्तिभेदेन यद् गौपेन्द्रमिदं वचः ॥१००॥– अनिवृत्ताधिकारायां." ॥ २ 'कश्चित् सर्गो' इति योगबिन्दौ पाठः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

*ततस्तदात्वे कल्याणमायत्यां तु विशेषतः।*
*मन्त्राद्यपि [1]सदाचारात् सर्वावस्थाहितं मतम् ।*
*[2]द्वयोरावर्तभेदेन तथा सांसिद्धिकत्वतः ।*
*युज्यते सर्वमेवैतन्नान्यथेति मनीषिणः ॥*
*(योगबिन्दुः १०१-५)*

न च प्रकृति-कर्मप्रकृत्योः कश्चिद् भेदोऽन्यत्राभिधानभेदात् । इति गाथार्थः ॥१०॥ एतद्भावनायैवाह –

**तप्पोग्गलाण तग्गहणसहावावगमओ य एयं ति ।**
**इय दट्ठव्वं इहरा तहबंधाई न जुज्जंति ॥११॥**

'तत्पुद्गलानां'– कर्मप्रकृतिपरमाणूनां 'तद्ग्रहणस्वभावापगमतः' जीवग्रहणस्वभावापगमात् 'च' शब्दाद् जीवस्य च तद्ग्राहकस्वभावापगमाद् कारणाद् एतन्नूनं निवृत्तप्रकृत्यधिकारित्वम्, एतत्पुरस्सरं च प्रस्तुताधिकारित्वम् 'इय' एवं द्रष्टव्यम् । विपक्षे बाधामाह 'इतरथा' यद्येवं नाभ्युपगम्यते, ततः किम् ? इत्याह– तथाबन्धादयो न युज्यन्ते 'तथा' इति चित्रानन्तग्रहणप्रकारेण बन्धः, आदिशब्दाद् भूयोग्रहणाऽग्रहणरूपो मोक्षः तथा एतन्निबन्धनाश्च विकारा दोष-गुणलक्षणा इति, एते न युज्यन्ते, अतत्स्वभावस्य तथा भवनाऽयोगात्, अतिप्रसङ्गादिति । तदयमत्र भावार्थः– ते परमाणवोऽनादित एव तथाऽनन्तशः तदात्मग्रहणस्वभावाः, सोऽप्यात्मा एवमेव तद्ग्राहकस्वभाव इत्युभयोस्तत्स्वभावतया घटन्ते तथाबन्धादयः, अन्यथा मुक्तानामपि बन्धादिप्रसङ्गः, अत(स्त)त्स्वभावत्व एवोभयोरपि तद्भावोपपत्तेरिति भावनीयम् । न चैवमपि स्वभाववाद एवैकान्तेन, तथाविधकालादेरप्यत्रोपयोगात्, तस्यैव तदाक्षेपकत्वात्, इतरेतरापेक्षित्वे प्राधान्यासिद्धेः, सामग्र्या एव फलनिष्पादकत्वात् । निर्लोठितमेतदन्यत्र **धर्मसारादौ** । इति गाथार्थः ॥११॥

दुर्विज्ञेयं चैतदित्याह—

---

१ 'सदा चारु' इति योगबिन्दौ ॥ २ "उभयोस्तत्स्वभावत्वात् तदावर्त्तनियोगतः ॥' इति रूपं पूर्वार्द्धं योगबिन्दौ वर्त्तते ॥'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एयं पुण णिच्छयओ अइसयणाणी वियाणए णवरं ।**
**इयरो वि य लिंगेहिं उवउत्तो तेण भणिएहिं ॥१२॥**

'एतत् पुनः 'अनन्तरोदितविधिसमायातमधिकारित्वं 'निश्चयतः'-निश्चयेन अतिशयज्ञानी विजानाति, नवरं-केवलं, नान्यः । यद्येवम्, अनर्थक एवास्योपन्यास इत्याह-'इतरोऽपि च' अनतिशयी छद्मस्थः 'लिङ्गैः'-चिह्नैर्वक्ष्यमाणैः उपयुक्तः सन्, नान्यथा, 'तेन' अतिशयिना 'भणितैः' प्रतिपादितैः जानाति । इति गाथार्थः ॥१२॥ कानि पुनस्तानि लिङ्गानि ? इत्याह—

**पावं न तिव्वभावा कुणइ, ण बहुमण्णई भवं घोरं ।**
**उचियट्ठिइं च सेवइ सव्वत्थ वि अपुणबंधो त्ति ॥१३॥**

'पापम्'-असदनुष्ठानं 'न तीव्रभावेन करोति, करोति च तथाविध-कर्मदोषेण । तथा न बहुमन्यते चित्तप्रीत्या 'भवं घोरं' भवन्त्यस्मिन् कर्मपरिणामवशवर्तिनः प्राणिन इति भवः-संसारस्तं रौद्रम् । तथा 'उचितस्थितिं च' उचितव्यवस्थां च 'सेवते' भजते 'सर्वत्रापि' धर्मादौ मार्गानुसारित्वाभिमुख्येन मयूरशिशुदृष्टान्ताद् 'अपुनर्बन्धक इति' एवम्-एवम्भूतोऽपुनर्बन्धकोऽभिधीयते इति गाथार्थः ॥१३॥ सम्यग्दृष्टिलिङ्गाभिधित्सयाऽऽह—

**सुस्सूस धम्मराओ गुरु-देवाण जहासमाहीए ।**
**वेयावच्चे णियमो सम्मद्दिट्ठिस्स लिंगाइं ॥१४॥**

'शुश्रूषा' श्रोतुमिच्छा धर्मशास्त्रेषु, गेयरागिकिन्नरगेयशुश्रूषाधिका । तथा 'धर्मरागः' धर्माभिष्वङ्गः, सामग्रीवैकल्या [त् त]दकरणेऽपि चेतसोऽनुबन्धः, दरिद्रब्राह्मणविशेषहविःपूर्णरागसमधिकः । तथा 'गुरु-देवानां'-चैत्य-साधूनां 'यथासमाधिना' शक्त्याद्यनुरूपम्, नासद्ग्रहेण, किम् ? इत्याह-'वैयावृत्त्ये' व्यावृत्तभावे नियमः, गुणज्ञश्राद्धचिन्तामणिवैयावृत्त्यनियमाभ्यधिकः करोत्ये-वैतदित्यर्थः । सम्यग्दृष्टेः 'लिङ्गानि'-चिह्नानि, ग्रन्थिभेदेन तत्त्वे तीव्रभावात् । इति गाथार्थः ॥१४॥ चारित्रिलिङ्गान्याह—

**मग्गणुसारी सद्धो पण्णवणिज्जो कियापरो चेव ।**
**गुणरागी सक्कारंभसंगओ तह य चारित्ती ॥१५॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'मार्गानुसारी', चारित्रमोहनीयकर्मक्षयोपशमयोगात्, अस्य च तत्त्वावाप्तिं प्रत्यवन्ध्यकारणत्वात्, कान्तारगतविवक्षितपुरप्राप्तिसद्योगतासमेतान्धवत् । तथा 'श्राद्धः'- तत्त्वं प्रति तत्प्रत्यनीकक्लेशह्रासातिशयात्, सन्निध्यवाप्तिप्रवृत्त-तद्भोक्तृतद्गतविधिश्राद्धवत्, अनेनोत्तरयोगः पापयोगप्रतिबन्धकापगमहेतु-रित्येतदाह । तथा 'प्रज्ञापनीयः' अत एव कारणद्वयात् सन्निध्यवाप्तिप्रवृत्त-तद्भोक्तृतद्गतविधिश्राद्धाप्तप्रज्ञापकवत्, सच्छ्रद्धाफलोपदर्शनार्थमेतत् । तथा क्रियापरश्चैव, उक्तलक्षणादेव हेतोः, अनेन मार्गानुसारित्वस्य निजं कार्यमाह । उक्तं चान्यैरपि—

*ऊर्ध्वाऽधःसमाधिफलः सास्रवः समाधिः, न चास्य योगतो भेदः इति।*

एवं योगस्यानुषङ्गतो निजफलविधिमभिधाय लिङ्गान्तरमाह–गुणरागी, विशुद्धाशयत्वात् तथा शक्त्या( ? क्या)रम्भसङ्गतः, वन्ध्यारम्भभावनिवृत्तेः । 'तथा च चारित्री' तथा चारित्री च एवंविधो भवति । इति गाथार्थः ॥१५॥

अयं च चारित्री देश-सर्वचारित्रभेदादनेकविध इत्यत आह—

**एसो सामाइयसुद्धिभेयओ णेगहा मुणेयव्वो ।**
**आणापरिणइभेया अंते जा वीयरागो त्ति ॥१६॥**

'एषः'-चारित्री 'सामायिकशुद्धिभेदतः'-इत्वरेतराङ्गीकरणेन 'अनेकधा' अनेकप्रकारो मन्तव्यः । सामायिकादिप्रतिमानुक्रमेण गृही, तथा सामायिक-च्छेदोपस्थाप्यादिक्रमेणानगारः । कथम् ? इत्याह—आज्ञापरिणतिभेदात्, न मौनीन्द्रवचनपरिणतेरन्यत् शुद्धिकारणमिति कृत्वा । अन्ते यावत् सर्वभेदानां वीतरागः । तत्रापि क्षायिकवीतरागः । इति गाथार्थः ॥१६॥

सामायिकस्यैकरूपत्वात् कथं शुद्धिः ? इत्याशङ्कापोहायाह—

**पडिसिद्धेसु अ देसे विहिएसु य ईसिरागभावे वि ।**
**सामाइयं असुद्धं सुद्धं समयाए दोसुं पि ॥१७॥**[१]

'प्रतिषिद्धेषु'-प्राणातिपातादिषु हेयेषु 'अ(च)द्वेषे'-अ(च)मत्सरे, 'विहितेषु च' तपोज्ञानादिषु ईषद्-मनाग् रागभावेऽपि औत्सुक्यकरणेन ।

१. द्रष्टव्यं स्थानांगे पृ. ३७८

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किम् ? इत्याह— 'सामायिकं'-समभावलक्षणं तात्त्विकम् 'अशुद्धं'-क्षयोपशमवैचित्र्यान्मलिनम् ।'शुद्धं'-निर्मलं यथावस्थितं 'समतया'-मध्यस्थतया 'द्वयोरपि' विहित-प्रतिषिद्धयोः समतृणमणि-मुक्ता-लेष्टु-काञ्चनसमशत्रु-मित्रभावरूपत्वादस्य ।इति गाथार्थः ॥१७॥ यथैतदेवं भवति तथाऽभिधातुमाह—

**एयं विसेसणाणा आवरणावगमभेयओ चेव ।**
**इय दट्ठव्वं पढमं भूसणठाणाइपत्तिसमं ॥१८॥**

'एतत्' शुद्धं सामायिकं 'विशेषज्ञानात्' तात्त्विकाद् हेयोपादेयविषयाद् अहिदष्टाङ्गच्छेदाद्युदाहरणतोऽभिष्वङ्गविषत्यागसंवेदनादिगर्भाद् विहितमिति, एकान्तानभिष्वङ्गानुष्ठानं क्रियमाणं श्रेयः, *"तत्त्वाभिष्वङ्गस्यापि तत्त्वतोऽतत्त्वत्वाद् वस्त्रादिशुद्धिविधावञ्जनकल्पत्वाद् धर्मरागादपि मुनिरमुनिः"* इत्यन्यैरप्यभिधानात् । अनेन रूपेण तत्कात्स्र्न्यानाराधनात्, भगवति गौतम-प्रतिबन्धो ज्ञातमप्यत्रेति, एवमादेर्विशिष्टश्रुतसमुत्थात् । एतच्च प्रायः सर्वेषां चतुर्दशपूर्वधरादीनामित्यत आह—आवरणापगमभेदतश्चैव, चारित्रमोह-नीयावरणापगमविशेषाच्चेति भावः । किम् ? इत्याह—'इति द्रष्टव्यम्' एतत् सामायिकं शुद्धमेवं द्रष्टव्यम्, परमार्थत उभयभाववृद्ध्या तात्त्विकमिति । यद्येवं माषतुषादीनामादौ कथमेतत् ? इत्याह-'प्रथमं' सामायिकं छेदोपस्था-प्यादिकण्डकाधोवर्ति । किम् ? इत्याह-'भूषणस्थानादिप्राप्तिसमं' रत्नालङ्कारकरण्डकप्राप्तितुल्यम्, आदिशब्दाद् हिरण्य-वसनादिप्राप्तिपरिग्रहः । अत्र हि न किञ्चित् तत्तदन्तर्यत्नावाप्तमोघेन, अथ च कालान्तरेणोपायतः तद्विशेषावाप्तिः । एवमोघतोऽपि सामायिकावाप्तौ विशिष्टक्षयोपशमभावतस्त-थाऽवन्ध्यबीजभावत्वेन कालोपायान्तरापेक्षायामपि तत्त्वतस्तद्भेदावाप्तिसिद्धिः, अन्यथा सामायिकसामग्र्याऽयोगात्, सर्वथा सर्वभावसमतायां आदित एव वीतरागत्वप्राप्तेः कर्मणस्तत्र परमार्थतोऽकिञ्चित्करत्वात्, किञ्चित्करत्वे तु नोक्तन्यायातिरेकेण समग्रताऽस्येति परिभावनीयम् । तथाऽन्यैरप्युक्तम् — *"सम्भृतसुगुप्तरत्नकरण्डक-प्राप्तितुल्या हि भिक्षवः ! प्रथमसद्धर्मस्थाना-वाप्तिः"* इति गाथार्थः ॥१८॥

यद्येवं समभावलक्षणं सामायिकं कथं तद्वतः क्वचित् क्रिया ?

Jain Education International　For Personal & Private Use Only　www.jainelibrary.org

इत्यत्राह–

**किरिया उ दंडजोगेण चक्कभमणं व होइ एयस्स ।**
**आणाजोगा पुव्वाणुवेहओ चेव णवरं ति ॥१९॥**

क्रिया पुनः क्वचिद् भिक्षाटनादौ प्रवृत्तिरूपा दण्डयोगेन चक्रभ्रमणवद् भवति 'एतस्य' सामायिकवतः आज्ञायोगात्, यथेह चक्रमचेतनत्वाद् राग-द्वेषरहितं भ्रमणा-ऽभ्रमणयोस्तुल्यवृत्ति दण्डयोगाद् भ्रमति एवमयं सामायिकवांस्तथाक्लिष्टकर्मविगमाद् विशुद्धभावयोगेन भिक्षाटना-ऽनटनयोः समवृत्तिरेवाज्ञायोगादटतीति हृदयम् । 'प्रवृत्तावाज्ञायोगेन तथाक्रियायामपि तद्योगे तु द्रव्यत्वप्रसङ्गात्, एकदोपयोगद्वयाभावात्, वीतरागस्य वा तद्योगात् क्षायिकज्ञानोपपत्तेः, आज्ञायोगस्य च क्षायोपशमिकत्वाद् न युक्तिमदटनादीति विभ्रमापोहायोपचयमाह–'पूर्वानुवेधतश्चैव'—दण्डयोगाभावेऽपि तत्सामर्थ्य-विशेषतश्चक्रभ्रमणवदेवाऽऽज्ञायोगाभावेऽपि तत्पूर्वानुवेधत एवाटनादि नवरमिति, एवं न कश्चिद् दोषः । इति गाथार्थः ॥१९॥

यत एतदेवं अत एव मुनिरेवंविध उक्त इत्याह—

**वासी-चंदणकप्पो समसुहदुक्खो मुणी समक्खाओ ।**
**भव-मोक्खापडिबद्धो अओ य पाएण सत्थेसु ॥२०॥**

'वासी-चन्दनकल्पः' मध्यस्थः । "एकान्तसत्त्वहितः" इत्यन्ये, बाह्यापेक्षमेतत् । तथा समसुख-दुःखः, माध्यस्थ्येनोपयोगात्, सर्वत्र राग-द्वेषजयात्, आन्तरापेक्षमेतत् । मुनिः समाख्यातः एवम्भूतः । तथा भवमोक्षाप्रतिबद्धः, इच्छाऽभावात्, "केवलित्वात्" इत्यन्ये । अत एव कारणाद् यथोक्तसामायिकयोगेन 'प्रायः' बाहुल्येन 'शास्त्रेषु' षष्टितन्त्रादिषु । तथा चोक्तम्—

*औदासीन्यं तु सर्वत्र त्याज्योपादानहानितः ।*
*वासी-चन्दनकल्पानां वैराग्यं नाम कथ्यते ॥"*

तथा—

*"वासी-चन्दनकल्पत्वं या कल्याणैकशीलता ।*
*चन्दनच्छेददृष्टान्तात् सद्धर्मातिशयान्मुने ! ॥"*

Jain Education International For Personal & Private Use Only www.jainelibrary.org

*"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।*
*वीतलोभ-भय-क्रोधः स्थिरधीर्मुनिरुच्यते ॥"*

[भगवद्गीता-५६]

*"मोक्षे भवे च सर्वत्र निस्पृहोऽयं सदाशयः ।*
*प्रकृत्यभ्यासयोगेन तथाशुद्धेर्नियोगतः ॥"*
*मोहादिच्छा स्पृहा चेयममोहश्च मुनि र्यतः ।*
*तत्रास्येयं क्वचिन्याय्या तत्प्राप्तिस्तु क्रियाफलम् ॥"*

इति गाथार्थः ॥२०॥

एवमेतानभिधाय सर्वेष्वेवैतेषु प्रकृतयोजनामाह—

**एएसिं णियणियभूमियाए उचियं जमेत्थऽणुट्ठाणं ।**
**आणामयसंयुत्तं तं सव्वं चेव योगो त्ति ॥२१॥**

"एतेषाम्"-अपुनर्बन्धकादीनां वीतरागान्तानां 'निजनिजभूमिकायाः'-तथाविधदशाया उचितं यदत्रानुष्ठानं तीव्रभावे पापाकरणादिवीतरागकल्पान्तम् । किंविशिष्टम् ? इत्याह—आज्ञामृतसंयुक्तम्, तथाविधकर्मपरिणतेरेव भावतस्तत्सिद्धेः । "तथाविधकर्मपरिणतिरेवाज्ञामृतसंयोगोऽन्तरङ्गमङ्गम्, बाह्याज्ञायोगस्यापि तन्निबन्धनत्वात्" इति विद्वत्प्रवादः । ततः किम् ? इत्यत आह तदनुष्ठानं सर्वमेव परमार्थमधिकृत्य योगः । इति गाथार्थः ॥२१॥

एतत्प्रकटनायैवाह—

**तल्लखणयोगाओ उ चित्तवित्तीणिरोहओ चेव ।**
**तह कुसलपवित्तीए मोक्खेण उ जोयणाओ त्ति ॥२२॥**

'तल्लक्षणयोगादेव'-उचितानुष्ठानत्वेन योगलक्षणयोगादेव, "सर्वत्रोचितानुष्ठानं योगः" इति तल्लक्षणोपपत्तेः । तथा चित्तवृत्तिनिरोधतश्चैव सर्वत्र यथासम्भवम्, योगलक्षणं चैतन्मुख्यम्, *'योगश्चित्तवृत्तिनिरोधः'* इति वचनात् । उभयत्रान्वर्थयोजनयोपसंहारः ।'तथा कुशलप्रवृत्त्या' तेन प्रकारेण कुशलप्रवृत्त्या हेतुभूतया मोक्षेण सह योजनात् कारणात् । अत एव प्रवृत्तिनिमित्ताद् योगः । इति गाथार्थः ॥२२॥

यद्यप्येतदेवं क्वचित् तथाप्येतानेवाधिकृत्य प्रायोगतं विधिमभिधातुमाह—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एएसिं पि य पायं बज्झाणायोगओ उ उचियम्मि ।**
**अणुठाणम्मि पवित्ती जायइ तहसुपरिसुद्ध त्ति ॥२३॥**

'एतेषामपि च' अपनुर्बन्धकादीनां तथाविधकर्मपरिणतिसमन्वितानामपि 'प्रायः'-बाहुल्येन 'बाह्याज्ञायोगत एव'-जिनवचनोपदेशलक्षणाद् 'उचिते' तीव्रभावेन पापाकरणादौ अनुष्ठाने प्रवृत्तिर्जायते चित्राऽनाभोगनिवृत्त्या तथा सुपरिशुद्धा दार्ढ्येन भगवद्बहुमानतः । इति गाथार्थः ॥२३॥

यत एवमतः किम् ? इत्याह—

**गुरुणा लिंगेहिं तओ एएसिं भूमिगं मुणेऊण ।**
**उवएसो दायव्वो जहोचियं ओसहाऽऽहरणा ॥२४॥**

'गुरुणा'-अन्वर्थव्यवस्थितशब्दार्थेन, गृणाति शास्त्रार्थमिति गुरुरित्यन्वर्थः । 'लिङ्गैः'-प्रागुपदिष्टैः तीव्रभावेन पापाकरणादिभिः । 'ततः-तस्मात् कारणात् यस्मादनन्तरोदितगाथोक्तं तथेति । 'एतेषाम्'-अपुनर्बन्धकादीनां 'भूमिकां'-तत्तद्धर्मस्थानयोग्यतारूपां मत्वा, किम् ? इत्याह-उपदेशो दातव्यः, प्रक्रमात् धर्मविषयः । कथम् ? इत्याह-'यथोचतिम्' इति क्रियाविशेषणम्-औचित्यापेक्षया । 'औषधोदाहरणात्' इति औषधोदाहरणेन यथेदं सदपि व्याध्याद्यपेक्षया मात्रादिना च दीयते, ततोऽन्यथा दोषभावात् । इति गाथार्थः ॥२४॥ साम्प्रतं यथा दातव्यस्तथा लेशत आह—

**पढमस्स लोगधम्मे परपीडावज्जणाइ ओहेणं ।**
**गुरु-देवा-ऽतिहिपूयाइ दीणदाणाइ अहिगिच्च ॥२५॥**

'प्रथमस्य'-अपुनर्बन्धकस्य 'लोकधर्मे'-लोकधर्मविषयः परपीडा-वर्जनाद्यधिकृत्येति योगः । परपीडा न कर्तव्या सत्यं वक्तव्यमित्यादि 'ओघेन'-सामान्येन, न विक्षेपणि( ?णी)कथाविशेषेण । तथा गुरु-देवा-ऽतिथिपूजाद्यधिकृत्य । तद्यथा—गुरुपूजा कर्तव्या, देवपूजा कर्तव्या, अतिथिपूजा कर्तव्या, आदिशब्दात् सत्कार-सम्मानपरिग्रहः । तथा दीनदानादि चाधिकृत्योपदेशो दातव्यः-दीनेभ्यो देयम्, तपस्विभ्यो देयम्, आदिशब्दाद् रात्रिभोजनादि परिहर्तव्यम् । इति गाथार्थः ॥२५॥ किमित्येतदेवम् ? इत्याह—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवं चिय अवयारो जायइ मग्गम्मि हंदि एयस्स ।**
**रण्णे पहपब्भट्ठोऽवट्टाए वट्टमोयरइ ॥२६॥**

'एवमेव'-उक्तेनैव प्रकारेण अवतारो जायते 'मार्गे'—सम्यग्दर्शनादि-लक्षणे । 'हन्दि' इत्युपप्रदर्शने । 'एतस्य'-अपुनर्बन्धकस्य, विक्षेपाभावाद् गुणमात्ररागभावाद् विशिष्टबुद्ध्यभावाच्चेति । अत्रैव निदर्शनमाह-'अरण्ये' कान्तारे 'पथप्रभ्रष्टः-' मार्गच्युतः अवर्तन्या व्यवहारतः वर्तनीमवतरति व्यवहारतः एव, निश्चयतस्तु साऽपि वर्तन्येव, तया तथा तदवतरणात् । अत एवोक्तम्—"आभिप्रायिकी योगिनां धर्मदेशना, उपेयसाधनत्वे उपायस्य तत्त्वात्" । तथा—"*अचर्यैव चर्या बोधिसत्त्वानाम्, लक्षवेधिनोऽवन्ध्यचेष्टा ह्येते*" । एवं च—

[1]"*सर्वदेवान् नमस्यन्ति नैकं देवं समाश्रिताः ।*
*जितेन्द्रिया जितक्रोधा* [2]*दुर्गाण्यपि तरन्ति ते ॥ [योगबिन्दु-११८]*"

एवमाद्यपि वीतरागे नमस्करणं प्रत्यप्रवृत्तस्य प्रवर्तकत्वात् चारिचरक-सञ्जीवन्यचरकचारणन्यायेनादुष्टमेव । इति गाथार्थः ॥२६॥

**बीयस्स उ लोगुत्तरधम्मम्मि अणुव्वयाइ अहिगिच्चि ।**
**परिसुद्धाणायोगा तस्स तहाभावमासज्ज ॥२७॥**

'द्वितीयस्य पुनः' उपन्यासक्रमप्रामाण्यात् सम्यग्दृष्टेः 'लोकोत्तरधर्मे'-लोकोत्तरधर्मविषयः 'अणुव्रताद्यधिकृत्य'-अणुव्रत-गुणव्रत-शिक्षापदान्याश्रित्य, उपदेशो दातव्य इति वर्तते । कथम् ? इत्याह—'परिशुद्धाज्ञायोगात्'-त्रिकोटिपरिशुद्धाज्ञानुसारेणेति भावः 'तस्य'-श्रोतुः 'तथाभावमासाद्य'-अभिप्रायं ज्ञात्वा यद् यत् परिणमति । इति गाथार्थः ॥२७॥

अथ किमर्थं सुप्रसिद्धमादौ साधुधर्मोपदेशमुल्लङ्घ्यास्य श्रावक-धर्मोपदेशः ? इत्याह—

**तस्साऽसण्णत्तणओ तम्मि दढं पक्खवायजोगाओ ।**
**सिग्घं परिणामाओ सम्मं परिपालणाओ य ॥२८॥**

---

१. सर्वान् देवान् इति योगबिन्दौ ॥ २. 'ण्यतितर' योगबिन्दौ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'तस्य'-श्रावकधर्मस्य 'आसन्नत्वाद्'-गुणस्थानकक्रमेण भावप्रतिपत्तिं प्रति प्रत्यासन्नः, यथोक्तम्-*"सम्मत्तम्मि उ लद्धे पलियपुहत्तेण"* [विशेषा.-१२२२] इत्यादि, अत एव कारणात् 'तस्मिन्'-श्रावकधर्मे 'दृढम्'-अत्यर्थं 'पक्षपातयोगात्' आसन्ने हि भावतस्तत्सद्भावसम्भवेन पक्षपातभावात् । अत एव कारणात् 'शीघ्रं' तूर्णं 'परिणामात्'-क्रियया परिणमनात्, तत्पक्षपाते तद्भावापत्तिरिति कृत्वा । तथा 'सम्यग्'-यथासूत्रं 'परिपालनातश्च' परिणतिगुणेनेति । सुप्रसिद्धत्वं चाऽऽदौ साधुधर्मोपदेशस्याणुव्रतादिप्रदान-कालविषयम्, अन्यथोक्तविपर्यये दोषः ।

इति गाथार्थः ॥२८॥

**तइयस्स पुण विचित्तो तहुत्तरसुजोगसाहगो णेओ ।**
**सामाइयाइविसओ णयणिउणं भावसारो त्ति ॥२९॥**

'तृतीयस्य पुनः'-उपन्यासक्रमप्रामाण्यादेव चारित्रिणः, प्रक्रमाद् देशचारित्रिणः श्रावकस्य 'विचित्रः'-नानाप्रकारः [1]तदपान्तरालभूमिकापेक्षया 'तथा'-तेन प्रकारेण उत्तरसुयोगसाधको ज्ञेय उपदेशः । उत्तराः सुयोगाः तद्भूमिकानुक्रमागता एव प्रतिमानुरूपेण । साध्यमाह—'सामायिकादिविषयः'-अर्थनीत्या सामायिकच्छेदोपस्थाप्यादिगोचरः "प्रासादविषयः तन्मूल-पादशोधनादि" न्यायेन । कथं दातव्योऽयमुपदेशः ? इत्याह—"णयणिपुणं" इति क्रियाविशेषणम्, सद्भावानयनहेतुराक्षेपणादिरूपः प्रकार इह नयः, तन्निपुणम्, 'भावसारः'-स्वतो वासितेनान्तःकरणेन संवेगसारः, प्रायशो भावाद् भावप्रसूतेः । इति गाथार्थः ॥२९॥ एतदुपदर्शनायाऽऽह—

**सद्धम्माणुवरोहा वित्ती दाणं च तेण सुविसुद्धं ।**
**जिणपुय-भोयणविही संझाणियमो य जोगंतो ॥३०॥**

सद्धर्मानुपरोधाद् भूमिकौचित्येन, तद्यथा-अणुव्रतधरस्य तावत् कर्मादानत्यागेन 'वृत्तिः'-वर्तनमित्यर्थः । दानं च 'तेन सुविशुद्धं'-सद्धर्मेणैव शक्तितः श्रद्धासत्कार-काल-मतिविशेषाकामादिविषयैणवृत्यनत्यनन्तरं (?)

१. कापेक्षाया प्रतौ

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नित्यमेतद् गृहिण इति ज्ञापनार्थमेतत् । तथा 'जिनपूजा-भोजनविधिः' जिनपूजाविधिः भोजनविधिश्च, तद्यथा-"द्रव्य-भावशुचित्वम्, कालाभिग्रहः, सन्माल्यादीनि, व्यूहे प्रयत्नः, कण्ड्वाद्यतिसहनम्, तदेकाग्रता, सत्स्तवपाठः, विधिवन्दनम्, कुशलप्रणिधानमिति । तथा-उचितदानक्रियाभावे नियोगः, कीटिकाज्ञातम्, परिग्रहेक्षा, औचित्येन वर्तनम्, स्थानोपवेशः, नियमे स्मृतिः, अधिकक्रिया, व्रणलेपवद् भोगाः" इति । तथा 'सन्ध्यानियमश्च'-चैत्यगृहगमनादिः 'योगान्तः'-चित्रभावनावसानः । इति गाथार्थः ॥३०॥ न गृहिणो योगसम्भवः इत्याशङ्कापोहायाह—

**चिइवंदण जइविस्सामणा य सवणं च धम्मविसयं ति ।**
**गिहिणो इमो वि जोगो, किं पुण जो भावणामग्गो ? ॥३१॥**

'चैत्यवन्दनं'-"भुवनगुरुरयं वन्दनीयः सताम्, एतदेव सत् तत्त्वम्, सैषा गुणज्ञता, महाकल्याणमेतत्, दुःखाचलवज्रम्, सुखकल्पपादपः, जीवनलोकसारः, दुर्लभानां शेखरः एतच्चैत्यवन्दम्" इति समुल्लसदसमसम्मदामोदम् । तथा 'यतिविश्रामणा च'-'चारित्रिण एते एतदुद्यता इति नातः परं कृत्यम्, प्रकर्षोऽयं गुणानाम्, रक्ष्य एष काय आत्मनो नियोगेन, तदुत्सर्पणोऽयम्, बीजमेतद् भावस्य, महावीर्यमेतत्, उचिता विश्रामणा' इति महाविवेकसारसंवेगसारता । तथा 'श्रवणं धर्मविषयमिति'-'उत्तमः श्रुतधर्मः, मोहतमोरविः, पापवध्यपटहः, प्रकर्षः श्रव्याणाम्, सेतुः सुरलोकस्य, भावामृतमयम्, देशकः शिवगतेः, जिनभावबीजम्, अभिव्यक्तो जिनेन, नातः परं कल्याणम्' इति । विशिष्टशुश्रूषया 'गृहिणः'-श्रावकस्य 'एषोऽपि अनन्तरोदितव्यापारः 'योगः'-अन्वर्थयोगाद् मोक्षेण योजनात् । किं पुनर्यो भावनामार्गः ? स बन्धुः परमध्यानस्य, स योग एव, अनुष्ठेयश्चायं श्रावकेण, तथा पुण्यदेशे सङ्क्लेशविघाताय पद्मासनादिना गुरुप्रणामपूर्वमर्थसन्तानेन-'असारो जीवलोक इन्द्रजालतुल्यः, विषकल्पा विषयाः, वज्रसारं दुःखम्, चलाः प्रियसङ्गमाः, अस्थिरा सम्पत्, दारुणः प्रमादः, महादौर्गत्यहेतुः, दुर्लभं मानुष्यं महाधर्मसाधनम् इति अलं ममान्येन, करोम्यत्र यत्नम्, न युक्ता(ऽत्रो)पेक्षा, प्रभवति मृत्युः, दुर्लभं दर्शनं सद्गुरुयोगश्च'-इति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रशस्तभावगतेन । एवं चास्ति गृहिणोऽपि योगसम्भव इति । उक्तं च—

*[1]"योजनाद् योग इत्युक्तो मोक्षेण मुनिसत्तमैः।*
*स निवृत्ताधिकारायां प्रकृतौ लेशतो ध्रुवः ॥*
*वेलावलनवन्नद्यास्तदापूरोपसंहृतेः।*
*प्रतिस्रोतोऽनुगत्वेन प्रत्यहं वृद्धि[2]सङ्गतः ॥*
*भिन्नग्रन्थेस्तु यत् प्रायो मोक्षे चित्तं, भवे तनुः ।*
*तस्य तत् सर्व एवेह योगो योगो हि भावतः ॥*
*नार्या यथाऽन्यसक्तायाः तत्र भावे सदा स्थिते ।*
*तद्योगः पापबन्धश्च तथा मोक्षेऽस्य दृश्यताम् ॥*
*न चेह ग्रन्थिभेदेन पश्यतो भावमुत्तमम् ।*
*इतरेणाऽऽकुलस्यापि तत्र चित्तं न जायते ॥"*

*[योगबिन्दु-२०१-५]*

*"सांसिद्धिकमनुष्ठानमत एव सतां मतम् ।*
*भावाढ्यं स्तोकमप्येतत् प्रतिबन्धविशेषतः ॥*
*अस्यापि तत्त्वतः सर्वमेतदेवंविधं यतः ।*
*नित्यकर्मनियोगेन ततो योग इति स्थितम् ॥"*

इति गाथार्थः ॥३१॥ अपान्तरालाधिकारोपसंहारमाह—

**एमाइवत्थुविसओ गिहीण उवएस मो मुणेयव्वो ।**
**जइणो उण उवएसो सामायारी जहा सव्वा ॥३२॥**

एवमादिवस्तुविषयः, आदिशब्दात् तत्प्रकृत्यपेक्षया अन्योऽपि व्रतसम्भवादिसूक्ष्मपदार्थालम्बनो गृह्यते । 'गृहिणां'-श्रावकाणामुपदेशो मन्तव्यः, उक्तहेतुभ्योऽस्य साफल्योपपत्तेः । अधुना सर्वचारित्रिणमधिकृत्याह—'यतेः पुनः'-प्रव्रजितस्य पुनः भावत उपदेशः कः ? इत्याह—'सामाचारी'-शिष्टाचरितक्रियाकलापरूपा भवति सर्वा 'यथाकर्मक्षयोपशमयोग्यतापेक्षया । इति गाथार्थः ॥३२॥ एनामधिकृत्याह—

---

१. इदं पद्यपञ्चकं गोपेन्द्रयोगशास्त्रगतमिति श्रीहरिभद्रपादैर्योगबिन्दावुक्तम् २. 'संयुतः' योगबिन्दौ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**गुरुकुलवासो गुरुतंतयाय उचियविणयस्स करणं च ।**
**वसहीपमज्जणाइसु जत्तो तह कालवेक्खाए ॥३३॥**

गुरुकुलवासो मूलगुणो यतेः, *"सुयं मे आउसंतेण"* [आचाराङ्ग १-१] इति वचनप्रामाण्यात् । कथमयमिष्यते ? इत्याह-'गुरुतन्त्रतया'-गुरुपारतन्त्र्येण आत्मप्रदान-सत्यपालनेन । तथा 'उचितविनयस्य'-ज्ञानविनयादेः 'करणं च'-सेवनं च, भगवदाज्ञेति कृत्वा । तथा वसतिप्रमार्जनादिषु क्रियाभेदेषु यत्नः, आदिशब्दाद् उपधिप्रत्युपेक्षणादिग्रहः, तथा कालापेक्षया न तु यदृच्छाप्रवृत्त्या ।

इति गाथार्थः ॥३३॥ तथा—

**अणिगूहणा बलम्मी सव्वत्थ पवत्तणं पसंतीए ।**
**णियलाभचिंतणं सइ अणुग्गहो मे त्ति गुरुवयणे ॥३४॥**

'अनिगूहना'-अप्रच्छादना बले शारीरे औचित्यप्रयोगेण, एतद्धि यदन्यथागतं गतमेव निष्फलमित्येतदालोच्य । तथा 'सर्वत्र'-श्रमणयोगे उपधिप्रत्युपेक्षणादौ प्रवर्तनं प्रशान्त्या, क्षान्त्यादिमन्थरमित्यर्थः । निजलाभचिन्तनं सदा निर्जराफलमङ्गीकृत्य । 'गुरुवचने'-गुर्वाज्ञायामिति सम्बन्धः । कथम् ? इत्याह-'अनुग्रहो ममेति'-यदयमित्थमाह, 'इति' एवम्, दुर्लभाः खलु चित्ररोगाभिभूतानां सदुपदेशदातारः सुवैद्या इत्याद्युदाहरणैः । इति गाथार्थः ॥३४॥ तथा—

**संवरणिच्छिड्डुत्तं सुद्धुंछुज्जीवणं सुपरिसुद्धं ।**
**विहिसज्झाओ मरणादवेक्खणं जइजणुवएसो ॥३५॥**

'संवरनिश्छिद्रत्वं'-आश्रवनिश्छिद्रत्वं यतेरुपदेशः । संवरच्छिद्रं हि गिरिशिखरात् पातालतलपातः । तथा 'शुद्धोञ्छजीवनं'-आधाकर्मादित्यागेन सुपरिशुद्धं, कल्पनीत्यनुसारतः । तथा 'विधिस्वाध्यायः'-विधिना वन्दनादिलक्षणेन वाचनाद्यनुष्ठानम् । तथा 'मरणाद्यपेक्षणं'-मरण-प्रमादजकर्मफलाद्यपेक्षणं 'यतिजनोपदेशः'-इत्ययमेवम्भूतो यतिजनस्यो-पदेशः । इति गाथार्थः ॥३५॥ उपदेशानुपदेशे प्रयोजनमाह—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**उवएसोऽविसयम्मी विसए वि अणीइसो अणुवएसो ।**
**बंधनिमित्तं णियमा जहोइओ पुण भवे जोगो ॥३६॥**

'उपदेशः'-अनन्तरोदितः सामान्येन वा 'अविषये' अपुनर्बन्धकादित्रयादन्यत्र संसाराभिनन्दिनि 'अनुपदेश' इति सम्बन्धः, तत्त्वावबोधादिकार्याकरणाद् विपर्ययसाधनाच्चेति । उक्तं च —

*अप्रशान्तमतौ शास्त्रसद्भावप्रतिपादनम् ।*
*दोषायाभिनवोदीर्णे शमनीयमिव ज्वरे ॥* [लोकतत्त्व-१]

इत्यनुपदेशः । तथा 'विषयेऽपि' अपुनर्बन्धकादौ 'अनीदृशः'-उक्तविपरीतः क्षयोपशमानुगुण्याभावेन 'अनुपदेशः', पुरुषमात्रापुरुषवद् विशिष्टस्वकार्याकरणात् । अयं चैवम्भूत उपदेशोऽनुपदेशः । किम् ? इत्याह—बन्धनिमित्तं नियमात् श्रोत्रऽनिष्टापादनाद् आज्ञाविराधनाच्च, अत इत्थं न कार्यः । 'यथोदितः पुनः' आज्ञापरिशुद्ध्या भवति योगः, मोक्षेण योजनात् । इति गाथार्थः ॥३६॥ एवं सामान्येन उपदेशानुपदेशे प्रयोजनमभिधाय प्रत्यपायपरिजिहीर्षया विशेषतोऽभिधित्सुराह—

**गुरुणो अजोगिजोगो अच्चंतविवागदारुणो णेओ ।**
**जोगीगुणहीलणा णट्ठणासणा धम्मलाघवओ ॥३७॥**

'गुरोः'-आचार्यस्य योगिन इत्यर्थः, 'अयोगियोगः'-अयोगिव्यापारो विपरीतोपदेशादिः अत्यन्तविपाकदारुणो ज्ञेयः- अतिशयेन दारुण इत्यर्थः । कुतः ? इत्याह—योगिगुणहीलनात् कारणात् । एवं हि विडम्बकप्रतिपत्तिन्यायेन तद्गुणा हीलिता भवन्ति । "उत्तमपदस्थस्य तद्धर्माननुपालनमघोषणा विडम्बना" इति वृद्धाः । तथा 'नष्टनाशनात्'-नष्टा एते प्राणिनोऽयोग्यतया विपरीतोपदेशेन नाशिता भवन्ति । तथा 'धर्मलाघवात्' हेतोः विपरीतोपदेशाद्धि तत्त्वाऽप्रतिपत्त्या वितथासेवनेन धर्मलाघवम् । इति गाथार्थः ॥३७॥

एवं सप्रसङ्गमुपदेशविधिमभिधाय एतत्परिणत्युत्तरकालं यत् कार्यं तद्गतं विधिमभिधातुमाह—

**एयम्मि परिणयम्मी पवत्तमाणस्स अहिगठाणेसु ।**
**एस विही अइणिउणं पायं साहारणो णेओ ॥३८॥**



Jain Education International For Personal & Private Use Only www.jainelibrary.org

'एतस्मिन्' उपदेशे परिणते भावप्रतिपत्तिद्वारेण । किम् ? इत्याह– प्रवर्तमानस्य सतः । क्व ? इत्याह–'अधिकस्थानेषु'–औचित्यापेक्षया तदुत्तरोत्तरगुणरूपेषु । किम् इत्याह–'एष विधिः' वक्ष्यमाणलक्षणः 'अतिनिपुणम्' क्रियाविशेषणमेतत् ।'प्रायः'–बाहुल्येन, अपुनर्बन्धकादिव्यवच्छेदार्थमेतत्, अणुव्रतादेरारभ्येति भावः । 'साधारणः'–सामान्यो ज्ञेयः 'अतिनिपुणं' प्रारब्धसिद्ध्यङ्गतया, विपर्यये विपर्ययभावात् । इति गाथार्थः ॥३८॥

किंविशिष्टोऽयं विधिः ? इत्याह–

**नियसहावालोयण-जणवायावगम-जोगसुद्धीहिं ।**
**उचियत्तं णाऊणं निमित्तओ सइ पयट्टेज्जा ॥३९॥**

'निजस्वभावालोचन-जनवादावगम-योगशुद्धिभिः'–करणभूताभिः उचितत्वं ज्ञात्वा तत्तद्गुणस्थानकापेक्षया आत्मनस्ततः 'निमित्ततः'–निमित्तात् कायिकादेः सदा प्रवर्तेत तस्मिंस्तस्मिन् गुणस्थानके इति । तत्र निजस्वभावालोचनम्–'कीदृशो मम स्वभावः ? केन गुणस्थानकेन संवादी विसंवादी वा ?' इत्येवंरूपम्, न हि तत्स्वभावानानुगुण्ये तदङ्गीकरणं श्रेयः, तत्सिद्ध्यसम्भवाद् विडम्बनामात्रत्वात् । तथा जनवादावगमः–'किं जनो मम वक्ति । किं नु गुणस्थानकमङ्गीकृत्य योग्यतां सम्भावयति ?' तत्रैव प्रवृत्तिर्न्याय्या, नेतरत्र, अस्य माननीयत्वात् । तथा योगशुद्धिः काय-मनो-वाग्व्यापारशुद्धिः, ''कीदृशा मम योगाः ? कस्य गुणस्थानकस्य साधकाः ?' न ह्येतत्प्रतिकूलमपि सर्वथा गुणस्थानकं प्रतिपत्तुं न्याय्यम्, ''उपहास्यप्रायमेतद् अनिष्टफलं च'' इत्याचार्याः । अत एभिर्निजस्वभावालोचनादिभिः उचितत्वं ज्ञात्वा निमित्ततः सदा प्रवर्तेत । इति गाथार्थः ॥३९॥ तत्र योगशुद्धिमधिकृत्याह–

**गमणाइएहिं कायं णिरवज्जेहिं, वयं च भणिएहिं ।**
**सुहचिंतणेहि य मणं, सोहेज्जा जोगसुद्धि त्ति ॥४०॥**

'गमनादिभिः' गमना-ऽऽसन-स्थानैः 'कायं'–देहम्, किम्भूतैः ? इत्याह–'निरवद्यैः'–अपापैः वाचं च भणितैर्निरवद्यैरेव । 'शुभचिन्तनैश्च' धर्माऽविरोधिभिः साधकैर्वा मनःशोधयेत् । एषा योगशुद्धिः । तथा मध्यमा–

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दिभेदेन तत्तद्गुणस्थानापेक्षयेत्येवं निजस्वभावालोचनजनवादावगमयोरपि शुद्धिः स्वबुद्ध्या द्रष्टव्या इति गाथार्थः ॥४०॥ इहैव मतान्तरमभिधातुमाह–

**सुहसंठाणा अण्णे कायं, वायं च सुहसरेणं तु ।**
**सुहसुविणेहिं च मणं, जाणेज्जा साहु सुद्धि त्ति ॥४१॥**

'शुभसंस्थानात्' उन्मान–मान–गति–सारादिशुद्धात्, पुरुषलक्षणोपलक्षणमेतत्, 'अन्ये'–तन्त्रान्तरीया एवं मन्यन्ते, कायं तद्योगोचितं जानीयादिति योगः । तथा वाचं च 'शुभस्वरेण' गम्भीर–मधुराऽऽज्ञापकादिभेदभिन्नेन तद्योगोचितां जानीयात् । तथा 'शुभस्वप्नैश्च' शुक्लस्वप्नरूपैः समुद्रनदीह्रदप्रतरणादिभिः सन्ततेतरादिभेदभिन्नैर्मनो जानीयात् । तत्तद्योगौचित्यमङ्गीकृत्येति प्रक्रमः । 'साधु शुद्धिरिति' शोभनैव योगशुद्धिः । इति गाथार्थः ॥४१॥

एतदपि तन्त्रान्तरीयमतं साध्वेव, न ह्यमहापुरुषा योगिनो भवन्ति, योगस्य भावैश्वर्यादेरमहापुरुषाभावतोऽस्य गुरुतरत्वोपपत्तेः, दृश्यन्ते चैवंविधानामेव महापुरुषाणां तदितरमहापुरुषेभ्यो भावसारमनिन्दितप्रतिपत्त्यादीनि । कृतं प्रसङ्गेन । एवं तावदोघत एवौचित्यगतमिह विधिमभिधाय अत्रैव प्रतिपत्तिगतमभिधित्सुराह–

**एत्थ उवाओ य इमो सुहदव्वाइसमवायमासज्ज ।**
**पडिवज्जइ गुणठाणं सुगुरुसमीवम्मि विहिणा तु ॥४२॥**

'अत्र'–औचित्ये सत्यधिकस्थानप्रतिपत्तौ 'उपायश्चायं' साधनप्रकारविशेषः, यदुत शुभं द्रव्यादिसमुदायं–द्रव्य–क्षेत्र–काल–भावसंयोगं 'आश्रित्य' अधिकृत्य प्रतिपद्यते 'गुणस्थानं'–देशसामायिकादि । क्व ? इत्याह– 'सुगुरुसमीपे' तदधिकगुणोपेतविधिज्ञमहापुरुषगुरुसकाशे, प्रायशो भावाद् भावप्रसूतिः, क्वचित् केवलादप्याज्ञाराधनाद् आज्ञासमये कर्मवैचित्र्याद् अङ्गारमर्दककुगुरुशिष्यन्यायेन, अतः सुगुरुसमीपे प्रतिपद्यते इत्ययमुपायः । तथा 'विधिना' तत्रापि वन्दनशुद्ध्यादिलक्षणेन । न हि सुगुरोरविधिरिति विधिसिद्धावपि विधिग्रहणं प्राधान्यख्यापनार्थमदुष्टम् । इति गाथार्थः ॥४२॥

अत एव विशेषतो विधिमभिधातुमाह–

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वंदणमाई उ विही णिमित्तसुद्धी पहाण मो णेओ ।**
**सम्मं अवेक्खियव्वा एसा, इहरा विही ण भवे ॥४३॥**

वन्दनादिः पुनर्विधिः तुलादण्डमध्यग्रहणनीत्या क्षेत्रशुद्धि-तत्सत्कार-जिनपूजारूपः तथा चैत्यवन्दन-तद्वन्दन-निरुद्धादिरूपश्च गृह्यते । अयं च निमित्तशुद्धिप्रधान एव ज्ञेयः, स्व-परगतकायिकादिनिमित्तशुद्धिप्रधान इत्यर्थः । 'भाविन इष्टादेः सूचकानि निमित्तानि' इत्येतच्छुद्धिरपेक्षणीया, अत एवाह-सम्यगपेक्षितव्या 'एषा' निमित्तशुद्धिः । 'इतरथा'-तदनपेक्षायां विधिर्न भवति, आज्ञाविराधनात् । लेशाभिधानमेतत्, अत्र तु विशेषो विशेषग्रन्थानुसारत एव द्रष्टव्यः । सर्वथा नेदं लोकव्यवहारवद् यथाकथञ्चित्प्रतिपन्नं प्रतिपन्नं भवति, किन्तु शास्त्रानुसारत इति शास्त्रमेवानुसरणीयम्, अन्यथा प्रत्यपायभावादिति ।

उक्तं च-*उपदेशं विनाऽप्यर्थ-कामौ प्रति पटुर्जनः ।*
*धर्मस्तु न विना शास्त्रादिति [1]तत्राऽऽदृतो भवेत् ॥*
*अर्थादावविधानेऽपि तदभावः परं नृणाम् ।*
*धर्मेऽविधानतोऽनर्थः क्रियोदाहरणात् परः ॥*
*तस्मात् सदैव [2]धर्मार्थी शास्त्रयत्नपरो भवेत् ।*
*लोके मोहान्धकारेऽस्मिन् शास्त्रालोकः प्रवर्तकः ॥*
*[3]शास्त्रं चिन्तामणिः श्रेष्ठः, शास्त्रं कल्पद्रुमः परम् ।*
*चक्षुः सर्वत्रगं शास्त्रं, शास्त्रं धर्मस्य साधनम् ॥*
*न यस्य भक्तिरेतस्मिंस्तस्य धर्मक्रियाऽपि हि ।*
*अन्धप्रेक्षाक्रियातुल्या कर्मदोषादसत्फला ॥* योगबिन्दुः [२२२-२६]

इति गाथार्थः ॥४३॥ प्रतिपन्नाधिकगुणस्थानकस्य विधिमाह-

**उड्ढं अहिगगुणेहिं तुल्लगुणेहिं च णिच्च संवासो ।**
**तग्गुणठाणोचियकिरियपालणासइसमाउत्तो ॥४४॥**

'ऊर्ध्वम्'-अधिकगुणस्थानप्रतिपत्तेरुत्तरकालं अधिकगुणैस्तुल्यगुणै-

---

१. तत्राऽऽदरो हितः' योगबिन्दौ ॥ २. धर्मार्थी शास्त्रयत्नः प्रशस्यते' इति योगबिन्दौ ॥
३. पापामयौषधंशास्त्रं, शास्त्रं पुण्यनिबन्धनम् । चक्षुः सर्वत्रगं शास्त्रं, शास्त्रं सर्वार्थसाधनम् ॥ इति योगबिन्दौ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्चप्राणिभिरात्मापेक्षया नित्यं संवासः । संवासो नाम औचित्येन तदुपजीवनादिर्निर्जराफलः । तथा 'तद्गुणस्थानोचितक्रियापालनास्मृतिसमायुक्तः'-अस्मिन् गुणस्थानके व्यवस्थितेनेदं चेदं च कर्तव्यमिति स्मृतिसमन्वागतस्तदेव कुर्यात् । इति गाथार्थः ॥४४॥

**उत्तरगुणबहुमाणो सम्मं भवरूवचिंतणं चित्तं ।**
**अरईए अहिगयगुणे तहा तहा जत्तकरणं तु ॥४५॥**

उत्तरगुणबहुमानः, अधिकृतगुणस्थानकापेक्षया उत्तरगुणस्थानकगुणराग इत्यर्थः । तथा 'सम्यग्' वासितेनान्तःकरणेन संवेगक्रियासारं 'भवरूपचिन्तनं' संसारस्वभावालोचनं 'चित्रं'-नानाप्रकारं कर्तव्यम् । तद्यथा-''इह असारं जन्म, आश्रयो जरादीनाम्, व्याप्तं दुःखगणेन, चला विभूतयः, अनवस्थिताः स्नेहाः, दारुणं विषयविषम्, रौद्रः पापकर्मविपाकः पीडाकरोऽनुबन्धेन, मिथ्याविकल्पं सुखम्, सदा प्रवृत्तो मृत्युरिति, न धर्माद् ऋतेऽत्र किञ्चित् कर्तुं न्याय्यम् इत्येवमादि । तथा अरतौ चाधिकृतगुणविषयायां चित्रकर्मोदयेन, किम् ? इत्याह-'तथा तथा'-तेन तेन प्रकारेण भावशरणादिलक्षणेन 'यत्नकरणं तु'-यत्न एव कर्तव्यः । इति गाथार्थः ॥४६॥

किमित्येतदेवम् ? इत्याह-

**अकुसलकम्मोदयपुव्वरूवमेसा जओ समक्खाया ।**
**सो पुण उवायसज्झो पाएण भयाइसु पसिद्धो ॥४६॥**

अकुशलकर्मोदयपूर्वरूपम् 'एषा'-अरतिरधिकृतगुणे यतः समाख्याता भगवद्भिः । यदि नामैवं ततः किम् ? इत्याह-'स पुनः'-अकुशलकर्मोदयः उपायसाध्यः प्रायेण 'भयादिषु' भय-रोग-विषेषु प्रसिद्धः । इति गाथार्थः ॥४६॥ एतदेवाह-

**सरणं भए उवाओ, रोगे किरिया, विसम्मि मंतो त्ति ।**
**एए वि पावकम्मोवक्कमभेया उ तत्तेणं ॥४७॥**

'शरणं' -पुरस्थानादि 'भये'-अन्यसमुत्थपीडारूपे 'उपायः'-प्रक्रमात् तत्प्रत्यनीकः । तथा 'रोगे'-व्याधौ चिरकुष्ठादौ 'क्रिया'-चिकित्सोपायः । तथा 'विषे' -स्थावर-जङ्गमरूपे 'मन्त्रः'-देवताधिष्ठितोऽक्षरन्यासः । इत्युपायः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पूर्ववत् तत्प्रत्यनीक एव । 'एतेऽपि' – शरणादयः 'पापकर्मोपक्रमभेदा एव'– भयमोहनीयादिपापकर्मोपक्रमविशेषा एव 'तत्त्वतः'–परमार्थतः, कारणे कार्योपचारात् । इति गाथार्थः ॥४७॥

एवं दृष्टान्तमभिधाय दार्ष्टान्तिकयोजनामाह–

**सरणं गुरू उ इत्थं, किरिया उ तवो त्ति कम्मरोगंम्मि ।**
**मंतो पुण सज्झाओ मोहविसविणासणो पयडो ॥४८॥**

शरणं गुरुरेव 'अत्र' – कर्मभये । क्रिया तु 'तप इति'–तप एव षष्ठादि, क्व ? इत्याह–'कर्मरोगे' कर्मव्याधौ । मन्त्रः पुनः 'स्वाध्यायः'– वाचनादिः, सामर्थ्याद् विषे । तथा चाह–'मोहविषविनाशनः'–कर्मजनिताज्ञान–विषविनाशनः 'प्रकटः'–अनुभवसिद्धः । इति गाथार्थः ॥४८॥

[प्रक्रान्तासेवनाफलमाह]

**एएसु जत्तकरणा तस्सोवक्कमणभावओ पायं ।**
**नो होइ पच्चवाओ, अवि य गुणो, एस परमत्थो ॥४९॥**

'एतेषु'–अधिकृतशरणादिषु यत्नकरणादाज्ञानुसारेण 'तस्य'–प्रक्रमाद–धिकृतारतिनिबन्धनस्य कर्मणः 'उपक्रमणभावतः'–उपक्रमणस्वभावत्वात् 'प्रायः' बाहुल्येन, निरुपक्रमाकुशलकर्मभावे तु प्रायो गुणस्थानाप्त्यभावाद्, न भवति प्रत्यपायोऽधिकृतारतिसमुत्थः, अपि च गुणस्तदन्योपक्रमणानुबन्धच्छेदादिना, एष परमार्थः, अन्यथा पुरुषकारवैयर्थ्यादिति ।

आह–पुरुषकारेण तर्ह्युपक्रम्यते, एवं च कृता(त)नाशाऽकृताभ्यागम–प्रसङ्ग अन्यथा वेदनीयस्वभावस्यान्यथावेदनात्, तथावेदनीयस्वभावत्वे त्वस्य पुरुषकारवैयर्थ्ये तस्यैव तथास्वभावत्वेनास्य तेनैवाक्षेपादिति ।

उच्यते–यत्किञ्चिदेतत्, अभिप्रायाऽपरिज्ञानात् । अनियतस्वभावं हि कर्म सोपक्रमम्, तदेव च पुरुषकारविषय इत्युक्तदोषाभावः । एतच्च दार्वादौ प्रतिमादियोग्यताकल्पम्, तथाप्रमाणोपपत्तेः । न हि योग्यान्नियमेन प्रतिमादि, न च तदभावे सति अयोग्यमेतत्, तल्लक्षणविलक्षणत्वात्, तथाप्रतीतेः सकललोकप्रसिद्धत्वात् । प्रतिमादिकल्पश्च पुरुषकार इति भावनीयम् । न च दार्वेव प्रतिमाक्षेपकमिति न्याय्यम्, सर्वत्र तत्प्राप्तेः, योग्यस्यापि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वाऽयोग्यत्वप्रसङ्गात्; तद्भेदस्य च नैश्चयिकस्यालौकिकत्वात् । लौकिकत्वेऽपि तथाविधयोग्यताभेदात्, तथाविधयोग्यतातुल्यं च कर्मणोऽनियतस्वभावत्वम् । किञ्च-कर्मापि पुरुषकाराक्षेपकं तत्स्वभावतयैव, एवमेव पुरुषस्य तदुपक्रामणस्वभावतायां को दोषः ? पारम्पर्यतस्तथाभावस्योभयत्र तुल्यत्वात् अत इह उभयतथाभावो न्याय्यः, कर्तृ-कर्मणोरुभयतथाभावतायां सर्वत्रेष्टफलसिद्धेः, अन्यथायोगादतिप्रसङ्गादिति । एवमुभयजेपि तत्त्वे तदुदग्रतादिरूपतत्प्राधान्यादिनिबन्धना कर्म-पुरुषकारव्यवस्थेति सूक्ष्मधियाऽऽ-लोचनीयम् । निर्लोठिंत चैतद् **उपदेशमालादिष्विति** नेह प्रयत्यते । इति गाथार्थः ॥४९॥ प्रस्तुतार्थसाधकमेव विधिमभिधातुमाह-

**चउसरणगमण दुक्कडगरहा सुकडाणुमोयणा चेव ।**
**एस गणो अणवरयं कायव्वो कुसलहेउ त्ति ॥५०॥**

'चतुःशरणगमनम्'-अर्हत्-सिद्ध-साधु-केवलिप्रज्ञप्तधर्मशरणगमनम्, आचार्योपाध्याययोः साधुष्वेवान्तर्भावात्, केवलिप्रज्ञप्तधर्मस्य चानादित्वेन पृथगुपादानात् । न ह्यतश्चतुष्टयादन्यच्छरण्यमस्ति, गुणाधिकस्य शरण्यत्वात्, गुणाधिकत्वेनैव ततो रक्षोपपत्तेः, रक्षा चेह तत्तत्स्वभावतया एवाभिध्यानतः-क्लिष्टकर्मविगमेन शान्तिरिति । तथा 'दुष्कृतगर्हा'-अनादावपि संसारेऽ-नाभोगादिना प्रकारेण कायादिभिः करणभूतैः यानि दुष्कृतानि अर्हत्-सिद्धादिसमक्षं संवेगापन्नेन चेतसा तेषां जुगुप्सेत्यर्थः । भवत्यतस्तद्धेयत्वभावनया अनुबन्धादिव्यवच्छेदः, शोभनश्चायं महानर्थनिवृत्तेरिति । तथा सुकृतानुमोदना चैव, सकलसत्त्वसङ्गतं मोक्षानुकूलं यदनुष्ठानं अनेकभेदभिन्नं तस्य महता पक्षपातेन स्वभावचिन्तासारा प्रशंसेति भावः, तदुपादेयतायां तद्बहुमानविशेषे नियोगत इयम्, नान्यथा । एवं च महदेतत् कल्याणाङ्गं वनच्छेत्तृ-बलदेव-मृगोदाहरणेन सुप्रसिद्धमेवेति । 'एष गणः'-चतुःशरणगमनादिः सर्व एव 'अनवरतं' - प्रायः सर्वकालमेव 'कर्तव्यः' - अनुष्ठेयः, भावनीय इति यावत्, 'कुशलहेतुः'-अपायपरिहारेण कल्याणहेतुरिति कृत्वा । तथा च महती गम्भीरा चास्य कुशलहेतुता, भ(भा)वसारतया तत्त्वमार्गप्रवेशात् । परिभावनीयमेतदचिन्त्यचिन्तामणिकल्पं भावधर्मस्थानम् । इति गाथार्थः ॥५०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रस्तुत एव योगाधिकारे विशेषमभिधातुमाह–

**घडमाण-पवत्तणं जोगीणं जोगसाहणोवाओ ।**
**एसो पहाणतरओ णवरं पवत्तस्स विण्णेओ ॥५१॥**

'घटमान-प्रवृत्तयोर्योगिनोः'-अपुनर्बन्धक-भिन्नग्रन्थिलक्षणयोः, निष्पन्न-योगिव्यवच्छेदार्थमेतत् । घटमान-प्रवृत्तयोरेव योगिनोः योगसाधनोपायः 'एषः'-अनन्तरोदितो वक्ष्यमाणलक्षणश्च । निष्पन्नयोगस्य त्वन्यः, केवलिनः स्वाभाविकः शैलेशीपर्यन्तः । एवं 'सांसिद्धिको निष्पन्नयोगानामधिकार-मात्रनिवृत्तिफलः' इत्येतदपि परोक्तमत्राविरुद्धमेव, अर्थतस्तुल्ययोग-क्षेमत्वात् । समुद्घातकरणशक्त्या हि कर्मवशितायां सत्यां तथादेशनादियोगः सं(सां)-सिद्धिक ए(व) भगवत इति भावनीयम् । तथा 'एषः' वक्ष्यमाणलक्षणः प्रधानतरो नवरं प्रवृत्तस्य 'विज्ञेयः' ज्ञातव्यः तथातदधिकारस्वभावत्वात् । इति गाथार्थः ॥५१॥ एनमेवाभिधातुमाह–

**भावणसुयपाढो तित्थसवणमसतिं तयत्थजाणम्मि ।**
**तत्तो य आयपेहणमतिनिउणं दोसवेक्खाए ॥५२॥**

'भावनाश्रुतपाठः'-रागादिप्रतिपक्षभावनं भावना, तत्प्रतिबद्धं श्रुतं भावनाश्रुतम्, रागादिनिमित्त-स्वरूप-फलप्रतिपादकमित्यर्थः, तस्य पाठः-विधिनाऽध्ययनम्, अन्यथा त्वन्यायोपात्तार्थवत् ततः कल्याणाभावात् । एवं पाठे सति तीर्थे श्रवणम्, पाठाभावे तन्निराकार्यक्लेशानपगमेन सम्यक्तदर्थज्ञानायोगात्, *'अपरिपाचितमलस्रंसनकल्पं ह्यपाठं श्रवणम्'* इति वचनात् । तीर्थम्-अधिकृतश्रुतार्थोभयविद् अभ्यस्तभावनामार्ग आचार्यः, तस्मिन् श्रवणम्, अनीदृशात् तत्त्वतः संज्ञानासिद्धेः । एतच्च 'असकृत्'-अनेकशः तीर्थश्रवणम्, कुज्ञानादाविह महाप्रत्यपायोपपत्तेः । एवं 'तदर्थज्ञाने सति'-भावनाश्रुतार्थज्ञाने सति किम् ? इत्याह-'ततश्च'-तदनन्तरं च 'आत्मप्रेक्षणम्'-आत्मनः प्रकर्षेण ईक्षणं-निरूपणमित्यर्थः । कथम् ? इत्याह-'अतिनिपुणम्' इति स्वतः परतः स्वभावादिभिः । 'दोषापेक्षया'-दूषयन्तीति दोषाः-रागादयः तदपेक्षया, 'किमहं रागबहुलो मोहबहुलो द्वेषबहुलः' अ(इ)त्युत्कटदोषप्रतिपक्षभावनाभ्यासोपपत्तेः इति गाथार्थः ॥५२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इह दोषापेक्षयेत्युक्तम् इति दोषाणामेव स्वरूपमाह–

**रागो दोसो मोहो एए एत्था ऽऽयदूसणा दोसा ।**
**कम्मोदयसंजणिया विण्णेया आयपरिणामा ॥५३॥**

रागो द्वेषो मोह एते 'अत्र'-प्रक्रमे आत्मदूषणा दोषाः, एते च स्वरूपतः कर्मोदयसञ्जनिता विज्ञेया आत्मपरिणामाः स्फटिकस्येव रागादय इति । तत्राभिष्वङ्गलक्षणो रागः, अप्रीतिलक्षणो द्वेषः, अज्ञानलक्षणो मोह इति एते चात्म-कर्मपरमाणुतत्स्वभावतया तत्त्वतो द्वन्द्वजा धर्माः । इति गाथार्थः ॥५३॥

कर्मोदयजनिता इत्युक्तम् अतःकर्मस्वरूपमाह–

**कम्मं च चित्तपोग्गलरूवं जीवस्सऽणाइसंबद्धं ।**
**मिच्छत्तादिनिमित्तं णाएणमतीयकालसमं ॥५४॥**

'कर्म च' - ज्ञानावरणीयादि । किम् ? इत्याह-'चित्रपुद्गलरूपं' ज्ञानाद्यवबन्धकस्वभावविचित्रपरमाणुरूपं 'जीवस्य'-आत्मनः 'अनादिसम्बद्धं' -तत्तत्स्वभावतया प्रवाहतोऽनादिसङ्गतमित्यर्थः । एतच्च *मिथ्यात्वाऽविरति-प्रमाद-कषाय-योगा बन्धहेतवः* [तत्त्वार्थ अ. ८ सू. १] इति वचनात्, 'न्यायेन'-नीत्या 'अतीतकालसमम्'-अतीतकालतुल्यम् । इति गाथार्थः ॥५४॥

तद्भावनायैवाह–

**अणुभूयवत्तमाणो सव्वो वेसो पवाहओऽणादी ।**
**जह तह कम्मं णेयं, कयकत्तं वत्तमाणसमं ॥५५॥**

'अनुभूतवर्तमानः' इति अनुभूतं-प्राप्तं वर्तमानत्वं येन सः, तथा सर्वोऽपि 'एषः'-अतीतकालः प्रवाहतोऽनादिः, कालशून्यलोकासम्भवात् 'यथा' इत्युदाहरणोपन्यासार्थः, तथा कर्म ज्ञेयमिति दार्ष्टान्तिकयोजना प्रवाहतोऽ-नादीत्यर्थः । भावार्थमाह-कृतकत्वं कर्मणो 'वर्तमानसमं' वर्तमानतुल्यम् । यथा हि यावानतीतः कालस्तेन सर्वेण वर्तमानत्वमनुभूतम् अथ च प्रवाहापेक्षयाऽनादिः, एवं यावत् किञ्चित् कर्म तत् सर्वं कृतकम् अथ च प्रवाहापेक्षयाऽनादि । इति गाथार्थः ॥५५॥ इहैवाऽऽशङ्काशेषपरिजिहीर्षयाह–

**मुत्तेणममुत्तिमओ उवघाया-ऽणुग्गहा वि जुज्जंति ।**
**जह विण्णाणस्स इहं मइरापाणोसहादीहिं ॥५६॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'मूर्त्तेन'-कर्मणा 'अमूर्तिमतः'-जीवस्य, किम् ? इत्याह-उपघाताऽनुग्रहावपि युज्येते, अन्यत्र तथोपलम्भादित्यभिप्रायः । निदर्शनमाह-यथा विज्ञानस्य 'इह'-लोके 'मदिरापानौषधादिभिः' मदिरापानेनोपघातः, ब्राह्म्याद्यौषधादनुग्रहः । इति गाथार्थः ॥५६॥ प्रस्तुतनिगमनायाह-

**एवमणादी एसो संबंधो कंचणोवलाणं व ।**
**एयाणमुवाएणं तह वि विओगो वि हवइ त्ति ॥५७॥**

'एवम्'-उक्तन्यायाद् अनादिरेष सम्बन्धः । निदर्शनमाह-काञ्चनोपलयोरिव, निसर्गमात्रतयोदाहरणम्, 'एतयोः' इति जीव-कर्मणोः यद्यप्येवम् 'उपायेन'-सम्यग्दर्शनादिना तथापि वियोगोऽपि भवति, क्षार-मृत्पुटपाकादिना काञ्चनोपलयोरिव । इति गाथार्थः ॥५७॥

एवं व्यवस्थिते सति प्रस्तुतसौविहित्यमाह-

**एवं तु बंध-मोक्खा विणोवयारेण दो वि जुज्जंति ।**
**सुह-दुक्खाइ य दिट्ठा, इहरा ण, कयं पसंगेण ॥५८॥**

एवमेव बन्ध-मोक्षौ सकलसमयसिद्धौ 'विनोपचारेण'-उपचारं विना द्वावपि 'युज्येते'-घटेते, अकल्पितावित्यर्थः । सुख-दुःखादयश्च 'दृष्टाः'-सकललोकसम्मताः युज्यन्ते, मुख्यनिबन्धनोपपत्तेः । 'इतरथा'-उक्तप्रकारव्यतिरेकेण 'न' इति न युज्यन्ते बन्धादयः, मुख्यनिबन्धनानुपपत्तेरिति भावनीयम् । 'कृतं प्रसङ्गेन -पर्याप्तमित्थमप्रस्तुतेन। इति गाथार्थः ॥५८॥

प्रकृताभिधित्सयाह-

**तत्थाभिस्संगो खलु रागो, अप्पीइलक्खणो दोसो ।**
**अण्णाणं पुण मोहो, को पीडइ मं दढमिमेसिं ? ॥५९॥**

तत्राभिष्वङ्गः खलु 'रागः'-भावरागः, रञ्जनं राग इति कृत्वा । अप्रीतिलक्षणो द्वेषः, स्वरूपस्यैव लक्षणत्वाद् भावद्वेष एव । अज्ञानं पुनर्मोहः, मोहनं मोह इति कृत्वा । कः 'पीडयति '-बाधते मां 'दृढम्'-अत्यर्थम् 'अमीषां 'रागादीनाम्, एवमात्मप्रेक्षणमिति । सुज्ञानं चैतद् विदुषां शास्त्रानुसारतः क्षयोपशमविशेषात्, सुप्तमण्डितप्रतिबुद्धादर्शकदर्शनन्यायसिद्धमेतत् । अनीदृशस्य तु योगेऽनधिकार एव । इति गाथार्थः ॥५९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनेन च विधिनैवं किम् ? इत्याह–

**णाऊण ततो तव्विसयतत्त-परिणइ-विवागदोसे त्ति ।**
**चिंतेज्जाऽऽणाए दढं पइरिक्के सम्ममुवउत्तो ॥६०॥**

'ज्ञात्वा' आत्मानं रागादिबहुलतया 'ततः'–तदनन्तरं तद्विषयतत्त्वपरिणति–विपाकदोषानिति चिन्तयेत्, तद्विषयः–रागादिविषयः स्त्र्यादिलक्षणः तस्य 'तत्त्वं'–स्वरूपं कलमलादि, परिणतिः–तस्यैव रोग–जरादिरूपा, विपाकः–नरकादिः, एत एव दोषाः, एतान् 'इति' एवमेव 'चिन्तयेत्'–भावयेत् । 'आज्ञया दृढम्'–'आज्ञया'–वीतरागवचनलक्षणया हेतुभूतया, तस्यास्तत्त्वावगमादिहेतुत्वात्, 'दृढम्'–अत्यर्थं ''पइरिक्के'' इति देशीपदं एकान्तार्थवाचकम्, एकान्ते विविक्ते, तत्र व्याघाताभावात्, 'सम्यगुपयुक्तः'–साकल्येन विहितक्रियासमेतः, सामग्रीसाध्यत्वाद् अभिप्रेतकार्यस्य । इति गाथार्थः ॥६०॥

इहैव विशेषमाह–

**गुरु-देवयापणामं काउं पउमासणाइठाणेण ।**
**दंस-मसगाइ काए अगणेंतो तग्गयऽज्झप्पो ॥६१॥**

गुरु–देवताप्रणामं कृत्वा तदनुगृहीतः तद्विषयतत्त्वादि चिन्तयेत् । कथम् ? पद्मासनादिस्थानेन कायनिरोधाद्यर्थं दंश–मशकादीन् काये अगणयन् स्ववीर्येण तद्‌गताध्यात्मः तत्त्वावभासनाय । इति गाथार्थः ॥६१॥

एष तावदधिकृतगाथाद्वयस्य समुदायार्थः । अवयवार्थं तु स्थूलोच्चयेन ग्रन्थकार एवाभिधातुमाह–

**गुरु-देवयाहि जायइ अणुग्गहो, अहिगयस्स तो सिद्धी ।**
**एसो य तन्निमित्तो तहाऽऽयभावाओ विण्णेओ ॥६२॥**

गुरुदेवताभ्यो जायतेऽनुग्रहः, प्रणामादिति गम्यते । 'अधिकृतस्य'–तद्विषयतत्त्वादिचिन्तनस्य 'ततः'–अनुग्रहात् 'सिद्धिः'–निष्पत्तिः । 'एष च'–अनुग्रहः 'तन्निमित्तः'–गुरु–देवतानिमित्तः 'तथात्मभावात्'–तद्बहुमानालम्बनाद् 'विज्ञेयः'–ज्ञातव्यः, एवं तदा तद्भावेन तन्माध्यस्थ्यादौ । इति गाथार्थः ॥६२॥

एतद्भावनायैवाह–

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**जह चेव मंत-रयणाइएहिं विहिसेवगस्स भव्वस्स ।**
**उवगाराभावम्मि वि तेसिं होइ त्ति तह एसो ॥६३॥**

यथैव मन्त्र-रत्नादिभ्यः सकाशाद् विधिसेवकस्य भव्यस्य प्राणिन उपकाराभावेऽपि 'तेषां'-मन्त्रादीनां भवत्यनुग्रह इति, तथा 'एषः'-गुरुदेवतानुग्रहः । इति गाथार्थः ॥६३॥ स्थानादिगुणानाह-

**ठाणा कायनिरोहो तक्कारीसु बहुमाणभावो य ।**
**दंसादिअगणणम्मि वि वीरियजोगो य इट्ठफलो ॥६४॥**

'स्थानात्'-पद्मासनादेः कायनिरोधो भवति । तत्कारिषु -अन्ययोगिषु **गौतमादिषु** बहुमानभावश्च, शुभाभिसन्धिना तच्चेष्टाऽनुकारात् । दंशाद्यगणनेऽपि सति वीर्ययोगः चशब्दात् तत्त्वानुप्रवेशश्च 'इष्टफलः'-योगसिद्धिफलः । इतिगाथार्थः ॥६४॥ तद्गताध्यात्मगुणानाह-

**तग्गयचित्तस्स तहोवओगओ तत्तभासणं होति ।**
**एय एत्थ पहाणं अंगं खलु इट्ठसिद्धीए ॥६५॥**

'तद्गतचित्तस्य'-तद्विषयतत्त्वादिगतचित्तस्य 'तथोपयोगतः'-तेनैकाग्रता-प्रकारेणोपयोगाद् हेतोः, किम् इत्याह-'तत्त्वभासनं भवति-अधिकृतवस्तुनः तद्भावभासनमुपजायते । एतच्चात्र 'प्रधानमङ्गं'-श्रेष्ठं कारणम् 'खलु' इत्येतदेव, कस्याः ? इत्याह-'इष्टसिद्धेः'-भावनानिष्पत्तेः सकललब्धिनिमित्त-साकारोपयोगत्वेन । इति गाथार्थः ॥६५॥ प्राधान्यमेवोपदर्शयन्नाह-

**एयं खु तत्तणाणं असप्पवित्तिविणिवित्तिसंजणगं ।**
**थिरचित्तगारि लोगदुगसाहगं बेंति समयण्णू ॥६६॥**

'एतदेव तत्त्वज्ञानं'-यदधिकृततत्त्वभासनम्, श्रुत-चिन्तामयनिरासेन भावनामयमित्यर्थः । अत एव 'असत्प्रवृत्तिविनिवृत्तिसञ्जनकं'-मिथ्या-ज्ञाननिबन्धनप्रवृत्तिनिवर्तकमिति भावना । तथा ''स्थिरचित्तकारि'-उपप्लव-त्यागतो निष्प्रकम्पचित्तकारि, विजयसमाधिबीजमित्यर्थः । अत एव लोकद्वयसाधकमौत्सुक्यनिवृत्ति-कुशलानुबन्धाभ्यामिहलोक-परलोकसाधक-मिति हृदयम्, ब्रुवते 'समयज्ञाः'-सिद्धान्तज्ञाः । इति गाथार्थः ॥६६॥

व्याख्याता 'गुरु-देवताप्रणामं कृत्वा' इति द्वारगाथा(६१), साम्प्रतं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'ज्ञात्वा [ततः] तद्विषयतत्त्व' इत्यादि गाथा (६०) व्याख्यायते । आह-एवमुत्क्रमदोषः, न, अर्थव्यापारेणोत्क्रमत्वासिद्धेः । आह-सौत्रोऽन्यथा किमर्थम् ? अनन्तरसूत्रेण तथायोगात्, तथा हि-रागादिस्वरूपमभिधाय एतद् ज्ञात्वा तद्विषयतत्त्वादि चिन्तयेदित्येतदेवाभधितुं युज्यते, 'कथमि'ति विधिस्तु पश्चात् तन्नान्तरीयकत्वात्, व्याख्यातः पुनरादौ विधिपुरस्सरत्वात् तद्विषयतत्त्वादिचिन्तनस्येति । तदेवमाद्यद्वारगाथावयवव्याचिख्यासयाह-

**थीरागम्मी तत्तं तासिं चिंतेज्ज सम्मबुद्धीए ।**
**कलमल-मंस-सोणिय-पुरीस-कंकालपायं ति ॥६७॥**

स्त्रीरागे सति तत्त्वं 'तासां'-स्त्रीणां चिन्तयेत् सम्यग्बुद्ध्या परमगुरुवचनगर्भया, अन्यथा तत्त्वचिन्तनायोगात् । किंविशिष्टं तत्त्वम् ? इत्याह-'कलमलक-मांस-शोणित-पुरीष-कङ्कालप्रायमिति' कलमलं-धात्वन्तरे जम्बालम् मांस-शोणितादयस्तु प्रसिद्धाः एतद्रूपमेव तत्त्वम् । इति गाथार्थः ॥६७॥ तथा-

**रोग-जरापरिणामं णरगादिविवागसंगयं अहवा ॥**
**चलरागपरिणतिं जीयनासणविवागदोसं ति ॥६८॥**

रोग-जरापरिणामं तत्त्वं 'तासामि'ति वर्तते । तथा नरकादिविपाक-सङ्गतमेतदेव तद्धोक्त्रपेक्षया । अथवा चलरागपरिणत्येतदेव । तथा जीवितनाशनविपाकदोषमिति, *"विषं विरक्ता स्त्री"* इति वचनात् । इति गाथार्थः ॥६८॥

एवं सचेतने वस्तुनि रागमधिकृत्य तद्विषयतत्त्वादिचिन्तनमुक्तम् । अधुना त्वचेतनमधिकृत्याह-

**अत्थे रागम्मि उ अज्जणाइदुक्खसयसंकुलं तत्तं ।**
**गमणपरिणामजुत्तं कुगइविवागं च चिंतेज्जा ॥६९॥**

अर्थ्यत इति अर्थः, अर्थविषये पुना रागे अर्जनादिदुःखशतसङ्कुलं तत्त्वम् अर्थस्य चिन्तयेदिति योगः, अर्जन-रक्षण-क्षय-भोगा ह्यर्थस्य लोकद्वयविरोधिनो दुःखाय । तथा गमनपरिणामयुक्तं अर्थस्य तत्त्वम्, पादरजःसमो ह्ययम् । एवं कुगतिविपाकं चैतत् काष्ठकीटोदाहरणेन चिन्तयेत् । इति गाथार्थः ॥६९॥

एवं रागप्रतिपक्षभावनामभिधाय साम्प्रतं द्वेषमधिकृत्याह-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**दोसम्मि उ जीवाणं विभिण्णयं एव पोग्गलाणं च ।**
**अणवट्ठियं परिणतिं विवागदोसं च परलोए ॥७०॥**

द्वेषे पुन: सति जीवा-ऽजीवविषये, किम् ? इत्याह-जीवानां विभिन्नतां चिन्तयेत्, अनुरागविषयोपरोधिनि प्रतिहति द्वेष इति ज्ञापनार्थमेतत्, अनुराग-विषयोऽपि विभिन्नस्तदुपरोध्यपि भिन्न इति भावयेत् । एवं पुद्गलानां च तत्सम्बन्धिनामेव देह-तदुपघातकपुद्गलापेक्षया प्राग्वद् भावनेति । तथा अनवस्थितां परिणतिं जीवपुद्गलानामेव चिन्तयेदिष्टेतरादिभावेन । एवं 'विपाकदोषं च'-परलोके द्वेषस्यैव सर्वस्यामनोरमत्वादिरूपम् । इति गाथार्थ: ॥७०॥ इदानीं मोहमधिकृत्य प्रतिपक्षमभिधातुमाह-

**चिंतेज्जा मोहम्मी ओहेणं ताव वत्थुणो तत्तं ।**
**उप्पाय-वय-धुवजुयं अणुहवजुत्तीए सम्मं ति ॥७१॥**

चिन्तयेद् मोहे सति 'ओघेन'-सामान्येन तावदादौ 'वस्तुन:'-जीवादे: 'तत्त्वं'-तद्भावम् । किम्भूतम् ? इत्याह-उत्पाद-व्यय-ध्रौव्ययुक्तं निमित्तभेदेन 'अनुभवयुक्त्या सम्यक्'-अनुभवप्रधाना युक्तिस्तया 'सम्यग्'व्यवहारनिबन्धनत्वेन चिन्तयेत् । इति गाथार्थ: ॥७१॥ अनुभवयुक्तिमेव लेशत आह-

**नाभावो च्चिय भावो अतिप्पसंगेण जुज्जइ कयाइ ।**
**ण य भावोऽभावो खलु तहासहावत्तऽभावाओ ॥७२॥**

नाभाव एव सर्वथा भावो युज्यते 'कदाचित्' इति कालावधारणम् । अतिप्रसङ्गेन हेतुना । यदि ह्यसदेव सद् भवेत् ततोऽसत्त्वाविशेषात् सकलशक्त्यभावाद् विवक्षितसत्त्ववद् अविवक्षितमपि भवेद् हेत्वविशेषादिति युगपद् [विवक्षिता-ऽ] विवक्षितघटपटादिभावापत्ति:, अनुपयोगिनी चेह तदन्यहेतुपरिकल्पना, असज्जननस्वभावत्वेन तस्या अप्युक्तदोषानतिवृत्ते:, अवध्यभावे तद्विशेषकल्पनायोगादिति । एवं च-

*असदुत्पद्यते तद्धि विद्यते यस्य कारणम् ।*
*शशशृङ्गाद्यनुत्पत्ति र्हेत्वभावादितीष्यते ॥ [शा.वा.समु. ४/४०॥]*

इति वचनमात्रमेव । तथा न च भाव एकान्तेन अभाव एव युज्यते कदाचित्, अतिप्रसङ्गेन हेतुनेति वर्तते । यदि हि सदेवासद् भवेत्, तत:

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सत्त्वाऽविशेषात् सकलशक्त्यभावाद् विवक्षिताऽसत्त्ववद् अविवक्षितमपि भवेत् हेत्वविशेषादिति समं घट-मृदाद्यभावापत्तिः, अनुपयोगिनी चेह तदन्यमृदादिपरि-कल्पना, सतोऽसद्भवनस्वभावतया हेतुत्वेन तस्या अप्युक्तदोषानतिवृत्तेः, अवध्यभावे स्वभावान्तरकल्पनायोगादिति, एवं च-

*सतोऽपि भावेऽभावस्य विकल्पश्चेदयं समः ।*
*न तत्र किञ्चिद् भवति न भवत्येव केवलम् ॥*

इत्यपि वचनमात्रमेव । **ग्रन्थत एव** हेतुद्वयासिद्धत्वपरिहारमाह- 'तथास्वभावत्वाभावादिति'-उभयत्रातिप्रसङ्गो व्यवस्थितः तथास्वभावत्वाभावात् । तथाहि-यदा अभावो भावो भवति तदा तथास्वभावत्वस्य-विवक्षितभाव-भवनस्वभावत्वस्य तत्राभावो निःस्वभावतयैवेति प्रकटम्, यदाऽपि भाव एवाभावो भवति तदाऽपि तथास्वभावत्वस्य स्वाऽभवनस्वभावत्वस्य तत्राभावो निःस्वभावतयैवेति भावनीयम् । इति गाथार्थः ॥७२॥

एवं विपक्षे बाधकप्रमाणमभिधाय स्वपक्षसिद्ध्यर्थमाह-

**एयस्स उ भावाओ णिवित्ति-अणुवित्तिजोगओ होंति ।**
**उप्पायादी णेवं अविगारी वऽणुहवविरोहा ॥७३॥**

'एतस्य पुनः'-तथास्वभावत्वस्य 'भावात्'-कारणाद् निवृत्त्यनुवृत्तियोगतो हेतोर्भवन्ति, के ? इ(त्या)ह । 'उत्पादादयः'-उत्पाद-व्यय-ध्रौव्याणि, प्रकारान्तरेणोक्तवदुत्पादाद्ययोगात् । नैवं प्रक्रमात्-पुरुषः अविकार्यपि अपिशब्दाद् विकार्यपि, अनुभवविरोधात्, एकान्तैकस्वभावेऽनुभवभेदायोगादिति हृदयम् । एतदुक्तं भवति-यदैव विवक्षितभावभवनस्वा (? स्व) भावोऽभावः तदैव स्वभावभावाद् जहाति सर्वथाऽभावत्वम्, यदाऽपि च स्वनिवृत्तिस्वभाव-स्तदाऽप्येवंविधस्वभावभावात् स्वनिवृत्तिमिति सूक्ष्मधियाऽऽलोचनीयम् । एवं चानुवृत्ति-व्यावृत्तिस्वभावम् वस्तूत्पादाद्यात्मकमिति सिद्धम् । उक्तं च-

*"घट-मौलि-सुवर्णार्थी नाशोत्पाद-स्थितिष्वयम् ।*
*शोक-प्रमोद-माध्यस्थ्यं जनो याति सहेतुकम् ॥४७८॥*
*पयोव्रतो न दध्यत्ति, न पयोऽत्ति दधिव्रतः ।*
*अगोरसव्रतो नोभे, तस्मात् तत्त्वं त्रयात्मकम् ॥४७९॥"*

[शास्त्रवार्ता. स्त. ९] इति गाथार्थः ॥७३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आज्ञयेति द्वारं व्याचिख्यासुराह–

**आणाए चिंतणम्मी तत्तावगमो णिओगओ होंति ।**
**भावगुणागरबहुमाणओ य कम्मक्खओ परमो ॥७४॥**

'आज्ञया' परमगुरुवचनरूपया हेतुभूतया चिन्तने अधिकृतस्य वस्तुनः 'तत्त्वावगमः'–तत्त्वपरिच्छेदः 'नियोगतो भवति'–अवश्यं भवतीति, रागादिविषं प्रति परममन्त्रकल्पत्वादाज्ञायाः । अत एवाहुरपरे–*"अमन्त्रापमार्जनकल्पाफलं प्रत्यनागमा क्रिया"* [ ]इति । तथा 'भावगुणाकरबहुमानाच्च'–तीर्थकरबहुमानाच्चाऽऽज्ञासारया प्रवृत्त्या कर्मक्षयः परमः, स्थानबहुमानेन तुल्यक्रियायामेवाऽऽज्ञाराधन–विराधनाभ्यां कर्मक्षयादिविशेषात् । इति गाथार्थः ॥७४॥ विविक्तदेशगुणानाह–

**पइरिक्के वाघाओ न होइ पाएण योगवसिया य ।**
**जायइ तहा पसत्था हंदि अणब्भत्थजोगाणं ॥७५॥**

"पइरिक्के"–विविक्ते–एकान्ते व्याघातो न भवति अधिकृतयोगस्य 'प्रायेण'–बाहुल्येन, विक्षेपनिमित्ताभावात् । 'योगवशिता च'–योगाभ्यास–सामर्थ्यलक्षणा जायते तथा प्रशस्ता, विधिप्रवृत्तेरसद्ग्रहाभावात् । 'हन्दि' इत्युपप्रदर्शने । 'अनभ्यस्तयोगानाम्'–आदियोगानाम् । इति गाथार्थः ॥७५॥

चरममुपयोगद्वारं व्याचिख्यासुराह–

**उवओगो पुण एत्थ विण्णेओ जो समीवजोगो त्ति ।**
**विहियकिरियागओ खलु अवितहभावो उ सव्वत्थ ॥७६॥**

उपयोगः पुनः 'अत्र'–प्रक्रमे विज्ञेयो यः 'समीपयोगः'–सिद्धेः प्रत्यासन्न इति ।स चायमित्याह–'विहितक्रियागतः खलु'–स्थानादिक्रियाविषय इत्यर्थः । 'अवितथभावस्तु'—यथोक्तभाव एव 'सर्वत्र'स्थानादौ । एतल्लिङ्ग एव बोधः परलोकपक्षपातो भगवद्बहुमानश्च, भावनीयमेतत् । इति गाथार्थः ॥७६॥ उपसंहरन्नाह–

**एवं अब्भासाओ तत्तं परिणमइ चित्तथेज्जं च ।**
**जायइ भवाणुगामी सिवसुहसंसाहगं परमं ॥७७॥**

'एवम्'–उक्तेन न्यायेन अभ्यासाद् हेतोः तत्त्वं परिणमति रागादिविषय–

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सम्बन्धि । तथा 'चित्तस्थैर्यं च'-आनन्दसमाधिबीजं जायते । किंविशिष्टम् ? इत्याह-'भवानुगामि'-जन्मान्तरानुगमनशीलं 'शिवसुखसंसाधकं'-पारम्पर्येण मोक्षसुखसाधकमित्यर्थः । 'परमं'-प्रधानं चित्तस्थैर्यं शिवाध्वविजयदुर्गा-वाप्तिलक्षणम् । इति गाथार्थः ॥७७॥ इहैव विध्यन्तरमाह-

**अहवा ओहेणं चिय भणियविहाणाओ चेव भावेज्जा ।**
**सत्ताइएसु मेत्ताइए गुणे परमसंविग्गो ॥७८॥**

'अथवा' इति प्रकारान्तरप्रदर्शनार्थः ।'ओघेनैव'-सामान्येनैव भणितविधा-नेनैव स्थानादिना 'भावयेत्'-प्रणिधानसारमभ्यस्येत् । क्व कान् ? इत्याह-'सत्त्वादिषु'-सत्त्व-गुणाधिक-क्लिश्यमानाऽविनेयेषु 'मैत्र्यादीन् गुणान्'-मैत्री-प्रमोद-कारुण्य-माध्यस्थ्यलक्षणान् 'परमसंविग्नः'-लब्धिपूजाख्यात्याद्याशय-रहितः । इति गाथार्थः ॥७८॥ एतदेव विशेषेणाभिधातुमाह-

**सत्तेसु ताव मेत्तिं, तहा पमोयं गुणाहिएसुं ति ।**
**करुणा-मज्झत्थत्ते किलिस्समाणाऽविणेएसु ॥७९॥**

सत्त्वेषु सर्वेष्वेव तावदादौ 'मैत्रीं' प्रत्युपकारानपेक्षसम्बन्धां सुखरूपां भावयेत् । तथा 'प्रमोदं'-बहुमानाशयलक्षणं 'गुणाधिकेषु'-इति स्वगुणाधिकेषु सत्त्वेषु । तथा 'करुणा-मध्यस्थत्वे'-कृपोपेक्षारूपे यथासंख्यमेतत् 'क्लिश्यमा-नाऽविनेययोः' क्लिश्यमानेषु करुणा, अविनेयेषु माध्यस्थ्यम् । इति गाथार्थः ॥७९॥ क्रमान्तराशङ्कापोहायाह-

**एसो चेवेत्थ कमो उचियपवित्तीए वण्णिओ साहू ।**
**इहराऽसमंजसत्तं तहातहाऽठाणविणिओया ॥८०॥**

'एष एव'-अनन्तरोदितः 'अत्र'-भावनाविधौ 'क्रमः'-प्रवृत्तिप्रस्ताररूपः 'उचितप्रवृत्तेः' कारणाद् वर्णितः 'साधुः'-शोभनः तीर्थंकरगणधरैः । तथाहि सामान्येन सत्त्वेषु मैत्री एवोचिता, प्रमोदो गुणाधिकेष्वेव, क्लिश्यमानेष्वेव करुणा, अविनेयेष्वेव माध्यस्थ्यम् । इत्थं चैतदङ्गीकर्तव्यम् इत्याह-'इतरथा'-अन्यथोक्तक्रमबाधायाम् 'असमञ्जसत्वं'-सन्न्यायविरुद्धं भवति, अत्र हेतुः तथातथाऽस्थानविनियोगादिति, सत्त्वादिषु प्रमोदादिकरणे अस्थाननियोगो मिथ्या-भावनात्मकः प्रत्यवायायेति भावनीयम् । गुणाधिकज्ञानं च क्षयोपशमविशेषाद्



Jain Education International For Personal & Private Use Only www.jainelibrary.org

रत्नादाविव मार्गानुसारिणाम् । इति गाथार्थः ॥८०॥

अत्रैव सामान्यविधिमाह-

**साहारणो पुण विही सुक्काहारो इमस्स विण्णेओ ।**
**अणणत्थओ य एसो उ सव्वसंपक्करी भिक्खा ॥८१॥**

साधारणः पुनर्विधिः सर्वावस्थानुगत इत्यर्थः, शुक्लाहारोऽस्य विज्ञेयः । शुद्धानुष्ठानसाध्यः शुद्धानुष्ठानहेतुः स्वरूपशुद्धश्च शुक्ल इति । 'अस्य'-योगिनः एवम्भूतो विज्ञेयः, तदन्यस्य योगाङ्गत्वानुपपत्तेः, न ह्यपथ्यान्नभुजो देहाद्यारोग्य-सिद्धिः अन्वर्थतश्चैष पुनः शुक्लाहारः सर्वसम्पत्करी भिक्षेति विज्ञेयः । सर्वसम्पत्करणशीला सम्पत्करी दातृ-ग्रहीत्रुभयलोकहिता, पौरुषघ्नी-वृत्तिभिक्षा-व्यवच्छेदार्थमेतत् । अत्र बहु वक्तव्यं तत् तु नोच्यते, गमनिकामात्रत्वात् प्रारम्भस्य । इति गाथार्थः ॥८१॥

**वणलेवोवम्मेणं उचियत्तं तग्गयं निओएणं ।**
**एत्थं अवेक्खियव्वं, इहराऽयोगो त्ति दोसफलो ॥८२॥**

अत्रैव विशेषमाह-

'व्रणलेपौपम्येन'-सकललोकसिद्धेन उचितत्वं 'तद्गतम्'-आहारगतं 'नियोगेन'-अवश्यन्तया 'अत्र'-प्रक्रमे अपेक्षितव्यम्, 'इतरथा'-अन्यथा 'अयोगः' -असम्बन्ध इति कृत्वा व्रणलेपवदेवाऽऽहारो दोषफल इति । एतदुक्तं भवति-यथा व्रणः स्वरूपभेदात् कश्चिन्निम्बतिलोचितः कश्चिच्चिक्कशोचितः कश्चिद् गवादिघृतोचित इति, तत्र विपर्ययलेपदाने दोषः; एवं कश्चिद् यतिकायः कोद्रवाद्योदनोचितः, कश्चित् शाल्याद्योदनोचितः, कश्चिद् हविःपूर्णाद्युचित इति, अत्रापि विपर्ययदाने दोषः, गम्भीरबुद्ध्या परिभावनीयमेतत् । इति गाथार्थः ॥८२॥

कथमुचितस्य लाभः ? इत्याशङ्कानिरासार्थमाह-

**जोगाणुभावओ च्चिय पायं ण य सोहणस्स वि अलाभो ।**
**लद्धीण वि संपत्ती इमस्स जं वण्णिया समए ॥८३॥**

'योगानुभावत एव' - योगसामर्थ्यत एव तत्प्रतिबन्धककर्मनिवृत्तेः 'प्रायः'- बाहुल्येन । न च 'शोभनस्यापि'-आहारस्य हविःपूर्णादेः अलाभः,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किन्तु लाभ एव । कुतः ? इत्याह-'लब्धीनामपि'-रत्नादिरूपाणां 'योगानुभावत एव' योगसामर्थ्यात् 'सम्प्राप्तिः'-शोभना प्राप्तिः परोपकारफला 'अस्य 'योगिनः 'यत्'-यस्मात् कारणाद् वर्णिता 'समये'-सिद्धान्ते । इति गाथार्थः ॥८३॥ लब्धीनां स्वरूपमाह-

**रयणाई लद्धीओ अणिमादीयाओ तह य चित्ताओ ।**
**आमोसहाइयाओ तहातहा योगवुड्ढीए ॥८४॥**

रत्नाद्या लब्धयः "*स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्*" [पा. योग ३-५१] इति वचनात् । अणिमाद्याश्च तथा 'चित्राः'-"*अणिमा महिमा लघिमा प्राप्तिः प्राकाम्यं ईशिता वशिता यत्रकामावसायिता च*" [ ] इति वचनात् । 'आमर्षौषध्याद्याः'-"*आमोसहि विप्पोसहि खेलोसहि.*" [आव. नि. ६९] इति वचनात् । एताश्च तथातथाप्रकारेण उत्तरोत्तर-परिशुद्धवृद्धिरूपेण योगवृद्धेः सकाशाद् भवन्ति, तच्छोभनाहारो लघ्वी मात्रा । इति गाथार्थः ॥८४॥ अधिकृतावस्थाफलमाह-

**एतीए एस जुत्तो सम्मं असुहस्स खवग मो णेओ ।**
**इयरस्स बंधगो तह सुहेणमिय मोक्खगामि त्ति ॥८५॥**

'एतया'-योगवृद्ध्या भावनया वा 'एषः'-योगी 'युक्तः'-घटितः । किम् ? इत्याह-सम्यग् अपुनर्बन्धकत्वेन अशुभस्य कर्मणः क्षपको ज्ञेयः । 'मो' इति अत्र स्थानेऽवधारणार्थो निपातः, एतयैव, अन्यथा क्षपणस्यापि भूयोऽधिकभावेनाक्षपणत्वात् । 'इतरस्य'-शुभस्य कर्मणः विशिष्टदेश-कुल-जात्यादि निमित्तस्य बन्धकः, ज्ञेय इति वर्तते । 'तथा'-तेन प्रकारेणानुबध्नानः शुभशुभतरप्रवृत्त्या प्रकृष्टफलदानरूपेण, एवं किम् ? इत्याह-'सुखेनैव'-सुखपरम्परया 'मोक्षगामी'-भवान्तकृत्। इति गाथार्थः ॥८५॥

साम्प्रतमधिकृतभावनासाध्यमेव वस्तु तन्त्रान्तरपरिभाषया अन्वयव्यतिरेकतः खल्वविरोधि इति प्रदर्शयन्नाह-

**कायकिरियाए दोसा खविया मंडुक्कचुण्णतुल्ल त्ति ।**
**ते चेव भावणाए नेया तच्छारसरिस त्ति ॥८६॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवं पुण्णं पि दुहा मिम्मय-कणयकलसोवमं भणियं ।**
**अण्णेहि वि इह मग्गे नामविवज्जासभेएणं ॥८७॥**
**तह कायपाइणो ण पुण चित्तमहिकिच्च बोहिसत्त त्ति ।**
**होति तहभावणाओ आसययोगेण सुद्धाओ ॥८८॥**
**एमाइ जहोइयभावणाविसेसाउ जुज्जए सव्वं ।**
**मुक्काहिनिवेसं खलु निरूवियव्वं सबुद्धीए ॥८९॥**

चतस्रोऽप्येकप्रघट्टकप्रतिबद्धाः । आसां व्याख्या–'कायक्रियया' आगम–बाधयाऽसद्भावतो भावशून्यया 'दोषाः'–रागादयः क्षपिताः सन्तः, किम् ? इत्याह–मण्डूकचूर्णतुल्याः इति, यथा माण्डूकचूर्णे चूर्णावस्थायां माण्डूकक्रियाक्षयः सन्नप्यक्षयकल्पः, प्रावृजादिनिमित्तयोगतः तदधिकभावात्, एवं कायक्रियया वचनबाधोपेतया तथाविधानुष्ठानसमभिव्यङ्ग्यो दोषक्षयोऽक्षयएव, जन्मान्तरा–दिनिमित्तयोगतस्तदधिकभावादिति । उक्तं च–''*क्रियामात्रतः कर्मक्षयः मण्डूकचूर्णवत्, भावनातस्तु तद्भस्मवत्*'' [ ] इत्यादि । अपथ्यद्रव्ययोगवेदनाक्षयोपलक्षणमेतत् । एवं दोषाः 'भावनया' वचनगर्भया चित्तवृत्त्या, 'क्षपिता' इति वर्तते, ज्ञेयाःकिंविशिष्टाः ? इत्याह–'तत्सा(?च्छा)रसदृशाः'–मण्डूकभस्मतुल्याः, पुनरभावात् । भावना ह्यत्राग्नितुल्या वर्तत, इयं च वचननिमित्तैवेति । तद् ''*एतयैवैष युक्तः सम्यगशुभस्य क्षपको ज्ञेयः*'' [गा. ८५]–इति एतदनुपात्येव एतदिति परिभावनीयम् । इति प्रथमगाथार्थः ॥८६॥

एवं पुण्यमपि 'द्विधा'–द्विप्रकारम् । कथम् ? इत्याह–'मृण्मय–कनककलशोपमं भणितम्'–एकं मृण्मयकलशोपमं क्रियामात्रजन्यमफलं सत् तत्फलदानस्वभावं वा, अन्यत् कनककलशोपमं विशिष्टभावनाजन्यं तथातथाफलान्तरसाधनेन प्रकृष्टफलजनकस्वभावमिति । एतद् भणितम् 'अन्यैरपि'–सौगतैः–''*द्विविधं हि भिक्षवः ! पुण्यम्–मिथ्यादृष्टिजं सम्यग्दृष्टिजं च । अपरिशुद्धमाद्यम्, फलं प्रति मृद्घटसंस्थानीयम् । परिशुद्धमुत्तरम्, फलं प्रति सुवर्णघटसंस्थानीयम्*'' [ ]इति वचनात् । 'इह मार्गे' योगधर्ममार्गे 'नामविपर्यासभेदेन'–अभिधानभेदेन, एतदपि ''इतरस्य बन्धकः तथा सुखेनैव मोक्षगामीति'' [गा. ८५] एतदनुपाति तत्त्वतः । इति द्वितीयगाथार्थः ॥८७॥

तथा कायपातिनः, न पुनश्चित्तमधिकृत्य पातिनः 'बोधिसत्त्वाः'–

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बोधिप्रधानाः प्राणिन इति भवन्ति । तथाभावनातः सकाशाद् 'आशययोगेन' चित्तगाम्भीर्यलक्षणेन शुद्धा[श]या इति । तथा चार्षम्–"*कायपातिनो हि बोधिसत्त्वाः, न चित्तपातिनः, निराश्रवकर्मफलमेतत्*" । इति तृतीयगाथार्थः ॥८८॥ एवमादि, आदिशब्दाद् '*विजया-ऽऽनन्द-सत्क्रिया-क्रियासमाधयः प्रवृत्तादीनाम्; तथा वितर्कचारु क्षुभितं प्रथमम्, प्रीत्युत्प्लावितमानसं द्वितीयम्, सुखसङ्गतमातुरं तृतीयम्, प्रशमैकान्तसुखं चतुर्थमेतत्*" इत्यादि प्रगृह्यते । तदेवमादि यथोदितभावनाविशेषात् सकाशाद् 'युज्यते सर्वं'–घटते निरवशेषम्, तत्त्वमधिकृत्य योगवृद्धैः, अधिकृतभावनायाश्च एवंस्वरूपत्वात् ।'मुक्ताभिनिवेशं खलु' इति सावधारणं क्रियाविशेषणम्, मुक्ताभिनिवेशमेव निरूपयितव्यं स्वबुद्ध्या, अभिनिवेशस्य तत्त्वप्रतिपत्तिं प्रति शत्रुभूतत्वात्, युक्तेरपि वैतथ्येन प्रतिभासनात्। उक्तं चात्र–

*"आग्रही बत ! निनीषति युक्तिं तत्र, यत्र मतिरस्य निविष्टा ।*
*पक्षपातरहितस्य तु युक्तिर्यत्र, तत्र मतिरेति निवेशम् ॥*
*साध्वसाध्विति विवेकविहीनो लोकपंक्तिकृत उक्तिविशेषः ।*
*बालिशो भवति नो खलु विद्वान्, सूक्त एव रमते मतिरस्य ॥"*

इत्यलं प्रसङ्गेन । इति चतुर्थगाथार्थः ॥८९॥

एवं प्रासङ्गिकमभिधाय 'एतयैष युक्तः' इत्येतद्गाथा[८५]सम्बद्धामेव प्रकृतयोजनागाथामाह–

**एएण पगारेणं जायइ सामाइयस्स सुद्धि त्ति ।**
**तत्तो सुक्कज्झाणं, कमेण तह केवलं चेव ॥९०॥**

एतेन प्रकारेण अनन्तरव्यावर्णितस्वरूपेण, किम् ? इत्याह–'जायते' निष्पद्यते'सामायिकस्य'–मोक्षहेतोः परिणामस्य'शुद्धिः–'विशेषाभिव्यक्तिरिति । परिभावितमेवैतत् प्राक् ।'ततः' सामायिकशुद्धेः 'शुक्लध्यानं' पृथक्त्ववितर्कं सविचारमित्यादिलक्षणं 'जायते' इति वर्तते ।'क्रमेण'–तथाश्रेणिपरिसमाप्ति-लक्षणेन 'केवलं चैव'–केवलज्ञानं च जायते । इति गाथार्थः ॥९०॥

सामायिकस्यैव प्राधान्येन मोक्षाङ्गतां ख्यापयन्नाह–

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वासी-चंदणकप्पं तु एत्थ सिट्ठं अओ च्चिय बुहेहिं ।**
**आसयरयणं भणियं, अओऽण्णहा ईसि दोसो वि ॥९१॥**

'वासी-चन्दनकल्पमेव'-सर्वमाध्यस्थ्यरूपम् 'अत्र'-व्यतिकरे 'श्रेष्ठं' प्रधानम् । अत एव कारणाद् 'बुधैः'-विद्वद्भिः 'आशयरत्नं भणितं'-चित्तरत्नमुक्तम्, "*जो चंदणेण बाहं आलिंपइ*" [उप. माला ९२] इत्यादिवचनेन । 'अतोऽन्यथा

अपकारिण्येवोपकार्याशयकल्पनायामाशयरत्नस्य, किम् ? इत्याह- 'ईषत्' मनाग् दोषोऽपि तदपायानिरूपणेन । तथा चोक्तम्-

*"सामायिकं च मोक्षाङ्गं परं सर्वज्ञभाषितम् ।*
*वासी-चन्दनकल्पानामुक्तमेतन्महात्मनाम् ॥१॥*
*निरवद्यमिदं ज्ञेयमेकान्तेनैव तत्त्वतः ।*
*कुशलाशयरूपत्वात् सर्वयोगविशुद्धितः ॥२॥*
*यत् पुनः कुशलं चित्तं लोकदृष्ट्या व्यवस्थितम् ।*
*तत् तथौदार्ययोगेऽपि चिन्त्यमानं न तादृशम् ॥३॥*
*मय्येव निपतत्वेतज्जगद्दुश्चरितं यथा ।*
*मत्सुचरितयोगाच्च मुक्तिः स्यात् सर्वदेहिनाम् ॥४॥*
*असम्भवीदं यद् वस्तु बुद्धानां निर्वृतिश्रुतेः ।*
*सम्भवित्वे त्वियं न स्यात् तत्रैकस्याप्यनिर्वृतौ ॥५॥*
*[1]एवं चिन्तनं न्यायात् तत्त्वतो मोहसङ्गतम् ।*
*साध्ववस्थान्तरे ज्ञेयं बोध्यादेः प्रार्थनादिवत् ॥६॥*
*अपकारिणि सद्बुद्धिर्विशिष्टार्थप्रसाधनात् ।*
*आत्मम्भरित्वपिशुना तदपायानपेक्षिणी ॥७॥*
*एवं सामायिकादन्यदवस्थान्तरभद्रकम् ।*
*स्याच्चित्तं तत् तु संशुद्धे र्ज्ञेयमेकान्तभद्रकम् ॥*

*[हारिभद्रीयमष्टकम् २९] इति ।*

पौरप्यस्य प्रविभागो गीतः । यथोक्तम्-

---

१. 'तदेवं चिन्तनं' इति हारिभद्राष्टके ।

Jain Education International　　For Personal & Private Use Only　　www.jainelibrary.org

*"धर्मधातावकुशलः सत्त्वनिर्वापणे मतिम् ।*
*क्षेत्राणां शोधने चैव करोति वितथा च सा ॥*
*आदिधार्मिकमाश्रित्य सज्ज्ञानरहितं यथा।*
*इष्टेयमपि चाऽऽर्याणां सदाशयविशोधनी ॥"*

इत्यादि । कृतं प्रसङ्गेन । इति गाथार्थः ॥९१॥

महाफलोपसंहारमाह–

**जई तब्भवेण जायइ जोगसमत्ती अजोगयाए तओ ।**
**जम्मादिदोसरहिया होइ सदेगंतसिद्धि त्ति ॥९२॥**

यदि 'तद्भवेन'–तेनैव जन्मना 'जायते'–निष्पद्यते । का ? इत्याह–योगसमाप्तिः सामग्रीविशेषेण । ततः किम् ? इत्याह–'अयोगतया ततः' शैलेश्यवस्थारूपया 'जन्मादिदोषरहिता'–जन्म–जरा–मरणवर्जिता भवति । का ? इत्याह–'सदेकान्तसिद्धिः' सती–अपुनरागमनेन एकान्तविशुद्धि मुक्तिः । इति गाथार्थः ॥९२॥ यदि तु योगसमाप्तिर्न जायते ततो यद् भवति योगिनां तदाह–

**असमत्तीय उ चित्तेसु एत्थ ठाणेसु होइ उप्पाओ ।**
**तत्थ वि य तयणुबंधो तस्स तहऽब्भासओ चेव ॥९३॥**

असमाप्तौ च पुनः तद्भवेन योगस्य । किम् ? इत्याह–'चित्रेषु' नानाप्रकारेषु 'अत्र स्थानेषु'–देवच्युतौ मानुष्ये विशिष्टकुलादिषु । किम् ? इत्याह–'भवत्युत्पादः' जायते जन्मपरिग्रह इत्यर्थः । 'तत्रापि'–जन्मपरिग्रहे किम् ? इत्याह–'तदनुबन्धः' योगधर्मानुबन्धः 'तस्य'–योगिन इति । कुतः ? इत्याह–'तथाऽभ्यासत एव' प्रणिधानतोऽविच्युत्यभ्यासत एव, प्रणिधानप्रवृत्ति–विघ्नजयप्राप्तीनामित्थमेव भावात् । इति गाथार्थः ॥९३॥

अधिकृतवस्तुसमर्थनायैवाह–

**जह खलु दिवसऽब्भत्थं रातीए सुविणयम्मि पेच्छंति ।**
**तह ईहजम्मऽब्भत्थं सेवंति भवंतरे जीवा ॥९४॥**

'यथा खलु' इति यथैव 'दिवसाभ्यस्तम्' अध्ययनादि 'रात्रौ'–रजन्यां 'स्वप्ने'–निद्रोपहतचित्तव्यापाररूपे पश्यन्ति तथानुभवापेक्षया । एष दृष्टान्तः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

साम्प्रतं दार्ष्टान्तिकयोजना-'तथा' तेन प्रकारेण 'इहजन्माभ्यस्तम्'-अधिकृत-जन्मासेवितं कुशलादि सेवन्ते 'भवान्तरे'-जन्मान्तरे 'जीवाः'-प्राणिनः तत्स्वाभाव्यात् । इति गाथार्थः ॥९४॥ यस्मादेवं तस्मात् किम् ? इत्याह-

**ता सुद्धजोगमग्गोच्चियम्मि ठाणम्मि एत्थ वट्टेज्जा ।**
**इह-परलोगेसु दढं जीविय-मरणेसु य समाणो ॥९५॥**

'तत्'-तस्मात् 'शुद्धयोगमार्गोचिते'-आगमाद् निरवद्ययोगमार्गानुरूपे 'स्थाने'-संयमस्थाने सामायिकादौ अत्र वर्तेत साम्प्रतजन्मनि । कथम् ? इत्याह-इहपरलोकयोः 'दृढम्'-अत्यर्थम्, तथा जीवित-मरणयोश्च 'समानः' सर्वत्र तुल्यवृत्तिः, परं मुक्तावस्थाबीजमेतत् । इति गाथार्थः ॥९५॥

न भावतः सदाऽनौचित्यवृत्तेः पर्यन्तौचित्यावाप्तिरिति तद्गतं विधिमाह-

**परिसुद्धचित्तरयणो चएज्ज देहं तहंतकाले वि ।**
**आसण्णमिणं णाउं अणसणविहिणा विसुद्धेणं ॥९६॥**

परिशुद्धचित्तरत्नः स सर्वत्रानाशंसया, किम् ? इत्याह-'त्यजेद् देहं' जह्यात् कायम् । तथा....तसंयुक्तशुभलेश्याप्रकारेण 'अन्तकालेऽपि' क्रमागतमरणकालेऽपि आसन्नम् 'एनं' मरणकालं ज्ञात्वा, कथं त्यजेत् ? इत्याह-'अनशनविधिना'-अनशनप्रकारेण 'विशुद्धेन'-कवचज्ञाततः आगम-परिपूतेन । इति गाथार्थः ॥९६॥ मरणकालविज्ञानोपायमाह-

**णाणं चाऽऽगम-देवय-पइहा-सुमिणंधराद[1]ऽदिदि्ठओ ।**
**णास-ऽच्छि-तारगादंसणाओ कण्णग्गऽसवमणाओ ॥९७॥**

ज्ञानं चाऽऽसन्नमरणकालस्य, कुतः ? इत्याह-'आगम-देवता-प्रतिभा-स्वप्ना-ऽरुन्धत्याद्यदृष्टेः' [1]आगमाद्-मरणविभक्त्यादेः नाडीसञ्चारादिना । यथाऽऽहुः समयविदः-

*'उत्तरायणा पंचाहमेगनाडीसंचारे तिण्णि समाओ जीवियं, दसाह-मेगनाडीसंचारे दो, पण्णराहमेगनाडीसंचारे एगं, वीसाहमेगनाडीसंचारे छम्मासा पंचवीसाहमेगनाडीसंचारे तिण्णि, छव्वीसाहमेगनाडीसंचारे दो, सत्तवीसाह-मेगनाडीसंचारे एगो, अठ्ठावीसाहमेगनाडीसंचारे पण्णरस दियहा, एगूणतीसाह-*

---

१. अत्र 'अरुंधती' पदमावश्यकम् ?

Jain Education International For Personal & Private Use Only www.jainelibrary.org

*मेगनाडीसंचारे दस, तीसाहमेगनाडीसंचारे पंच, एगतीसाहमेगनाडीसंचारे तिण्णि, बत्तीसाहमेगनाडीसंचारे दो, तेत्तीसाहमेगनाडीसंचारे दिवसो जीवियं ।'*
तथा अन्यैरप्युक्तम्-

**पञ्चाहात् पञ्चवृद्ध्या दिवसगतिरिहाऽऽरोहते पञ्चविंशात्*
*तस्मादेकोत्तरेण त्रिगुणितदशकं त्र्युत्तरं यावदेतत् ।*
*काले पौष्णे समास्तास्त्रि-नयन-शशिनः, षट्-त्रि-युग्मेन्दवो ये,*
*मासास्तेऽहानि शेषास्तिथि-दिगिषु-गुण-द्वीन्दवो जीवितस्य ॥*

एवं [2]देवतातः-देवताकथनेन, चारित्री देवतापरिगृहीतो भवति तस्योचितमन्यदपि देवता कथयत्येव । एवं [3]प्रतिभातः-प्रातिभमप्यस्याविसंवाद्येव भवति, व्यवहारोपयोगिन्यपि तथोपलब्धेः । एवं [4]स्वप्नाद्-✡मृतगुर्वाह्वानादेः मृतगुर्वाह्वान-बाल-देहभाव-भोगसन्दर्शनं योगिनोऽन्तकाले सिद्धः चित्तविभ्रम इति । [5]अरुन्धत्याद्यदृष्टेः, यथोक्तम्-

*प्रध्मातदीप[गं]गन्धमल्पायुर्नैव जिघ्रति ।*
*स्फुटतारावृते व्योम्नि न च पश्यत्यरुन्धतीम् ॥* [ ]

तथा[6] 'नासा-ऽक्षितारकाऽदर्शनात्' इति नासिकाऽदर्शनं अवष्टब्धाऽक्षिज्योतिस्ताराऽदर्शनं चाऽऽसन्नमृत्युलिङ्गं, तथा[7] 'कर्णाग्न्यश्रवणाद्'-अङ्गुष्ठापूरितकर्णान्तराग्न्यश्रवणं आसन्नमृत्युलिङ्गं समुद्रध्वनिश्रवण-दशग्रन्थिस्फुरणद्वादशाक्षरानुपलम्भाद्युपलक्षणमेतत् । इति गाथार्थः ॥९७॥

एवमेनं ज्ञात्वा किम् ? इत्याह-

**अणसणसुद्धीए इहं जत्तोऽतिसएण होइ कायव्वो ।**
**जल्लेसे मरइ जओ तल्लेसेसुं तु उववाओ ॥९८॥**

---

* "समसप्तगते सूर्ये चन्द्रे जन्मर्क्षमाश्रिते । स कालः पौष्ण उद्दिष्टः कुर्यास्तत्र विचारणाम् ॥ आदौ कृत्वा दिनार्धं सकलदिनमथाहर्निशं चोत्तरेण, पश्चादहृद्वयं च त्रिदिनमथ चतुर्वासराणि क्रमेण । प्राणो नाड्याश्रितो यो भवति दिनपतेरुद्गमात् सव्यहीनः, तत्रैतान् धारणाब्दान् मनुरविविदिशो मण्डलाः षट् चतस्रः ॥" इत्येषा आदर्शगता टिप्पणी ॥

✡ अस्य ग्रन्थस्य ताडपत्रीये मूलादर्शे एतत्पुष्पिकास्थाने एतादृग्xहंसपदं वर्तते, किञ्च उपरि अधो वा पाठो लिखितो नास्तीति संशोधकविदुषोऽत्र पाठ लेखनविस्मृतिः सम्भाव्यते ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनशनशुद्धाविह कवचोदाहरणेन यत्नोऽतिशयेन भवति कर्तव्यः, फलप्रधानाः समारम्भा इति कृत्वा । किमेतदेवम् ? इत्याह-यल्लेश्यो म्रियते 'यतः' प्राणी भावलेश्यामधिकृत्य तल्लेश्येष्वेवामरादिषूपपद्यते, *"जल्लेसे मरइ तल्लेसे उववज्जइ"* [ ] इति वचनात् । न चास्यामवस्थायामेवं मतः स्वप्राणातिपातः, विहितकरणात्, वचनप्रामाण्याद् माध्यस्थ्योपपत्तेः, अन्यथा दोषभावाद् वचनविरोधात् । एवमेव हि तदाशयपरिपुष्टेः तत्सङ्कल्पभावानुरोधात् । इति गाथार्थः ॥९८॥

एवमिह लेश्यायाः प्राधान्यमुक्तम्, न चैतावतैव एतच्चारु भवतीत्याह-

**लेसाय वि आणाजोगओ उ आराहगो इहं णेओ ।**
**इहरा असतिं एसा वि हंतऽणाइम्मि संसारे ॥९९॥**

लेश्यायामपि सत्याम्, किम् ? इत्याह-आज्ञायोगत एव=दर्शनादि-परिणामयोगादेवेत्यर्थः । आराधकश्चरणधर्मस्य 'इह ज्ञेयः' इह प्रवचने ज्ञातव्यः, नान्यथा । एतदेवाह-'इतरथा'-एवमनभ्युपगमे सति, किम् ? इत्याह-'असकृत्' अनेकशः 'एषाऽपि' शुभा लेश्या प्राप्ता सौधर्माद्युपपातेन "हन्त सम्प्रेषण-प्रत्यवधारण-विवादेषु" इति [इह 'हन्त'] सम्प्रेषणेऽवसेयः, अनादौ संसारे, अतिदीर्घ इत्यर्थः, न चाऽऽराधकत्वं सञ्जातम्, तस्माद् यथोक्तमेव तत्त्वं प्रतिपत्तव्यम्। इति गाथार्थः ॥९९॥ प्रकरणोपसंहारार्थमेवाह-

**ता इय आणाजोगे जइयव्वमजोगअत्थिणा सम्मं ।**
**एसो चिय भवविरहो सिद्धीए सया अविरहो य ॥१००॥**

यस्मादेवं तस्माद् "इय" एवम्, आज्ञायोगे-आज्ञाव्यापारे, किम् ? इत्याह-'यतितव्यं' यत्नः कार्यः । केन ? 'अयोगतार्थिना' शैलेशीकामेन सत्त्वेन 'सम्यग्' अविपरीतेन विधिना । यस्माद् 'एष एव' आज्ञायोगः 'भवविरहः' जीवन्मुक्तिः संसारविरहो वर्तते, कारणे कार्योपचारात्, यथाऽऽयुर्घृतमिति । तथा 'सिद्धेः' मुक्तेः-'सदा' सर्वकालं अविरहश्चैष एव, आजीविकमतमुक्तव्यवच्छेदार्थमेतत्, मुक्तस्य कृतकृत्यत्वेनेहागमनायोगाद् अविरहः । इति गाथार्थः ॥१००॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ कृतिर्धर्मतो याकिनीमहत्तरासूनोराचार्यहरिभद्रस्य ॥

॥ ग्रन्थाग्रमनुष्टुप्छन्दसोद्देशतः श्लोकशतानि सप्त सार्धानि ॥७५० ॥

योगशतकस्य टीकां कृत्वा यदवाप्तमिह मया कुशलम् ।
तेनानपायमुच्चैर्योगरतो भवतु भव्यजनः ॥१ ॥

संवत ११६५ फाल्गुन सुदि ८ लिखितेति ॥

॥ योगशतकटीका समाप्ता ॥

❖

**પૂ. પં. શ્રી અભયશેખરવિજય ગણિવર દ્વારા**
**અનુવાદિત-સંપાદિત અધ્યયનોપયોગી સાહિત્ય**

(૧) અધ્યાત્મમત પરીક્ષા
(૨) ધર્મપરીક્ષા
(૩) સામાચારી પ્રકરણ, આરાધકવિરાધક ચતુર્ભંગી, કૂપદૃષ્ટાન્ત વિશદીકરણ પ્રકરણ
(૪) સમ્યક્ત્વષટ્સ્થાનની ચઉપઈ
(૫) દ્વાત્રિંશદ્ દ્વાત્રિંશિકા ભાગ-૧
(૬) સત્પદાદિપ્રરૂપણા
(૭) કર્મપ્રકૃતિ પદાર્થો ભાગ-૧
(૮) કર્મપ્રકૃતિ પદાર્થો ભાગ-૨
(૯) કર્મપ્રકૃતિ ભાગ-૩, પ્રશ્નોત્તરી.
(૧૦) ન્યાય સિદ્ધાન્ત મુક્તાવલી ભાગ-૧
(૧૧) ન્યાય સિદ્ધાન્ત મુક્તાવલી ભાગ-૨
(૧૨) સિદ્ધિનાં સોપાન (પ્રણિધાન વગેરે પાંચ આશયોનું વિસ્તૃતવિવેચન)
(૧૩) યોગવિંશિકા (ચાલુ)
(૧૪) તત્ત્વાવલોકન સમીક્ષા
(૧૫) તત્ત્વનિર્ણય
(૧૬) જિનપૂજા : દેવદ્રવ્ય
(૧૭) નવાંગી ગુરુપૂજન
(૧૮) કર પડિક્કમણું ભાવશું...

Jain Education International    For Personal & Private Use Only    www.jainelibrary.org

॥ ॐ अर्हं नमः ॥

श्रीहरिभद्रसूरिसन्दृब्धः स्वोपज्ञव्याख्यासमेतः

# ॥ श्री योगदृष्टिसमुच्चयः ॥

योगतन्त्रप्रत्यासन्नभूतस्य योगदृष्टिसमुच्चयस्य व्याख्या प्रारभ्यते । इह चादावेवाचार्यः (१) शिष्टसमयप्रतिपालनाय (२) विघ्नविनायकोपशान्तये (३) प्रयोजनादिप्रतिपादनार्थं (चेदं) श्लोकसूत्रमुपन्यस्तवान्–

**नत्वेच्छायोगतोऽयोगं, योगिगम्यं जिनोत्तमम् ।**
**वीरं वक्ष्ये समासेन, योगं तद्दृष्टिभेदतः ॥१॥ इति ॥**

(१) तत्र शिष्टानामयं समयो यदुत "शिष्टाः क्वचिदिष्टे वस्तुनि प्रवर्तमानाः सन्त इष्टदेवतानमस्कारपूर्वकं प्रवर्तन्ते" । अयमप्याचार्यो न हि न शिष्ट इति अतस्तत्समयप्रतिपालनाय, तथा चोक्तम् *"शिष्टानामेष समयस्ते सर्वत्र शुभे किल ॥ प्रवर्तन्ते सदैवेष्टदेवतास्तवपूर्वकम्"* ॥१॥ इत्यादि ॥ (२) तथा श्रेयांसि बहुविघ्नानि भवन्ति इति, उक्तं च–*"श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि ॥ अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायकाः"* ॥१॥ इति ॥ इदं प्रकरणं तु सम्यग्ज्ञानहेतुत्वाच्छ्रेयोभूतम् । अतो 'मा भूद्विघ्न' इति विघ्नविनायकोपशान्तये । (3) तथा प्रेक्षावतां प्रवृत्त्यर्थं प्रयोजनादिप्रतिपादनार्थं च (आद्यं श्लोक–सूत्रमुपन्यस्तम्) । तथा चोक्तम्– *"सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् । यावत्प्रयोजनं नोक्तं, तावत्तत्केन गृह्यते ॥१॥ न चाप्यविषयस्येह, शक्यं वक्तुं प्रयोजनम् ॥ काकदन्तपरीक्षादेस्तत्प्रयोगाप्रसिद्धितः ॥२॥ अस्येदं फलमित्येवं, योगः सम्बन्ध उच्यते । तदुक्त्यन्तर्गतत्वेन, न पृथक्कैश्चिदिष्यते"* ॥३॥ इत्यादि ॥

तत्र 'नत्वेच्छायोगतोऽयोगं योगिगम्यं जिनोत्तमम् वीरं' इत्यनेनेष्टदेवतास्तवमाह । 'वक्ष्ये समासेन योगं तद्दृष्टिभेदतः' इत्यनेन तु

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रयोजनादित्रयमिति श्लोकसूत्रसमुदायार्थः ॥

अवयवार्थस्तु नत्वा-प्रणम्य, वीरं इति योगः । कथमित्याह इच्छायोगतः इति क्रियाविशेषणमदः 'इच्छायोगेन', शास्त्रयोग-सामर्थ्ययोगव्यवच्छेदार्थमेतत् । इष्टव्यवच्छेदश्चायं तदनधिकारित्वेन प्रकारणारम्भे[1] मृषावादपरिहारेण सर्वत्रौचित्यारम्भप्रवृत्तिप्रदर्शनार्थः । एतेषां च त्रयाणामपि योगानां स्वरूपमनन्तरमेव वक्ष्यति । किंविशिष्टं वीरमित्याह-जिनोत्तमं इति वस्तुविशेषणम् । इह रागादिजेतृत्वात्सर्व एव विशिष्टश्रुतधरादयो जिना उच्यन्ते । तद्यथा-श्रुतजिनाः, अवधिजिनाः, मनःपर्यायज्ञानजिनाः, केवलिजिनाश्च, तेषामुत्तमः केवलित्वात्तीर्थंकरत्वाच्च । अनेन भगवतस्तथाभव्यत्वाक्षिप्तवरबोधिलाभगर्भार्हद्वात्सल्योपात्तानुत्तरपुण्यस्वरूपतीर्थंकरनामकर्मविपाकफलरूपां परं-परार्थसम्पादनीं [2]कर्मकायावस्थामाह । अयमेव विशिष्यते 'अयोगं' इति । *"कायवाङ्मनःकर्म योगः"* अविद्यमानयोगोऽयोगः, तम् । अनेन च भगवतः शैलेश्यवस्थोत्तरकालभाविनीं समस्तकर्मापगमरूपां तथाभव्यत्वपरिक्षयोद्भूतपरमज्ञानसुखलक्षणां कृतकृत्यतया निष्ठितार्थां परमफलरूपां (च) तत्त्वकायावस्थामिति । अत एवाह 'योगिगम्यं' इति, योगिनां गम्यो योगिगम्यः, तम् । योगिनोऽत्र श्रुतजिनादयो गृह्यन्ते, अनेनापि भगवतोऽयोगिमिथ्यादृष्टिगम्यत्वव्यवच्छेदमाह । एतज्जिज्ञासाया अपि चरमयथाप्रवृत्तकरणभावित्वादन्यदा तदनुपपत्तिरिति ।

वीरं इति चान्वर्थसंज्ञेयं, महावीर्यराजनात्तपःकर्मविदारणेन कषायादिशत्रु-जयात्केवलश्रीस्वयंग्रहणेन विक्रान्तो वीरः, तम् । इत्थमनेन यथाभूतान्याऽसाधारणगुणोत्कीर्तनरूपत्वाद्भावस्तवस्येष्टदेवतास्तवमाहेति । इष्टत्वं च गुणतो गुणप्रकर्षरूपत्वाद् भगवतः, देवतात्वं च परमगत्यवाप्त्येति । 'वक्ष्ये समासेन योगं तद्दृष्टिभेदतः' [3]इत्यनेन तु प्रयोजनादित्रयमाह । कथमित्युच्यते वक्ष्ये अभिधास्ये-'योगं'-मित्रादिलक्षणं, 'समासेन'-संक्षेपेण, विस्तरेण तु पूर्वाचार्यैरेवायमुक्तोऽप्युत्तराध्ययन-योगनिर्णयादिषु, 'तद्दृष्टिभेदतः' इति योगदृष्टिभेदेन । तदत्र समासतो योगाभिधानं कर्तुरनन्तरं प्रयोजनम्, परंपरा-

---

१. प्रकरणकारस्येति पाठान्तरम्; २. धर्मका.....ता.; ३. इत्यत्र तु....प्र.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रयोजनं तु निर्वाणमेव, शुद्धाशयतस्तथासत्त्वहितप्रवृतेः, अस्याश्चावन्ध्यनिर्वाणबीजत्वादिति । अभिधेयं योग एव । साध्यसाधनलक्षण (णश्च)सम्बन्ध इति; क्षुण्णोऽयं मार्गः । श्रोतृणां त्वनन्तरप्रयोजनं प्रकरणार्थपरिज्ञानं, परंपराप्रयोजनं त्वमीषामपि निर्वाणमेव, प्रकरणार्थपरिज्ञानादौचित्येनाऽत्रैव प्रवृत्तेः, अस्या[१]श्चाप्यवन्ध्यनिर्वाणबीजत्वादिति ॥१॥ एवं सम्पादितेष्टदेवतास्तवः प्रयोजनाद्यभिधाय प्रकरणोपकारकं प्रासङ्गिकमभिधातुमाह–

**इहैवेच्छादियोगानां, स्वरूपमभिधीयते।**
**योगिनामुपकाराय, व्यक्तं योगप्रसङ्गतः ॥२॥**

'इहैव' इति प्रक्रमे, किमित्याह 'इच्छादियोगानां' इति इच्छायोग-शास्त्रयोग-सामर्थ्ययोगानाम् किमत आह, 'स्वरूपमभिधीयते' इति स्वलक्षणमुच्यते । किमर्थमेतदित्याह 'योगिनामुपकाराय' इति, योगिनोऽत्र कुलयोगिनः प्रवृत्तचक्रा गृह्यन्ते वक्ष्यमाणलक्षणाः, न निष्पन्नयोगा एव, तेषामत उपकाराभावात्, तदितरेषामेवोपकारार्थम्। उपकारश्चातो योगहृदयावबोधः । कथमभिधीयत इत्याह 'व्यक्तं'-स्पष्टं, न चाप्रस्तुतमप्येतदित्याह 'योगप्रसङ्गत' इति, मित्रादियोगप्रसङ्गेन प्रसङ्गाख्यतन्त्रयुक्त्याक्षिप्तमित्यर्थः ॥२॥

इच्छायोगस्वरूपप्रतिपादनायाह–

**कर्तुमिच्छोः श्रुतार्थस्य, ज्ञानिनोऽपि प्रमादतः ।**
**विकलो धर्मयोगो यः, स इच्छायोग उच्यते ॥३॥**

'कर्तुमिच्छोः–' कस्यचिन्निर्व्याजमेव तथाविधक्षयोपशमभावेन, अयमेव विशिष्यते-किंविशिष्टस्यास्य चिकीर्षोः ? 'श्रुतार्थस्य'-श्रुतागमस्य, अर्थशब्दस्यागमवचनत्वात्, [२]अर्थ्यतेऽनेन तत्त्वं इति कृत्वा । अयमपि कदाचिदज्ञान्येव भवति, क्षयोपशमवैचित्र्यात् अत आह 'ज्ञानिनोऽपि'-अवगतानुष्ठेयतत्त्वार्थस्यापीति । एवंभूतस्यापि सतः किमित्याह 'प्रमादतः'-प्रमादेन विकथादिना, विकलः असंपूर्णः कालादिवैकल्यमाश्रित्य, धर्मयोगो-धर्मव्यापारः, 'यः' इति योऽर्थः वन्दनादिविषयः 'स इच्छायोग उच्यते',

---

१. श्चाव....पा.मो.ता. । २. अर्थ्यते.....भ.पा.ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इच्छाप्रधानत्वं चास्य तथा[१]ऽकालादावपि करणादिति ॥३॥ शास्त्रयोग-स्वरूपाभिधित्सयाह-

**शास्त्रयोगस्त्विह ज्ञेयो, यथाशक्त्यप्रमादिनः ।**
**श्राद्धस्य तीव्रबोधेन, वचसाऽविकलस्तथा ॥४॥**

'शास्त्रयोगस्तु' इति शास्त्रप्रधानो योगः शास्त्रयोगः प्रक्रमाद्धर्मव्यापार एव । स तु-पुनः, 'इह'-योगतन्त्रे, 'ज्ञेयो'- विज्ञेयः । कस्य कीदृगित्याह-यथाशक्ति-शक्त्यनुरूपं, अप्रमादिनः- विकथादिप्रमादरहितस्य । अयमेव विशिष्यते-श्राद्धस्य तथाविधमोहापगमात्संप्रत्ययात्मिकादिश्रद्धावतः, तीव्रबो-धेन-पटुबोधेन हेतुभूतेन, वचसा-आगमेन, अविकलः-अखण्डः, तथा कालादिवैकल्याऽबाधया, "न ह्यपटवोऽतिचारदोषज्ञा" इति ॥४॥

सामर्थ्ययोगलक्षणमाह-

**शास्त्रसन्दर्शितोपायस्तदतिक्रान्तगोचरः ।**
**शक्त्युद्रेकाद्विशेषेण, सामर्थ्याख्योऽयमुत्तमः ॥५॥**

'शास्त्रसन्दर्शितोपायः' इति सामान्येन शास्त्राभिहितोपायः, सामान्येन शास्त्रे तदभिधानात् । 'तदतिक्रान्तगोचर'-इति शास्त्रातिक्रान्तविषयः । कुत इत्याह शक्त्युद्रेकात् इति शक्तिप्राबल्यात् । 'विशेषेण' इति न सामान्येन शास्त्रातिक्रान्तगोचरः, सामान्येन फलपर्यवसानत्वाच्छास्त्रस्य । 'सामर्थ्या-ख्योऽयं' इति सामर्थ्ययोगाभिधानोऽयं योगः 'उत्तमः'-सर्वप्रधानः तद्भावभा-वित्वात्, अक्षेपेण प्रधानफलकारणत्वादिति ॥५॥ एतत्समर्थनायैवाह-

**सिद्ध्याख्यपदसम्प्राप्ति-हेतुभेदा न तत्त्वतः ।**
**शास्त्रादेवावगम्यन्ते, सर्वथैवेह योगिभिः ॥६॥**

'सिद्ध्याख्यपदसम्प्राप्तिहेतुभेदाः -मोक्षाभिधानपदसम्प्राप्तिकारणवि-शेषाः सम्यग्दर्शनादयः, किमित्याह 'न तत्त्वतः'-न तत्त्वभावेन परमार्थतः, 'शास्त्रादेवावगम्यन्ते'। न चैवमपि शास्त्रवैयर्थ्यमित्याह, 'सर्वथैवेह योगिभिः' इति सर्वैरेव प्रकारैरिह लोके साधुभिः, अनन्तभेदत्वात्तेषामिति ॥६॥

१. कालादावकरणादिति....ता. टि.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सर्वथा तत्परिच्छेदे शास्त्रादेवाभ्युपगम्यमाने दोषमाह-

**सर्वथा तत्परिच्छेदात् साक्षात्कारित्वयोगतः ।**
**तत्सर्वज्ञत्वसंसिद्धेस्तदा सिद्धिपदाप्तितः ॥७॥**

'सर्वथा'-सर्वैः प्रकारैरक्षेपफलसाधकत्वादिभिः । 'तत्परिच्छेदात्-' शास्त्रादेव सिद्ध्याख्यपदसम्प्राप्तिहेतुभेदपरिच्छेदात् किमित्याह 'साक्षात्कारित्व -योगतः'-केवलेनेव 'साक्षात्कारित्वेन योगात्कारणात्, 'तत्सर्वज्ञत्वसंसिद्धेः'- श्रोतृयोगिसर्वज्ञत्वसंसिद्धेः, अधिकृतहेतुभेदानामनेन[१] सर्वथा परिच्छेदयोगात्[२], ततश्च 'तदा'-श्रवणकाल एव, 'सिद्धिपदाप्तितः'-मुक्तिपदाप्तेः, अयोगि-केवलित्वस्यापि शास्त्रादेव [३]सद्भावावगतिप्रसङ्गादिति ॥७॥ स्यादेतत्- अस्त्वेवमपि का नो बाधा, इत्यत्राह-

**न चैतदेवं यत्तस्मात् प्रातिभज्ञानसङ्गतः ।**
**सामर्थ्ययोगोऽवाच्योऽस्ति, सर्वज्ञत्वादिसाधनम् ॥८॥**

'न चैतदेवं'-अनन्तरोदितं, शास्त्रादयोगिकेवलित्वावगमेऽपि सिद्ध्यसिद्धेः । यद्-यस्मादेवं तस्मात् प्रातिभज्ञानसंगतो मार्गानुसारिप्र-कृष्टोहाख्यज्ञानयुक्तः । किमित्याह 'सामर्थ्ययोगः' सामर्थ्यप्रधानो योगः सामर्थ्ययोगः प्रक्रमाद्धर्मव्यापार एव क्षपकश्रेणिगतो गृह्यते, अयं 'अवाच्योऽस्ति' तद्योगिनः स्वसंवेदनसिद्धेः, 'सर्वज्ञत्वादिसाधनं' अक्षेपेणातः सर्वज्ञत्वसिद्धेः । आह-"इदमपि प्रातिभं श्रुतज्ञानमेव, अन्यथा षष्ठज्ञानप्रसङ्गः । न चैतत् केवलं, सामर्थ्ययोगकार्यत्वादस्य । एवं च सिद्ध्याख्यपद-संप्राप्तिहेतुभेदास्तत्त्वतः शास्त्रादेवावगम्यन्त इति" । अत्रोच्यते,- नैतच्छ्रुतं, न केवलं, न च ज्ञानान्तरमिति, रात्रिंदिवारुणोदयवत् । अरुणोदयो हि न रात्रिंदिवातिरिक्तो न च तयोरेकोऽपि वक्तुं पार्यते । एवं प्रातिभमप्येतत्र तदतिरिक्तं न च तयोरेकमपि वक्तुं शक्यते । तत्काल एव तथोत्कृष्ट-क्षयोपशमवतो भावात् श्रुतत्वेन तत्त्वतोऽसंव्यवहार्यत्वान्न श्रुतं, क्षायोपशमि-कत्वादशेषद्रव्य-पर्यायाऽविषयत्वान्न[१] केवलमिति । इष्टं [२]चैतत्तारकनिरीक्ष-

---

१. मन्येन. भ.पा.प.ता. । २. दायोगात् भ. पा. प. ता. । ३. तद्भावा....ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

णादिज्ञानशब्दवाच्यमपरैरपीत्यदोषः ॥८॥ सामर्थ्ययोगभेदाभिधानायाह-

**द्विधायं धर्मसंन्यास-योगसंन्याससंज्ञितः ।**
**क्षायोपशमिका धर्मा योगाः कायादिकर्म तु ॥९॥**

'द्विधा'-द्विप्रकारः अयं-सामर्थ्ययोगः । कथमित्याह 'धर्मसंन्यास-योगसंन्याससंज्ञितः' इति । धर्मसंन्याससंज्ञा संजाताऽस्येति धर्मसंन्यासंसंज्ञितः, [3]'तारकादिभ्य इतच्' । एवं योगसंन्याससंज्ञा संजाताऽस्येति योगसंन्याससंज्ञितः । संज्ञा चेह "तया संज्ञायत" इति कृत्वा, सा तत्स्वरूपमेव गृह्यते । क एते धर्माः के वा योगा? इत्याह 'क्षायोपशमिका धर्मा':- क्षयोपशमनिवृत्ताः क्षान्त्यादयः, 'योगाः कायादिकर्म तु'-योगाः पुनः कायादिव्यापाराः कायोत्सर्गकरणादयः एवमेष द्विधा सामर्थ्ययोग इति ॥९॥

यो यदा भवति तं तदाभिधातुमाह-

**द्वितीयापूर्वकरणे, प्रथमस्तात्त्विको भवेत् ।**
**आयोज्यकरणादूर्ध्वं, द्वितीय इति तद्विदः ॥१०॥**

'द्वितीयापूर्वकरण' इति, ग्रन्थिभेदनिबन्धनप्रथमापूर्वकरणव्यवच्छेदार्थं [4]द्वितीयग्रहणं, प्रथमेऽधिकृतसामर्थ्ययोगाऽसिद्धेः । अपूर्वकरणं त्वपूर्व-परिणामः शुभोऽनादावपि भवे तेषु-तेषु धर्मस्थानेषु वर्तमानस्य तथाऽसंजातपूर्वो ग्रन्थिभेदादिफल उच्यते । तत्र प्रथमेऽस्मिन् ग्रन्थिभेदः फलं, अयं च सम्यग्दर्शनफलः, सम्यग्दर्शनं च प्रशमादिलिङ्ग आत्मपरिणामः । यथोक्तं *"प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिलक्षणं तत्त्वार्थश्रद्धानं सम्य-ग्दर्शनं"* (त.भाष्य-१-२) इति, यथाप्राधान्यमयमुपन्यासः [5]"चारुश्च पश्चानुपूर्व्येति समयविदः । द्वितीये त्वस्मिंस्तथाविधकर्मस्थितेस्तथा-विधसंख्येयसागरोपमातिक्रमभाविनि 'प्रथमस्तात्त्विको भवेत्' इति, 'प्रथमो'-पारमार्थिको भवेत्, क्षपकश्रेणियोगिनः क्षायोपशमिकक्षान्त्यादिधर्मनिवृत्तेः, अतोऽयमित्थमुपन्यास इति । अतात्त्विकस्तु प्रव्रज्याकालेऽपि भवति,

---

१. त्वाच्च न-ता.। २. तारक-ऋतम्भरादिज्ञान मो. ['ऋतम्भरा तत्र प्रज्ञा' पातंजलयोग-१-४८] ३. तदस्य सञ्जात तारकादिभ्य इतः [सिद्धहेम-७-१-१३६] ४.द्वितीयेति ग्रहणं - मो. । ५. लाभश्च ।



Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रवृत्तिलक्षणधर्मसंन्यासाया: प्रव्रज्याया: ज्ञानयोगप्रतिपत्तिरूपत्वात् ।

अत एवास्या भवविरक्त एवाधिकार्युक्त:, यथोक्तं–*"अथ प्रव्रज्यार्ह: (१) आर्यदेशोत्पन्न:, (२) विशिष्टजातिकुलान्वित:, (३) क्षीणप्रायकर्ममल:, (४) तत एव विमलबुद्धि:, (५) 'दुर्लभं मानुष्यं, जन्म मरणनिमित्तं, संपदश्चपला:, विषया दु:खहेतव: संयोगे वियोग:, प्रतिक्षणं मरणं, दारुणो विपाक:' इत्यवगतसंसारनैर्गुण्य:, (६) तत एव तद्विरक्त:, (७) प्रतनुकषाय:, (८) अल्पहास्यादि:, (९) कृतज्ञ:, (१०) विनीत: (११) प्रागपि राजामात्यपौरजनबहुमत:, (१२) अद्रोहकारी, (१३) कल्याणाङ्ग:, (१४) श्राद्ध:, (१५) स्थिर:, (१६) समुपसंपन्नश्च इति ।"* न ह्यनीदृशो ज्ञानयोगमाराधयति, न चेदृशो नाराधयतीति भावनीयम् । सर्वज्ञवचनमागम:, तत्रायमनिरूपितार्थ इति ।

'आयोज्यकरणादूर्ध्वं' इति केवलाभोगेनाऽचिन्त्यवीर्यतया 'योज्य'-तथा-तथा तत्कालक्षपणीयत्वेन भवोपग्राहिकर्मणस्तथावस्थानभावे (भावेन) 'करणं' कृतिरायोज्यकरणं शैलेश्यवस्थाफलमेतत् । अत एवाह 'द्वितीय इति तद्विद:,-योगसंन्याससंज्ञित:सामर्थ्ययोग इति तद्विदोऽभिदधति शैलेश्यवस्थायामस्य भावात् ।

सर्वमिदमागमिकं वस्तु, तथा चैतत्संवाद्यार्षम्– *"करणं अहापवत्तं, अपुव्वमणियट्टिमेव भव्वाणं । इयरेसिं पढमं चिय, भण्णइ करणं ति परिणामो ॥१॥ जा गण्ठी ता पढमं, गण्ठिं समइच्छओ भवे बीयं । अणियट्टीकरणं पुण, सम्मत्तपुरक्खडे जीवे ॥२॥ गण्ठि त्ति सुदुब्भेओ, कक्खडघण-रूढगूढगण्ठि व्व । जीवस्स कम्मजणिओ, घणरागद्दोसपरिणामो ॥३॥ एत्तो विवज्जओ खलु, भिन्ने एयम्मि सम्मणाणं तु । थोवं पि सुपरिसुद्धं [1]सच्चासम्मोहहेउ त्ति ॥४॥ सम्मत्तंमि उ लद्धे, पलियपुहत्तेण सावओ होइ । चरणोवसमखयाणं, सागरसंखन्तरा होन्ति"* [2]॥५॥ [विशेषावश्यकगता इमा गाथा: – १२०२, १२०३, – ११९५-१२२२] इत्यादि, लेशत: परिभावितार्थमेतत् ॥१०॥

---

१. सच्चाऽ-ता. २. एतासां विशेषार्थो विशेषावश्यकभाष्यविवरणे ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यत आयोज्यकरणादूर्ध्वं द्वितीयः-

**अतस्त्वयोगो योगानां, योगः पर उदाहृतः ।**
**मोक्षयोजनभावेन, सर्वसंन्यासलक्षणः ॥११॥**

अत एव शैलेश्यवस्थायां योगसंन्यासात्कारणात् 'अयोगो'-योगाभावः 'योगानां'-[1]मित्रादीनाम्, 'मध्य' इति गम्यते, किमित्याह योगः 'परः'-प्रधानः 'उदाहृतः' इति । कथमित्याह 'मोक्षयोजनभावेन' हेतुना योजनाद्योग इति कृत्वा, स्वरूपमस्याह 'सर्वसंन्यासलक्षणः'-अधर्मधर्मसंन्यासयोरप्यत्र परिशुद्धिभावादिति ॥११॥ एवमेतत्स्वरूपमभिधाय प्रकृतोपयोगमाह-

**एतत्त्रयमनाश्रित्य, विशेषेणैतदुद्भवाः ।**
**योगदृष्टय उच्यन्त अष्टौ सामान्यतस्तु ताः ॥१२॥।**

एतत्त्रयं-इच्छायोगादिलक्षणं, अनाश्रित्याऽनङ्गीकृत्य विशेषेणाऽस्मादिय-मित्येवंलक्षणेन। किमित्याह [2]'एतदुद्भवाः योगदृष्टय उच्यन्ते' मित्राद्याः, 'अष्टौ सामान्यतस्तु ताः' दृष्टय इति ॥१२॥ ताश्चैताः-

**मित्रा तारा बला दीप्रा, स्थिरा कान्ता प्रभा परा ।**
**नामानि योगदृष्टीनां, लक्षणं च निबोधत ॥१३॥**

तत्र मित्रेव मित्रा, तारेव तारेत्यादि यथार्थान्येव नामानि योगदृष्टीनाम् । 'लक्षणं' चासां वक्ष्यमाणलक्षणं, 'निबोधत'-शृणुतेत्यर्थः ॥१३॥ इहौघदृष्टिव्यवच्छेदार्थं योगदृष्टिग्रहणमिति तामभिधातुमाह-

**समेघाऽमेघरात्र्यादौ, सग्रहाद्यर्भकादिवत् ।**
**ओघदृष्टिरिह ज्ञेया, मिथ्यादृष्टीतराश्रया ॥१४॥**

इहौघदृष्टिर्ज्ञानावरणीयादिकर्मक्षयोपशमवैचित्र्याच्चित्रा, समेघामेघं च तद्रात्र्यादि च आदिशब्दाद् दिवसपरिग्रहः तस्मिन्, सग्रहादिश्चासौ अर्भकादिश्चेति विग्रहः, प्रथमादिशब्दादग्रहपरिग्रहः, द्वितीयादिशब्दादनर्भक-परिग्रहः । 'ओघदृष्टिः' सामान्यदर्शनं भवाभिनन्दिसत्त्वविषया, मिथ्यादृष्टि-श्चेतरश्च मिथ्यादृष्टीतरौ, तदाश्रया, काचाद्युपहतो मिथ्यादृष्टिः, तदनुपहतस्त्वितर

१. मैत्रा... ता. । २. इच्छायोगादिप्रभवाः - ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यक्षरगमनिका ।

भावार्थस्तु-एका समेघायां रात्रौ दृष्टिः किंचिन्मात्रग्राहिणी, अपरा त्वमेघायां मनागधिकतरग्राहिणीति, आदिशब्दाद्दिवसग्रह इति, ³तदेका समेघे दिवसे तथाऽपराऽमेघ इति, अस्ति चानयोर्विशेषः । इयमपि सग्रहस्य द्रष्टुः, आदिशब्दादग्रहस्य च, भवत्यनयोरपि विशेषः, चित्र(त्त)विभ्रमादिभेदात्। इयमप्यर्भकस्य द्रष्टुः, आदिशब्दादनर्भकस्य च, अस्त्यनयोरपि भेदो विवेकवैकल्यादिभेदात् । इयमपि मिथ्यादृष्टेः काचाद्युपहतलोचनस्य, इतरस्य तदनुपहतलोचनस्येति । यथैष दृष्टिभेद एकस्मिन्नपि दृश्ये चित्रोपाधिभेदात्, तथा पारलौकिकेऽपि प्रमेये क्षयोपशमवैचित्र्यतश्चित्रः प्रतिपत्तिभेद इति । एतन्निबन्धनोऽयं दर्शनभेद इति योगाचार्याः । न खल्वयं स्थिरादिदृष्टिमतां भिन्नग्रन्थीनां योगिनां, यथाविषयं नयभेदावबोधभावादिति । प्रवृत्तिरप्यमीषां परार्थं शुद्धबोधभावेन विनिवृत्ताऽऽग्रहतया मैत्र्यादिपारतन्त्र्येण गम्भीरोदाराशयत्वात् चारिचरिकसंजीवन्यचरकचारणनीत्येत्यलं प्रसङ्गेन ॥१४॥

प्रकृतं प्रस्तुमः । प्रकृता च मित्रादिभेदभिन्ना योगदृष्टिः, इयं चेत्थमष्टधेति निदर्शनमात्रमधिकृत्याह-

**तृणगोमयकाष्ठाग्नि-कणदीपप्रभोपमा ।**
**रत्नतारार्कचन्द्राभा, सद्दृष्टेर्दृष्टिरष्टधा ॥१५॥**

इहाधिकृतदृष्टिबोधः खल्वर्थोक्त एव तृणाग्निकणाद्युदाहरणसाधर्म्यतो निरूप्यते । सामान्येन 'सद्दृष्टे'-र्योगिनो 'दृष्टि'-र्बोधलक्षणाष्टधा भवति । तृणाग्निकणोपमा मित्रायां, गोमयाग्निकणोपमा तारायां, काष्ठाग्निकणोपमा बलायां, दीपप्रभोपमा दीप्रायां, तथाविधप्रकाशमात्रादिनेह साधर्म्यम् ।

यदाह-**मित्रायां** बोधस्तृणाग्निकणसदृशो भवति, न तत्त्वतोऽभीष्टकार्यक्षमः, सम्यक्प्रयोगकालं यावदनवस्थानादल्पवीर्यतया (ततः) पटुस्मृतिबीजसंस्काराधानानुपपत्तेः, ततश्च विकलप्रयोगभावाद्भावतो वन्दनादिकार्यायोगादिति । **तारायां** तु बोधो गोमयाग्निकणसदृशः, अयमप्येवंकल्प एव, तत्त्वतो विशिष्टस्थिति-वीर्यविकलत्वात्, अतोऽपि प्रयोगकाले स्मृतिपा-

३. तत्रे(त्रै)का - मो. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

टवासिद्धेः तदभावे प्रयोगवैकल्यात्, ततस्तथातत्कार्याभावादिति ।

**बलायामप्येष** काष्ठाग्निकणकल्पो विशिष्ट ईषदुक्तबोधद्वयात्, तद्भवतोऽत्र मनाक् स्थितिवीर्ये, अतः पटुप्राया स्मृतिरिह प्रयोगसमये तद्भावे चार्थप्रयोगमात्रप्रीत्या यत्नलेशभावादिति । **दीप्रायां** त्वेष दीपप्रभातुल्यो विशिष्टतर उक्तबोधत्रयात्, अतोऽत्रोदग्रे स्थितिवीर्ये, तत्पट्व्यपि प्रयोगसमये स्मृतिः । एवं भावतोऽप्यत्र द्रव्यप्रयोगो वन्दनादौ, तथाभक्तितो यत्नभेदप्रवृत्तेरिति प्रथमगुणस्थानकप्रकर्ष एतावानिति समयविदः ।

**स्थिरा** तु भिन्नग्रन्थेरेव भवति [1]तद्बोधो रत्नप्रभासमानस्तद्भावाऽप्रतिपाती प्रवर्धमानो निरपायो नापरपरितापकृत् परितोषहेतुः प्रायेण प्रणिधानादियोनिरिति । **कान्तायां** तु ताराभासमान एषः, अतः स्थित एव प्रकृत्या निरतिचारमा(म)त्रानुष्ठानं शुद्धोपयोगानुसारि विशिष्टाऽप्रमादसचिवं विनियोगप्रधान(नं)गम्भीरोदाराशयमिति ।

**प्रभायां** पुनरर्कभासमानो बोधः, स ध्यान(सद्ध्यान)हेतुरेव सर्वदा, नेह प्रायो विकल्पावसरः, प्रशमसारं सुखमिह, अकिंचित्कराण्यत्रान्यशास्त्राणि, समाधिनिष्ठमनुष्ठानं, तत्संनिधौ वैरादिनाशः, परानुग्रहकर्तृता, औचित्ययोगो [2]विनेयेषु, तथाऽवन्ध्या सत्क्रियेति । **परायां** पुनर्दृष्टौ चन्द्रचन्द्रिकाभासमानो बोधः सद्ध्यानरूप एव सर्वदा विकल्परहितं मनः, तदभावेनोत्तमं सुखं आरूढावरोहणवत्रानुष्ठानं प्रतिक्रमणादि, परोपकारित्वं, यथाभव्यत्वं(भव्यं) तथा पूर्ववदवन्ध्या क्रियेति ।

एवं सामान्येन सद्दृष्टेर्योगिनो दृष्टिरष्टधेत्यष्टप्रकारा । अत्राह-ग्रन्थिभेदे सद्दृष्टित्वं स च दीर्घो(? प्रो)त्तरकालमिति कथं सद्दृष्टेर्दृष्टिरष्टधेति? उच्यते । अवन्ध्यसद्दृष्टिहेतुत्वेन मित्रादिदृष्टीनामपि सतीत्वादिति । वर्षोलकनिष्पत्ताविक्षुरसकक्कबगुडकल्पाः खल्वेताः खण्डसर्करामत्स्यण्डीवर्षोलकसमाश्चेतरा इत्याचार्याः, इक्ष्वादीनामेव तथाभवनादिति । रुच्यादिगोचरा एवैताः एतेषा(तासा)मेव संवेगमाधुर्योपपत्तेः इक्षु(इक्ष्वादि)कल्पत्वादिति ।

---

१. तदस्यां बोधो - ता. । २. विनयेषु - भ. पा. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नलादिकल्पास्त्वभव्याः, संवेगमाधुर्यशून्यत्वात् । अनेन [1]सर्वथाऽपरिणामिक्षणिकात्मवादे दृष्टिभेदाभावमाह तत्तथाभवनानुपपत्तेरिति ॥१५॥ [2]इयं च सकलयोगिदर्शनसाधारणेति यथाविधानां यथा भवति तथाविधानां तथाभिधातुमाह–

**यमादियोगयुक्तानां, खेदादिपरिहारतः ।**
**अद्वेषादिगुणस्थानं, क्रमेणैषा सतां मता ॥१६॥**

यमादियोगयुक्तानामिति । इह यमादयो योगाङ्गत्वाद्योगा उच्यन्ते। यथोक्तं *"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि"* [पात० योग० २-२१] । तदेवं [3]यमादियोगप्रत्यनीकाशयपरिहारेण । एतेऽपि चाष्टावेव तथा–*"खेदोद्वेगक्षेपोत्थान[4]भ्रान्त्यन्यमुद्रुगासङ्गैः । युक्तानि हि चित्तानि प्रपञ्चतो वर्जयेन्मतिमान् ॥१॥* [षोडशक१४-३]" तदेतत्परिहारेणापि क्रमेणैषाष्टधेति । एवमद्वेषादिगुणस्थानमिति यत एतान्यप्यष्टावेव । यथोक्तम्–*"अद्वेषो जिज्ञासा शुश्रूषा श्रवणबोधमीमांसाः । परिशुद्धा प्रतिपत्तिः [5]प्रवृत्तिरष्टांगिकी तत्त्वे ॥१॥"* [षोडशक १६-१४] एवं क्रमेणैषा सद्दृष्टिः 'सतां'–मुनीनां भगवत्पतञ्जलि–भदन्तभास्करबन्धुभगवद्[6]त्तादीनां योगिनामित्यर्थः 'मता'–इष्टा । एतत्साकल्यं च प्रतिदृष्टि दर्शयिष्यामः ॥१६॥

साम्प्रतं दृष्टिशब्दार्थाभिधानायाह–

**सच्छ्रद्धासङ्गतो बोधो, दृष्टिरित्यभिधीयते ।**
**असत्प्रवृत्तिव्याघातात् सत्प्रवृत्तिपदावहः ॥१७॥**

'सच्छ्रद्धासङ्गतो बोधः' इत्यनेनासच्छ्रद्धाव्यवच्छेदमाह, असच्छ्रद्धा चेह शास्त्रबाह्या स्वाभिप्रायतस्तथाविधासदूहात्मिका गृह्यते, तद्वैकल्यात् 'सच्छ्रद्धासङ्गतः' इति एवंभूतो बोधोऽवगमः, किमित्याह [7]दृष्टिरित्यभिधीयते । दर्शनं दृष्टिरिति कृत्वा निष्प्रत्यपायतया । फलत एतामेवाह 'असत्प्रवृ–

---

१. एकान्तनित्यानित्यात्मकादिमते इत्यर्थः । २. अथ योगदृष्टिः कतमा केषां स्यादित्याह – पा. टि । ३. यमादियोगयुक्तानां क्रमेणैषाऽष्टधा प्रत्येकमङ्गयोगे दृष्टिभेदत्वात् । एवं खेदादिपरिहारतः=यमादियोगप्रत्य...ता. । ४. भ्रान्तान्य – ता. । ५. प्रवृत्तिरष्टाङ्गिका – भ. पा. मो. ता. । ६. दवधूतादी – ता. । ७. दृष्टिरत्राभि – मो. ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्तिव्याघातात्' इति तथाश्राद्धतया शास्त्रविरुद्धप्रवृत्तिव्याघातेन किमित्याह 'सत्प्रवृत्तिपदावहः' इति । शास्त्राऽविरुद्धप्रवृत्तिपदावहोऽवेद्यसंवेद्यपदपरित्यागेन वेद्यसंवेद्यपदप्रापक इत्यर्थः । वेद्यसंवेद्यपदरूपत्वेऽपि स्थिरादिदृष्टीनां सामान्यलक्षणत्वादस्य, एवमप्यदोष इति । अथवा सत्प्रवृत्तिपदं परमार्थतः शैलेशीपदमिति तदावहत्वेन न कश्चिद्दोष इति ॥१७॥ एषा च परिस्थूरभेदादष्टधा, अन्यथा बहुभेदेत्यभिधातुमाह–

**इयं चावरणापायभेदादष्टविधा स्मृता ।**
**सामान्येन विशेषास्तु, भूयांसः सूक्ष्मभेदतः ॥१८॥**

'इयं च' अनन्तरोदितलक्षणा दृष्टिः । 'आवरणापायभेदाद् आवरणापगमभेदेन परिस्थूरनीत्या 'अष्टविधा स्मृता' पूर्वाचार्यैः 'सामान्येन'–सूक्ष्मेक्षिकामनादृत्य । 'विशेषास्तु'–भेदाः पुनः सद्दृष्टेर्भूयांसोऽतिबहवः 'सूक्ष्मभेदतो'ऽनन्तभेदत्वाद्दर्शनादीनां मिथःषट्स्थानपतितत्वाभिधानादिति ॥१८॥

इह च दृष्टिसमुच्चये

**प्रतिपातयुताश्चाद्याश्चतस्रो नोत्तरास्तथा ।**
**सापाया अपि चैतास्ताः प्रतिपातेन नेतराः ॥१९॥**

'प्रतिपातयुता'–भ्रंशोपेताः । 'आद्याश्चतस्रो'–दृष्टयो मित्रादिरूपाः 'एता अपि च' प्रतिपातयुता अपि तथाकर्मवैचित्र्यात्, न तु प्रतिपातयुता एव, ताभ्यस्तदुत्तरभावादिति । 'नोत्तरास्तथा–' न स्थिराद्यास्तेन प्रकारेण प्रतिपातयुताः । यत एवं 'सापाया अपि–' दुर्गतिहेतुत्वेन, '[1]एतास्ता–' एता एव । कथमित्याह 'प्रतिपातेन' भ्रंशेन, 'नेतरा–' –न स्थिराद्याः सापाया इति । आह–कथं श्रेणिकादीनामेतदप्रतिपातादपायः ? उच्यते–एतदभावोपात्तकर्मसामर्थ्येन । अत एवोक्तं प्रतिपातेन[2] तु संभवमात्रमधिकृत्य 'सापाया अपि', तथापि प्रायोवृत्तिविषयत्वात्सूत्रस्यैवमुपन्यासः । अथवा सद्दृष्ट्य[3]घाते सत्यपायोऽप्यनपाय एव वज्रतन्दुलवत्पाकेन, तदाशयस्य कायदुःखभावेऽपि

---

१. नैतास्तत् एताः – ता. । २. प्रतिपातेन नेतरा इति । अप्रतिपातेन – ता. । ३. पाते – ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विक्रियानुपपत्तेरित्येवमुपन्यासः । योगाचार्या एवात्र प्रमाणमिति । अतः 'प्रतिपातेन नेतरा' इति स्थितम् ॥१९॥ इहापि[1] –

**प्रयाणभङ्गाभावेन, निशि स्वापसमः पुनः ।**
**विघातो दिव्यभवतश्चरणस्योपजायते ॥२०॥**

'प्रयाणभङ्गाऽभावेन' इति कन्यकुब्जादिगमनेऽनवरतप्रयाणकगमनेनापि 'निशि'–रात्रौ 'स्वापसमः पुनः'–स्वापतुल्यस्तु किमित्याह 'विघातः'–प्रतिबन्धः 'दिव्यभवतः'–देवजन्मनः सकाशात् 'चरणस्य'–चारित्रस्य 'उपजायते' तथाविधौदयिकभावयोगेन, तदभावे तु पुनस्तत्रैव प्रवृत्तिः, स्वापविगमेऽनवरतप्रयाणे[2] च प्रवृत्तकन्यकुब्जगन्तृगमनप्रवृत्तिवत् ॥२०॥ इदानीं प्रतिदृष्टि साकल्येनाङ्गयोजनामुपदर्शयन्नाह –

**मित्रायां दर्शनं मन्दं, यम इच्छादिकस्तथा ।**
**अखेदो देवकार्यादावद्वेषश्चापरत्र तु ॥२१॥**

'मित्रायां' दृष्टौ 'दर्शनं मन्दं'–स्वल्पो बोधः, तृणाग्निकणोद्द्योतेन सदृशः । 'यम'–अहिंसादिलक्षणः 'इच्छादिकस्तथा' यथोक्तं – '*अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः*' [पा. यो. सू. 2-30] । एते च 'इच्छाप्रवृत्तिस्थैर्यसिद्धिभेदा' इति वक्ष्यति । 'अखेदो देवकार्यादौ' आदिशब्दाद्गुरुकार्यादिपरिग्रहः, तथातथोपनत एतस्मिंस्तथापरितोषान्न खेदोऽत्र अपि तु प्रवृत्तिरेव, शिरोगुरुत्वादिदोषभावेऽपि भवाभिनन्दिनो भोगकार्यवत् । अद्वेषश्चामत्सरश्च अपरत्र त्वदेवकार्यादौ, तथा तत्त्ववेदितया मात्सर्यवीर्यबीजभावेऽपि तद्भावाङ्कुरानुदयात्तत्त्वानुष्ठानमधिकृत्य [3]कर्मण्याशयः । अतोऽस्यापरत्र न चिन्ता, तद्भावेऽपि करुणांशबीजस्यैवेषत्स्फुरणमिति ॥२१॥ अस्यां दृष्टौ व्यवस्थितो योगी यत्साधयति तदभिधित्सयाह–

**करोति योगबीजानामुपादानमिह स्थितः ।**
**अवन्ध्यमोक्षहेतूनामिति योगविदो विदुः ॥२२॥**

---

१. प्रतिपाताभावेऽपि उपरासु चतसृषु देवजन्मनि चरणविघातः स्यादित्याह –पा. टि. ।
२. णकप्रवृत्त – ता. । ३. कर्मण्योऽस्या – ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'करोति' तत्त्वकरणेन 'योगबीजानां'-वक्ष्यमाणलक्षणानां 'उपादानं'-ग्रहणम्, 'इह स्थितो' मित्रायां दृष्टौ मैत्रो [1]योगीत्यर्थः । किंविशिष्टानां योगबीजानामित्याह-अवन्ध्यमोक्षहेतूनां इति, न हि योगबीजं न योगफलं नाम, योगश्च मोक्षफल इति । 'इति योगविदो'-विशिष्टा एव योगाचार्याः, 'विदु'रिति जानते ॥२२॥ साम्प्रतं योगबीजान्युपन्यस्यन्नाह-

**जिनेषु कुशलं चित्तं, तन्नमस्कार एव च ।**
**प्रणामादि च संशुद्धं, योगबीजमनुत्तमम् ॥२३॥**

'जिनेषु' भगवदर्हत्सु 'कुशलं चित्तं'-द्वेषाद्यभावेन प्रीत्यादिमत्, अनेन मनोयोगवृत्तिमाह । 'तन्नमस्कार एव च'-जिननमस्कार एव च तथामनोयोगप्रेरित इति, अनेन तु वाग्योगवृत्तिम् । 'प्रणामादि च' पञ्चाङ्गादिलक्षणं; आदिशब्दान्मण्डलादिग्रहः 'संशुद्धं' इत्यसंशुद्धव्यवच्छेदार्थमेतत्, तस्य सामान्येन यथाप्रवृत्तिकरणभेदत्वात्,तस्य च योगबीजत्वानुपपत्तेः । एतत्सर्वमेव सामस्त्यप्रत्येकभावाभ्यां 'योगबीजं'-मोक्षयोजकानुष्ठान[2]कारणम् 'अनुत्तमम्' इति सर्वप्रधानं विषयप्राधान्यादिति ॥२३॥ यदैतद्भवति तत्समयमभिधातुमाह-

**चरमे पुद्गलावर्ते, तथाभव्यत्वपाकतः ।**
**संशुद्धमेतन्नियमान्नान्यदापीति तद्विदः ॥२४॥**

'चरमे पुद्गलावर्ते' इति पुद्गलानामावर्तास्तथातथा तत्तद्ग्रहण[3]-सन्त्यागाभ्यामिति पुद्गलावर्ताः, "एते ह्यनादौ संसारे तथाभव्यत्वाक्षिप्ताः कस्यचित्कियन्तोऽपि" इति वचनप्रामाण्याच्चरमपदे चरमावर्ताभिधानात् । अत्रापि कारणमाह 'तथाभव्यत्वपाकतः' इति तथाभव्यत्वपाकेन [4]ततस्तस्मान्मिथ्यात्वकटुकत्वनिवृत्त्या मनाक् माधुर्यसिद्धेः संशुद्धमेतज्जिनेषु कुशलादिचित्तम् 'नियमाद्' नियमेन तथाभव्यत्व[5]पाकभावेन कर्मणा तथा, अन्यदा संशुद्धवदसंशुद्धानुपपत्तेः, अत एवाह 'नान्यदापि' नान्यस्मिन्नपि काले प्राक्

---

१. योगीति योऽर्थः - भ.मो.ता. । २. करणं....मो. । ३. संन्यासाभ्याम्....मो. । ४. ततस्तथामि....ता. । ५. पाके भावकर्मण्यतया अन्य....ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पश्चाच्च क्लिष्टाशयविशुद्धतराशययोगात् 'इति तद्विदः' इत्येवं योगविदोऽभिदधति ॥२४॥

एवमस्य समयमभिधायैतदभिधित्सया त्वाह–

**उपादेयधियात्यन्तं, संज्ञाविष्कम्भणान्वितम् ।**
**फलाभिसन्धिरहितं, संशुद्धं ह्येतदीदृशम् ॥२५॥**

'उपादेयधिया' उपादेयबुद्ध्या 'अत्यन्तं–' सर्वान्यापोहेन तथापरिपाकात्सम्यग्ज्ञानपूर्वरूपत्वेन 'संज्ञाविष्कम्भणान्वितं–' क्षयोपशमवैचित्र्यादाहारादिसंज्ञोदयाभावयुक्तम् । संज्ञा आहारादिभेदेन दश । तथा **चार्षम्**– *"कइविहा णं* ***भन्ते*** *। सन्ना पन्नत्ता? ।* ***गोयमा*** *!, दसविहा–*[१]*आहारसन्ना, भयसन्ना, मेहुणसन्ना, परिग्गहसन्ना, कोहसन्ना, माणसन्ना, मायासन्ना, लोभसन्ना, ओहसन्ना, लोगसन्ना"* इति । एतत्सम्प्रयुक्ताशयानुष्ठानं सुन्दरमप्यभ्युदयाय, न निःश्रेयसावाप्तये, परिशुद्ध्यभावाद्भवभोगनिःस्पृहाशयप्रभवमेतदिति योगिनः, 'फलाभिसन्धिरहितं' भवान्तर्गतफलाभिसन्ध्यभावेन । आह– असम्भव्येव संज्ञाविष्कम्भणे पूर्वोदितफलाभिसन्धिः । सत्यमेतत् तद्भवान्तर्गतफलमधिकृत्य, इह तु तदन्यभवान्तर्गतमपि[२] [२]सामानिकादिलक्षणफलमधिकृत्य गृह्यते, तदभिसन्धेरसुन्दरत्वात्तदुपात्तस्यास्य स्वतः प्रतिबन्धसारत्वतः । एतद्रहितं चेदमपवर्गसाधनं, स्वप्रतिबन्धसारं तु तत्स्थानस्थितिकार्येव तथास्वभावत्वात्, गौतमभगवद्बहुमानवत्, एवम्भूतस्यैव योगनिष्पादकत्वात् । न ह्यशालिबीजात्कालेनापि शाल्यङ्कुरः । एतत्त्वभिन्नग्रन्थेरपि तदैवं भवति चरमयथाप्रवृत्तिकरणसामर्थ्येन तथाविधक्षयोपशमसारत्वादप्रमत्तयतेः सरागस्यैव वीतरागभावकल्पम् । यथाहुर्योगाचार्याः:– *"योगबीजचित्तं भवसमुद्रनिमग्नस्येषदुन्मज्जनाभोगः१ तच्छक्त्यतिशयशैथिल्यकारी२ प्रकृतेः प्रथमविप्रियेक्षा३ तदाकूतकारिणी (समुज्जासना; आगमोपायनं) मुज्जासमागमोपायनचेतस्तदुचितं*[४] *चिन्तासमावेशकृद् ग्रन्थिपर्वतपरमवज्रं नियमात्तद्भेदकारि भवचारकपलायनकालघण्टा तदपसारका–*

---

१. तंजहा आहारसन्ना....ता. । २. सर्वाग्रेतनमपि फलमधिकृत्य – भ. । ३. तीर्थकृत्तुल्यत्वादि – ता. टि. । ४. चित्ता....पा. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

*रिणी समासेने*"त्यादि । अतः संशुद्धं ह्येतदीदृशमेतदिति जिनकुशलचित्तादि । एतच्च तथाविधकालादिभावेन तत्तत्स्वभावतया फलपाकारम्भसदृशमिति ॥२५॥

न चेदमेव केवलं योगबीजमिति तदन्तराभिधित्सयाह–

**आचार्यादिष्वपि ह्येतद्विशुद्धं भावयोगिषु ।**
**वैयावृत्त्यं च विधिवच्छुद्धाशयविशेषतः ॥२६॥**

'आचार्यादिष्वपि' आचार्योपाध्यायतपस्व्यादिष्वपि, एतदेव कुशलचित्तादि, विशुद्धं'–संशुद्धमेवेत्यर्थः, किंविशिष्टेषु ? इति आह 'भावयोगिषु–' न द्रव्याचार्यादिष्वधर्मजलक्षणेषु, कूटरूपे खल्वकूट-बुद्धेरप्यसुन्दरत्वात् । नैतदेव केवलं योगबीजम्, किं तर्हि ? 'वैयावृत्त्यं च'–व्यावृत्तभावलक्षणमाहारादिना, 'विधिवत्' सूत्रोक्तविधियुक्तं पुरुषाद्य-पेक्षयेत्यर्थः । यदाह–*'पुरिसंतस्सुवयारं, अवयारं चप्पणो य णाऊणं । कुज्जा वेयावडियं, आणं काऊं निरासंसो* ॥ उ. प. २३७॥" इत्यादि ॥ अत एवाह शुद्धाशयविशेषतः–शुद्धचित्तप्रबन्धविशेषेण, अयं च तथाविधकालादि-भावेनेत्युक्तप्रायम् ॥२६॥

बीजान्तरमाह–

**भवोद्वेगश्च सहजो, द्रव्याभिग्रहपालनम् ।**
**तथा सिद्धान्तमाश्रित्य, विधिना लेखनादि च ॥२७॥**

'भवोद्वेगश्च–' संसारोद्वेगश्च जन्मादिरूपतया भवत्यस्य, 'सहजो–' नेष्टवियोगादिनिमित्तः, तस्यार्त्तध्यानरूपत्वात् । उक्तं च–*"प्रत्युत्पन्नात्तु दुःखान्निर्वेदो द्वेष ईदृशः । न वैराग्यमित्यादि"* योगबीजमिति वर्तते । तथा 'द्रव्याभिग्रहपालनं औषधादिसमादानमधिकृत्य, भावाभिग्रहस्य विशिष्टक्ष-योपशमभावरूपस्याभिन्नग्रन्थेरसम्भवाद् द्रव्याभिग्रहग्रहणम् । तथा सिद्धान्त-माश्रित्यार्षं न तु 'कामादिशास्त्राणि, किमित्याह 'विधिना'–न्यायात्तधनसत्प्र-योगादिलक्षणेन किमित्याह–'लेखनादि च' योगबीजमनुत्तममिति ॥२७॥

---

१. काणादादि...मो. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आदिशब्दार्थमाह-

**लेखना पूजना दानं, श्रवणं वाचनोद्ग्रहः ।**
**प्रकाशनाथ स्वाध्यायश्चिन्तना भावनेति च ॥२८॥**

'लेखना'-सत्पुस्तकेषु, 'पूजना'-पुष्पवस्त्रादिभिः, 'दानं'-पुस्तकादेः, 'श्रवणं'-व्याख्यानस्य, 'वाचना'-स्वयमेवास्य, 'उद्ग्रहः'-विधिग्रहणं अस्यैव, 'प्रकाशना'-गृहीतस्य भव्येषु, 'अथ स्वाध्यायो' वाचनादिः अस्यैव, 'चिन्तना' ग्रन्थार्थतः अस्यैव, 'भावनेति च' एतद्गोचरैव योगबीजमिति योगः ॥२८॥ तथा-

**बीजश्रुतौ च संवेगात् प्रतिपत्तिः स्थिराशया ।**
**तदुपादेयभावश्च, परिशुद्धो महोदयः ॥ २९ ॥**

'बीजश्रुतौ च' यथोक्तगोचरायाम्, 'संवेगात्' श्रद्धाविशेषात् प्रतिपत्तिः-'एवमेतत्'-इत्येवंरूपा, 'स्थिराशया'-तथाविधचित्तप्रबन्धविस्रोतसिकाऽभावेन । 'तदुपादेयभावश्च'-बीजश्रुत्युपादेयभावश्च, 'परिशुद्धः'-फलौत्सुक्याभावेन, 'महोदयः' अत एवानुष्वङ्गिकाभ्युदयतो निःश्रेयससाधना[१]दिति ॥२९॥

एवमेतद्योगबीजोपादानं यथा जायते तथाभिधातुमाह-

**एतद्भावमले क्षीणे, प्रभूते जायते नृणाम् ।**
**करोत्यव्यक्तचैतन्यो, महत् कार्यं न यत्क्वचित् ॥३०॥**

एतदनन्तरोदितं योगबीजोपादानं, 'भावमले-' तत्तत्पुद्गलादिसम्बन्धयोग्यतालक्षणे, क्षीणे सति, न स्तोके किं तु 'प्रभूते' (प्रभूत) पुद्गलपरावर्ताक्षेपके 'जायते-' प्रादुर्भवति, 'नृणां'-पुंसाम् । प्राय एतेऽधिकारिण इति नृग्रहणं, अन्यथा चातुर्गतिकमेतत्, प्रभूत एव क्षीणे नाल्प इत्याह 'करोत्यव्यक्तचैतन्यः'- हिताहितविवेकशून्यो बालः, 'न महत्कार्यं' अर्थानुष्ठानादि, [२]'यत्क्वचित्' किंतु व्यक्तचैतन्य एव करोति ॥३०॥ यदाऽस्य क्षयोऽभिमतः तदोपदर्शयन्नाह-

**चरमे पुद्गलावर्ते, क्षयश्चास्योपपद्यते ।**
**जीवानां लक्षणं तत्र, यत एतदुदाहृतम् ॥३१॥**

१. नत्वादि....ता. । २. यत्कार्यम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'चरमे पुद्गलावर्ते' यथोदितलक्षणे 'क्षयश्चास्योपपद्यते' भावमलस्य, जीवानां लक्षणं 'तत्र'-चरमे पुद्गलावर्ते, यत एतदुदाहृतं वक्ष्यमाणमिति ॥३१॥ यदुदाहृतं तदभिधातुमाह-

**दुःखितेषु दयात्यन्तमद्वेषो गुणवत्सु च ।**
**औचित्यात्सेवनं चैव, सर्वत्रैवाविशेषतः ॥३२॥**

'दुःखितेषु' शारीरादिना दुःखेन, 'दयात्यन्तं '[१]सानुशयत्वमित्यर्थः, अद्वेषोऽमत्सरः केष्वित्याह 'गुणवत्सु च' विद्यादिगुणयुक्तेषु, 'औचित्यात्सेवनं चैव' शास्त्रानुसारेण, 'सर्वत्रैव' दीनादौ, 'अविशेषतः' सामान्येन ॥३२॥ यतश्चैवमतः-

**एवंविधस्य जीवस्य भद्रमूर्तेर्महात्मनः ।**
**शुभो निमित्तसंयोगो, जायतेऽवञ्चकोदयात् ॥३३॥**

'एवंविधस्य जीवस्य' अनन्तरोदितलक्षणयोगिनो, 'भद्रमूर्तेः' प्रियदर्शनस्य, 'महात्मनः' सद्वीर्ययोगेन किमित्याह 'शुभः' प्रशस्तः क इत्याह 'निमित्तसंयोगः'- सद्योगादिसंयोगः,सद्योगादिनामेव निःश्रेयससाधननिमित्तत्वात् 'जायते' । कुत इत्याह 'अवञ्चकोदयात्' वक्ष्यमाणसमाधिविशेषोदयादित्यर्थः ॥३३॥ अवञ्चकोदयाद् इत्युक्तं, अत एतत्स्वरूपप्रतिपिपादयिषयाह —

**योगक्रियाफलाख्यं यत् श्रूयतेऽवञ्चकत्रयम् ।**
**साधूनाश्रित्य परममिषुलक्ष्यप्रि( क्रि )योपमम् ॥३४॥**

योगक्रियाफलाख्यं यस्मात् श्रूयतेऽवञ्चकत्रयमागमे *'योगावञ्चकः क्रियावञ्चकः फलावञ्चकः'* इति वचनात्। अव्यक्तसमाधिरेवैष, तदधिकारे पाठात्, चित्रक्षयोपशमतस्तथाविध आशयविशेष इति । एतच्च 'साधूनाश्रित्य' साधवो मुनयः, 'परं-(परमं)अवञ्चकत्रयं' स्वरूपतस्त्वेतद् 'इषुलक्ष्यक्रियोपमं' शरस्य लक्ष्यक्रिया तत्प्रधानतया तदविसंवादिन्येव, अन्यथा लक्ष्यक्रियात्वायोगात् । एवं साधूनाश्रित्य योगावञ्चकस्तद्योगाविसंवादी । एवं

१. सानुबन्धेत्यर्थः.....म. पा. मो.ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तद्वन्दनादिक्रिया तत्फलं चाश्रित्यैष एवमेव [१]द्रव्यत इति ॥३४॥ एतदपि यन्निमित्तं तदभिधातुमाह –

**एतच्च सत्प्रणामादिनिमित्तं समये स्थितम् ।**
**अस्य हेतुश्च परमस्तथाभावमलाल्पता ॥३५॥**

एतच्चावञ्चकत्रयं, 'सत्प्रणामादिनिमित्तं'– साधुवन्दनादिनिमित्तमित्यर्थः । 'समये स्थितं'– सिद्धांते प्रतिष्ठितम् । 'अस्य' सत्प्रणामादेः हेतुश्च परमः क इत्याह तथाभावमलाल्पता कर्मसम्बन्धयोग्यताल्पता रत्नादिमलापगमे ज्योत्स्नादिप्रवृत्तिवदिति योगाचार्याः ॥३५॥

प्रकृतवस्त्वपोद्वलनाय व्यतिरेकसारमाह–

**नास्मिन् घने यतः सत्सु, तत्प्रतीतिर्महोदया ।**
**किं सम्यग् रूपमादत्ते कदाचिन्मन्दलोचनः ॥ ३६ ॥**

नास्मिन् भावमले 'घने–' प्रबले यतः 'सत्सु–' साधुषु 'तत्प्रतीतिः'– सत्प्रतीतिर्भवति। किंविशिष्टेत्याह 'महोदया–' अभ्युदयादिसाधकत्वेन । प्रतिवस्तूपमयाऽमुमेवार्थमाह 'किं सम्यग् रूपमादत्ते ?' लक्षणव्यञ्जनादिकात्स्न्र्येन कदाचिन्मन्दलोचनः' इन्द्रियदोषान्नादत्त एवेत्यर्थः ॥३६॥

अधुनान्वयसारमधिकृतवस्तुसमर्थनायैवाह –

**'अल्पव्याधिर्यथा लोके तद्विकारैर्न बाध्यते ।**
**चेष्टते चेष्टसिद्धयर्थं, वृ( धृ )त्यैवायं तथा हिते ॥३७॥'**

'अल्पव्याधिः'– क्षीणप्रायरोगः यथा लोके कश्चित्तद्विकारैः– कण्ड्वादिभिः 'न बाध्यते' व्याधेरल्पत्वेन न बाध्यते । किं चेत्याह 'चेष्टते च' राजसेवादौ, 'इष्टसिद्धयर्थं' कुटुम्बादिपालनाय, एष दृष्टान्तोऽयमर्थोपनय इत्याह, वृ(धृ)त्यैव धर्मयोनिरूपया एतच्च *'वृत्तिः' (धृतिः) श्रद्धा सुखा विविदिषा विज्ञप्तिरिति धर्मयोनयः* इति [२]वचनात् । तदनया हेतुभूतया, अयं योगी तथाल्पव्याधिपुरुषवत्स्थूराऽकार्यप्रवृत्तिनिरोधेन, 'हिते'–हितविषये दानादौ चेष्टत इति॥३७॥ एतदनन्तरोदितमखिलमेव यदोपजायते

१. द्रष्टव्यः.....ता. । २. शा. वा. समु. स्त. ९ श्लो. ७ वृत्तौ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदाभिधातुमाह-

**यथाप्रवृत्तकरणे, चरमेऽल्पमलत्वतः।**
**आसन्नग्रन्थिभेदस्य समस्तं जायते ह्यदः ॥३८॥**

'यथाप्रवृत्तकरणे'- प्राग्व्यावर्णितस्वरूपे 'चरमे' पर्यन्तवर्तिनि अल्पमलत्वतः कारणात् 'आसन्नग्रंथिभेदस्य' सतः, समस्तमनन्तरोदितं 'जायते ह्यद' एतदिति ॥३८॥ अथवा चरमं यथाप्रवृत्तमिदमपूर्वमेवेत्याह-

**अपूर्वासन्नभावेन, व्यभिचारवियोगतः ।**
**तत्त्वतोऽपूर्वमेवेदमिति योगविदो विदुः ॥ ३९॥**

अपूर्वासन्नभावेन, हेतुना तथा 'व्यभिचारवियोगतः' कारणात् तत्त्वतः परमार्थेन 'अपूर्वमेवेदं' चरमं यथाप्रवृत्तम् 'इति योगविदो विदुः' एवं योगविदो जानत इति भावः ॥३९॥ इहैव गुणस्थानयोजनमाह-

**प्रथमं यद् गुणस्थानं, सामान्येनोपवर्णितम् ।**
**अस्यां तु तदवस्थायां, मुख्यमन्वर्थयोगतः ॥४०॥**

प्रथममाद्यं यद् गुणस्थानं मिथ्यादृष्ट्याख्यं, सामान्येनोपवर्णितमागमे *मिच्छद्दिट्ठी सासायणाइ (सासायणे, य)* इति वचनात्, अस्यां तु तदवस्थाया-मित्यस्यामेव, मुख्यं निरुपचरितम् । कुत इत्याह अन्वर्थयोगतः एवं गुणभावेन गुणस्थानोपपत्तेरिति ॥ उक्ता **मित्रा** ॥४०॥

अधुना **तारो**च्यते। तदत्राह -

**तारायां तु मनाक्स्पष्टं, नियमश्च तथाविधः ।**
**अनुद्वेगो हितारम्भे, जिज्ञासा तत्त्वगोचरा ॥ ४१॥**

'तारायां' पुनर्दृष्टौ किमित्याह 'मनाक्स्पष्टं' दर्शनमिति वर्तते 'मित्रायां दर्शनं मन्दं' (श्लो-२१) इत्यतः, नियमश्च तथाविधः शौचादिरिच्छादिरूप एव *'शौचसन्तोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः'* (यो.सू.-२, ३२) इति वचनात् । तदत्र द्वितीययोगात्प्रतिपत्तिरपि, मित्रायां त्वेतदभाव एव, तथाविधक्षयोपशमाभावात् । तथानुद्वेगो हितारम्भे पारलौकिकेऽखेदसहित :, अत एव तत्सिद्धिः । तथा 'जिज्ञासा तत्त्वगोचरा' अद्वेषत एव

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्प्रतिपत्त्यानुगुण्यमिति ॥ ४१ ॥ अस्यां दृष्टौ यदन्यद्गुणजातं भवति तदाह-

**भवत्यस्यां तथाऽच्छिन्ना, प्रीतिर्योगकथास्त्वलम्।**
**शुद्धयोगेषु नियमाद् बहुमानश्च योगिषु ॥४२॥**

भवत्यस्यां दृष्टौ 'तथा-' तेन प्रकारेण 'अच्छिन्ना'- भावप्रतिबन्ध-सारतया प्रीतिर्योगकथास्वलमत्यर्थं तथा शुद्धयोगेषु(फलप्रधानेषु)अवकल्क-प्रधानेषु 'नियमाद्' नियमेन बहुमानश्च योगिषु भवति ॥ ४२ ॥ न केवलमयम्, किं च-

**यथाशक्त्युपचारश्च, योगवृद्धिफलप्रदः ।**
**योगिनां नियमादेव, तदनुग्रहधीयुतः ॥ ४३ ॥**

'यथाशक्ति' शक्त्यौचित्येन किमित्याह 'उपचारश्च' ग्रासादिसम्पादनेन यथोक्तयोगिष्विति प्रक्रमः । स एव विशिष्यते 'योगवृद्धिफलप्रदः' तत्सम्य-क्परिणामेन, 'योगिनां नियमादेव' नान्यथा तद्विघातहेतुरिति, 'तदनुग्रहधीयुतः' उपचारसम्पादकानुग्रहधीयुत इत्यर्थः ॥४३॥ अयमेव विशिष्यते-

**लाभान्तरफलश्चास्य, श्रद्धायुक्तो हितोदयः ।**
**क्षुद्रोपद्रवहानिश्च, शिष्टसम्मतता तथा ॥४४॥**

लाभान्तरफलश्चास्योपचारकर्तुः, शुद्धोपचारपुण्यात्तथाविपाकभावात् । अत एव श्रद्धायुक्त उपचार इति प्रक्रमः। 'हितोदयः' पूर्ववत्, क्षुद्रोपद्रवहानिश्च भवति, अत एव व्याध्यादिनाशः शिष्टसम्मतता तथा, अत एवास्यातिसुन्दरो बहुमानः ॥४४॥ तथा-

**भयं नातीव भवजं, कृत्यहानिर्न चोचिते ।**
**तथाऽनाभोगतोऽप्युच्चैर्न चाप्यनुचितक्रिया ॥४५॥**

'भयं नातीव भवजं' तथाऽशुभाऽप्रवृत्तेः, 'कृत्यहानिर्न चोचिते' सर्वस्मिन्नेव धर्मादरात्, तथानाभोगतोऽप्युच्चैरत्यर्थं, न चाप्यनुचितक्रिया सर्वत्रैव ॥४५॥ एवं

**कृत्येऽधिकेऽधिकगते, जिज्ञासा लालसान्विता ।**
**तुल्ये निजे तु विकले, सन्त्रासो द्वेषवर्जितः ॥४६॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'कृत्ये' ध्यानादौ 'अधिके-' स्वभूमिकापेक्षया 'अधिकगत' आचार्यादिवर्तिनि 'जिज्ञासा'ऽस्य कथमेतदेवमिति 'लालसान्विता' अभिलाषातिरेकयुक्ता। 'तुल्ये' कृत्ये वन्दनादौ,'निजे' त्वात्मीय एव 'विकले -' कायोत्सर्गकरणादिना 'सन्त्रासो' भवत्यात्मनि 'हा! विराधकोऽहमि' ति, 'द्वेषवर्जितो'ऽधिकेऽधिकृतदृष्टिसामर्थ्यादिति ।।४६ ।।

**दुःखरूपो भवः सर्व उच्छेदोऽस्य कुतः कथम् ।**
**चित्रा सतां प्रवृत्तिश्च, साऽशेषा ज्ञायते कथम् ॥ ४७॥**

'दुःखरूपो भवः सर्वो' जन्मजरादिरूपत्वात् 'उच्छेदोऽस्य' भवस्य, 'कुतो' हेतोः क्षान्त्यादेः 'कथं' केन प्रकारेण । चित्रा 'सतां' मुनीनां, प्रवृत्तिश्चैत्यकर्मादिना प्रकारेण, साऽशेषा ज्ञायते कथं तदन्यापोहतः ।।४७॥ यत :

**नास्माकं महती प्रज्ञा, सुमहान् शास्त्रविस्तरः।**
**शिष्टाः प्रमाणमिह तदित्यस्यां मन्यते सदा ।।४८॥**

'नास्माकं महती प्रज्ञा' संवादिनी, स्वप्रज्ञाविकल्पिते विसंवाददर्शनात्, तथा 'सुमहान् शास्त्रविस्तरः' तत्तत्प्रवृत्तिहेतुत्वात् । एवं 'शिष्टाः' साधुजनसम्मताः 'प्रमाणमिह' व्यतिकरे (तद्)तस्मादित्येवमस्यां दृष्टौ 'मन्यते सदा' यत्तैराचरितं तदेव यथाशक्ति सामान्येन कर्तुं युज्यत इत्यर्थ : ।।४८॥ उक्ता तारा ।

अधुना बलोच्यते, तदत्राह –

**सुखासनसमायुक्तं, बलायां दर्शनं दृढम् ।**
**परा च तत्त्वशुश्रूषा, न क्षेपो योगगोचरः ।।४९॥**

सुखासनसमायुक्तमिति स्थिरसुखासनवत् 'बलायां' दृष्टौ 'दर्शनं' प्रागुक्तं 'दृढं' काष्ठाग्निकणोपममिति कृत्वा, 'परा च तत्त्वशुश्रूषा' जिज्ञासासम्भवेति । 'न क्षेपो योगगोचरः' तदनुद्वेगज इति कृत्वा ॥ ४९॥ अमुमेवार्थमाह–

**नास्यां सत्यामसत्तृष्णा, प्रकृत्यैव प्रवर्त्तते।**
**तदभावाच्च सर्वत्र, स्थितमेव सुखासनम् ॥ ५०॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नास्यामधिकृतदृष्टौ, सत्यामसत्तृष्णा- स्थितिनिबन्धनातिरिक्तगोचरा, प्रकृत्यैव स्वभावेनैव प्रवर्तते विशिष्टशुद्धियोगात् । तदभावाच्च असत्तृष्णा-भावाच्च, सर्वत्र- व्याप्त्या स्थितमेव सुखासनं, तथापरिभ्रमणाभावेन ॥ ५० ॥

एतदेवाह —

**अत्वरापूर्वकं सर्वं, गमनं कृत्यमेव वा ।**
**प्रणिधानसमायुक्तमपायपरिहारतः ॥ ५१ ॥**

अत्वरापूर्वकमनाकुलमित्यर्थः 'सर्वं सामान्येन किं तदित्याह' 'गमनं' देवकुलादौ, कृत्यमेव वा वन्दनादि, प्रणिधानसमायुक्तं-मनःप्रणिधानपुरःसरं, अपायपरिहारतः-दृष्ट्याद्यपाय(दृष्टाद्यपाय)परिहारेण॥ ५१ ॥ उक्तं दर्शनम्।

अस्यैव शुश्रूषामाह—

**कान्तकान्तासमेतस्य, दिव्यगेयश्रुतौ यथा ।**
**यूनो भवति शुश्रूषा तथास्यां तत्त्वगोचरा ॥ ५२ ॥**

कान्तकान्तासमेतस्य-कमनीयप्रियतमायुक्तस्य, दिव्यगेयश्रुतौ यथा-किंनरादिगेयश्रुतावित्यर्थः यूनो वयःस्थस्य भवति शुश्रूषा श्रोतुमिच्छा तद्गोचरैव तथाऽस्यां दृष्टौ व्यवस्थितस्य सतः तत्त्वगोचरा-तत्त्वविषयैव शुश्रूषा भवति ॥ ५२ ॥ इयं चैवम्भूतेत्याह –

**बोधाम्भःस्रोतसश्चैषा, सिरातुल्या सतां मता ।**
**अभावेऽस्याः श्रुतं व्यर्थमसिरावनिकूपवत् ॥ ५३ ॥**

बोधाम्भःस्रोतसो-बोधोदकप्रवाहस्य चैषा- शुश्रूषा, सिरातुल्या-ऽवन्ध्याऽक्षयतद्बीजकल्पतया सतां मता मुनीनामिष्टा । अभावेऽस्याः शुश्रूषायाः किमित्याह श्रुतं व्यर्थं श्रमफलम् । किंवदित्याह असिरावनिकूपवत् असिरावनौ पृथिव्यां कूपखननं अतत्खननमेवाऽतत्फलत्वादिति ॥ ५३ ॥

इहैव व्यतिरेकमाह –

**श्रुताभावेऽपि भावेऽस्याः, शुभभावप्रवृत्तितः ।**
**फलं कर्मक्षयाख्यं स्यात्परबोधनिबन्धनम् ॥ ५४ ॥**

'श्रुताभावेऽपि'- श्रवणाभावेऽपि 'भावेऽस्याः-' शुश्रूषायाः, किमित्याह

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'शुभभावप्रवृत्तितः' तद्भावस्यैव शुभत्वात् 'फलं कर्मक्षयाख्यं स्यात्'-वचनप्रामाण्येन । एतच्च 'परबोधनिबन्धनं' प्रधानबोधकारणं वचनप्रामाण्यादेव ॥५४॥ योगेऽक्षेपगुणमाह-

**शुभयोगसमारम्भे, न क्षेपोऽस्यां कदाचन ।**
**उपायकौशलं चापि, चारु तद्विषयं भवेत् ॥ ५५॥**

'शुभयोगसमारम्भे-' तथाविधध्यानादौ, न क्षेपोऽस्यामधिकृतदृष्टौ सत्यां कदाचन भवति। उपायकौशलं चापि तथाविधदेशाध्यासनादि चारुशोभनं तद्विषयं शुभयोगसमारम्भविषयं, भवेदिति ॥ ५५ ॥

तथाऽस्यामेव दृष्टावभ्युच्चयमाह—

**परिष्कारगतः प्रायो, विघातोऽपि न विद्यते ।**
**अविघातश्च सावद्यपरिहारान्महोदयः ॥ ५६ ॥**

परिष्कारगतः उपकरणगत इत्यर्थः प्रायो-बाहुल्येन विघातोऽपि- इच्छा-प्रतिबन्धो, न विद्यते-अस्यां सत्यामिति । 'अविघातश्च' किम्भूतो भवतीत्याह सावद्यपरिहारात्-प्रतिषिद्धपरिहारेण महोदयः अभ्युदयनिःश्रेयसहेतुरित्यर्थः ॥ ५६ ॥ उक्ता बला, साम्प्रतं दीप्रामाहः-

**प्राणायामवती दीप्रा, न योगोत्थानवत्यलम् ।**
**तत्त्वश्रवणसंयुक्ता, सूक्ष्मबोधविवर्जिता ॥ ५७॥**

प्राणायामवती चतुर्थाङ्गभावतः भावरेचकादिभावात् 'दीप्रा-' चतुर्थी दृष्टिः, 'न योगोत्थानवती-'तथाविधप्रशान्तवाहितालाभेन अलमत्यर्थम् तत्त्व-श्रवणसंयुक्ता- शुश्रूषाफलभावेन सूक्ष्मबोधविवर्जिता- निपुणबोधरहितेत्यर्थः ॥ ५७॥ भावरेचकादिगुणमाह —

**प्राणेभ्योऽपि गुरुर्धर्मः, सत्यामस्यामसंशयम् ।**
**प्राणांस्त्यजति धर्मार्थं, न धर्मं प्राणसङ्कटे ॥ ५८॥**

प्राणेभ्योऽपीन्द्रियादिभ्यो, गुरुर्धर्मो-महत्तर इत्यर्थः, सत्यामस्याम-धिकृतदृष्टौ दीप्रायाम् असंशयम्, एतत्कुत इत्याह प्राणांस्त्यजति धर्मार्थं-तथोत्सर्गप्रवृत्त्या, न धर्मं प्राणसङ्कटे त्यजति- तथोत्सर्गप्रवृत्त्यैव ॥ ५८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अत्र प्रतिबन्धनिबन्धनमाह–

**एक एव सुहृद्धर्मो, मृतमप्यनुयाति यः।**
**शरीरेण समं नाशं, सर्वमन्यत्तु गच्छति ॥ ५९॥**

एक एव सुहृद्धर्मो– नान्यः, तल्लक्षणयोगात् । तदाह *'मृतमप्यनुयाति य'* इति, शरीरेण समं नाशं–व्ययं, सर्वमन्यत्तु गच्छति [1]'स्वजनादि' ॥ ५९ ॥

**इत्थं सदाशयोपेतस्तत्त्वश्रवणतत्परः ।**
**प्राणेभ्यः परमं धर्मं, बलादेव प्रपद्यते ॥ ६०॥**

इत्थम्–एवं सदाशयोपेतः सन्, तत्त्वश्रवणतत्पर एतत्प्रधानः, प्राणेभ्यः परमं धर्मं बलादेव प्रपद्यते [2]तत्स्वभावत्वात् [3]स्वत (तत) एव न योगोत्थानमस्य ॥ ६० ॥ तत्त्वश्रवणगुणमाह —

**क्षाराम्भस्त्यागतो यद्वन्मधुरोदकयोगतः ।**
**बीजं प्ररोहमादत्ते, तद्वत्तत्त्वश्रुतेर्नरः ॥ ६१ ॥[4]**

क्षाराम्भस्त्यागतो यद्वन्मधुरोदकयोगतः, तन्माधुर्यानवगमेऽपि स्पष्टसंवित्त्या बीजं प्ररोहमादत्ते तद्वत्तत्त्वश्रुतेर्नरः, तत्त्वश्रुतेरचिन्त्यसामर्थ्यात् (सामर्थ्यत्वात्) महाप्रभावत्वादिति ॥६१॥ अस्यैव भावार्थमाह–

**क्षाराम्भस्तुल्य इह च भवयोगोऽखिलो मतः ।**
**मधुरोदकयोगेन, समा तत्त्वश्रुतिस्तथा ॥ ६२॥**

क्षाराम्भस्तुल्य इह च भवयोगोऽखिलो मतोऽतत्त्वश्रवणरूपोऽपि, मधुरोदकयोगेन, समा तत्त्वश्रुतिस्तथा तदङ्गतया तत्त्वश्रुतिरपीति ॥ ६२॥

अस्या एव गुणमाह–

**अतस्तु नियमादेव, कल्याणमखिलं नृणाम् ।**
**गुरुभक्तिसुखोपेतं, लोकद्वयहितावहम् ॥६३॥**

अतस्त्वित्यत एव तत्त्वश्रुतेः किमित्याह 'नियमादेव कल्याणं'

---

१. स्वजनादीति – ता. । २. तत्स्वाभाव्यात् – भ. पा. ता. । ३. अतः....ता. ।
४. क्षाराम्भस्त्यागतो....क्षाराम्भस्तुल्य....इदं श्लोकद्वयं अमितगतिना योगसारप्राभृते समुद्धृतम् ७/५०–५१ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परोपकारादि 'अखिलं नृणां'- तत्त्वश्रुतेस्तथाविधाशयभावात्, तदेव विशिष्यते 'गुरुभक्तिसुखोपेतं' कल्याणं, तदाज्ञया तत्करणस्य तत्त्वतः कल्याणत्वात्, अत एवाह 'लोकद्वयहितावहं' अनुबन्धस्य गुरुभक्तिसाध्यत्वादिति ॥ ६३ ॥

अस्य एव विशेषतः परं फलमाह-

**गुरुभक्तिप्रभावेन, तीर्थकृद्दर्शनं मतम् ।**
**समापत्त्यादिभेदेन, निर्वाणैकनिबन्धनम् ॥६४॥**

'गुरुभक्तिप्रभावेन-' गुरुभक्तिसामर्थ्येन तदुपात्तकर्मविपाकत इत्यर्थः, किमित्याह तीर्थकृद्दर्शनं मतं- भगवद्दर्शनमिष्टम्, कथमित्याह समापत्त्यादिभेदेन 'समापत्तिर्ध्यानतः स्पर्शना' तथा, आदिशब्दात्तन्नामकर्मबन्धविपाकतद्भावापत्त्युपपत्तिपरिग्रहः । तदेव विशिष्यते निर्वाणैकनिबन्धनं-[१]अवन्ध्यमोक्षकारणमसाधारणमित्यर्थः ॥ ६४ ॥ इह प्रतिषिद्धसूक्ष्मबोधलक्षणाभिधित्सयाह—

**सम्यग्घेत्वादिभेदेन, लोके यस्तत्त्वनिर्णयः ।**
**वेद्यसंवेद्यपदतः, सूक्ष्मबोधः स उच्यते ॥६५॥**

सम्यग् अविपरीतेन विधिना, हेत्वादिभेदेनेति हेतुस्वरूपफलभेदेन, लोके विद्वत्समवाये, यस्तत्त्वनिर्णयः परमार्थपरिच्छेदः, कुत इत्याह वेद्यसंवेद्यपदतः वक्ष्यमाणलक्षणाद्वेद्यसंवेद्यपदात्, 'सूक्ष्मबोधः स उच्यते', निपुण इत्यर्थः ॥ ६५ ॥ इहैव विशेषतः प्रवृत्तिनिमित्तमाह—

**भवाम्भोधिसमुत्तारात्कर्मवज्रविभेदतः ।**
**ज्ञेयव्याप्तेश्च कार्त्स्न्येन, सूक्ष्मत्वं नायमत्र तु ॥६६॥**

भवाम्भोधिसमुत्ताराद्-भवसमुद्रसमुत्तारणाल्लोकोत्तरप्रवृत्तिहेतुतया तथा कर्मवज्रविभेदतः कर्मवज्रविभेदेन-विभेदस्त्वपुनर्ग्रहणतः, ज्ञेयव्याप्तेश्च कार्त्स्न्येनानन्तधर्मात्मकतत्त्वप्रतिपत्त्या, सूक्ष्मत्वं निपुणत्वं बोधस्य, नायमत्र तु-नायं सूक्ष्मो बोधः अत्र-दीप्रायां दृष्टौ, अधस्त्यासु च तत्त्वतो ग्रन्थिभेदाऽसिद्धेरिति ॥ ६६ ॥ तदाह—

---

१. ता-प्रतौ 'अवन्ध्य' इति पदं नास्ति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अवेद्यसंवेद्यपदं, यस्मादासु तथोल्बणम् ।**
**पक्षिच्छायाजलचरप्रवृत्त्याभमतः परम् ॥६७॥**

अवेद्यसंवेद्यपदं-वक्ष्यमाणलक्षणं, यस्मादासु-मित्राद्यासु, चतसृषु दृष्टिषु, तथोल्बणं-तेन निवृत्त्यादिपदप्रकारेण प्रबलमुद्धतमित्यर्थः पक्षिच्छाया-जलचरप्रवृत्त्याभं- पक्षिच्छायायां तद्धिया जलचरप्रवृत्त्याकारम् । अतः, परं वेद्यसंवेद्यपदमासु न तात्त्विकमित्यर्थः, ग्रन्थिभेदाऽसिद्धेरित्येतदपि चरमासु चरमयथाप्रवृत्त[1]करणेनैवेत्याचार्याः ॥६७॥ किमेतदेवमित्याह :—

**अपायशक्तिमालिन्यं, सूक्ष्मबोधवि( नि )बन्धकृत् ।**
**नैतद्वतोऽयं तत्तत्त्वे, कदाचिदुपजायते ॥६८॥**

अपायशक्तिमालिन्यं नरकाद्यपायशक्तिमलिनत्वम् किमित्याह सूक्ष्म-बोधवि( नि )बन्धकृत्-अपायहेत्वासेवनक्लिष्टबीजभावेन नैतद्वतोऽपायशक्ति-मालिन्यवतो अयं-सूक्ष्मो बोधः तत्तस्मात् 'तत्त्वे इति' तत्त्वविषये कदाचिदुपजायते, अवन्ध्यस्थूरबोधबीजभावादित्यर्थः ॥६८॥ यस्मादेवम्-

**अपायदर्शनं तस्माच्छ्रुतदीपान्न तात्त्विकम् ।**
**तदाभालम्बनं त्वस्य,तथा पापे प्रवृत्तितः ॥६९॥**

अपायदर्शनं-दोषदर्शनं तस्माच्छ्रुतदीपादागमात्, न तात्त्विकं-न पारमार्थिकमस्येति योगः । तदाभालम्बनं तु-परमार्थाभाविषयं पुनर्भवति भ्रान्त्या, कुत इत्याह-तथा पापे प्रवृत्तितः-तथा चि( त्ता )त्रानाभोगप्रकारेण पापे प्रवृत्तेरिति ॥६९॥

**अतोऽन्यदुत्तरास्वस्मात्पापे कर्मागसोऽपि हि ।**
**तप्तलोहपदन्यास-तुल्या वृत्तिः क्वचिद्यदि ॥७०॥**

अतोऽन्यदुत्तरास्विति-प्रक्रमादवेद्य( संवेद्य )पदादन्यद्वेद्यसंवेद्यपदम्, उत्तरास्विति स्थिराद्यासु चतसृषु दृष्टिषु । अस्माद् वेद्यसंवेद्यपदात्, पापे-पापकर्मणि हिंसादौ, कर्मागसोऽपि हि-कर्मापराधादपि किमित्याह तप्तलोहपदन्यासतुल्या वृत्तिः- संवेगसारा पापे क्वचिद्यदि भवति, प्रायस्तु

---

१. करणिन एवे - पा. ता. । करणतः एव - मो. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न भवत्येवेति ॥ ७० ॥

किमित्येवम्भूतेत्याह-

**वेद्यसंवेद्यपदतः, संवेगातिशयादिति ।**
**चरमैव भवत्येषा, पुनर्दुर्गत्ययोगतः ॥ ७१ ॥**

वेद्यसंवेद्यपदतो-वक्ष्यमाणलक्षणात्, संवेगातिशयादित्यतिशयसंवेगेन चरमैव भवत्येषा-पापवृत्तिः । कुत इत्याह पुनर्दुर्गत्ययोगतः श्रेणिकाद्युदाहरणात्। 'प्रतिपतितसद्दर्शनानामनन्तसंसारिणामनेकधादुर्गतियोग इति यत्किंचिदेतत्,' न, अभिप्रायाऽपरिज्ञानात्, क्षायिकसम्यग्दृष्टेरेव नैश्चयिकवेद्यसंवेद्यपदभाव इत्यभिप्रायाद्, व्यावहारिकं अपि तु एतदेव चारु, सत्येतस्मिन् प्रायो दुर्गतावपि मानसदुःखाभावात्, वज्रतन्दुलवदस्य भावपाकाऽयोगात् । अचारु पुनरेकान्तत एव अतोऽन्यदिति[१] ॥७१ ॥ यदाह-

**अवेद्यसंवेद्यपदमपदं परमार्थतः ।**
**पदं तु वेद्यसंवेद्यपदमेव हि योगिनाम् ॥ ७२ ॥**

अवेद्यसंवेद्यपदमिति मिथ्यादृष्ट्याशयस्थानम्, अत एवाह 'अपदं परमार्थतः'-यथावस्थितवस्तुतत्त्वाऽनापादनात् ।'पदं तु'-पदं पुनः, 'वेद्यसंवेद्यपदमेव' वक्ष्यमाणलक्षणमन्वर्थयोगादिति ॥७२॥ तथा चाह-

**वेद्यं संवेद्यते यस्मिन्नपायादिनिबन्धनम् ।**
**तथाऽप्रवृत्तिबुद्ध्यापि, स्त्र्याद्यागमविशुद्धया ॥ ७३ ॥**

वेद्यं-वेदनीयं वस्तुस्थित्या तथाभावयोगिसामान्येनाविकल्पकज्ञानग्राह्यमिति योऽर्थः, संवेद्यते-क्षयोपशमानुरूपं निश्चयबुद्ध्या विज्ञायते, 'यस्मिन्पदे'-आशयस्थाने किंविशिष्टमित्याह अपायादिनिबन्धनं-नरकस्वर्गादिकारणम् स्त्र्यादि तथा-तेन प्रकारेण येन सामान्यानुविद्धं अप्रवृत्तिबुद्ध्यापि[२]-तदुपादानत्यागाशयात्मिकया संवेद्यते, स्त्र्यादि वेद्यं आगमविशुद्ध्या-श्रुतापनीतविपर्ययमलया । प्रधानमिदमेव बन्धकारणं प्रेक्षावतामपीति स्त्र्यादिग्रहणम् ॥ ७३ ॥

---

१. अवेद्यसंवेद्यपदमित्यर्थः । २. अप्रवृत्तिबुद्ध्या तन्मात्रग्राहिण्या गृहीतं तथा प्रवृत्तिबुद्ध्यापि...ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तत्पदं साध्ववस्थानाद्भिन्नग्रन्थ्यादिलक्षणम् ।**
**अन्वर्थयोगतस्तन्त्रे वेद्यसंवेद्यमुच्यते ॥ ७४॥**

तत्पदमिति पदनात्पदमाशयस्थानं, 'साध्ववस्थानात्-' परिच्छेदात्सम्यगवस्थानेन, भिन्नग्रन्थ्यादिलक्षणं भिन्नग्रन्थिदेशविरत(सर्वविरत)रूपम् किमित्याह 'अन्वर्थयोगतः-'अन्वर्थयोगेन, तन्त्रे-सिद्धान्ते, वेद्यसंवेद्यमुच्यते-वेद्यं संवेद्यतेऽनेनेति कृत्वा ॥ ७४॥ [1]तस्मादन्यदाह-

**अवेद्यसंवेद्यपदं, विपरीतमतो मतम् ।**
**भवाभिनन्दिविषयं,समारोपसमाकुलम् ॥७५॥**

अवेद्यसंवेद्यपदं विपरीतमतो-वेद्यसंवेद्यपदात् मतमिष्टम्, तथाहि अवेद्यमवेदनीयं वस्तुस्थित्या न तथाभावयोगिसामान्येनात्यविकल्पकज्ञानग्राह्यं, तथाविधसमानपरिणामानुपपत्तेः, तत्संवेद्यते अज्ञानावरणक्षयोपशमानुरूपं निश्चयबुद्ध्योपप्लवसारया मृगतृष्णोदकवज्ज्ञायते यस्मिन्पदे तत्तथाविधम् । अत एवाह भवाभिनन्दिविषयं एतद्, भवाभिनन्दी वक्ष्यमाणलक्षणः, समारोपसमाकुलमिति-मिथ्यात्वदोषतोऽपायगमनाभिमुख (खो न तथा पिङ्गलित ?) मित्यर्थः ॥ ७५॥ भवाभिनन्दिलक्षणमाह-

**क्षुद्रो लोभरतिर्दीनो, मत्सरी भयवान् शठः ।**
**अज्ञो भवाभिनन्दी स्यान्निष्फलारम्भसङ्गतः ॥७६॥**

क्षुद्रः-कृपणः । लोभरतिर्याञ्चाशीलः । दीनः सदैवाकल्याणदर्शी । मत्सरो- परकल्याणदुःस्थितः । भयवान्नित्यभीतः । शठो-मायावी। अज्ञो-मूर्खः भवाभिनन्दी- संसारबहुमानी स्यादेवम्भूतो, निष्फलारम्भसङ्गतः-सर्वत्राऽतत्त्वाभिनिवेशादिति ॥७६॥ यदि नामैवं ततः किमित्याह-

**इत्यसत्परिणामानुविद्धो बोधो न सुन्दरः ।**
**तत्सङ्गादेव नियमाद्विषसम्पृक्तकान्नवत् ॥७७॥**

इत्येवं-भवाभिनन्दिपरिणामे सति, अस्याऽसत्परिणामत्वात् असत्परिणामानुविद्धो बोधः सामान्येन न सुन्दरः । कुत इत्याह तत्सङ्गादेव-

---

१. अस्माद्....मो. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विवक्षिताऽसत्परिणामसम्बन्धादेव, नियमाद्-किमित्याह विषसम्पृक्तका-न्नवत् इति निदर्शनमात्रम् ॥७७॥ फलत एतदेवाह-

**एतद्वन्तोऽत एवेह, विपर्यासपरा नराः ।**
**हिताहितविवेकान्धाः, खिद्यन्ते साम्प्रतेक्षिणः ॥७८॥**

एतद्वन्तोऽवेद्य(संवेद्य)पदवन्तः अत एव-कारणात् इह-लोके, विपर्यासप्रधाना नराः किमित्याह हिताहितविवेकान्धाः-एतद्रहिता इत्यर्थः, अत एवाह खिद्यन्ते साम्प्रतेक्षिणः सन्त इति ॥७८॥ तथा च-

**जन्ममृत्युजराव्याधिरोगशोकाद्युपद्रुतम् ।**
**वीक्षमाणा अपि भवं, नोद्विजन्तेऽतिमोहतः ॥ ७९ ॥**

जन्म-प्रादुर्भावलक्षणं, मृत्युः-प्राणत्यागस्वरूपः, जरा-वयोहान्यात्मिका, व्याधिः-कुष्ठादिलक्षणः, रोगो-विशुचिकाद्यातङ्कः, शोक-इष्टवियोगादिजो मनोविकारः, आदिशब्दाद्ग्रहादिपरिग्रहः, एभिरुपद्रुतं-कदर्थितं वीक्षमाणा अपि-पश्यन्तोऽपि सन्तः भवं-संसारं, नोद्विजन्तेऽस्मादिति प्रक्रमः, अतिमोहतो हेतोरिति ॥ ७९ ॥ तथाह्य( ?चा)मीषां किमित्याह—

**कुकृत्यं कृत्यमाभाति, कृत्यं चाकृत्यवत्सदा ।**
**दुःखे सुखधियाकृष्टाः, कच्छूकण्डूयकादिवत् ॥ ८० ॥**

कुकृत्यं-प्राणातिपातारम्भादि कृत्यमाभाति मोहात्, कृत्यं चाहिंसाऽनारम्भादि च अकृत्यवत्सदाऽऽभाति मोहादेव । दुःखे-समारम्भादौ सुखधिया सुखबुद्ध्या आकृष्टा-आकर्षिताः किंवदित्याह कच्छूकण्डूयकादिवत् कच्छू पामा तस्याः कण्डूयकाः-कण्डूयन्त इति कण्डूयकाः; आदिशब्दात्कृमिप्र-तुद्यमानाग्निसेवककुष्ठिपरिग्रहः ॥८०॥ अमुमेवार्थं स्पष्टयन्नाह-

**यथाकण्डूयनेष्वेषां, धीर्न कच्छूनिवर्तने ।**
**भोगाङ्गेषु तथैतेषां, न तदिच्छापरिक्षये ॥ ८१ ॥**

कस्यचित्कण्डूयकस्य कण्डूयनातिरेकात्परिक्षीणनखस्य सिकता-क्षितिनिवासात्कथञ्चिदनवाप्ततृणकण्डूविनोदकस्य भिक्षापुटिकाद्यैर्गृहीततृ-णपूलकेन वैद्यपथिकेन दर्शनं बभूव । स तेन तृणमेकं याचितो, दत्तं चानेन

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्तस्मै । परितुष्टोऽसौ हृदयेन, चिन्तितं च सतोषं 'अहो धन्यः खल्वयं यस्यैतावन्ति कण्डूयनानि,' पृष्टश्च स 'क्व खल्वेतान्येवमतिप्रभूतान्यवाप्यन्ते ?' तेनोक्तम्-लाटदेशादौ, प्रयोजनं [1]किञ्च तवैभिः ? तेनोक्तं कच्छूकण्डूविनोदनम् । पथिक आह-यद्येवं, ततः किमेभिः ? कच्छूमेव ते सप्तरात्रेणापनयामि "कुरू(र्वो)पयोगं त्रिफलायाः" । स पुनराह-कच्छ्वपगमे कण्डूविनोदाभावे किं फलं जीवितस्य, तदलं त्रिफलया, क्वैतान्यवाप्यन्त इत्येतदेव कथय, इति श्लोकगर्भार्थः ॥ अक्षरगमनिका तु यथा [2]कण्डूयनेष्वेषां तथैतेषां भवाभिनन्दिनां धीर्न तदिच्छापरिक्षये-न भोगेच्छानिवृत्तौ, तत्त्वानभिज्ञतयैव वयःपरिपाकेऽपि वाजीकरणादरात् । इच्छाग्रहणमिह भोगक्रियोपलक्षणम् ॥८१॥ यतश्चैवमतः-

**आत्मानं पाशयन्त्येते, सदाऽसच्चेष्टया भृशम्।**
**पापधूल्या जडाः कार्यमविचार्यैव तत्त्वतः ॥ ८२॥**

आत्मानं-जीवं पाशयन्ति-गण्डयन्ति एतेऽधिकृतसत्त्वाः सदा-सर्वकालं असच्चेष्टया-प्राणातिपातारम्भरूपया हेतुभूतया भृशमत्यर्थम् । कया पाशयन्तीत्याह-पापधूल्या-ज्ञानावरणीयादिलक्षणया जडा-मन्दाः कार्यम-विचार्यैव तत्त्वतः परमार्थेन क्षणिककुसुखसक्ततयाऽऽत्मानं पाशयन्तीति ॥ ८२॥ तथा हि-

**[3]धर्मबीजं परं प्राप्य, मानुष्यं कर्मभूमिषु ।**
**न सत्कर्मकृषावस्य, प्रयतन्तेऽल्पमेधसः ॥ ८३॥**

धर्मबीजं-धर्मकारणं परं-प्रधानं प्राप्यासाद्य किं तदित्याह मानुष्यं-मानुषत्वं । क्वेत्याह कर्मभूमिषु-भरताद्यासु । किमित्याह न सत्कर्मकृषौ-धर्मबीजाधानादिरूपायां अस्य-धर्मबीजस्य प्रयतन्तेऽल्पमेधसः-अल्पमतय

---

१. किं वा - पा. ।

२. 'कण्डूयनेषु' तृणेषु 'एषां' कच्छूकण्डूयकानां 'धीः' बुद्धिस्तत्त्वानभिज्ञतया न कच्छूनिवर्तने दुष्टानुभवाधिकाराभावात् भोगाङ्गेषु स्त्र्यादिषु तथैतेषां अवेद्यसंवेद्यपदवतां - ता. ।

३. धर्मबीजं(८३), बडिशामिष...(८४), बोधरोगः (८७), कुतर्केऽभि...(८८)....इदं श्लोकचतुष्टयं अमितगतिना योगसार-प्राभृते समुद्धृतम् ७/४५-४६ - ५२-५३.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यर्थः ॥ ८३ ॥

किन्तर्हि-

**बडिशामिषवत्तुच्छे, कुसुखे दारुणोदये ।**
**सक्तास्त्यजन्ति सच्चेष्टां, धिगहो दारुणं तमः ॥ ८४ ॥**

बडिशामिषवदिति निदर्शनं मत्स्यगलमांसवत् तुच्छे-अल्पे कुसुखे-दुष्टभोगजे दारुणोदये-रौद्रविपाके, समयपरिभाषेयम्, सक्ता-गृद्धाः किमित्याह त्यजन्ति सच्चेष्टां-धर्मसाधन(नी)म्, कर्मदोषोऽयमित्याह 'धिगहो दारुणं तमः'-कष्टमज्ञानमिति योऽर्थः ॥८४॥ उपसंहरन्नाह-

**अवेद्यसंवेद्यपदमान्ध्यं दुर्गतिपातकृत् ।**
**सत्सङ्गागमयोगेन, जेयमेतन्महात्मभिः ॥ ८५ ॥**

अवेद्यसंवेद्यपदमुक्तलक्षणं, आन्ध्यं-अन्धभावरूपम् । अत एवाह दुर्गतिपातकृत्-दुर्गतिपातकरणशीलम्, सत्सङ्गागमयोगेन-विशिष्टसङ्गागमसम्बन्धेनेत्यर्थः एकवद्भावः [1]पुरुषप्राधान्यख्यापनपरः । जेयमेतदवेद्यसंवेद्यपदं, महात्मभिः-पुम्भिः अस्यामेव भूमिकायामन्यदा जेतुमशक्यत्वात् । अत एवानुवादपरोऽप्यागम इति योगाचार्याः, अयोग्यनियोगाऽसिद्धेरिति ॥८५ ॥

अत एव जयलिङ्गान्याह-

**जीयमाने च नियमादेतस्मिंस्तत्त्वतो नृणाम् ।**
**निवर्तते स्वतोऽत्यन्तं, कुतर्कविषमग्रहः ॥८६ ॥**

जीयमाने च नियमादेतस्मिन्नवेद्यसंवेद्यपदे महामिथ्यात्वनिबन्धने पशुत्वादिशब्दवाच्ये तत्त्वतः-परमार्थेन, नृणां-पुंसां निवर्तते स्वत-आत्मनैवाऽपरोपदेशेन, निमित्ताभावे नैमित्तिकाभावात् अत्यन्तं-नितरां सम्यग्ज्ञानयोगात्, आगमप्रामाण्यावगमात् कुतर्कविषमग्रहो-दृष्टा(दृष्टादृष्टा) पायहेतुत्वेन ग्रह इव ग्रहः ॥८६ ॥

किंविशिष्टोऽयमित्याह-

१. उभय- ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**बोधरोगः शमाऽपायः, श्रद्धाभङ्गोऽभिमानकृत् ।**
**कुतर्कश्चेतसो व्यक्तं, भावशत्रुरनेकधा ॥८७॥**

बोधरोगस्तद्यथावस्थितोपघातभावात्, शमाऽपायोऽसदभिनिवेशजनकत्वात्, श्रद्धाभङ्ग आगमार्थाऽप्रतिपत्तेः, अभिमानकृन्मिथ्याभिमानजनकत्वात्, एवं 'कुतर्क' आगमनिरपेक्ष इत्यर्थः, किमित्याह चेतसः अन्तःकरणस्य 'भावशत्रुः'-परमार्थरिपुः अनेकधा-आर्यापवादादि[२]कारणेन ॥८७॥

यतश्चैवमतः किमित्याह-

**कुतर्केऽभिनिवेशस्तन्न युक्तो मुक्तिवादिनाम् ।**
**युक्तः पुनः श्रुते शीले, समाधौ च महात्मनाम् ॥ ८८॥**

कुतर्के-उक्तलक्षणे, अभिनिवेशस्तथातद्ग्रहरूपः, किमित्याह-न युक्तः, केषामित्याह मुक्तिवादिनां-संन्यासिनामित्यर्थः । युक्तः पुनःश्रुते-आगमे शीले-परद्रोहविरतिलक्षणे समाधौ च-ध्यानफलभूते महात्मनां मुक्तिवादिनामभिनिवेशो युक्त इति ॥८८॥

**बीजं चास्य परं सिद्धमवन्ध्यं सर्वयोगिनाम् ।**
**परार्थकरणं येन, परिशुद्धमतोऽत्र च ॥८९॥**

बीजं चास्य श्रुतादेः परं सिद्धं-प्रधानं प्रतिष्ठितम् अवन्ध्यंनियतफलदायि सर्वयोगिनां-कुलयोगिप्रभृतीनाम् । किं तदित्याह परार्थकरणंपरप्रयोजननिष्पादनं, येन-कारणेन परिशुद्धं-अन्यानुपघातेन । अतः कारणात्अत्र च परार्थकरणे युक्तोऽभिनिवेश इति ॥ ८९॥

कुतर्कासारतामेवाभिधातुमाह-

**अविद्यासङ्गताः प्रायो, विकल्पाः सर्व एव यत् ।**
**तद्योजनात्मकश्चैष, कुतर्कः किमनेन तत् ॥९०॥**

अविद्यासङ्गताः-ज्ञानावरणीयादिसम्पृक्ताः प्रायो-बाहुल्येन विकल्पाः सर्व एव-शब्दविकल्पा अर्थविकल्पाश्च, यत्तद्योजनात्मको-विकल्पयोजना-

---

२. करणात्- पा. कारणात् - ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्मकः चैष गोमयपायसादिविकल्पनेन कुतर्कः-उक्तलक्षणः, किमनेन तत्-न किञ्चिदित्यर्थः ॥९०॥ किं च-

**जातिप्रायश्च सर्वोयं, प्रतीतिफलबाधितः ।**
**हस्ती व्यापादयत्युक्तौ, प्राप्ताऽप्राप्तविकल्पवत् ॥९१॥**

जातिप्रायश्च-दूषणाभासप्रायश्च सर्वोऽयं कुतर्कः प्रतीतिफलबाधित इति कृत्वा, एतदेवाह-हस्ती व्यापादयत्युक्तौ- मेण्ठेन, किमिवेत्याह प्राप्ताप्राप्त-विकल्पवत् इति। कश्चिन्नैयायिकश्छात्रः कुतश्चिदागच्छन् अवशीभूतमत्त-हस्त्यारूढेन केनचिदुक्तः, भोः । भोः ! त्वरितमपसरः हस्ती व्यापादयति इति च । तथाऽपरिणतन्यायशास्त्र आह रे रे बठर ! किमेवं युक्तिबाह्यं प्रलपसि । तथाहि-"किमयं प्राप्तं व्यापादयति किं वाऽप्राप्तमिति ? आद्यपक्षे भवत एव व्यापत्तिप्रसङ्गः, प्राप्तिभावात्-[1][द्वितीये त्रिभुवनस्य, अप्राप्त्यविशेषात्]" एवं यावदाह तावद्धस्तिना गृहीतः स, कथमपि मेण्ठेन मोचित इति । जातिप्रायता(च) सर्वत्र भिन्नार्थग्रहणस्वभावसंवेदनवेदने तद्गताकारविकल्पनस्यैवम्प्रायत्वादिति चर्चितमन्यत्र॥ ९१॥

किञ्च —

**स्वभावोत्तरपर्यन्त, एषोऽसावपि तत्त्वतः ।**
**नार्वाग्दृग्गोचरो न्यायादन्यथाऽन्येन कल्पितः ॥ ९२॥**

स्वभावोत्तरपर्यन्त एष कुतर्कः, अत्र च वस्तुस्वभावैरुत्तरं वाच्यमिति वचनात् एवमग्निर्दहत्यापः क्लेदयन्तीति स्वभाव एषामिति । असावपि स्वभावः तत्त्वतः परमार्थेन नार्वाग्दृग्गोचरो-न छद्मस्थविषयः न्यायाद् न्यायेन परप्रसिद्धेन किम्भूतः सन्नित्याह-अन्यथा प्रकारान्तरेण, अन्येन प्रतिवादिना, कल्पितःसन्निति । तथा हि-[2]अथ वस्तुस्वभावैरुत्तरं वाच्यमिति सर्वत्रैव तथा(न) [3]तत्तत्सिद्धौ वक्तुं पार्यते । कथम् ? येन तदर्थक्रियाकारण-स्वभावस्तेन तां करोति न पुनः क्षणिकतया, तस्याः सर्वभावेष्वेवाभ्युपगमात्

---

१. द्वितीय पक्षे तु त्रैलोक्यस्य,अप्राप्त्यविशेषात्" - ता. । २. अत्र-तान ३. तत्त्वसिद्धौ - ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यतःकुतश्चित्तदर्थक्रियाभावप्रसङ्गात्तन्निबन्धनाविशेषादिति। एवमग्निः क्लेदयत्यप्सन्निधौ तथाऽऽपो दहन्त्यग्निसन्निधौ तथास्वभावत्वादेव । स्वभाववैचित्र्यान्नात्रापि लोकबाधामन्तरेणाऽ[1]परो वा स्वभावो, दृष्टान्तमात्रस्य सर्वत्र सुलभत्वात् । तदेवमसङ्गसकारी कुतर्क इत्यैदम्पर्यम् ॥९२॥ अमुमेवार्थं विशेषेणाभिधातुमाह –

**अतोऽग्निः कलेदयत्यम्बुसन्निधौ दहतीति च ।**
**अम्ब्वग्निसन्निधौ तत्स्वाभाव्यादित्युदिते तयोः ॥९३॥**

यतो नार्वाग्दृग्गोचरोऽधिकृतस्वभावः "अतोऽस्मात्कारणात्: अग्निः क्लेदयति, अध्यक्षविरोधपरिहारायाह अम्बुसन्निधौ इति । दहति चाऽम्बु, न प्रतीतिबाधेत्याह तत्स्वाभाव्यात्तयोः अग्न्यम्बुनोरिति" उदिते [2]सत्यपि परवादिना ॥९३॥ किमित्याह–

**कोशपानादृते ज्ञानोपायो नास्त्यत्र युक्तितः ।**
**विप्रकृष्टोऽप्ययस्कान्तः स्वार्थकृद् दृश्यते यतः ॥९४॥**

कोशपानादृते–कोशपानं विना, ज्ञानोपायो नास्त्यत्र–स्वभावव्यतिकरे, युक्तितः– शुष्कतर्कयुक्त्यां, कश्चिदपरो दृष्टान्तोऽप्यस्यार्थस्योपोद्बलको विद्यते न वेत्याह विप्रकृष्टोऽप्ययस्कान्तः लोहाकर्ष उपलविशेषः, स्वार्थकृत्– लोहाकर्षादिस्वकार्यकरणशीलः, दृश्यते यतः लोके, स हि विप्रकृष्ट एव न सन्निकृष्ट लोहमेव न ताम्रादि, आकर्षत्येव न कर्तयति, तदित्थमस्येवाग्न्यादीनां तथास्वभावकल्पनं केन बाध्यते ? न केनचिदिति भावनीयम् ॥९४॥

उपसंहरन्नाह–

**दृष्टान्तमात्रं सर्वत्र यदेवं सुलभं क्षितौ ।**
**एतत्प्रधानस्तत्केन स्वनीत्यापोद्यते ह्ययम् ॥९५॥**

दृष्टान्तमात्रं साध्ये वस्तुनि लोकप्रतीतिबाधितं सर्वत्राऽविशेषेण यदेवं

---

१. परोबाधाभावो – ता. । २. सति – भ. पा. ता.।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उक्तनीत्या सुलभं क्षितौ पृथिव्याम् । [1]एतत्प्रधानोऽयं कुतर्कः, केनापोद्यते बाध्यते, न केनचित्, स्वनीतिविरोधादित्यर्थः ॥९५॥ इहैव दृष्टान्तमाह—

**द्विचन्द्रस्वप्नविज्ञाननिदर्शनबलोत्थितः ।**
**निरालम्बनतां सर्वज्ञानानां साधयन् यथा ॥९६॥**

द्विचन्द्रस्वप्नविज्ञाननिदर्शनबलोत्थित इति निदर्शनमुदाहरणमेतत्सामर्थ्योपजातः निरालम्बनतामालम्बनशून्यतां, सर्वज्ञानानां- मृगतृष्णिकाजलादिगोचराणाम् अविशेषेण सामान्येन, साधयन् यथा केनापोद्यते ? ॥ ९६ ॥

न चैवं तत्त्वसिद्धिरित्याह-

**सर्वं सर्वत्र चाप्नोति यदस्मादसमञ्जसम् ।**
**प्रतीतिबाधितं लोके तदनेन न किञ्चन ॥ ९७॥**

सर्वं निरवशेषं साध्यमिति प्रक्रमः सर्वत्रच सर्वत्रैव वस्तुनि, प्राप्नोति यदस्मात्कुतर्कात्, असमञ्जसमतिप्रसङ्गेन प्रतीतिबाधितं लोके तथाविधदृष्टान्तमात्र[2]सारं, तदनेन न किञ्चन कुतर्केण ॥ ९७॥ इतश्चैतदेवमित्याह-

**अतीन्द्रियार्थसिद्ध्यर्थं यथाऽऽलोचितकारिणाम् ।**
**प्रयासः शुष्कतर्कस्य न चासौ गोचरः क्वचित् ॥ ९८॥**

अतीन्द्रियार्थसिद्ध्यर्थं-धर्मादिसिद्ध्यर्थमित्यर्थः । यथालोचितकारिणां प्रेक्षावतां, प्रयासः-प्रवृत्त्युत्कर्षः, शुष्कतर्कस्याधिकृतस्य, न चा(साव) तीन्द्रीयोऽर्थो गोचरो विषयः क्वचिदिति ॥ ९८॥

**गोचरस्त्वागमस्यैव ततस्तदुपलब्धितः ।**
**चन्द्रसूर्योपरागादिसंवाद्यागमदर्शनात् ॥ ९९॥**

गोचरस्तु-गोचरः पुनः, आगमस्यैवातीन्द्रीयोऽर्थः। कुत इत्याह ततस्तदुप[3]लब्धितः-आगामादतीन्द्रियार्थोपलब्धितः । एतदेवाह- चन्द्रसूर्योपरागादिसंवाद्यागमदर्शनात्, लौकिकोऽयमर्थ इति भावनीयम् ॥९९॥ उपसंहरन्नाह-

---

१. एतत्प्रधानो दृष्टान्तमात्रप्रधानः तस्मात् केन कुतार्किकेण स्वनीत्या आत्मीयया व्यवस्थया अपोद्यते निराक्रियते अयं कुतर्कः ?न केनचित् स्वनीति....ता. । २. सारत्वात् - पा. । ३. लब्धेः - ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एतत्प्रधानः सच्छ्राद्धः शीलवान् योगतत्परः ।**
**जानात्यतीन्द्रियानर्थांस्तथा चाह महामतिः ॥१००॥**

एतत्प्रधान इत्यागमप्रधानः, सच्छ्राद्धः-प्राज्ञः, शीलवान् परद्रोहविरतिमान्, योगतत्परः- सदा तदभियुक्तः, एवम्भूतः, सन् जानात्यतीन्द्रियानर्थान् धर्मादीन् । तथा चाह महामतिः **पतञ्जलिः** ॥१००॥ किमित्याह—

**आगमेनानुमानेन योगाभ्यासरसेन च ।**
**त्रिधा प्रकल्पयन् प्रज्ञां लभते तत्त्वमुत्तमम् ॥१०१॥**

आगमेनाप्तवचनेन लक्षणेन, अनुमानेन-लिङ्गाल्लिङ्गिज्ञानरूपेण, योगाभ्यासरसेन च विहितानुष्ठानात्मकेन त्रिधा प्रकल्पयन् प्रज्ञामुक्तक्रमेणैव, [1]अन्यथा हि प्रवृत्त्यसिद्धेः, किमित्याह-लभते तत्त्वमुत्तमं पापसंमोहनिवृत्त्या श्रुतादिभेदेन ॥१०१॥ अमुमेवार्थमाह-

**न तत्त्वतो भिन्नमताः सर्वज्ञा बहवो यतः ।**
**मोहस्तदधिमुक्तीनां[2] तद्भेदाश्रयणं ततः ॥१०२॥**

न तत्त्वतः परमार्थेन, भिन्नमता भिन्नाभिप्रायाः, सर्वज्ञा बहवो यतो यस्मात् । मोहस्तदधिमुक्तीनां सर्वा(र्वज्ञा)तिशयश्राद्धानां, तद्भेदाश्रयणं सर्वज्ञभेदाङ्गीकरणं, ततस्तस्मादिति ॥१०२॥ कथमित्याह-

**सर्वज्ञो नाम यः कश्चित्पारमार्थिक एव हि ।**
**स एक एव सर्वत्र व्यक्तिभेदेऽपि तत्त्वतः ॥१०३॥**

सर्वज्ञो नाम यः कश्चिदर्हदादिः, पारमार्थिक एव हि निरुपचरितः स एक एव सर्वत्र सर्वज्ञत्वेन 'व्यक्तिभेदेऽपि तत्त्वतः' ऋषभादिलक्षणे सति ॥१०३॥

**प्रतिपत्तिस्ततस्तस्य सामान्येनैव यावताम् ।**
**ते सर्वेऽपि तमापन्ना इति न्यायगतिः परा ॥१०४॥**

प्रतिपत्तिः ततस्तस्य- सर्वज्ञस्य सामान्येनैव यावतां-तन्त्रान्तरीयाणामपि, ते सर्वेऽपि तमापन्नाः सर्वज्ञं मुख्य[3]मेवेति न्यायगतिः परा, तमन्तरेण

---
१. अन्यथेह - ता. । २. अधिमुक्तिः=श्रद्धा । ३. मेव च इति-पा. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्प्रतिपत्तेरसिद्धेः ॥१०४॥

**विशेषस्तु पुनस्तस्य कार्त्स्न्येनासर्वदर्शिभिः ।**
**सर्वैर्न ज्ञायते तेन तमापन्नो न कश्चन ॥१०५॥**

विशेषस्तु भेद एव, पुनस्तस्य सर्वज्ञस्य, कार्त्स्न्येनासर्वदर्शिभिः-प्रमातृभिः सर्वैर्न विज्ञायते, तददर्शनात्, दर्शनेऽपि तज्ज्ञानाऽगतेः, तेन कारणेन तं-सर्वज्ञं आपन्नः-प्रतिपन्नो, न कश्चनासर्वदर्शी ॥१०५॥

**तस्मात्सामान्यतोऽप्येनमभ्युपैति य एव हि।**
**निर्व्याजं तुल्य एवासौ तेनांशे[1]नैव धीमताम् ॥१०६॥**

तस्मात्सामान्यतोऽप्येनं सर्वज्ञं, अभ्युपैति य एव हि-कश्चिदसर्वदर्शी, निर्व्याजमौचित्ययोगेन तदुक्तपालनपरः । तुल्य एवासौ तेनांशेन सर्वज्ञप्रतिपत्तिलक्षणेन, धीमतामनुपहतबुद्धीनामित्यर्थः ॥१०६॥

अमुमेवार्थं निदर्शनगर्भमाह-

**यथैवैकस्य नृपतेर्बहवोऽपि समाश्रिताः ।**
**दूरासन्नादिभेदेऽपि तद्भृत्याः सर्व एव ते ॥ १०७ ॥**

यथैवैकस्य नृपतेः-कस्यचिद्विवक्षितस्य, बहवोऽपि समाश्रिताः-पुमांसो, दूरासन्नादिभेदेऽपि सति तथा नियोगादिभेदेन कृते, तद्भृत्या-विवक्षितनृपतिभृत्याः, सर्व एव ते समाश्रिता इति ॥१०७॥ दार्ष्टान्तिकयोजनमाह-

**सर्वज्ञतत्त्वाऽभेदेन तथा सर्वज्ञवादिनः ।**
**सर्वे तत्तत्त्वगा ज्ञेया भिन्नाचारस्थिता अपि ॥१०८॥**

सर्वज्ञतत्त्वाभेदेन-यथोदितनीत्या हेतुभूतेन तथा नृपतिसमाश्रितबहुपुरुषवत् सर्वज्ञवादिनः सर्वे जिनादिमतभेदावलम्बिनः तत्तत्त्वगाः सर्वज्ञतत्त्वगाः, ज्ञेया भिन्नाचारस्थिता अपि तथाधिकारभेदेनेति ॥१०८॥

उपसंहरन्नाह—

१. नेह - ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**न भेद एव तत्त्वेन सर्वज्ञानां महात्मनाम् ।**
**तथा नामादिभेदेऽपि भाव्यमेतन्महात्मभिः ॥१०९॥**

न भेद एव तत्त्वेन-परमार्थेन, सर्वज्ञानां महात्मनां-भावसर्वज्ञानामित्यर्थः तथेष्टानिष्टनामादिभेदेऽपि सति, भाव्यमेतन्महात्मभिः श्रुतमेधाऽसंमोहसारया प्रज्ञया ॥१०९॥ शास्त्रगर्भमेवोपपत्त्यन्तरमाह-

**चित्राऽचित्रविभागेन यच्च देवेषु वर्णिता ।**
**भक्तिः सद्योगशास्त्रेषु ततोऽप्येवमिदं स्थितम् ॥११०॥**

चित्राऽचित्रविभागेन-वक्ष्यमाणलक्षणेन यच्च देवेषु वर्णिता लोकपालमुक्तादिषु भक्तिः सद्योगशास्त्रेषु-[१]सौवाध्यात्मचिन्ताशास्त्रेषु, ततोऽपि कारणात् एवमिदं स्थितं प्रस्तुतमिति ॥११०॥ अमुमेवार्थं स्पष्टयन्नाह—

**संसारिषु हि देवेषु भक्तिस्तत्कायगामिनाम् ।**
**तदतीते पुनस्तत्त्वे तदतीतार्थयायिनाम् ॥१११॥**

संसारिषु हि देवेषु-लोकपालादिषु भक्तिः-सेवा, तत्कायगामिनां-संसारिदेवकायगामिनां, तदतीते पुनः संसारातीते तु, तत्त्वे तदतीतार्थयायिनां-संसारातीतमार्गयायिनां योगिनां भक्तिः ॥१११॥ अनयोर्विशेषमाह—

**चित्रा चाद्येषु तद्रागतदन्यद्वेषसङ्गता ।**
**अचित्रा चरमे त्वेषा शमसाराखिलैव हि ॥११२॥**

चित्रा च-नानाप्रकारा च आद्येषु-सांसारिकेषु देवेषु तद्रागतदन्यद्वेषसङ्गता- स्वाभीष्टदेवतारागाऽनभीष्टद्वेषसंयुक्ता, मोहगर्भत्वात् । अचित्रा एकाकारा, चरमे तदतीते तु तत्त्वे, एषा भक्तिः, सा च शमसारा शमप्रधाना, अखिलैव हि, तथा संमोहाभावादिति ॥११२॥ अत्रैव हेतुमाह—

**संसारिणां हि देवानां यस्माच्चित्राण्यनेकधा ।**
**स्थित्यैश्वर्यप्रभावाद्यैः स्थानानि प्रतिशासनम् ॥११३॥**

संसारिणां हि देवानां-लोकपालादीनां यस्माच्चित्राण्यनेकाकाराणि

---
१. शैवा...ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनेकधाऽनेकैः प्रकारैः । कैः कानीत्याह स्थित्यैश्वर्यप्रभावाद्यैः आदिशब्दात्सहजरूपादिपरिग्रहः, स्थानानि-विमानादीनि प्रतिशासनं-[1]शासनं प्रति ब्रह्माण्डत्रैविध्यानुभेदात् ॥११३॥ यस्मादेवम्—

**तस्मात्तत्साधनोपायो नियमाच्चित्र एव हि ।**
**न भिन्ननगराणां स्यादेकं वर्त्म कदाचन ॥११४॥**

तस्मात्कारणात् तत्साधनोपायः संसारिदेवस्थानसाधनोपायो नियमाच्चित्र एव हि भवति । इदमेव वस्तु लोकप्रसिद्धोदाहरणद्वारेणाह-न भिन्ननगराणां स्याद् भवेत् एकं वर्त्म कदाचन, तथा तद्भेदानुपपत्तेरिति ॥११४॥ तथा—

**इष्टापूर्तानि कर्माणि लोके चित्राभिसन्धितः ।**
**नानाफलानि सर्वाणि द्रष्टव्यानि विचक्षणैः ॥११५॥**

इष्टापूर्तानि कर्माणि वक्ष्यमाणलक्षणानि लोके प्राणिगणे चित्राभिसन्धितः कारणात् किमित्याह नानाफलानि-चित्रफलानीति योऽर्थः सर्वाणि द्रष्टव्यानि हेतुभेदात्, कैरित्याह विचक्षणैः-विद्वद्भिरिति ॥११५॥ इष्टापूर्तस्वरूपमाह—

**ऋत्विग्भिर्मन्त्रसंस्कारैर्ब्राह्मणानां समक्षतः ।**
**अन्तर्वेद्यां हि यद्दत्तमिष्टं तदभिधीयते ॥११६॥**

ऋत्विग्भिर्यज्ञाधिकृतैः मन्त्रसंस्कारैः करणभूतैः 'ब्राह्मणानां समक्षतः' तदन्येषां, अन्तर्वेद्यां हि यद्दत्तं हिरण्यादि, इष्टं तदभिधीयते, विशेषलक्षणयोगात् ॥११६॥

**वापीकूपतडागानि, देवतायतनानि च ।**
**अन्नप्रदानमेतत्तु, पूर्तं तत्त्वविदो विदुः ॥११७॥**

वापीकूपतडागानि-लोकप्रसिद्धान्येव, देवतायतनानि च-वसतिकादीनि, तथा अन्नप्रदानं लौकिकमेव, एतत्त्वेवम्भूतं, किमित्याह पूर्तं तत्त्वविदो विदुः-इति पूर्तपरिभाषया तत्त्वविदो विदन्ति ॥११७॥ आन्तरं हेतुमधिकृत्याह—

**अभिसन्धेः फलं भिन्नमनुष्ठाने समेऽपि हि ।**
**परमोऽतः स एवेह वारीव कृषिकर्मणि ॥११८॥**

---

१. शासनं प्रति ब्रह्माण्डत्रैधातु भे...भा. । शासनं शासनं प्रति ब्रह्माण्डत्रैधानुभे....ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अभिसन्धेस्तथाविधाशयलक्षणात् किमित्याह फलं भिन्नं-संसारिदेव-स्थानादि अनुष्ठाने समेऽपि हि इष्टादौ । परमः-प्रधानः, अतः-कारणात् स एवाऽभिसन्धिरेव इह-फलसिद्धौ । किंवदित्याह वारीव कृषिकर्मणि इति दृष्टान्तः परमो-लोकरूढ्या ॥११८॥ अभिसन्धिभेदनिबन्धनान्याह

**रागादिभिरयं चेह, भिद्यतेऽनेकधा नृणाम् ।**
**नानाफलोपभोक्तॄणां, तथा बुद्ध्यादिभेदतः ॥११९॥**

रागादिभिर्दोषैः अयं चाभिसन्धिः इह-लोके भिद्यतेऽनेकधा नृणां तन्मृदुमध्याधिमात्रभेदेन किंविशिष्टानामित्याह-नानाफलोपभोक्तॄणां तथा-बुद्ध्यादिभेदतः-वक्ष्यमाणाद् भिद्यतेऽभिसन्धिरिति ॥११९॥ एनमेवाह—

**बुद्धिर्ज्ञानमसंमोहस्त्रिविधो बोध इष्यते ।**
**तद्भेदात्सर्वकर्माणि, भिद्यन्ते सर्वदेहिनाम् ॥१२०॥**

बुद्धिर्वक्ष्यमाणलक्षणा ज्ञानमप्येवमेव, असंमोहश्चैवं, त्रिविधो बोध इष्यते शास्त्रेषु । तद्भेदाद् बुद्ध्यादिभेदात्, सर्वकर्माणीष्टादीनि भिद्यन्ते सर्वदेहिनां, तद्धेतुभेदात्फलभेद इति कृत्वा ॥ १२० ॥ तत्र—

**इन्द्रियार्थाश्रया बुद्धिर्ज्ञानं त्वागमपूर्वकम् ।**
**सदनुष्ठानवच्चैतदसंमोहोऽभिधीयते ॥१२१॥**

इन्द्रियार्थाश्रया बुद्धिस्तीर्थयातृकदर्शने [1]तद्गमनबुद्धिवत् । ज्ञानं त्वागमपूर्वकं तीर्थयात्राविधिविज्ञानवत्, सदनुष्ठानवच्चैतज्ज्ञानम् किमित्याह असंमोहोऽभिधीयते बोधराज इति ॥१२१॥

एवमेतेषां लक्षणे व्यवस्थिते सति लोकसिद्धमुदाहरणमाह—

**रत्नोपलम्भतज्ज्ञानतत्प्राप्त्यादि यथाक्रमम् ।**
**इहोदाहरणं साधु, ज्ञेयं बुद्ध्यादिसिद्धये ॥१२२॥**

'रत्नोपलम्भः' सामान्येनेन्द्रियार्थाश्रया बुद्धिः, 'तज्ज्ञानं' त्वागमपूर्वकं रत्नज्ञानं, 'तत्प्राप्त्यादि' त्वसंमोहः, बोधगर्भत्वादस्य यथाक्रमम् इह-बुद्ध्यादौ उदाहरणं साधु, अभिप्रेतार्थसाधकत्वात्, अत एवाह ज्ञेयं बुद्ध्यादिसिद्धये बुद्धिज्ञानाऽसंमोहसिद्ध्यर्थमिति ॥१२२॥ सदनुष्ठानलक्षणमाह—

---

१. तद्भूगमन....भ. पा. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**आदरः करणे प्रीतिरविघ्नः सम्पदागमः ।**
**जिज्ञासा [1]तन्निसेवा च, सदनुष्ठानलक्षणम् ॥१२३॥**

आदरो-यत्नातिशय इष्टादौ, करणे प्रीतिरभिष्वङ्गात्मिका । अविघ्नस्तत्करण एवादृष्टसामर्थ्यात्, सम्पदागमः, तत एव शुभभावपुण्यसिद्धेः, जिज्ञासेष्टादिगोचरैव, [2]तन्निसेवा चेष्टादिज्ञाऽऽसेवा चशब्दात्तदनुग्रहग्रहः । एतत्सदनुष्ठानलक्षणं, अनुबन्धसारत्वादस्य ॥१२३॥ तत्र—

**बुद्धिपूर्वाणि कर्माणि, सर्वाण्येवेह देहिनाम् ।**
**संसारफलदान्येव, विपाकविरसत्वतः ॥१२४॥**

[3]बुद्धिपूर्वाणि कर्माणि सर्वाण्येव सामान्येन इह-लोके, देहिनां-प्राणिनाम् किमित्याह संसारफलदान्येव, अशास्त्रपूर्वकत्वात्, तथा चाह विपाकविरसत्वतः इति तेषां नियोगत एव विपाकविरसत्वादिति ॥१२४॥

**ज्ञानपूर्वाणि तान्येव, मुक्त्यङ्गं कुलयोगिनाम् ।**
**श्रुतशक्तिसमावेशादनुबन्धफलत्वतः ॥१२५॥**

ज्ञानपूर्वाणि-यथोदितज्ञाननिबन्धनानि तान्येव-कर्माणि किमित्याह मुक्त्यङ्गं भवन्ति कुलयोगिनां-वक्ष्यमाणलक्षणानाम् । कुलयोगिग्रहणमन्याऽसम्भव-ज्ञापनार्थम्, कुत इत्याह श्रुतशक्तिसमावेशात् हेतोः, अमृतशक्तिकल्पेयं, नैतदभावे मुख्यं कुलयोगित्वम्। अत एवाह 'अनुबन्धफलत्वतः' मुक्त्यङ्गत्वसिद्धेः, तात्त्विकानुबन्धस्यैवम्भूतत्वादिति ॥१२५॥

**असंमोहसमुत्थानि, त्वेकान्तपरिशुद्धितः ।**
**निर्वाणफलदान्याशु, भवातीता[4]र्थयायिनाम् ॥१२६॥**

असंमोहसमुत्थानि-पुनर्यथोदितासंमोहनिबन्धनानि तु एकान्तपरिशुद्धितः-कारणात्, परिपाकवशेन किमित्याह निर्वाणफलदान्याशु-शीघ्रं तान्येव कर्माणि केषामित्याह भवातीता[4]र्थयायिनां-सम्यग् परतत्त्ववेदिनामित्यर्थः ॥१२६॥ एतेषामेव लक्षणमाह-

१.२. तज्ज्ञसेवा. ता. । ३. बुद्धिपूर्वाणि-यथोदितबुद्धिनिबन्धनानि. ता. । ४. ध्व...ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**प्राकृतेष्विह भावेषु, येषां चेतो निरुत्सुकम् ।**
**भवभोगविरक्तास्ते, भवातीता[१]र्थयायिनः ॥१२७॥**

प्राकृतेष्विह भावेषु शब्दादिषु बुद्धिपर्यवसानेषु, येषां चेतो निरुत्सुकं निःसङ्गतासमावेशात्, भवभोगविरक्तास्ते- एवम्भूता जीवा मुक्तकल्पा भवातीता[२]र्थयायिन उच्यन्ते, भवचित्ताऽ(न्ताऽ)संस्पर्शादिति ॥१२७॥

**एक एव तु मार्गोऽपि,तेषां शमपरायणः ।**
**अवस्थाभेदभेदेऽपि, जलधौ तीरमार्गवत् ॥१२८॥**

एक एव तु मार्गोऽपि चित्तविशुद्धिलक्षणः । तेषां भवातीता[२]र्थयायिनां शमपरायणः-शमनिष्ठः, अवस्थाभेदभेदेऽपि-गुणस्थानकभेदापेक्षया जलधौ तीरमार्गवदिति निदर्शनम्। अवस्थाभेदश्चेह तद्दूरासन्नतादिभेदेन॥१२८॥

परतत्त्वाभिधित्सयाऽऽह-

**संसारातीततत्त्वं तु, परं निर्वाणसंज्ञितम्।**
**तद्ध्येकमेव नियमाच्छब्दभेदेऽपि तत्त्वतः ॥१२९॥**

संसारातीततत्त्वं त्विति संसारातीतं पुनस्तत्त्वम् किमित्याह परं- प्रधानं निर्वाणसंज्ञा संजाताऽस्येति कृत्वा, [३]तद्ध्येकमेव सामान्येन, नियमात् नियमेन शब्दभेदेऽपि वक्ष्यमाणलक्षणे सति, तत्त्वतः परमार्थेन ॥१२९॥ एतदेवाह—

**सदाशिवः परं ब्रह्म, सिद्धात्मा तथातेति च ।**
**शब्दैस्तदुच्यतेऽन्वर्थादेकमेवैवमादिभिः ॥१३०॥**

सदाशिव इति सर्वकालं शिवो न कदाचिदप्यशिवः, त्रिकालपरिशुद्धः सर्वाशिवाऽभावात् परं-प्रधानं 'ब्रह्म-'तथा बृंहत्त्वबृंहकत्वाभ्यां सद्भावालम्बनत्वात्। सिद्धात्मा-कृतकृत्यात्मा निष्ठितार्थ इत्यर्थः । तथातेति च-आकालं तथाभावात् । यथोक्तम्-*"उपादाननिमित्ताभ्यामधिकारित्वता[४] ध्रुवा । सर्वकालं तथाभावात्तथातेत्यभिधीयते ॥१॥ विसंयोगात्मिका चेयं [५]त्रिदुःखपरिवर्जिता । भूतकोटिः परात्यन्तं भूतार्थफलदेति च ॥२॥"* [ ] इत्यादिशब्दैस्तन्निर्वाणमुच्यते, अन्वर्थादन्वर्थेनोक्तनीत्या एकमेव सत् एवमादिभिरिति ॥१३०॥ कथमेकमेवे(वमि) त्याह-

---

१. ध्व...ता. । २. ध्व...ता.। ३. तथैकमेव तच्चैकमेव...ता.। ४. त्वतो. ता. ।
५. दुःख दुःख 1. संस्कार दुःख 2. परिणामदुःखाख्यैः 3. ता. टि.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तल्लक्षणाविसंवादान्निराबाधमनामयम्।**
**निष्क्रियं च परं तत्त्वं, यतो जन्माद्ययोगतः ॥१३१॥**

तल्लक्षणाऽविसंवादादिति- निवार्णलक्षणाविसंवादात् । एनमेवाह निराबाधं निर्गतमाबाधाभ्यः, अनामयं- अविद्यमानद्रव्यभावरोगम्, निष्क्रियं च कर्तव्याभावान्निबन्धनाभावेन परं तत्त्वमेवम्भूतं यतो- यस्मात्, जन्माद्ययोगतो जन्मजरामरणाऽयोगेन ॥१३१॥ ऐदम्पर्यमाह—

**ज्ञाते निर्वाणतत्त्वेऽस्मिन्नसंमोहेन तत्त्वतः ।**
**प्रेक्षावतां न तद्भक्तौ, विवाद उपपद्यते ॥१३२॥**

ज्ञाते परिच्छिन्ने, निर्वाणतत्त्वेऽस्मिन्नेवम्भूते असंमोहेन बोधेन, तत्त्वतःपरमार्थतः किमित्याह प्रेक्षावतां बुद्धिमतां न तद्भक्तौ-निवार्णतत्त्वसेवायां किमित्याह विवाद उपपद्यते तत् तत्त्वज्ञानभेदाभावात् (तत्तत्त्वज्ञानाभेदात्) अन्यथा प्रेक्षावत्त्वविरोधादिति ॥१३२॥

**सर्वज्ञपूर्वकं चैतन्नियमादेव यत्स्थितम् ।**
**आसन्नोऽयमृजुमार्गस्तद्भेदस्तत्कथं भवेत् ॥१३३॥**

सर्वज्ञपूर्वकं चैतदधिकृततत्त्वं निर्वाणाख्यं नियमादेव यत्स्थितमसर्वज्ञस्य निर्वाणानुपपत्तेः, आसन्नोऽयं निर्वाणस्य सर्वज्ञलक्षण ऋजुरवक्रो, मार्गः- पन्थाः। तद्भेदः-सर्वज्ञभेदो मतभेदलक्षणः तत्तस्मात् कथं भवेन्नैव भवतीति ॥१३३॥

देशनाभेदः कथमित्याशङ्क्याह-

**चित्रा तु देशनैतेषां,स्याद्विनेयानुगुण्यतः ।**
**यस्मादेते महात्मानो, भवव्याधिभिषग्वराः ॥१३४॥**

चित्रा तु—नानाप्रकारा पुनः देशना "नित्य आत्मा, अनित्य इति च" इत्यादिरूपा एतेषां-सर्वज्ञानां कपिलसुगतादीनां, स्याद्-भवेत् विनेयानुगुण्यतः तथाविधशिष्यानुगुण्येन, कालान्तरापायभीरुमधिकृत्योपसर्जनीकृतपर्याया द्रव्यप्रधाना नित्यदेशना, भोगास्थावतस्त्वधिकृत्योपसर्जनीकृतद्रव्या पर्यायप्रधाना अनित्यदेशना । न तु तेऽन्वयव्यतिरेकवद्वस्तुवेदिनो न भवन्ति, सर्वज्ञत्वानुपपत्तेः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवं देशना तु [1]तथागुणसम्पादनेनाऽदुष्टैवेत्याह 'यस्मादेते महात्मानः' सर्वज्ञाः किमित्याह भवव्याधिभिषग्वराः संसारव्याधिवैद्यप्रधानाः ॥१३४॥

अतः किमित्याह—

**यस्य येन प्रकारेण, बीजाधानादिसम्भवः।**
**सानुबन्धो भवत्येते, तथा तस्य जगुस्ततः ॥१३५॥**

यस्य-प्राणिनो, येन प्रकारेण- नित्यदेशनादिलक्षणेन, बीजाधानादिसम्भवस्तथाभा(भ)वोद्वेगादिभावेन सानुबन्धो भवति तथातथोत्तरगुणवृद्ध्या एते सर्वज्ञाः तथा तेन प्रकारेण तस्य जगुः गीतवन्तः तत इति ॥१३५॥

परिहारान्तरमाह-

**एकापि देशनैतेषां यद्वा श्रोतृविभेदतः ।**
**अचिन्त्यपुण्यसामर्थ्यात् तथा चित्राऽवभासते ॥१३६॥**

एकापि देशना तन्मुखविनिर्गममधिकृत्य एतेषां सर्वज्ञानां यद्वा श्रोतृविभेदतस्तथाभव्यत्वभेदेन अचिन्त्यपुण्यसामर्थ्यात् [2]परबोधाश्रयोपात्तकर्मविपाकादित्यर्थः, तथा नित्यादिप्रकारेण चित्राऽवभासत इति ॥१३६॥

न च नैवमपि गुण इत्याह—

**यथाभव्यं च सर्वेषामुपकारोऽपि तत्कृतः ।**
**जायतेऽवन्ध्यताप्येवमस्याः सर्वत्र सुस्थिता ॥१३७॥**

यथाभव्यं च भव्यसदृशं च [3]सर्वेषामुपकारोऽपि- गुणोऽपि, तत्कृतो-देशनानिष्पन्नः जायते प्रादुर्भवति । अवन्ध्यताऽपि- अनिष्फलतापि एवमुक्तनीत्या अस्याः देशनायाः, सर्वत्र सुस्थितेति ॥१३९॥ प्रकारान्तरमाह—

**यद्वा तत्तन्नयापेक्षा, तत्तत्कालादियोगतः ।**
**ऋषिभ्यो देशना चित्रा, तन्मूलैषापि तत्त्वतः ॥१३८॥**

यद्वा तत्तन्नयापेक्षा-द्रव्यास्तिकादीनधिकृत्य तत्तत्कालादियोगात्-दुःषमादियोगात् ऋषिभ्यः- **कपिलादिभ्य** एव देशना चित्रेति । न चेयमपि

---

१. तथागुणदर्शनेनाऽ इति मुद्रितप्रतौ । तथा तद्गुण....भ. । तथा तद्गुणसंदर्शनेन.... ता. । २. परबोधिप्रत्ययोपात्तकर्म.....पा. । ३. सर्वेषां श्रोतृणामुपका....ता.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निर्मूलेत्याह- तन्मूलैषापि- सर्वज्ञदेशनामूलैषापि तत्त्वतः परमार्थेन, तत्प्रवचनानुसारतस्तथाप्रवृत्तेरिति ॥१३८॥ [1]प्रकृते ऋषिभ्यो योजनमाह—

**तदभिप्रायमज्ञात्वा, न ततोऽर्वाग्दृशां सताम्।**
**युज्यते तत्प्रतिक्षेपो, महानर्थकरः परः ॥१३९॥**

तदभिप्रायं-सर्वज्ञाभिप्रायं अज्ञात्वा, न ततः कारणात् अर्वाग्दृशां सतां प्रमातृणाम् किमित्याह युज्यते तत्प्रतिक्षेपः सर्वज्ञप्रतिक्षेपः, किंविशिष्ट इत्याह 'महानर्थकरः परः' महानर्थकरणशीलः प्रधान इति ॥१३९॥

इहैव निदर्शनमाह—

**निशानाथप्रतिक्षेपो, यथाऽन्धानामसङ्गतः।**
**तद्भेदपरिकल्पश्च, तथैवार्वाग्दृशामयम् ॥ १४०॥**

निशानाथप्रतिक्षेपश्चन्द्रप्रतिक्षेपः यथाऽन्धानां-चक्षुर्विकलानां, असङ्गतो नीत्या, तद्भेदपरिकल्पश्च-निशानाथभेदपरिकल्पश्च वक्रचतुरस्रत्वादिः, तथैवार्वाग्दृशांछद्मस्थानाम् अयं सर्वज्ञप्रतिक्षेपः तद्भेदपरिकल्पश्चासङ्गत इति ॥१४०॥ किञ्च—

**न युज्यते प्रतिक्षेपः, सामान्यस्यापि तत् सताम्।**
**आर्यापवादस्तु पुनर्जिह्वाच्छेदाधिको मतः ॥१४१॥**

न युज्यते प्रतिक्षेपो-निराकरणरूपः सामान्यस्यापि कस्यचित्पुरुषादेः, तत्तस्मात् सतां-मुनीनाम् आर्यापवादस्तु पुनः-सर्वज्ञपरिभवः इत्यर्थः किमित्याह जिह्वाच्छेदाधिको मतः-तथाविधप्रत्यपायभावेन ॥ १४१॥ किञ्च,

**[2]कुदृष्ट्यादिवन्नो सन्तो, भाषन्ते प्रायशः क्वचित् ।**
**निश्चितं सारवच्चैव, किन्तु सत्त्वार्थकृत्सदा ॥ १४२॥**

[3]कुदृष्ट्यादिवत्कुत्स्यमित्यादि, न सन्तो-मुनयो, भाषन्ते (प्रायशः-प्रायेण) क्वचित् कथं तर्हि भाषन्त इत्याह निश्चितं- असन्दिग्धं, सारवच्चैव नापार्थकं किन्तु सत्त्वार्थकृत्- परार्थकरणशीलं सदा भाषन्ते ॥१४२॥

---

१. प्रकृतयोजनमाह - ता. । २. कुदृष्टादि च नो सन्तो - भ. पा. ता. । ३. कुदृष्टादि च कु... भ. पा. कुदृष्टादि च कुदृष्टं कुश्रुतं कुज्ञातमित्या-ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उपसंहरन्नाह—

**निश्चियोऽतीन्द्रियार्थस्य, योगिज्ञानादृते न च ।**
**अतोऽप्यत्रान्धकल्पानां, विवादेन न किञ्चन ॥१४३॥**

निश्चयोऽतीन्द्रीयार्थस्य–सर्वज्ञादेः योगिज्ञानादृते न च, तत एव तत्सिद्धेः, अतोऽपि कारणाद् अत्र सर्वज्ञाधिकारे, अन्धकल्पानां विशेषतस्तदतत्त्वदर्शिनां, विवादेन न किञ्चन सच्चित्तनाशफलेन ॥१४३॥

**न चानुमानविषय एषोऽर्थस्तत्त्वतो मतः ।**
**न चातो निश्चयः सम्यगन्यत्राप्याह धीधन : ॥ १४४ ॥**

न चानुमानविषयो– न च युक्तिगोचरः एषोऽर्थः– सर्वज्ञविशेषलक्षणः तत्त्वतो मतः परमार्थेनेष्टः (र्थेन दृष्टः)। न चातोऽनुमानात् निश्चयः सम्यग्, अन्यत्रापि सामान्यार्थे आह धीधनः स भर्तृहरिः ॥१४४॥ किमाहेत्याह—

**यत्नेनानुमितोऽप्यर्थः, कुशलैरनुमातृभिः**
**अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते ॥१४५॥**

यत्नेनानुमितोऽप्यर्थोऽन्वयाद्यनुसारेण, कुशलैरनुमातृभिरन्वयादिज्ञैः अभि-युक्त- तरैरन्वयादिज्ञैरेव अन्यथैवोपपाद्यते [1]तथाऽसिद्धयादिप्रकारेण ।।१४५॥

अभ्युच्चयमाह—

**ज्ञायेरन् हेतुवादेन, पदार्था यद्यतीन्द्रियाः ।**
**कालेनैतावता प्राज्ञैः कृतः स्यात्तेषु निश्चयः ॥१४६॥**

ज्ञायेरन् हेतुवादेनानुमानवादेन पदार्था यद्यतीन्द्रियाः सर्वज्ञादयः कालेनैतावता प्राज्ञैस्तार्किकैः कृतः स्यात्तेषु निश्चयोऽवगम इति ॥१४६॥

**न चैतदेवं यत्तस्माच्छुष्कतर्कग्रहो महान् ॥**
**मिथ्याभिमानहेतुत्वात्त्याज्य एव मुमुक्षुभिः ॥१४७॥**

न चैतदेवं यद्येन कारणेन तस्माच्छुष्कतर्कग्रहो महानतिरौद्रः मिथ्याभिमान-हेतुत्वात्त्याज्य एव मुमुक्षुभिर्मोक्तुमिच्छुभिः ॥१४७॥ किञ्च—

---

१. तथासिद्धा-भ. तथाऽसिद्धा – पा. ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**ग्रहः सर्वत्र तत्त्वेन, मुमुक्षूणामसङ्गतः ।**
**मुक्तौ धर्मा अपि प्रायस्त्यक्तव्याः किमनेन तत् ॥ १४८ ॥**

ग्रहः सर्वत्र-वस्तुनि तत्त्वेन, परमार्थेन, मुमुक्षूणामसङ्गतोऽयुक्तः, कुत इत्याह मुक्तौ धर्मा अपि प्रायस्त्यक्तव्याः, प्रायोग्रहणं क्षायिकधर्मव्यवच्छेदार्थम्, किमनेन ग्रहेण तत् ? न किञ्चिदित्यर्थः ॥१४८॥ यत एवम्—

**तदत्र महतां वर्त्म, समाश्रित्य विचक्षणैः ॥**
**वर्तितव्यं यथान्यायं, तदतिक्रमवर्जितैः ॥१४९॥**

तदत्र व्यतिकरे, महतां वर्त्म, समाश्रित्याङ्गीकृत्य विचक्षणैः- पण्डितैः, वर्तितव्यं यथान्यायं न्यायसदृशं, तदतिक्रमवर्जितैर्महद्वर्त्मातिचाररहितैः ॥१४९॥ एतदेवाह—

**परपीडेह सूक्ष्मापि, वर्जनीया प्रयत्नतः ।**
**तद्वत्तदुपकारेऽपि, यतितव्यं सदैव हि ॥ १५०॥**

परपीडा परबाधा इहलोके, सूक्ष्माप्यास्तां महतीति, किमित्याह वर्जनीया- परित्यक्तव्या, प्रयत्नतः सूक्ष्माभोगेन तद्वत् प्रयत्नत एव तदुपकारेऽपि - परोपकारेऽपि, यतितव्यमनुष्ठानद्वारेण, सदैव हीति ॥१५०॥ तथा—

**गुरवो देवता विप्रा, यतयश्च तपोधना ।**
**पूजनीया महात्मानः, सुप्रयत्नेन चेतसा ॥ १५१॥**

गुरवो-मातापितृप्रमुखाः, देवता सामान्येनैव, विप्राः- द्विजाः, यतयश्च प्रव्रजिताश्च, तपोधनाः तद्वन्तः, पूजनीया महात्मानः सर्व एवैते यथार्हम् । कथमित्याह सुप्रयत्नेन चेतसा आज्ञाप्रधानेनेत्यर्थः ॥१५१॥ किञ्च—

**पापवत्स्वपि चात्यन्तं, स्वकर्मनिहतेष्वलम् ।**
**अनुकम्पैव सत्त्वेषु न्याय्या धर्मोऽयमुत्तमः ॥ १५२॥**

पापवत्स्वपि चात्यन्तं, लुब्धकादिषु, स्वकर्मनिहतेष्वलमत्यर्थम्, अनुकम्पैव सत्त्वेषु न्याय्या, न मत्सरो, धर्मोऽयमुत्तमः कारणे कार्योपचारादिति ॥१५२॥ उपसंहरन्नाह—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कृतमत्र प्रसङ्गेन, प्रकृतं प्रस्तुमोऽधुना ।**
**तत्पुनः पञ्चमी तावद्योगदृष्टिर्महोदया ॥१५३॥**

कृतं पर्याप्तं अत्र-व्यतिकरे प्रसङ्गेन, प्रकृतं प्रस्तुमोऽधुना- साम्प्रतं, तत्पुनः प्रकृतं पञ्चमी तावद्योगदृष्टिः स्थिराख्या किंविशिष्टेत्याह महोदया निवार्णपरमफलेत्यर्थः ॥१५३॥

एवं सप्रपञ्चं चतुर्थीं दृष्टिमभिधाय पञ्चमीमभिधातुमाह—

**स्थिरायां दर्शनं नित्यं, प्रत्याहारवदेव च ।**
**कृत्यमभ्रान्तमनघं सूक्ष्मबोधसमन्वितम् ॥१५४॥**

स्थिरायां दृष्टौ, दर्शनं- बोधलक्षणं, नित्यमप्रतिपाति निरतिचारायाम्, सातिचारायां तु (अ)प्रक्षीणनयनपटलोपद्रवस्य तदुक्तोपायानवबोधकल्पम-नित्यमपि भवति, तथातिचारभावात् रत्नप्रभायामपि(मिव) धूल्यादेरुपद्रवः । प्रत्याहारवदेव च *स्वविषयाऽसम्प्रयोगे स्वचित्तस्वरूपानुकारी चेन्द्रियाणां प्रत्याहारः* (यो.सू.२-५४) तद्वदेतद्दर्शनं, कृत्यं-वन्दनादि, अभ्रान्तं क्रममधिकृत्य । अत एव, अनघमनतिचारत्वात् । एतदेव विशेष्यते, सूक्ष्मबोधसमन्वितं-ग्रन्थिभेदाद्वेद्यसंवेद्यपदोपपत्तेरिति ॥१५४॥

**बालधूलीगृहक्रीडातुल्याऽस्यां भाति धीमताम्।**
**तमोग्रन्थिविभेदेन, भवचेष्टाखिलैव हि ॥१५५॥**

बालधूलीगृहक्रीडातुल्या-प्रकृत्यसुन्दरत्वाऽस्थिरत्वाभ्यां अस्यां-स्थिरायां दृष्टौ, भाति धीमतां पुंसां तमोग्रन्थिविभेदेन हेतुना, भवचेष्टाखिलैव हि चक्रवर्त्यादिचेष्टारूपापि, प्रकृत्यसुन्दरत्वादस्थिरत्वाच्च ॥१५५॥

**मायामरीचिगन्धर्वनगरस्वप्नसन्निभान् ।**
**बाह्यान् पश्यति तत्त्वेन, भावान् श्रुतविवेकतः ॥१५६॥**

मायामरीचयो-मृगतृष्णिका गन्धर्वनगरं-हरिश्चन्द्रपुरादि स्वप्नः प्रतीत एव, एतत्सन्निभान्-एतदाकारान्, बाह्यान्-देहगृहादीन्, पश्यति तत्त्वेन परमार्थेन, भावान्-पदार्थान् । कुत इत्याह श्रुतविवेकतः-सम्यक्परिणतेन श्रुतज्ञानेन ॥१५६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अबाह्यं केवलं ज्योतिर्निराबाधमनामयम् ।**
**यदत्र तत्परं तत्त्वं, शेषः पुनरुपप्लवः ॥१५७॥**

अबाह्यमान्तरं केवलमेकं ज्योतिर्ज्ञानं, अनाबाधममूर्ततया पीडारहितं, अनामयमरोगम् अत एव, यदत्र-लोके, तत्परं तत्त्वं वर्तते, सदा तथाभावात् । शेषः पुनरुपप्लवस्तथास्वरूपेण भावादिति ॥१५७॥

**एवं विवेकिनो धीराः, प्रत्याहारपरास्तथा ।**
**धर्मबाधापरित्यागयत्नवन्तश्च तत्त्वतः ॥१५८॥**

एवमुक्तनीत्या, विवेकिन एते धीरा अचपलाः, 'प्रत्याहारपराः'-उक्तलक्षणप्रत्याहारप्रधानाः तथा-तेन प्रकारेण धर्मबाधापरित्यागयत्नवन्तश्च-तथान्तःपरिशुद्धेः, तत्त्वतः- परमार्थेन, एते हि भिन्नग्रन्थित्वादुत्तमश्रुतप्रधाना इत्येवमालोचयन्ति ॥१५८॥

**न ह्यलक्ष्मीसखी लक्ष्मीर्यथानन्दाय धीमताम् ।**
**तथा पापसखा लोके, देहिनां भोगविस्तरः ॥१५९॥**

न हि-नैव, अलक्ष्मीसखी लक्ष्मीस्तथोभयपरिभोगेन यथानन्दाय आनन्दार्थं धीमतां-बुद्धिमतां तथा पापसखा लोके तदविनाभावेन, देहिनां भोगविस्तरो नानन्दाय, "नानुपहत्य भूतानि भोगः संभवति, भूतोपघाताच्च पापमिति भावना" ॥१५९॥ धर्मभोगः सुन्दर इत्यप्याशङ्कापोहायाह-

**धर्मादपि भवन् भोगः प्रायोऽनर्थाय देहिनाम् ।**
**चन्दनादपि सम्भूतो दहत्येव हुताशनः ॥१६०॥**

धर्मादपि भवन् भोगो-देवलोकादौ, प्रायो-बाहुल्येन, अनर्थाय देहिनां तथाप्रमादविधानात् । प्रायोग्रहणं शुद्धधर्मा[१]क्षेपिभोगनिरासार्थं, तस्य प्रमादजीव-(बीज)त्वायोगात्, अत्यन्तानवद्यतीर्थकरादिफलशुद्धेः पुण्यसिद्ध्यादावागमा-भिनिवेशाद्धर्मसारचित्तोपपत्तेरिति । सामान्यतो दृष्टान्तमाह-चन्दनादपि सम्भूतः तथा [२]शैत्यप्रकृतेः किमित्याह दहत्येव हुताशनः तथास्वभावत्वात् । प्राय एतदेवं, न दहत्यपि कश्चित् सत्यमन्त्राभिसंस्कृताद् दाहाऽसिद्धेः ।

१. क्षेप्यभो - ता. । २. शीत -भ. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सकललोक(प्र)सिद्धमेतदिति ॥१६०॥

**भोगात्तदिच्छाविरतिः स्कन्धभारापनुत्तये ।**
**स्कन्धान्तरसमारोपस्तत्संस्कारविधानतः ॥१६१॥**

भोगात्सकाशात्, तदिच्छाविरतिर्भोगेच्छाविरतिस्तात्कालिकी । किमित्याह स्कन्धभारापनुत्तये-स्कन्धभारापनुत्त्यर्थं स्कन्धान्तरसमारोपः वर्तते । कुत इत्याह तत्संस्कारविधानतः । तथाकर्मबन्धेनानिष्टभोगसंस्कारविधानात्तत्त्वतस्तदिच्छाऽनिवृत्तेरिति । उक्ता पञ्चमी दृष्टिः ।

सत्यामस्यामपरैरपि योगाचार्यैरलौल्यादयो गुणाः प्रोच्यन्ते । यथोक्तम्- [स्कंदपुराणे माहेश्वरखण्डे-कुमारिकाखण्डे च, तथा शार्ङ्गधरपद्धतौ च]

*अलौल्यमारोग्यमनिष्ठुरत्वं । गन्धः शुभो मूत्रपुरीषमल्पम् ।*
*कान्तिः प्रसादः स्वरसौम्यता च । योगप्रवृत्तेः प्रथमं हि चिह्नम् ॥१॥*
*मैत्र्यादियुक्तं विषयेष्वचेतः प्रभाववद्धैर्यसमन्वितं च ।*
*द्वन्द्वैरधृष्यत्वमभीष्टलाभः जनप्रियत्वं च तथा परं स्यात् ॥२॥*
*दोषव्यपायः परमा च तृप्तिरौचित्ययोगः समता च गुर्वी ।*
*वैरादिनाशोऽथ ऋतम्भरा धीर्निष्पन्नयोगस्य तु चिह्नमेतत् ॥३॥*

*इत्यादि* । इहाप्येतदकृत्रिमं गुणजातम् अत एवारभ्य विज्ञेयम् ॥१६१॥

तथा च षष्ठीं दृष्टिमभिधातुमाह-

**कान्तायामेतदन्येषां प्रीतये धारणा परा ।**
**अतोऽत्र नान्यमुन्नित्यं मीमांसास्ति हितोदया ॥१६२॥**

कान्तायां-दृष्टौ एतदनन्तरोदितं नित्यदर्शनादि अन्येषां प्रीतये भवति, न तु द्वेषाय । तथा धारणा परा-प्रधाना चित्तस्य देशबन्धलक्षणा । यथोक्तम् "*देशबन्धश्चित्तस्य धारणा*" (३-१ पा.यो.सू.) । अतो-धारणातः अत्र-दृष्टौ, नान्यमुद्-नान्यत्र हर्षः, तदा तत्तत्प्रतिभासाऽयोगात् । तथा नित्यं-सर्वकालं, मीमांसास्ति-सद्विचारात्मिका । अत एवाह 'हितोदया' सम्यग्ज्ञानफलत्वेन ॥१६२॥ अमुमेवार्थं स्पष्टयन्नाह-

**अस्यां तु धर्ममाहात्म्यात्समाचारविशुद्धितः ।**
**प्रियो भवति भूतानां धर्मैकाग्रमनास्तथा ॥१६३॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अस्यामेव-दृष्टौ कन्तायां नियोगेन, धर्ममाहात्म्यात्कारणात्, समाचार-विशुद्धितो हेतोः किमित्याह प्रियो भवति भूतानां-प्राणिनां, धर्मैकाग्रमनास्तथा भवतीति ॥१६३॥ एतदेवाह-

**श्रुतधर्मे मनो नित्यं कायस्त्वस्यान्यचेष्टिते ।**
**अतस्त्वाक्षेपकज्ञानान्न भोगा भवहेतवः ॥१६४॥**

श्रुतधर्मे-आगमे, मनो नित्यं तद्भावनोपपत्तेः, कायस्तु-काय एव अस्याधिकृतदृष्टिमतो अन्यचेष्टिते-सामान्ये, अतस्त्वत एव कारणात् आक्षेपक-ज्ञानात् सम्यगाक्षेपकज्ञानेन हेतुभूतेन, भोगाः-इन्द्रियार्थसम्बन्धाः भवहेतवः-संसारहेतवो न इति ॥१६४॥ अमुमेवार्थं दृष्टान्तमधिकृत्याह-

**मायाम्भस्तत्त्वतः पश्यन्ननुद्विग्नस्ततो द्रुतम् ।**
**तन्मध्येन प्रयात्येव यथा व्याघातवर्जितः ॥१६५॥**

मायाम्भस्तत्त्वतः पश्यन्-मयाम्भस्त्वेनैव, अनुद्विग्नस्ततो-मायाम्भसः द्रुतं-शीघ्रं, तन्मध्येन-मायाम्भोमध्येन प्रयात्येव-न न प्रयाति, यथा इत्युदाहरणो-पन्यासार्थः व्याघातवर्जितोमायाम्भसस्तत्त्वेन व्याघाताऽसमर्थत्वादिति ॥१६५॥

**भोगान्स्वरूपतः पश्यंस्तथा मायोदकोपमान् ।**
**भुञ्जानोऽपि ह्यसङ्गः सन् प्रयात्येव परं पदम् ॥१६६॥**

भोगानिन्द्रियार्थसम्बन्धान्, स्वरूपतः पश्यन्समारोपमन्तरेण, तथा तेनैव प्रकारेण मायोदकोपमानसारान्, भुञ्जानोऽपि हि कर्माक्षिप्तान्, असङ्गः सन् प्रयात्येव परं पदं, तथाऽनभिष्वङ्गतया परवशताभावात् ॥१६६॥

**भोगतत्त्वस्य तु पुनर्न भवोदधिलङ्घनम् ।**
**मायोदकदृढावेशस्तेन यातीह कः पथा ॥१६७॥**

भोगतत्त्वस्य तु-भोगपरमार्थस्य पुनः, न भवोदधिलङ्घनं-तथाबुद्धेस्त-दुपायेऽप्रवृत्तेः। आह च, मायोदकदृढावेशः तथाविपर्यासात्, तेन यातीह कः पथा-यत्र मायायामुदकबुद्धिः ॥१६७॥

**स तत्रैव भयोद्विग्नो यथा तिष्ठत्यसंशयम् ॥**
**मोक्षमार्गेऽपि हि तथा भोगजम्बालमोहितः ॥१६८॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स-मायायामुदकदृढावेशः, तत्रैव-पथि, भयोद्विग्नः सन् यथा-इत्युदाहरणोपन्यासार्थः, तिष्ठत्यसंशयं-तिष्ठत्येव जलबुद्धिसमावेशात् । मोक्षमार्गेऽपि हि ज्ञानादिलक्षणे तथा तिष्ठत्यसंशयं भोगजम्बालमोहितः-भोगनिबन्धनदेहादिप्रपञ्चमोहित इत्यर्थः ॥१६८॥

**मीमांसाभावतो नित्यं न मोहोऽस्यां यतो भवेत् ।**
**अतस्तत्त्वसमावेशात्सदैव हि हितोदयः ॥१६९॥**

मीमांसाभावतोः-सद्विचारभावेन, नित्यं-सर्वकालं, न मोहोऽस्यां दृष्टौ, यतो भवेत् अतस्तत्त्वसमावेशात्कारणात्, सदैव हितोदयोऽस्यां दृष्टाविति ॥१६९॥ प्रतिपादिता षष्ठी दृष्टिः । साम्प्रतं सप्तम्युच्यते-

**ध्यानप्रिया प्रभा प्रायो नास्यां रुगत एव हि ।**
**तत्त्वप्रतिपत्तियुता [1]विशेषेण शमान्विता ॥१७०॥**

एवं सत्प्रवृत्तिपदावहेति पिण्डार्थः ॥१७०॥[2]

**ध्यानजं सुखमस्यां तु जितमन्मथसाधनम् ।**
**विवेकबलनिर्जातं शमसारं सदैव हि ॥१७१॥**

ध्यानजं सुखमस्यां-त्वधिकृतदृष्टावेव किंविशिष्टमित्याह-जितमन्मथसाधनं -व्युदस्तशब्दादिविषयम्, एतदेव विशेष्यते विवेकबलनिर्जातं ज्ञानसामर्थ्योत्पन्नम् । अत एव शमसारं सदैव हि, विवेकस्य शमफलत्वादिति ॥१७१॥ किञ्च-

**सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।**
**एतदुक्तं समासेन लक्षणं सुखदुःखयोः ॥१७२॥**

सर्वं परवशं दुःखं-तल्लक्षणयोगात्, सर्वमात्मवशं सुखमत एव हेतोः । एतदुक्तं मुनिना समासेन-संक्षेपेण, लक्षणं-स्वरूपं, सुखदुःखयोरिति ॥१७२॥

**पुण्यापेक्षमपि ह्येवं सुखं परवशं स्थितम् ।**
**ततश्च दुःखमेवैतत्तल्लक्षणनियोगतः ॥१७३॥**

---

१. सत्प्रवृत्तिपदावहा-भ.पा.ता. । २. अवयवार्थं त्वाह-ध्यानप्रिया=ध्यानवल्लभा विक्षेपोद्वेगात् प्रभादृष्टिः प्रायः=बाहुल्येन न अस्यां दृष्टौ रुग्-वेदना अत एव हि तथा तत्त्वप्रतिपत्तियुता विशेषेण, एवं सत्प्रवृत्तिपदावहेति पिण्डार्थः ॥१७०॥ ता.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुण्यापेक्षमपि ह्येवमुक्तनीत्या सुखं परवशं स्थितं-पुण्यस्य परत्वात् । ततश्च दुःखमेवैत्, तत्तल्लक्षणनियोगात् । तदित्थं ध्यानजं तात्त्विकं सुखम्, अपरायत्तत्वात्कर्मवियोगमात्रजत्वादिति ॥१७३॥

**ध्यानं च निर्मले बोधे सदैव हि महात्मनाम् ।**
**क्षीणप्रायमलं हेम सदा कल्याणमेव हि ॥१७४॥**

ध्यानं च निर्मले बोधे-स्पष्टक्षयोपशमसमुत्थे सति किमित्याह सदैव हि महात्मनां-मुनीनाम्, एतदेव प्रतिवस्तूपमयाह 'क्षीणप्रायमलं हेम-स्वर्णं 'सदा कल्याणमेव हि' तथावस्थोपपत्तेः ॥१७४॥

**सत्प्रवृत्तिपदं चेहाऽसङ्गानुष्ठानसंज्ञितम् ।**
**महापथप्रयाणं यदनागामिपदावहम् ॥१७५॥**

सत्प्रवृत्तिपदं चेह-सत्त्वमार्गे किमित्याह 'असङ्गानुष्ठानसंज्ञितं' वर्तते तथास्वरसप्रवृत्तेः । महापथप्रयाणं यदसङ्गानुष्ठानम्, अनागामिपदावहं - नित्यपदप्रापकमित्यर्थः ॥१७५॥ असङ्गानुष्ठाननामान्याह-

**प्रशान्तवाहितासंज्ञं विसभागपरिक्षयः ।**
**शिववर्त्म ध्रुवाध्वेति योगिभिर्गीयते ह्यदः ॥१७६॥**

प्रशान्तवाहितासंज्ञं-सांख्यानां, विसभागपरिक्षयो-बौद्धानां, शिववर्त्म-शैवानां, ध्रुवाध्वा-महाव्रतिकानां, इत्येवं योगिभिर्गीयते ह्यदोऽसङ्गाऽनुष्ठानमिति ॥१७६॥

**एतत्प्रसाधयत्याशु यद्योग्यस्यां व्यवस्थितः ।**
**एतत्पदावहैषैव तत्तत्रैतद्विदां मता ॥१७७॥**

एतदसङ्गानुष्ठानं, प्रसाधयत्याशु-शीघ्रं, यद्योगी अस्यां-दृष्टौ व्यवस्थितः सन्, एतत्पदावहैषैव दृष्टिः तत्तत्रैतद्विदां मतेष्टेति ॥१७७॥ उक्ता सप्तमी दृष्टिः । अधुनानन्तरोच्यते । तदाह-

**समाधिनिष्ठा तु परा तदासङ्गविवर्जिता ।**
**सात्मीकृतप्रवृत्तिश्च तदुत्तीर्णाशयेति च ॥१७८॥**

समाधिनिष्ठा तु पराऽष्टमी दृष्टिः *"समाधिस्तु ध्यानविशेषः,"* (तत्)



Jain Education International For Personal & Private Use Only www.jainelibrary.org

फलमित्यन्ये। यथोक्तं *"देशबन्धश्चित्तस्य धारणा"* (३-१ पा.) *"तत्रप्रत्ययैकतानता ध्यानं"* (३-२ पा.) *"तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः"* (३-३ पा.)इति ॥ तदासङ्गविवर्जिता-समाध्यासङ्गविवर्जिता भूतप्रवृत्तिश्चैषा चन्दनगन्धन्यायेन ।। तदुत्तीर्णाशयेति [१]चाऽसच्चित्ताऽभावेन ॥१७८॥

**निराचारपदो ह्यस्यामतिचारविवर्जितः ।**
**आरूढारोहणाभावगतिवत्त्वस्य चेष्टितम् ॥१७९॥**

निराचारपदो हि-एव अस्यां दृष्टौ योगी भवति, प्रतिक्रमणाद्यभावात्, अतिचारविवर्जितस्तन्निबन्धनाभावेन । आरूढारोहणाभावगतिवत्त्वस्य-योगिन-श्चेष्टितं भवति, आचारजेयकर्माभावात् निराचारपद इत्यर्थः॥१७९॥ कथं भिक्षाटनाद्याचारोऽस्येत्याशङ्कापनोदायाह-

**रत्नादिशिक्षादृग्भ्योऽन्या यथा दृक्तन्नियोजने ।**
**तथाचारक्रियाप्यस्य सैवान्या फलभेदतः ॥१८०॥**

रत्नादिशिक्षादृग्भ्यः सकाशात् अन्या-भिन्नैव यथा दृकृतन्नियोजने शिक्षितस्य सतः । तथाऽऽचारक्रियाप्यस्य-योगिनः, सैव-भिक्षाटनादिलक्षणा अन्या भवति । कुत इत्याह फलभेदतः, प्राक् साम्परायिककर्मक्षयः फलं, इदानीं तु भवोपग्राहिकर्मक्षय इति ॥१८०॥

**तन्नियोगान्महात्मेह कृतकृत्यो यथा भवेत् ।**
**तथाऽयं धर्मसन्न्यासविनियोगान्महामुनिः ॥१८१॥**

तन्नियोगाद्-रत्ननियोगात् महात्मेह-लोके कृतकृत्यो यथा भवेत् कश्चिद्रत्नवणिक् तथाऽयमधिकृतयोगो, धर्मसन्न्यासविनियोगात्सकाशात् महामुनिः कृतकृत्यो भवतीति ॥१८१॥ तत्र-

**द्वितीयाऽपूर्वकरणेमुख्योऽयमुपजायते ।**
**केवलश्रीस्ततश्चास्य निःसपत्ना सदोदया ॥१८२॥**

द्वितीयाऽपूर्वकरणे-श्रेणिवर्तिनि, मुख्योऽयं-धर्मसन्न्यासः उपजायते,

---

१. चाऽसच्चित्ता इति मुद्रितप्रतौ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उपचरितस्तु प्रमत्तसंयतादारभ्य, केवलश्रीस्ततश्च-धर्मसन्यासविनियोगात् अस्य योगिनो निःसपत्ना केवलश्रीः, सदोदया प्रतिपाताभावेन ॥१८२॥

सिंहावलोकितनीत्याधिकृतवस्तुनिर्धारणायाह-

**स्थितः शीतांशुवज्जीवः प्रकृत्या भावशुद्धया ।**
**चन्द्रिकावच्च विज्ञानं तदावरणमभ्रवत् ॥१८३॥**

स्थितो-न स्थापनीयः, शीतांशुवच्चन्द्रवत्, जीवः-आत्मा, प्रकृत्याऽऽत्मीयया, भावशुद्धया-तत्त्वशुद्धयेत्यर्थः तथा चन्द्रिकावच्च - ज्योत्स्नावच्च, विज्ञानं केवलादि, उपमामात्रमेतत्, तदावरणं - ज्ञानावरणं, अभ्रवत् - मेघपटलवदित्यर्थः ॥१८३॥ प्रकृतयोजनमाह-

**घातिकर्माभ्रकल्पं तदुक्तयोगाऽनिलाऽऽहतेः ।**
**यदाऽपैति तदा श्रीमान् जायते ज्ञानकेवली ॥१८४॥**

घातिकर्म-ज्ञानावरणीयादि [1]तथा ज्ञानावरणीयं, दर्शनावरणीयं, मोहनीयं, अन्तरायं चेति। एतदभ्रकल्पं वर्तते । तद् घातिकर्म उक्तयोगानिलाहतेः-अनन्तरोदितयोगवायुघातादित्यर्थः यदापैति-श्रेणिपरिसमाप्तौ तदा श्रीमानसौ मुख्यविक्रमयोगेन जायते ज्ञानकेवली-सर्वज्ञ इत्यर्थः ॥१८४॥

अत एवाह-

**क्षीणदोषोऽथ सर्वज्ञः सर्वलब्धिफलान्वितः ।**
**परं परार्थं सम्पाद्य ततो योगान्तमश्नुते ॥१८५॥**

क्षीणदोषः-सकलरागादिपरिक्षयेण अर्थात् तदैव सर्वज्ञो-निरावरणज्ञानभावेन सर्वज्ञ इत्यर्थः । सर्वलब्धिफलान्वितः-सर्वौत्सुक्यनिवृत्त्या परं परार्थं सम्पाद्य-यथाभव्यं सम्यक्त्वादिलक्षणं ततो योगान्तमश्नुते-योगपर्यन्तमाप्नोति ॥१८५॥

**तत्र द्रागेव भगवानयोगाद्योगसत्तमात् ।**
**भवव्याधिक्षयं कृत्वा निर्वाणं लभते परम् ॥१८६॥**

तत्र-योगान्ते शैलेश्यवस्थायां, द्रागेव-शीघ्रमेव, ह्रस्वपञ्चाक्षरोद्गिरणमात्रेण कालेन, भगवानसौ अयोगाद्-अव्यापारात्, योगसत्तमाद्-योगप्रधानात् शैलेशीयो-

---

१. तद्यथा -ता.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गादित्यर्थः किमित्याह 'भवव्याधिक्षयं कृत्वा' सर्वप्रकारेण निर्वाणं लभते परं-भावनिर्वाणमित्यर्थः ॥१८६॥ तत्रायं कीदृश इत्याह-

**व्याधिमुक्तः पुमान् लोके यादृशस्तादृशो ह्ययम् ।**
**नाभावो न च नो मुक्तो व्याधिनाऽव्याधितो न च ॥१८७॥**

[१]व्याधिमुक्तो-व्याधिपरिक्षीणः पुमान् यादृशो भवति तादृशो ह्ययं निर्वृतो, नाऽभावः-प्रध्यातदीपकल्पोपमो, 'न च नो मुक्तो व्याधिना' मुक्त एव भव्यत्वपरिक्षयेण, 'अव्याधितो न च'-पूर्वं तथा तद्भावादिति ॥१८७॥

अमुमेवार्थं स्पष्टयन्नाह-

**भव एव महाव्याधिर्जन्ममृत्युविकारवान् ।**
**विचित्रमोहजननस्तीव्ररागादिवेदनः ॥१८८॥**

भवः-संसार एव महाव्याधिः । किंविशिष्ट इत्याह-जन्ममृत्युविकारवान् जराद्युपलक्षणमेतत् । विचित्रमोहजननो मिथ्यात्वोदयभावेन, तीव्ररागादिवेदनः स्त्र्याद्यभिष्वङ्गभावेन ॥१८८॥

**मुख्योऽयमात्मनोऽनादिचित्रकर्मनिदानजः ।**
**तथानुभवसिद्धत्वात्सर्वप्राणभृतामिति ॥१८९॥**

मुख्यो-निरुपचरितो अयं-भवव्याधिः, आत्मनो-जीवस्य किम्भूत इत्याह अनादिचित्रकर्मनिदानजः-द्रव्यभावभेदभिन्नकर्मबलोत्पन्न इत्यर्थः । कुत इत्याह तथानुभवसिद्धत्वात्-जन्माद्यनुभावेन सर्वप्राणभृतामिति-तिर्यक्प्रभृतीनामपि ॥१८९॥

**एतन्मुक्तश्च मुक्तोऽपि मुख्य एवोपपद्यते ।**
**जन्मादिदोषविगमात्तददोषत्वसङ्गतेः ॥१९०॥**

एतेन भवव्याधिना मुक्तश्च, मुक्तोऽपि-सिद्धः 'मुख्य एवोपपद्यते' प्रवृत्तिनिमित्तभावात् । तथा चाह-जन्मादिदोषविगमात् कारणात् तददोषत्वसङ्गतेस्तस्य दोषवतोऽदोषत्वप्राप्तेरिति ॥१९०॥ अमुमेवार्थं स्पष्टयन्नाह-

---

१. व्याधिमुक्तः परिक्षीण रोगः - ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तत्स्वभावोपमर्देऽपि तत्तत्स्वाभाव्ययोगतः ।**
**तस्यैव हि तथाभावात्तददोषत्वसङ्गतिः ॥१९१॥**

तस्यात्मनः स्वभावोपमर्देऽपि सति जन्मादिभावविगमेन तत्तत्स्वाभाव्ययोगतः-तस्य तत्स्वाभाव्यं तेन योगात्, तथाहि-तस्येत्थम्भूत एव स्वभावो येन स एव तथा भवतीति, ततश्च तस्यैव हि तथाभावाज्जन्मादित्यागतो जन्माद्यतीतत्वेन भावात् किमित्याह तददोषत्वसङ्गतिः-दोषवत एवाऽदोषत्वप्राप्तिरित्यर्थः ॥१९१॥ इत्थं चैतदङ्गी[1]कर्तव्यमित्याह-

**स्वभावोऽस्य स्व-भावो यन्निजा सत्तैव तत्त्वतः ।**
**भावावधिरयं युक्तो नान्यथाऽतिप्रसङ्गतः ॥१९२॥**

स्वभावोऽस्यात्मनः स्व-भावो यद्यस्मात्, किमुक्तं भवति-निजा सत्तैव 'तत्त्वतः'-परमार्थेन भावावधिरयं युक्तः-स्वभावोऽनन्तरोदितः 'नान्यथा' युक्तः । कुत इत्याह अतिप्रसङ्गतः इति ॥१९२॥ एनमेवाह-

**अनन्तरक्षणाभूतिरात्मभूतेह यस्य तु ।**
**तयाऽविरोधान्नित्योऽसौ[2] स्यादसत्त्वात् सदैव हि ॥१९३॥**

अनन्तरक्षणाऽभूतिः[3]-प्राक्पश्चात्क्षणयोरभूतिरित्यर्थः, आत्मभूतेह यस्य तु-वर्तमानस्य वादिनो वा, तस्य दोषमाह-तथा अनन्तरक्षणाभूत्या अविरोधात् कारणाद्वर्तमानभावेन किमित्याह नित्योऽसौ वर्तमानः स्यात्, तद्वत्सदा तद्भावादिति । पक्षान्तरमाह-[4]असत्त्वात् सदैव हि तया विरोधेन तद्ग्रस्तत्वादिति ॥१९३॥ परोक्तिमात्रपरिहारायाह-

**स एव न भवत्येतदन्यथा भवतीतिवत् ।**
**विरुद्धं तन्नयादेव तदुत्पत्त्यादितस्तथा ॥१९४॥**

स एव-इति भावपरामर्शः, न भवतीति चाभावाभिधानं एतत्, किमित्याह 'अन्यथाभवतीतिवत्' इति निदर्शनम्, विरुद्धं-व्याहतम्, तन्नयादेव, स हि स एवान्यथाभवतीत्युक्ते एवमाह-यदि स एव, कथमन्यथा भवति, अन्यथा

---

१. कर्तव्यमेवेत्याह -भ. । २. स्यादसत्ता सदैव हि - पा. । ३. भूतिः भाविक्षणाभूति - रित्यर्थः - पा.ता. । ४. असन्वा सदैव इति मुद्रितप्रतौ । असत्ता सदैव- पा. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चेद्भवति, कथं स इति । एतच्च स एव न भवतीत्यत्रापि समानमेव । तथा हि यदि स एव, कथं न भवति ? अभवन्वा कथं स एव ? इति विरुद्धमेतत् । अभ्युच्चयमाह 'तदुत्पत्त्यादितः' इत्यभावोत्पत्त्यादेः, तथा-विरुद्धमिति ॥१९४॥ एतद्भावनायैवाह-

**सतोऽसत्त्वे तदुत्पादस्ततो नाशोऽपि तस्य यत् ।**
**तन्नष्टस्य पुनर्भावः सदा नाशे न तत्स्थितिः ॥१९५॥**

सतो-भावस्य असत्त्वेऽभ्युपगम्यमाने "स एव न भवति" इति वचनात् किमित्याह तदुत्पादः-इत्यसत्त्वोत्पादः कादाचित्कत्वेन, ततः-उत्पादात् नाशोऽपि तस्यासत्त्वस्य, 'यदुत्पत्तिमत्तदनित्यं' इति कृत्वा यद्यस्मात् तत्तस्मात्, नष्टस्याऽसत्त्वस्य (नष्टस्य सत्त्वस्य ?) पुनर्भावस्तेनैव रूपेण, सदसत्त्वविनाशा-न्यथानुपपत्तेः ।अथ नाशो नाशात्मना भावात्प्राक्पश्चाच्चावस्थित एव-एतदाशङ्क्याह सदानाशे-अभ्युपगम्यमाने किमित्याह 'न तत्स्थितिः' विवक्षितक्षणेऽपि [1]तन्नश्यति ॥१९५॥

**स क्षणस्थितिधर्मा चेद् द्वितीयादि[2]क्षणे स्थितौ ।**
**युज्यते ह्येतदप्यस्य तथा चोक्तानतिक्रमः ॥१९६॥**

स-नाशः, क्षणस्थितिधर्मा चेद्भाव एव । एतदाशङ्क्याह द्वितीयादि[3]क्षणे स्थितौ सत्याम् किमित्याह युज्यते ह्येतदपि-क्षणस्थितिधर्मकत्वं, अस्य-अधिकृतभावस्य । तथा चैवं सति उक्तानतिक्रमः ॥१९६॥ कथमित्याह-

**क्षणस्थितौ तदैवाऽस्य नाऽस्थितिर्युक्त्यसङ्गतेः ।**
**न पश्चादपि[4] सेत्येवं सतोऽसत्त्वं व्यवस्थितम् ॥१९७॥[5]**

क्षणस्थितौ सत्यां तदैव विवक्षितक्षणे अस्य-विवक्षितभावस्यैव नाऽस्थितिः । कुत इत्याह युक्त्यसङ्गतेः, तदैवाऽस्थितौ तत्स्थितिविरोधादिति युक्तिः । न पश्चादपि द्वितीयक्षणे, साऽस्थितिर्न, युक्त्यसङ्गतेरेव 'तदावस्थितौ

---

१. तन्नाशादिति-भ.पा.ता. । २. क्षणा-भ.पा.ता. । ३. क्षण-भ.पा.ता. । ४. सा नेति -भ.पा.ता. । ५. सतोऽ.... स क्षण... क्षण... इति श्लोकत्रयं शास्त्रवार्तासमुच्चये ४/ १२, १३, १४

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदस्थितिविरोधादिति' युक्तिः । इत्येवं सतोऽसत्त्वं व्यवस्थितम् । ततश्च 'सतोऽसत्त्वे' इत्याद्यनुवर्त्तते एवेति ॥१९७॥ नित्यपक्षमधिकृत्याह-

**भवभावानिवृत्तावप्ययुक्ता मुक्तकल्पना ।**
**एकान्तैकस्वभावस्य न ह्यवस्थाद्वयं क्वचित् ॥१९८॥**

भवभावानिवृत्तावप्येकान्तनित्यतायाम् किमित्याह अयुक्ता मुक्तकल्पना आत्मनः । कथमयुक्तेत्याह एकान्तैकस्वभावस्य-अप्रच्युतानुत्पन्नस्थिरैकस्वभावतायाः, न हि यस्मात् अवस्थाद्वयं संसारिमुक्ताख्यं क्वचित्, एकान्तैकस्वभावत्वविरोधात् ॥१९८॥

**तदभावे च संसारी मुक्तश्चेति निरर्थकम्।**
**तत्स्वभावोपमर्दोऽस्य नीत्या तात्त्विक इष्यताम् ॥१९९॥**

तदभावे चाऽवस्थाद्वयाभावे च, संसारी-तिर्यगादिभाववान्, मुक्तो-भवप्रपञ्चोपरमादित्येतत् निरर्थकं-शब्दमात्रमेव च, अर्थायोगादिति । तत्तथा स्वभावोपमर्दस्तदन्तरेण तदन्तरापनयनलक्षणः अस्यात्मनः नीत्या-न्यायेन । किमित्याह तात्त्विक इष्यतां-पारमार्थिकोऽभ्युपगम्यतामिति ॥१९९॥

**दिदृक्षाद्यात्मभूतं तन्मुख्यमस्य निवर्तते (अतिवर्तते) ।**
**प्रधानादिनतेर्हेतुस्तदभावान्न तन्नतिः ॥२००॥**

दिदृक्षाऽविद्यामलभवाधिकारादि, आत्मभूतं सहजं वस्तुसत् । तत्तस्मात्, मुख्यमनुपचरितमेव, अस्यात्मनो निवर्तत अतिवर्तत इति । किम्भूतं तदित्याह प्रधानादिनतेः-प्रधानमायादिपरिणतेः, हेतुः-कारणम् । तदभावाद्दिदृक्षाद्यभावात्, न तन्नतिर्न प्रधानादिपरिणतिर्मुक्तात्मन इति ॥२००॥

**अन्यथा स्यादियं नित्यमेषा च भव उच्यते ।**
**एवं च भवनित्यत्वे कथं मुक्तस्य सम्भवः ॥२०१॥**

इत्थं चैतदङ्गीकर्तव्यं, अन्यथैवमनभ्युपगम्यमाने स्यादियं-प्रधानादिनतिः नित्यं-सदैव। ततःकिमित्याह एषा च-प्रधानादिनतिः, भव उच्यते-संसारोऽभिधीयते, एतन्नतौ तदात्मकमहदादिभावात् । एवं चोक्तनीत्या भवनित्यत्वे सति कथं मुक्तस्य सम्भवः ? नैवेत्यर्थः ॥२०१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अवस्था तत्त्वतो नो चेन्ननु तत्प्रत्ययः कथम् ।**
**भ्रान्तोऽयं किमनेनेति मानमत्र न विद्यते ॥२०२॥**

अवस्था तत्त्वतः-परमार्थेन, नो चेत्पूर्वापरभावेन तदाशङ्क्याह ननु तत्प्रत्ययः-अवस्थाप्रत्ययः कथं-निबन्धनाभावेन । स्यादेतत्-तद्भ्रान्तोऽयमवस्थाप्रत्ययः तत्किमनेनेत्येतदाशङ्क्याह-'मानमत्र' भ्रांन्ततायां न विद्यते ॥२०२॥

**योगिज्ञानं तु मानं चेत्तदवस्थान्तरं तु तत्।**
**ततः किं भ्रान्तमेतत्स्यादन्यथा सिद्धसाध्यता ॥२०३॥**

योगिज्ञानं तु-योगिज्ञानमेव प्रमाणं चेदत्र एतदाशङ्क्याह तदवस्थान्तरं तु-योग्यवस्थान्तरमेव, तत्-योगिज्ञानम् । ततः किमित्येतदाशङ्क्याह भ्रान्तमेतत्स्यात्-योगिज्ञानं, अन्यथा अभ्रान्तत्वेऽस्य किमित्याह सिद्धसाध्यता-अवस्थाभेदोपपत्तेरिति ॥२०३॥ उक्तमानुषङ्गिकं, प्रकृतं प्रस्तुमः, तच्च सिद्धस्वरूपं 'व्याधिमुक्तः पुमान् लोके' (श्लो. १८७). इत्याद्युपन्यासात्, तत्र-

**व्याधितस्तदभावो वा तदन्यो वा यथैव हि ।**
**व्याधिमुक्तो न सन्नीत्या कदाचिदुपपद्यते ॥२०४॥**

व्याधितः-सञ्जातव्याधिरेव, तदभावो वा, तदन्यो वा व्याधितादन्यो वा तत्पुत्रादिः, यथैव हि व्याधिमुक्तो न त्रयाणामेकोऽपि, सन्नीत्या-सन्न्यायेन, कदाचिदुपपद्यत इति दृष्टान्तः ॥२०४॥ दार्ष्टान्तिकयोजनमाह-

**संसारी तदभावो वा तदन्यो वा तथैव हि ।**
**मुक्तोऽपि हन्त नो मुक्तो, मुख्यवृत्त्येति तद्विदः ॥२०५॥**

संसारी-पुरुषः तदभावो वा-पुरुषाभावमात्रमेव तदन्यो वैकान्तलक्षणः तथैव हि यथा दृष्टान्ते किमिवेत्याह 'मुक्तोऽपि हन्त नो मुक्तो' मुख्यवृत्त्या त्रयाणामपि तत्प्रवृत्तिनिमित्ताभावात्, इति तद्विदः-[1]मुक्तविद इत्थमभिदधतीति ॥२०५॥ कथं तर्हि मुक्तव्यवस्थेत्याह-

---

१. मुक्तिविदः - पा. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**क्षीणव्याधिर्यथा लोके व्याधिमुक्त इति स्थितः ।**
**[1]भवरोग्येव तु तथा मुक्तस्तन्त्रेषु तत्क्षयात् ॥२०६॥**

क्षीणव्याधिः-पुरुषः यथा लोकेऽविगानेन व्याधिमुक्त इति तत्तदभावेन स्थितो न स्थापनीयः [2]भवरोग्येव-[3]न मुख्यतद्भावेन [4]तथा मुक्तः-भवव्याधिमुक्तः, तन्त्रेषु स्थितः । तत्क्षयादिति भवरोगक्षयादित्यर्थः ॥२०६॥

एवं प्रकृतमभिधाय सर्वोपसंहारमाह-

**अनेकयोगशास्त्रेभ्यः संक्षेपेण समुद्धृतः ।**
**दृष्टिभेदेन योगोऽयमात्मानुस्मृतये परः ॥२०७॥**

अनेकयोगशास्त्रेभ्यः-**पातञ्जलादिभ्यः**, संक्षेपेण-समासेन, समुद्धृ-तस्तेभ्यः पृथक्कृतः नवनीतमिव क्षीरादिति । केन क इत्याह दृष्टिभेदेन-उक्तलक्षणेन योगोऽयं अधिकृत एव । किमर्थमित्याह आत्मानुस्मृत्यर्थं परः-प्रधानो योग इति ॥२०७॥ प्रयोजनान्तरमप्याह-

**कुलादियोगिभेदेन, चतुर्धा योगिनो यतः ।**
**अतः परोपकारोऽपि, लेशतो न विरुध्यते ॥२०८॥**

कुलादियोगिभेदेन-येऽत्र(गोत्र)कुलप्रवृत्तचक्रनिष्पन्नयोगलक्षणेन चतुर्धाचतुष्प्रकारा योगिनो यतः सामान्येन अतः किमित्याह परोपकारोऽपि तथाविधकुलादियोग्यपेक्षया लेशतो न विरुध्यते, मनागतोऽपि योगपक्षपाता-दिभावात् ॥२०८॥ तदत्र-

**कुलप्रवृत्तचक्रा ये त एवास्याधिकारिणः ।**
**योगिनो न तु सर्वेऽपि तथाऽसिद्ध्यादिभावतः ॥२०९॥**

कुलप्रवृत्तचक्रा-ये कुलयोगिनः प्रवृत्तचक्राश्च य इत्यर्थः, एते चास्य-योगशास्त्रस्य अधिकारिणोऽर्हाः, योगिनो न तु सर्वेऽपि सामान्येन । कुत इत्याह तथा-तेन प्रकारेण, असिद्ध्यादिभावतः-गोत्रयोगिनामसिद्धिभावात्, आदिशब्दात्तु निष्पन्नयोगिनां तु सिद्धिभावादिति ॥२०९॥ एतद्विशेषलक्षणमाह-

---

१. भवरोगे च तु-पा। २. भवरोगे च -पा ३. भवरोगे च -पा ४. तथाव्याधिमुक्तवत् मुक्तः -पा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**ये योगिनां कुले जातास्तद्धर्मानुगताश्च ये ।**
**कुलयोगिन उच्यन्ते गोत्रवन्तोऽपि नापरे ॥२१०॥**

ये योगिनां कुले जाता-जन्मनैव, तद्धर्मानुगताश्च-योगिधर्मानुगताश्च, ये प्रकृत्यान्येऽपि, कुलयोगिन उच्यन्ते इति गम्यते द्रव्यतो भावतश्च । गोत्रवन्तोऽपि-सामान्येन भूमिभव्या अपि नापरे-कुलयोगिन इति ॥२१०॥

एतद्विशेषलक्षणमधिकृत्याह-

**सर्वत्राऽद्वेषिणश्चैते गुरुदेवद्विजप्रियाः ।**
**दयालवो विनीताश्च बोधवन्तो यतेन्द्रियाः ॥२११॥**

सर्वत्राऽद्वेषिणश्चैते-तथाऽऽग्रहाऽभावेन, तथा गुरुदेवद्विजप्रिया-धर्मप्रभावात् तथा दयालवः-प्रकृत्या क्लिष्टपापाभावेन, विनीताश्च, कुशलानुबन्धिभव्यतया । तथा बोधवन्तो-ग्रन्थिभेदेन, यतेन्द्रियाश्चारित्रभावेन ॥२११॥

**प्रवृत्तचक्रास्तु पुनर्यमद्वयसमाश्रयाः ।**
**शेषद्वयार्थिनोऽत्यन्तं शुश्रूषादिगुणान्विताः ॥२१२॥**

प्रवृत्तचक्रास्तु पुनः, किंविशिष्टा भवन्तीत्याह यमद्वयसमाश्रयाः-इच्छा-यमप्रवृत्तियमाश्रया इत्यर्थः, शेषद्वयार्थिनः-स्थिरयमसिद्धियमद्वयार्थिन इत्युक्तं भवति, अत्यन्तं-सदुपायप्रवृत्त्येति, अत एवाह शुश्रूषाश्रवणग्रहण-धारणविज्ञानोहापोहतत्त्वाभिनिवेशगुणयुक्ताः ॥२१२॥ तथा-

**आद्यावञ्चकयोगाप्त्या तदन्यद्वयलाभिनः ।**
**एतेऽधिकारिणो योगप्रयोगस्येति तद्विदः ॥२१३॥**

आद्यावञ्चक(योगावञ्चक)योगाप्त्या हेतुभूतया, तदन्यद्वयलाभिनः-क्रियावञ्चकफलाऽवञ्चकद्वयलाभिनः, तदवन्ध्यभव्यतयैवम्भूताः, (एते) किमित्याह अधिकारिणः, कस्येत्याह योगप्रयोगस्याधिकृतस्य, इत्येवं तद्विदो-योगविदः 'अभिदधति' इति शेषः ॥२१३॥ उपन्यस्तयमादिस्वरूपमाह-

**इहाऽहिंसादयः पञ्च सुप्रसिद्धा यमाः सताम् ।**
**अपरिग्रहपर्यन्तास्तथेच्छादिचतुर्विधाः ॥२१४॥**

इह लोके, अहिंसादयो धर्माः पञ्च संख्यया सुप्रसिद्धाः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सर्वतन्त्रसाधारणत्वेन, यमा-उपरमाः, सतां-मुनीनाम् इति, किम्पर्यन्ता इत्याह अपरिग्रहपर्यन्ताः । "*अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः*" (२-३० पा.) इति वचनात् । तथेच्छादिचतुर्विधाः प्रत्येकमिच्छायमाः प्रवृत्तियमाः स्थिरयमाः सिद्धियमा इति ॥२१४॥ एतेषां विशेषलक्षणमाह-

**तद्वत्कथाप्रीतियुता तथाऽविपरिणामिनी ।**
**यमेष्विच्छाऽवसेयेह प्रथमो यम एव तु ॥२१५॥**

तद्वत्कथाप्रीतियुता-यमवत्कथाप्रीतियुता तथाऽविपरिणामिनी-तद्भाव-स्थिरत्वेन, यमेषूक्तलक्षणेषु इच्छा अवसेयेह "[1]यमचक्रे इयं च 'प्रथमो यम एव तु' अनन्तरोदितलक्षणेच्छैवेच्छायम इति कृत्वा ॥२१५॥ तथा-

**सर्वत्र शमसारं तु यमपालनमेव यत् ।**
**प्रवृत्तिरिह विज्ञेया द्वितीयो यम एव तत् ॥२१६॥**

सर्वत्र-सामान्येन शमसारं-तूपशमसारमेव यत्क्रियाविशिष्टं यमपालनं, प्रवृत्तिरिह विज्ञेया यमेषु, द्वितीयो यम एव तत्-प्रवृत्तियम इत्यर्थः ॥२१६॥

**विपक्षचिन्तारहितं यमपालनमेव यत् ।**
**तत्स्थैर्यमिह विज्ञेयं तृतीयो यम एव हि ॥२१७॥**

विपक्षचिन्तारहितमतिचारादिचिन्तारहितमित्यर्थः यमपालनमेव यद्वि-शिष्टक्षयोपशमवृत्त्या तत्स्थैर्यमिह विज्ञेयं यमेषु, एतच्च तृतीयो यम एव हि स्थिरयम इति योऽर्थः ॥२१७॥

**परार्थसाधकं त्वेतत्सिद्धिः शुद्धान्तरात्मनः ।**
**अचिन्त्यशक्तियोगेन चतुर्थो यम एव तु ॥२१८॥**

परार्थसाधकं त्वेतद्यमपालनं सिद्धिरभिधीयते । एतच्च शुद्धान्तरात्मनो नान्यस्य, अचिन्त्यशक्तियोगेन तत्सन्निधौ वैरत्यागादितः । एतच्चतुर्थो यम एव तु सिद्धियम इति भावः ॥२१८॥ अवञ्चकस्वरूपमाह-

**सद्भिः कल्याणसम्पन्नैर्दर्शनादपि पावनैः ।**
**तथा दर्शनतो योग आद्यावञ्चक उच्यते (इष्यते) ॥२१९॥**

---

१. यमचयचक्रे - भ. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सद्भिः कल्याणसम्पन्नैर्विशिष्टपुण्यवद्भिः दर्शनादपि पावनैरवलोकनेनापि पवित्रैः तथा-तेन प्रकारेण गुणवत्तया विपर्ययाभावेन दर्शनं-तथादर्शनम्, ततस्तेन यो योगः-सम्बन्धस्तैः सह स आद्यावञ्चक इष्यते सद्यो(गा)ऽवञ्चक इत्यर्थः ॥२१९॥

**तेषामेव प्रणामादिक्रियानियम इत्यलम् ।**
**क्रियावञ्चकयोगः स्यान्महापापक्षयोदयः ॥२२०॥**

तेषामेव-सतां प्रणामादिक्रियानियम इत्यलम् क्रियावञ्चकयोगः स्याद्-भवेदिति । अयं च महापापक्षयोदयो-नीचैर्गोत्रकर्मक्षयकृदिति भावः ॥२२०॥

**फलावञ्चकयोगस्तु सद्भ्य एव नियोगतः ।**
**सानुबन्धफलावाप्तिर्धर्मसिद्धौ सतां मता ॥२२१॥**

फलावञ्चकयोगस्तु चरमो योगोत्तमः किम्भूत इत्याह सद्भ्य एव अनन्तरोदितेभ्यः नियोगतः-अवश्यंतया, सानुबन्धफलावाप्तिः-तथा सदुपदेशादिना, धर्मसिद्धौ विषये सतां मता इति ॥२२१॥

एवमेषां स्वरूपमभिधाय प्रकृतयोजनमाह-

**कुलादियोगिनामस्मात् मत्तोऽपि जडधीमताम् ।**
**श्रवणात्पक्षपातादेरुपकारोऽस्ति लेशतः ॥२२२॥**

कुलादियोगिनामुक्तलक्षणानां, अस्माद्योगदृष्टिसमुच्चयात्, मत्तोऽपि सकाशात् जडधीमतामन्येषाम् किमित्याह श्रवणात्-श्रवणेन, पक्षपातादेः पक्षपातशुभेच्छादेः, उपकारोऽस्ति लेशतः तथा बीजपुष्टा(ष्ट्या) ॥२२२॥

कः पक्षपातमात्रादुपकार इत्याशङ्कापोहायाह-

**तात्त्विकः पक्षपातश्च, भावशून्या च या क्रिया ।**
**अनयोरन्तरं ज्ञेयं, भानुखद्योतयोरिव ॥२२३॥**

तात्त्विकः पक्षपातश्च पारमार्थिक इत्यर्थः भावशून्या प्रति (च या) क्रिया 'अनयोरन्तरं ज्ञेयं' कयोरिवेत्याह भानुखद्योतयोरिव महदन्तरमित्यर्थः ॥२२३॥ तथा चाह-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**खद्योतकस्य यत्तेजः तदल्पं च विनाशि च ।**
**विपरीतमिदं भानोरिति भाव्यमिदं बुधैः ॥२२४॥**

खद्योतकस्य–सत्त्वविशेषस्य, यत्तेजः प्रकाशात्मकम् तत्किमित्याह अल्पं च विनाशि च स्वरूपेण विपरीतमिदं भानोर्बह्वविनाशि चाऽऽदित्यस्येति इत्येवं भावं, भाव्यमिदमधिकृतपक्षपातादेतत्क्रियादिकं, बुधैस्तत्त्वनीत्येति ॥२२४॥ विशेषमाह–

**श्रवणे प्रार्थनीयाः स्युर्न हि योग्याः कदाचन ।**
**यत्नः कल्याणसत्त्वानां, महारत्ने स्थितो यतः ॥२२५॥**

श्रवणे–श्रवणविषये प्रार्थनीयाः स्युर्भवेयुः न हि योग्याः कदाचन–शुश्रूषाभावेन स्वतःप्रवृत्तेः । तथा चाह यत्नः कल्याणसत्त्वानां–पुण्यवतां, महारत्ने–चिन्तामण्यादिविषयः, स्थितो यतः–तथौचित्ययोगेन, पक्षपातादेरपि जन्मान्तरावाप्तिश्रुतेः ॥२२५॥ अयोग्यदानदोषपरिहारायाह–

**नैतद्विदस्त्वयोग्येभ्यो, ददत्येनं तथापि तु ।**
**हरिभद्र इदं प्राह, नैतेभ्यो देय आदरात् ॥२२६॥**

नैतद्विदस्त्वाचार्याः, अयोग्येभ्योऽन्येभ्यो, ददति–यच्छन्ति, एनं योगदृष्टि-समुच्चयाख्यं ग्रन्थम्, तथापि त्वेवमपि व्यवस्थिते हरिभद्रो ग्रन्थकृत्, इदं प्राह किमित्याह नैतेभ्य अयोग्येभ्यः, देयः अयं–योगदृष्टिसमुच्चयः, आदरात्–आदरेण इदं प्राह ॥२२६॥ किमेतदेवमित्याह–

**अवज्ञेह कृताल्पापि, यदनर्थाय जायते ।**
**अतस्तत्परिहारार्थं, न पुनर्भावदोषतः ॥२२७॥**

अवज्ञेह योगदृष्टिसमुच्चयाख्ये ग्रन्थे, कृताल्पापि स्वरूपेण यद्यस्मात् अनर्थाय जायते महाविषयत्वेन । अतस्तत्परिहारार्थं [1]न पुनर्भावदोषतः–क्षुद्रतया हरिभद्र इदं प्राहेति ॥२२७॥ इत्थं चैतदङ्गीकर्तव्यम् । अत एवाह–

**योग्येभ्यस्तु प्रयत्नेन, देयोऽयं विधिनाऽन्वितैः ।**
**मात्सर्यविरहेणोच्चैः, श्रेयोविघ्नप्रशान्तये ॥२२८॥**

---

१. अनर्थपरिहारार्थं – ता. ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

योग्येभ्यस्तु श्रोतृभ्यः प्रयत्नेनोपयोगसारेण देयोऽयं विधिना-श्रवणादि-गोचरेण अन्वितैर्युक्तैः, दोषोऽन्यथा, प्रत्यवायसम्भवादित्याचार्याः मात्सर्यविरहेण-मात्सर्याभावेन, उच्चैः श्रेयोविघ्नप्रशान्तये पुण्यान्तरायप्रशान्त्यर्थमिति ॥२२८॥ समाप्तोऽयं योगदृष्टिसमुच्चयः ॥

कृतिः श्रीश्वेतभिक्षोराचार्यश्रीहरिभद्रस्येति ॥

## ॥ सवृत्तियोगदृष्टिसमुच्चयः समाप्तः ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥ ओ अर्हं नमः ॥

श्रीमद्धरिभद्रसूरिप्रणीतः श्रीमुनिचंद्रसूरिविरचितवृत्तिसमलङ्कृतः

# योगबिन्दुः

सद्योगचिन्तामणितोऽनणीयो । येनाधिजग्मे जगतः पतित्वम् ॥
स योगिवृन्दारकवन्दनीयो । द्यतादवद्यानि घनं जिनो नः ॥१॥
सुधाबिन्दोरिवानन्दममन्दमुपचिन्वतः ।
योगबिन्दोः समासेन, वृत्तिरेषा विधीयते ॥२॥
गुरूपदेशो न च तादृगस्ति, मतिर्न वा काचिदुदाररूपा ।
तथापि योगप्रियतावशेन, यत्नस्तदभ्यासकृते ममायम् ॥३॥

तस्य चेदमादिसूत्रं "नत्वा" इत्यादि श्लोकद्वयम् –

**नत्वाद्यन्तविनिर्मुक्तं शिवं योगीन्द्रवन्दितम् ।**
**योगबिन्दुं प्रवक्ष्यामि तत्त्वसिद्धयै महोदयम् ॥१॥**
**सर्वेषां योगशास्त्राणामविरोधेन तत्त्वतः ।**
**सन्नीत्या स्थापकं चैव मध्यस्थांस्तद्विदः प्रति ॥२॥**

नत्वा–ऽभिवन्द्य, आदिः–प्रथमभावः, अन्तः–पर्यवसानं, ताभ्यां विनिर्मुक्तं–विरहितम् कमित्याह शिवं–सकलोपप्लवकलाविकलं देवताविशेषम् । कीदृशमित्याह योगीन्द्रवन्दितं–गणधरादिमहामुनिनमस्कृतम्, किमित्याह योगबिन्दुं–योगस्य मोक्षहेतोरनुष्ठानस्य बिन्दुरवयवो योगबिन्दुः, तत्प्रतिपादकतया प्रकरणमपि योगबिन्दुरुच्यते ततो योगबिन्दुनामकं प्रकरणं प्रवक्ष्यामि–अभिधास्ये । किमर्थमित्याह तत्त्वसिद्धयै–आत्मादितत्त्वप्रतीतिनिमित्तम् । पुनरपि कीदृशं योगबिन्दुमित्याह महोदयं–महान्–प्रशस्य उदयो निःश्रेयसाभ्युदयसंसिद्धिरूपो यस्मात् स तथा तम् ॥१॥ पुनरपि कीदृशं योगबिन्दुमित्याह सर्वेषां–कपिलसुगतादिप्रणीतयोगशास्त्राणां–अध्यात्मग्रन्थानां अविरोधिनां

Jain Education International For Personal & Private Use Only www.jainelibrary.org

(अविरोधेन) अविघटनेनोपलक्षितम् । तत्त्वतः-ऐदम्पर्यालोचनेन, न पुनः शाब्दन्यायेनापि, तस्य प्रतिदर्शनमन्यथाऽन्यथाप्रवृत्तत्वात् । पठ्यते च- *प्रशान्तवाहितासंज्ञं विसभागपरिक्षयम्[१] । शिववर्त्म ध्रुवाध्वेति, योगिभिर्गीयते ह्यदः ॥१॥* (यो. दृ. स. १७६) इति ॥ तथा सन्नीत्या-अन्वयव्यतिरेक[२]शुद्धयुक्तिरूपया स्थापकमविसंवादापादनेन प्रतिष्ठाकारि सर्वयोगशास्त्राणामेव, 'चैव' इति समुच्चये ।

ननु योग[३]शास्त्रकाराणां निजनिज[४]मतात्यन्ताभिनिवेशेन विप्रतिपन्नत्वात्कथं सर्वयोगशास्त्राणां संस्थापकमिदं प्रकरणं स्यादित्याशङ्क्याऽऽह- मध्यस्थान् स्वदर्शनराग-परदर्शनद्वेषयोर्मध्यभागवर्तिनः, तद्विदः-योगशास्त्रविदः श्रोतृन् 'प्रति' इति [५]स्वदर्शनं प्रतीत्य, अमध्यस्थेषु श्रोतृषु वस्तुस्थापनायोगात् । तथा चोक्तम्-*"आग्रही बत निनीषति युक्तिं, तत्र यत्र मतिरस्य निविष्टा । पक्षपातरहितस्य तु युक्तिर्यत्र तत्र मतिरेति निवेशम्" ॥१॥* इति ॥ आद्यन्तविनिर्मुक्तं इति च विशेषणं शिवसन्तानापेक्षम्, न पुनरेकः कश्चिदनादिशुद्धः शिवः समस्ति, तस्य शास्त्रान्तरे महता प्रबन्धेन प्रतिषिद्धत्वात् । अत्र च 'नत्वा शिवं' इत्यनेन विघ्नापोहहेतुशास्त्रमूलमङ्गलमुक्तम् । 'योगबिन्दुं' इत्यनेन प्रेक्षावत्प्रवृत्त्यर्थमभिधेयम् । 'तत्त्वसिद्ध्यै' इत्यनेनानन्तरप्रयोजनम् । 'महोदयं' इत्यनेन तु परम्पराप्रयोजनमभिहितम् । अभिधानाभिधेयलक्षणश्च सम्बन्धः स्वयमेव वाच्य इति ॥२॥

सर्वेषां योगशास्त्राणामविरोधेन इत्युक्तम्, अथ तमेव भावयन्नाह-

**मोक्षहेतुर्यतो योगो भिद्यते न ततः क्वचित् ।**
**साध्याभेदा थाभावे तूक्तिभेदो न कारणम् ॥३॥**

मोक्षहेतुः-निवृत्ति(र्वृति)निमित्तं, यतो-यस्मात्कारणात् योगः सर्वैर्योगशास्त्रकारैः सङ्गीयते, भिद्यते-भेदमनुभवति न-नैव, ततो-मोक्षहेतुत्वाद्धेतोः, क्वचिद्योगशास्त्रे । एतदपि कुत इत्याह साध्याऽभेदात्-

---

१. क्षयः - AB; २. शुद्धि-A; ३. शास्त्राणां-A; ४. मत्या-A; ५. 'स्वदर्शन' इति A प्रतौ नास्ति;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

साध्यस्य योगाभ्यासनिष्पाद्यस्य-मोक्षस्याभेदादेकरूपत्वात् । सकलकर्मक्लेशक्षयलक्षणो हि मोक्षः, न तत्र कश्चिद् भेद इति। एवं सति यत्सिद्धं तदाह-तथाभावे तु मोक्षाभेदभावे पुनः सति, उक्तिभेदः-योगशास्त्रेष्वात्मादीनां योगा(ङ्गा)नां यो भणितः स न कारणं-हेतुर्योगभेदस्य । न हि नाममात्रभेदेन भावा भिद्यन्ते, एकस्यापि शक्रादेरनेकेन नाम्ना व्यवह्रियमाणत्वात् ॥३॥

अथात्रैव विशेषमाह [1]"मोक्षहेतुत्वं' इत्यादि-

**मोक्षहेतुत्वमेवास्य किन्तु यत्नेन धीधनैः ।**
**सद्गोचरादिसंशुद्धं मृग्यं स्वहितकाङ्क्षिभिः ॥४॥**

मोक्षहेतुत्वमेव-मोक्षनिमित्तभाव एव नापरं किञ्चित्, अस्य-योगस्य, किन्तु-केवलं, यत्नेना-ऽऽदरेण, धीधनैः-बुद्धिमद्भिः 'मृग्यम्' इत्युत्तरेण योगः । कीदृशमित्याह सताऽनुपचरितेन, गोचरादिनाऽनन्तरमेव दर्शयिष्यमाणेन, संशुद्धम्-अनवद्यम् [2]मृग्यं-आत्मादौ मोक्षहेतुर्योग युज्यते न वा इत्येवंरूपेण निपुणोहापोहयोगेन गवेषणीयं, [3]कीदृशैः, ? स्वहितकांक्षिभिः-आत्मकल्याणचिन्तकैः । योगवञ्चनायां हि [4]सर्वपुरुषार्थवञ्चना नियमात्सम्पद्यते । यदवाचि *"एसो य उत्तमो जं, पुरिसत्थो एत्थ वञ्चिओ नियमा । वञ्चिज्जइ सव्वेसुं, कल्लाणेसुं न संदेहो* (पंचवस्तु-१०२५)" ॥ ४ ॥

अथ कस्मादस्य गोचरादिशुद्धिः मृग्यत इत्याशंक्याह-

**गोचरश्च स्वरूपं च फलं च यदि युज्यते ।**
**अस्य योगस्ततोऽयं यन्मुख्यशब्दार्थयोगतः ॥५॥**

गोचरो-विषयः परिणामिजीवलक्षणः स्वरूपं-सर्वार्थेषूचितप्रवृत्तिलक्षणम् फलं-मोक्षात्मकम् । चकारा उक्तसमुच्चये, 'यदि' इत्यभ्युपगमे, युज्यते-घटते अस्य-योगस्य, योगः ततो गोचरादियोगात् अयं वस्तुतो यद्यस्मात्तत् स्यात् । एतदपि कुत इत्याह-मुख्यस्याऽनुपचरितस्य, शब्दार्थस्य-'मोक्षेण योजनाद्योग' इत्येवंलक्षणस्य योगतो-घटनात् ॥५॥

---

१. 'मोक्षहेतुत्वं' इत्यादि - ABC प्रतिषु नास्ति; २. मृग्यं कीदृशै-A; कीदृशे-B, कीदृशो-C ३. कीदृशैः इति-ABC प्रतिषु नास्ति; ४. पुरुषस्य सर्वपुरुषार्थेषु वञ्चना-A



Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ यथोद्देशं निर्देशाद् गोचरादिशुद्धिमेव भावयति-

**आत्मा तदन्यसंयोगात्संसारी तद्वियोगतः ।**
**स एव मुक्त एतौ च तत्स्वाभाव्यात्तयोस्तथा ॥६॥**

आत्मा-जीवः तदन्यसंयोगात्-तस्मादात्मनोऽन्येन कर्मणा [1]सम्बन्धात् किमित्याह [2]संसारी-नारकादिपर्यायवान् । तथा तद्वियोगतः-तदन्यविरहात् । स एव यो द्रव्यरूपतयात्मा संसारी न पुनरन्यः मुक्तो-मोक्षभाक् । एतौ च संसारमोक्षौ पुनः तत्स्वाभाव्यात्संसारहेतु[3]र्मोक्षहेतुश्च स्वभावो ययोस्तौ तथा तद्भावस्तस्मात् तयोस्तदन्यसंयोगवियोगयोः, तथा इति वक्तव्यान्तरसमुच्चयार्थः ॥६॥ एतदेवाह-

**अन्यतोऽनुग्रहोऽप्यत्र तत्स्वाभाव्यनिबन्धनः ।**
**अतोऽन्यथा त्वदः सर्वं न मुख्यमुपपद्यते ॥७॥**

"*महेशानुग्रहाद्बोधनियमौ*" इतिवचनाद् अन्यतो-महेशात्, अनुग्रहोऽ-प्युपकारोऽपि शुद्धज्ञानक्रियालाभलक्षणः, किं पुनः पूर्वोक्तौ संसारापवर्गौ इत्यपिशब्दार्थः, अत्र-योगचिन्तायाम् किमित्याह तत्स्वाभाव्यनिबन्धनः-स महेशानुग्रहयोग्यः स्वभावो यस्य स तथा तद्भावस्तत्स्वाभाव्यम्; तन्निबन्धनं हेतुर्यस्य स तथा । विपर्यये बाधामाह अतः-तत्स्वाभाव्यात्, अन्यथा तु-अन्येन प्रकारेण पुनः केवल[4]महेशानुग्रहादिरूपेण, अदः-संसारित्वादि, सर्व-कृत्स्नं, न-नैव, मुख्यं-अनुपचरितं, उपपद्यते-घटते । यथा हि कर्पासादिः स्वभावत एवाऽयोग्यो लाक्षारसादिना रज्यमानोऽपि न तात्त्विकं रागं प्रतिपद्यते किं तु रागाभासमेव, एवमात्मनां योग्यताविरहे महेशेन क्रियमाणाव- प्यनुग्रहनिग्रहौ न तात्त्विकौ स्यातामिति तत्स्वाभाव्यमवश्यमभ्युपगन्तव्यम् । तदभ्युपगमे च तत एव संसारमोक्षोपपत्त्या न किंचिन्महेशानुग्रहादिना प्रयोजनमस्तीति सिद्धं "आत्मा तदन्यसंयोगात्संसारी" (श्लोक-६) इत्यादि ॥ ७ ॥ इत्थं महेशवादिमतमपास्यात्रैव पुरुषाद्वैतमतमपाकुर्वन्नाह-

**केवलस्यात्मनो न्यायात्सदात्मत्वाविशेषतः ।**
**संसारी मुक्त इत्येतद् द्वितयं कल्पनैव हि ॥८॥**

---

१. संयोगात्-A; २. संसारी-नरनारका-A; ३. मुक्ति-B.C; ४. केवलं-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

केवलस्य-तदन्याऽदृष्टादिविकलस्य, आत्मनो-जीवस्य, न्यायाद्युक्तिमार्गात्, सदा [1]सर्वकालमपि आत्मतत्त्वस्य-स्वरूपमात्ररूपस्य [2]अविशेषतो विशेषकारणकर्मसंयोगादेरनभ्युपगमात् । किमित्याह 'संसारी-मुक्त' इत्येतत् पूर्वमेव प्रपञ्चितं, द्वितयं-आत्मावस्थाद्वयलक्षणं वस्तु कल्पनैव स्वविकल्परूपैव केवला । हि-स्फुटम् । न पुनर्वस्त्वपि तथा वर्तत इति ॥ ८॥ एतदेव दृष्टान्तोपन्यासेन भावयन्नाह-

**काञ्चनत्वाऽविशेषेऽपि यथा सत्काञ्चनस्य न ।**
**शुद्ध्यशुद्धी ऋते शब्दात्तद्वदत्राप्यसंशयम् ॥ ९॥**

काञ्चनत्वस्य-सुवर्णभावस्य, अविशेषेऽप्यभेदेऽपि, भेदे पुनर्भवत एवेत्यपिशब्दार्थः, यथा इति दृष्टान्तार्थः, सत्काञ्चनस्य-सर्वमलविकलस्य कल्याणनाम्नो हेम्नः किमित्याह न-नैव, शुद्ध्यशुद्धी-निर्मलतामलिनतारूपे स्याताम् । किं सर्वथा नेत्याह ऋते-विना, शब्दात्-वाचकाद्विकलपुरुषप्रयुक्तात्, तद्वत्-[3]सत्काञ्चनशुद्ध्यशुद्धिवत्, अत्रापि केवल आत्मन्यभ्युपगते, किं पुनः सत्काञ्चन इत्यपिशब्दार्थः, असंशयं-असन्देहम् ऋते शब्दात्संसारित्वमुक्तत्वे न भवेतामिति ॥९॥

ननु यत्प्राक्तदन्यदुक्तं तत्किल कर्म, तच्च क्रियमाणत्वेनावश्यं कर्तारमात्मानमपेक्षते, स च कर्मणः प्रागेव सिद्धरूपोऽभ्युपगन्तव्यः, समकालभाविनोः सव्येतरगोविषाणयोरिव कार्यकारणभावाभावाद् इति कथं तस्य स्वरूपमात्रस्थितस्यात एव शुद्धरूपस्य प्रथमः कर्मसंयोगः संसारित्वहेतुरित्याशंक्याह-

**योग्यतामन्तरेणास्य संयोगोऽपि न युज्यते ।**
**सा च तत्तत्त्वमित्येवं तत्संयोगोऽप्यनादिमान् ॥ १०॥**

योग्यतां-कर्मसंयोगानुकूलपरिणतिरूपां अन्तरेण-विना अस्याऽऽत्मनः संयोगोऽपि-कर्मणा सह सम्बन्धः, किं पुनः कर्मसंयोगाभावे संसारित्वमित्यपिशब्दार्थः, न युज्यते-न घटत एव । यदि नामैवं ततः किमित्याह सा च-सा पुनर्योग्यता, तत्तत्त्वं-तस्यात्मनस्तत्त्वं स्वभाव[4]भूतत्वं वर्तते, न

---

१. आकालमपि-A.B.C.; २. अविशेषात्-A.B.C.; ३. सत्काञ्चनस्य शुद्ध्य-A ४. भूता-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुनरुपाधिजन्यं किञ्चिद्रूपम् । इत्येवं-अनेन प्रकारेणात्मस्वभावभवनरूपेण योग्यतायाः [1]तथा तत्संयोगोऽपि-कर्मसंयोगः किं पुनर्जीव इत्यपिशब्दार्थः अनादिमान्-प्रवाहापेक्षया [2]जीववदादिकालविकलः ॥ १० ॥

एतदपि कथमित्याह -

**योग्यतायास्तथात्वेन विरोधोऽस्यान्यथा पुनः ।**
**अतीतकालसाधर्म्यात् किन्त्वाज्ञातोऽयमीदृशः ॥ ११ ॥**

योग्यताया-उक्तरूपायाः तथात्वेन-जीवस्वभावभूतत्वादनादित्वेन हेतुना, अत्रैव विपर्यये दोषमाह-विरोधः विघटमानता, अस्य-बन्धस्य, अन्यथा पुनः-आदिमत्त्वे योग्यताया अभ्युपगम्यमाने सति । तथाहि यद्यादिमती योग्यता, तदा बन्धोऽप्यादिमानेव प्राप्नोति । न चैवं, तस्यानादित्वेन सर्वैरेवाभ्युपगतत्वात् । तथा शुद्धस्याप्यकस्मादेव कर्मसंयोगाभ्युपगमे सिद्धानामपि तत्प्रसङ्गादनाश्वासः [3]सम्पद्येत इति । तस्माद्योग्यता तदुद्भवश्च बन्धो द्वावप्यनादिमन्तावभ्युपगन्तव्याविति । ननु कृतकत्वेन कथमनादिमत्त्वं बन्धस्य श्रद्धातुमुचितम् ? सत्यम्, अतीतकालसाधर्म्याद्-अतिक्रान्तकालसादृश्येन, किंतु-केवलं, आज्ञातः-आगमात् अयं-कर्मबन्धः ईदृशः-अनादिः स्यात् । यथा ह्यतीतकालः प्रतिक्षणमपरापररूपेण भूतोऽपि प्रवाहापेक्षयानादिः तथा बन्धोऽपि जिनवचनप्रामाण्यादवगन्तव्य इति ॥ ११ ॥

अथ प्रपञ्चतो महेशानुग्रहान्मोक्ष इति निराकुर्वन्नाह -

**अनुग्रहोऽप्यनुग्राह्ययोग्यतापेक्ष एव तु ।**
**नाणुः कदाचिदात्मा स्याद् देवतानुग्रहादपि ॥१२॥**

अनुग्रहोऽपि-महेशकृतः किं पुनः शेषक्रियाविशेष इत्यपिशब्दार्थः, अनुग्राह्यस्य-अनुग्रहविषयस्य जन्तोः, योग्यतापेक्ष एव तु-योग्यतामेवाऽपेक्ष्य न पुनरन्यथा । अमुमेवार्थं प्रतिवस्तूपमया भावयति, न-नैव, अणुः-पुद्गलविशेषः, कदाचित्-क्वापि काले, आत्मा-जीवः, स्यात् । कुतोऽपीत्याह देवतानुग्रहादपि-देवताया दिव्यविशेषरूपाया अनुग्रहः-प्रसादः, तस्मादपि किं

---

१. 'तथा'-A.B प्रत्योः नास्ति; २. ऽतीतवदा-A; ३. सम्पद्यत-ABC;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुनस्तदभाव इत्यपिशब्दार्थः ॥१२॥ अमुमेवार्थं भावयति -

**कर्मणो योग्यतायां हि कर्त्ता तद्व्यपदेशभाक् ।**
**नान्यथाऽतिप्रसङ्गेन लोकसिद्धमिदं ननु ॥१३॥**

कर्मणः-क्रियाविषयस्य सामान्येन मुद्गादेर्वस्तुनो, योग्यतायां-योग्यभावे हि-यस्मात्कारणात् कर्ता-पाचकादिः तद्व्यपदेशभाक् तं पाचकादिरूपं व्यपदेशं भजते यः स तथा । विपक्षे बाधामाह-न-नैव, अन्यथा-अन्येन प्रकारेण कर्मणः पाकादियोग्यताविरहे, कर्ता तद्व्यपदेशभाक् कथमित्याह अतिप्रसङ्गेन अतिव्याप्तिलक्षणेन, लोकसिद्धं-बालाबलादिजनप्रतीतम् इदं-पूर्वोक्तं वस्तु ननु-निश्चितम् । नास्मिन्नर्थेऽन्यत्प्रमाणं गवेषणीयमिति भावः ॥ १३ ॥ पुनरप्यमुमेवार्थं पुरस्कृत्याह-

**अन्यथा सर्वमेवैतदौपचारिकमेव हि ।**
**प्राप्नोत्यशोभनं चैतत्तत्त्वतस्तदभावतः ॥ १४ ॥**

अन्यथा-स्वयोग्यतामन्तरेणापि कर्मणो यदि कर्ता तद्व्यपदेशभागिष्यते, तदा सर्वमेवैतद्बाह्यमाभ्यन्तरं च कार्यजातं किमित्याह औपचारिकमेव-उपचारमात्रोद्भवमेव, हि-स्फुटं, प्राप्नोति-प्रसज्यते माणवकसिंहत्ववत् । यदि नामैवं, तथापि को दोष इत्याह अशोभनं च-अशोभनं पुनः, एतत्-सर्वमेवौपचारिकतयाभ्युपगम्यमानम्, कुत इत्याह तत्त्वतः पारमार्थिक्या वृत्त्या, तदभावतः-औपचारिकवस्तुनोऽभावात् । न ह्युपचरिता भावा माणवकसिंहतादयः पारमार्थिकं सिंहादिरूपं भजन्ते, एवं मोक्षादयोऽप्यात्मनः स्वयोग्यताया विरहे महेशानुग्रहादेः परैरभ्युपगम्यमाना न पारमार्थिकरूपभाजो भवेयुरिति ॥१४॥ किं च -

**उपचारोऽपि च प्रायो लोके यन्मुख्यपूर्वकः ।**
**[१]दृष्टस्ततोऽप्यदः सर्वमित्थमेव व्यवस्थितम् ॥ १५ ॥**

उपचारोऽपि चोपचरितवस्तुव्यवहाररूपः 'किं पुनर्मुख्यो मुख्यपूर्वको व्यवहार' इत्यपिचशब्दार्थः, प्रायो-बाहुल्येन लोके-व्यवहारार्हे जने यद्यस्मात्

---

१. दृष्टोऽप्यदोऽप्यतः-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुख्यपूर्वकः-निरुपचरितवस्तुव्यवहारापेक्षः दृष्टः-उपलब्धः । प्रायोग्रहणं क्वचिद्व्यभिचारार्थं तेन *"मेरुमन्थानेन मथितो नीरनिधिः सुरैः"* इत्यादयोऽत्यन्तमसम्बद्धाः केचिल्लोकव्यवहारा न मुख्य[१]वस्तुव्यवहारपूर्वकाः, किं तु मिथ्याविकल्पवासनाप्रकोपपूर्वका इति । ततोऽपि-मुख्यपूर्वकत्वादप्युपचारस्य 'किं पुनः प्रागुक्तयुक्तेरि'त्यपिशब्दार्थः, अद एतत्स्वयोग्यताया सकाशात्कर्मबन्धादि सर्वं-निरवशेषम् इत्थमेव-व्यवस्थापितनीत्यैव व्यवस्थितं-प्रतिष्ठितम् ॥१५॥

साम्प्रतमुक्तग्रन्थस्य [२]भावार्थमाविष्करणाय प्राह -

**ऐदम्पर्यं तु विज्ञेयं, सर्वस्यैवास्य भावतः ।**
**एवं व्यवस्थिते तत्त्वे योगमार्गस्य सम्भवः ॥१६॥**

ऐदम्पर्यं तु - परमार्थः पुनः, विज्ञेयं-अवगन्तव्यं, सर्वस्यैवास्योपन्यस्तग्रन्थस्य कीदृशमित्याह भावतः-परमार्थतः, एवं-उक्तन्यायेन, व्यवस्थिते [३]तत्त्वे-आत्मादौ, योगमार्गस्य-वक्तुमुपक्रान्तस्य,सम्भवः-घटना भवेत्, एवमेव तत्त्वे व्यवस्थिते योगमार्गस्य भावतः सम्भव इत्यैदम्पर्यं विज्ञेयमित्यर्थः ॥ १६ ॥ कुत इत्याह -

**पुरुषः क्षेत्रविज्ज्ञानमिति नाम यदात्मनः ।**
**अविद्या प्रकृतिः कर्म तदन्यस्य तु भेदतः ॥१७॥**

"पुरुषो" जैनवेदान्तिकानां, क्षेत्रवित्-सांख्यानां, ज्ञानमिति बौद्धानाम् इत्यनेन प्रकारेण नाम-संज्ञा यद्यस्मात्कारणात् आत्मनो-जीवस्य । तथा अविद्या बौद्धवेदान्तिकानां, प्रकृतिः सांख्यानां, कर्म-जैनानाम् । तदन्यस्य तु-तस्मादात्मनोऽन्यस्य कर्मणः पुनः 'नाम' इत्यनुवर्तते भेदतो-दर्शनभेदेन ॥१७॥

**भ्रान्तिप्रवृत्तिबन्धास्तु संयोगस्येति कीर्तितम् ।**
**शास्ता वन्द्योऽविकारी च तथानुग्राहकस्य तु ॥१८॥**

भ्रान्ति-र्वेदान्तिकसौगतानां, प्रवृत्तिः-सांख्यानां, बन्धः पुनर्जैनानां, संयोगस्य-तदन्यसम्बन्धलक्षणस्य, इत्येवं भेदेन कीर्तितम् "नाम"

---

१. 'वस्तु'-इति शब्दः-A.B.C. प्रतिषु नास्ति; २. भावार्थाविष्करणाय-A.B.C.; ३. प्रतिष्ठिते तत्त्वे-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्यनुवर्तते। शास्ता-जैनानां, वन्द्यः सौगतानां, अविकारी च शैवभागवतानाम् तथा इत्युक्तसमुच्चये, अनुग्राहकस्य तु-अनुग्रहविधातुर्जिनादेः पुनर्नाम इदमुक्तं भवति, इहात्मादीनि योगोप[1]योगादीनि यावन्ति वस्तूनि जैनमते प्रपञ्चितानि तावन्त्येव दर्शनान्तरेष्वपि परं नामभेदेन, न च नामभेदो बाधकः, एकस्याप्यनेक[2]भेदसम्भवात्, किं तु परिणामिन्यात्मनि स्वयोग्यतयैव च कर्मसंयोगं तद्वियोगं चानुभवति सत्यभ्युपगते सर्वदर्शनोक्तो योगो घटते। अतः सर्वैः स तथाभ्युपगन्तव्य इति ॥१८॥ तस्मात्किं सिद्धमित्याह –

**साकल्यस्यास्य विज्ञेया परिपाकादिभावतः ।**
**औचित्याबाधया सम्यग्योगसिद्धिस्तथा तथा ॥१९॥**

साकल्यस्यात्मतदन्यसंयोगादिभावलक्षणस्य अस्यानन्तरमेवोपन्यस्तस्य विज्ञेया –बोद्धव्या परिपाकस्य–भव्यत्वपाकरूपस्य, आदिशब्दात्तदन्यसंयोग-ह्रासस्य शास्तुरनुग्रहस्य च यो 'भावः' तस्मात्, या औचित्याऽबाधा योग्य-प्रवृत्तिलक्षणा तया किमित्याह सम्यग्योगसिद्धिः–निरुपचरितयोगनिष्पत्तिः। तथा तथा–तेन तेनापुनर्बन्धकाद्यनुष्ठानाराधनारूपेण जायते इति ॥१९॥ किं च –

**एकान्ते सति तद्यत्नस्तथाऽसति च यद् वृथा ।**
**तत्तथायोग्यतायां तु तद्भावेनैष सार्थकः ॥२०॥**

इह परमार्थचिन्तायामात्मादयो भावाः स्वरूपेण सन्तः (पररूपेण चाऽसन्तः)। [3]एवं 'एकान्ते सति'–एकान्तेनैव स्वरूपेण पररूपेण चेत्यर्थः, 'सति' विद्यमाने 'आत्मनि' इति गम्यते, तद्यत्नः–योगप्रयत्नः, 'तथा' इति समुच्चये, असति चैकान्तेनैव किमित्याह 'यत्'–यस्मात् वृथा–निरर्थको योगः। तथाहि, यदि योगी सर्वथा सन्नेवाऽभ्युपगम्यते तदा तस्याऽयोगिरूपेणाऽपि सत्त्वात्पररूपप्रवेशेन स्वरूपव्याहतिः स्यात्, तथा च योगिनः स्वरूपाभावाद्योगाभ्यासो निरर्थक एव स्यात्, परकीयाऽयोगेनोपहतत्वात्। एकान्ताऽसत्त्वे त्वात्मनः स्वरूपस्याप्यभावात् को नाम योगाभ्यासवान् तत्फलभोगी च स्यात्। न हि खरविषाणं क्वचित्प्रवर्तते फलं वासादयतीति।

१. योगीनि-A.B; २. नामसम्भवात्-A; ३. एवं च 'एकान्ते-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तर्हि कथं न वृथैष स्यादित्याह-तस्याऽऽत्मनः 'तथायोग्यतायां तु'- स्वरूपपररूपापेक्षया सत्त्वाऽसत्त्वयोग्यतायां सत्यां पुनः किमित्याह 'तद्भावेन'- आत्मनः फलरूपतया परिणामलक्षणेन, 'एष'-योगः,'सार्थकः'-[१]स्वसाध्यनिष्पादक इति । यदा हि स्वरूपेण सन् पररूपेण चासन्नात्मा परिणामी चेष्यते, तदायमवृथा योगः स्यात्, न पुनरन्यथेति ॥२०॥ एवं नित्याऽनित्ये सदसद्रूपे चात्मनि प्रसाधिते यदन्यदपि सिद्धं तद्दर्शयति -

**दैवं पुरुषकारश्च तुल्यावेतदपि स्फुटम् ।**
**युज्येते एवमेवेति वक्ष्याम्यूर्ध्वमदोऽपि हि ॥२१॥**

'दैवं' पूर्वकृत[२]कर्म, 'पुरुषकारः'- पुरुषव्यापारः, चकारः समुच्चये । 'तुल्यौ'-समसामर्थ्यौ पुरुषार्थसिद्धिं प्रतीति यच्छास्त्रान्तरेषु गीयते 'एतदपि' किं पुनः प्रस्तुतो योग इत्यपिशब्दार्थः 'स्फुटं'-व्यक्तम् 'युज्यते'-घटते [३]एवमेवेत्युक्तनीत्यैव 'इतिः' पादपरिसमाप्तौ । तथा 'वक्ष्यामि'-भणिष्यामि ऊर्ध्वमेतद्ग्रन्थोपरिभागे 'अदोऽपि हि' दैवपुरुषकारतुल्यत्वं, न केवलं प्रस्तुतं योगमित्यपिहिशब्दार्थः ॥२१॥

आह किमर्थं गोचरादिशुद्ध्या योगो मृग्यते इत्याशंक्याह-

**लोकशास्त्राऽविरोधेन यद्योगो योग्यतां व्रजेत् ।**
**श्रद्धामात्रैकगम्यस्तु हन्त नेष्टो विपश्चिताम् ॥२२॥**

'लोकशास्त्रयो' र्लोकप्रतीत्यागमयोः अविरोधेनाऽविघटनेन, यद् यस्माद् 'योगो' वक्तुमुपक्रान्तो 'योग्यतां' फलं प्रति योग्यभावं तात्त्विकं 'व्रजेत्' । न ह्येकान्तेन नित्येऽनित्ये वाऽऽत्मनि योगो युज्यते, आत्मावस्थान्तरतया लोकशास्त्रयोः प्रतीयमानत्वात्तस्य। न च नित्यस्यावस्थान्तरप्रतिपत्तिरस्ति, तस्य सर्वदैकरूपत्वात्, अनित्यस्य च क्षणक्षयित्वेनेति । इति योगस्य गोचरादिशुद्धिरन्विष्यत इति । ननु गोचराद्यशुद्धावपि [४]कपिलादिभिर्योगो निरूप्यमाण उपलभ्यत इत्याशंक्याह-श्रद्धामात्रेण-पूर्वापरविमर्शविकलेन, अत एवैकेन-स्वदर्शनपक्षपातरूपेण, गम्यते-निश्चीयते यः स तथा तुर्विशेषणे 'हन्त'

---

१. स्वभाव्य-A; २. तं-A; ३. एवमेवोक्तनीत्यैव.-A.B.C.; ४. कापि-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति कोमलामन्त्रणे, नेष्टो-नाभिमतः, विपश्चितां-मतिमताम्, कषच्छेदतापशु-द्धवस्तुश्रद्धालुत्वात्तेषामिति ॥२२॥ [1]तथा –

**वचनादस्य संसिद्धिरेतदप्येवमेव हि ।**
**दृष्टेष्टाऽबाधितं तस्मादेतन्मृग्यं हितैषिणा ॥२३॥**

वचनाद्-आगमात् अस्य-योगस्य, संसिद्धिः- प्रतीतिर्जायते, न पुनरन्यथा, "*परलोकविधौ मानं वचनं*", इतिवचनप्रामाण्यात् । यदि नामैवं, [2]ततः किमित्याह 'एतदपि वचनं'-किं पुनर्योग इत्यपिशब्दार्थः । 'एवमेव हि' योगवदेव परिणामिन्येवात्मनि घटते, भाषकपरिणामान्तरसम्भवेन वचनप्रवृत्ते-रुपपद्यमानत्वात् । तत्तु वचनमनेकमिति हृदि व्यवस्थाप्याह-'दृष्टेष्टाभ्यां'-वक्ष्यमाणरूपाभ्यां, अबाधितं-अविरुद्धं, 'तस्मात्'- योगसिद्धिहेतुत्वात्, एतद्-वचनं 'मृग्यं'-गवेषणीयं, हितैषिणा-मनीषिणेति ॥२३॥ आह-किमर्थमीदृशं वचनं मृग्यते ? उच्यते -

**दृष्टबाधैव यत्रास्ति ततोऽदृष्टप्रवर्तनम् ।**
**असच्छ्रद्धाभिभूतानां केवलं [3]ध्यान्ध्यसूचकम् ॥२४॥**

'दृष्टेनैव'-प्रत्यक्षोपलब्धेनैव द्रव्य[4]रूपत्त्वावस्थितस्यात्मादेरर्थस्य परिणामेन किं पुनरन्यप्रमाणोपलब्धेनेत्येवकारार्थः, बाधा-विरोधः 'यत्र'-शास्त्रे प्रज्ञाप्यमानस्य नित्यत्वादेः, अस्ति-विद्यते ततः-शास्त्रात्, अदृष्टेऽर्थे-ऽदृष्टफलविषयत्वेन यम-नियमादावनुष्ठाने 'प्रवर्तनम्' असती-असुन्दरा या श्रद्धा-रुचिः भक्षितधत्तूराणामिवेष्टकाखण्डादौ सुवर्णश्रद्धा[5]समाना तयाऽ-भिभूतानां विह्वलीकृतानाम्, किमित्याह-'केवलं-' नापरं किंचित्, 'ध्यान्ध्य-सूचकं-' भ्रान्त्याविर्भावकम्, न ततः काचिदिष्टफलसिद्धिरिति भावः ॥२४॥

तर्हि कीदृशाद्वचनात्प्रवृत्तिर्ज्यायसीत्याह -

**प्रत्यक्षेणानुमानेन यदुक्तोऽर्थो न बाध्यते ।**
**दृष्टोऽदृष्टेऽपि युक्ता स्यात् प्रवृत्तिस्तत एव तु ॥२५॥**

---

१. तथा च-A; तथा वचनेत्यादि B.C; २. तथापि-A; ३. बाध्यसूचकम्-A; ४. रूपतयाव्य A; ५. समानतया-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'प्रत्यक्षेण'-चाक्षुषादिना 'अनुमानेन'-लिङ्गलिङ्गिसम्बन्धग्रहणोद्भवेन, 'यदुक्तो'-यत्र भणितोऽर्थ आत्मादिः, 'न बाध्यते'-न विरोधमानीयते । 'दृष्टः' स्वसंवेदनादिसिद्धः । 'अदृष्टेऽपि'-स्वर्गापवर्गादावर्थे 'किं पुनर्दृष्टे' इत्यपिशब्दार्थः 'युक्ता'-घटमाना, स्यात् प्रवृत्तिर्हानोपादानरूपा । 'तत एव तु'-तस्मादेव वचनात्, न पुनरन्यतोऽपि, व्यंसकवचनस्य महाऽनर्थहेतुत्वादिति ॥२५॥ अत्रैव विपक्षे बाधामाह-

**अतोऽन्यथाप्रवृत्तौ तु स्यात् साधुत्वाद्यनिश्चितम् ।**
**वस्तुतत्त्वस्य हन्तैवं सर्वमेवासमञ्जसम् ॥२६॥**

'अत' उक्तगुणाद्वचनाद् 'अन्यथा तु'-यतःकुतोऽपि वचनात् 'प्रवृत्तौ' पुनर्धर्मार्थिनः सत्याम् स्याद् -भवेत् 'साधुत्वादि'-साधुत्वमसाधुत्वं च 'अनिश्चित'मनिर्धारितम् । कस्येत्याह 'वस्तुतत्त्वस्य'-आत्मादिरूपस्य परिशुद्धवचनपूर्वकत्वाद्वस्तुतत्त्वनिश्चयस्य, तस्य च धर्मार्थिनो यदृच्छावचनपूर्वकतया प्रवृत्तत्वात् । एवमपि किमित्याह 'हन्त' इति पूर्ववत् 'एवं'वस्तुतत्त्वाऽनिश्चयेन प्रवृत्तौ, 'सर्वमेव' ऐहिकमामुष्मिकं च 'असमञ्जसं'-असङ्गतार्थं स्यात् । न हीहाऽनिश्चितव्यवहारतत्त्वा व्यवहारिणोऽपि किंचित्फलमवाप्नुवन्ति, किं त्वनर्थमेवेति ॥२६॥ तर्हि कथं वस्तुव्यवस्था स्याद्यत्पूर्वकं प्रवृत्तः पुमान्न फलेन वञ्च्येत इत्याह-

**तद्दृष्टाद्यनुसारेण वस्तुतत्त्वव्यपेक्षया ।**
**तथा तथोक्तिभेदेऽपि साध्वी तत्त्वव्यवस्थितिः ॥२७॥**

तत्-तस्माद् 'दृष्टस्य'-प्रत्यक्षोपलब्धस्य आदिशब्दात्तथाविधार्थान्यथानुपपत्तिवशेनानुमितस्य चात्मादेरर्थस्य अनुसारेणानुवर्त्तनेन 'यद्वस्तुतत्त्वं'- परिणामित्वादिर्वस्तुस्वभावः, तस्य 'व्यपेक्षा'-आश्रयणरूपा तथा, 'साध्वी तत्त्वव्यवस्थितिः' इत्युत्तरेण योगः । 'तथा तथा'-तेन तेन प्रकारेण प्रतिदर्शनं प्रज्ञापनामाश्रित्य, उक्तिभेदेऽपि ''पुरुषः क्षेत्रविज्ञानमित्यादि'' प्राग्निरूपितरूपे, अपिशब्दात्किं पुनस्तदभेदे 'साध्वी'-अविरुद्धा, 'तत्त्वव्यवस्थितिः' जीवादितत्त्वव्यवस्थारूपा ॥२७॥ कुत एतदेवमित्याह—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अमुख्यविषयो यः स्यादुक्तिभेदः स बाधकः ।**
**हिंसाहिंसादिवद्यद्वा तत्त्वभेदव्यपाश्रयः ॥२८॥**

'अमुख्यविषयो'ऽपरमार्थगोचरो, 'यः स्याद्'-भवेद्, 'उक्तिभेदः-' शब्दप्रवृत्तिवैसदृश्यलक्षणः, 'स बाधको'-विरुद्ध :। दृष्टान्तमाह-'हिंसाहिंसादिवद्'- नित्यरूपेऽनित्यरूपे वैकान्तेनात्मनि हिंसावदहिंसावच्च, 'यद्वा'- अथवा तत्त्वभेदो-"द्रव्यगुणादिषट्तत्त्वरूपः," "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान्, महतोऽहङ्कार" इत्यादि पञ्चविंशतितत्त्वलक्षणो वा । स 'व्यपाश्रयोऽपेक्षणीयो यस्योक्ति[1]भेदस्य तथा, यथा इति गम्यते ॥२८॥ एतदेव व्यतिरेकत आह—

**मुख्ये तु तत्र नैवासौ, बाधकः स्याद्विपश्चिताम् ।**
**हिंसादिविरतावर्थे यमव्रतगतो यथा ॥२९॥**

'मुख्ये तु'-परिणामित्वादिधर्मभाज्यनुपचरिते पुनः 'तत्र' तत्त्व आत्मादौ 'नैवासौ' उक्तिभेदो 'बाधको'-विघटमानः, स्याद्विपश्चितां-मतिमताम् । दृष्टान्तमाह-हिंसादिविरतौ-हिंसानृतस्तेयादिविरमणरूपे अर्थे-पदार्थे 'यमव्रतगतः' यमगतः सांख्यानां व्रतगतो जैनानां संज्ञाभेदः, यथा इति दृष्टान्तार्थः ॥२९॥

इत्थं [2]योगगोचरादिकमभिधाय साम्प्रतं प्रस्तुतमुप[3]क्रम्यते—

**मुख्यतत्त्वानुवेधेन स्पष्टलिङ्गान्वितस्ततः ।**
**युक्त्यागमानुसारेण योगमार्गोऽभिधीयते ॥३०॥**

मुख्यतत्त्वस्याऽऽत्मादेरनुपचरितस्य, अनुवेधनाऽनुगमेन, स्पष्टलिङ्गान्वितः - स्फुटलक्षणोपेतः, ततो-यत एवमनेकधा योगो वचनभेदात् ततः कारणाद्, युक्त्यागमानुसारेण-अनुमानाप्तवचनानुववर्तनेन, योगमार्गो-योग एव निर्वाणपुरप्रापकतया मार्गो योगमार्गः, अभिधीयते-निरूप्यते, स्पष्टलिङ्गानि चात्रैव वक्ष्यमाणानि। यथा *"किं चान्यद् योगतः स्थैर्यं, धैर्यं श्रद्धा च जायते । मैत्री जनप्रियत्वं च, प्रातिभं तत्त्वभासनम् ॥१॥"* (श्लोक.५२) इत्यादि ॥३०॥ योगमार्गमेव [4]भेदतोऽभिव्यनक्ति—

१. भेदस्य स तथा-A; २. योगस्य गोचरादि-A.B.C.; ३. क्रमते-A; ४. भेदेनाऽ-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अध्यात्मं भावना ध्यानं समता वृत्तिसंक्षयः ।**
**मोक्षेण योजनाद्योग एष श्रेष्ठो यथोत्तरम् ॥३१॥**

१-अध्यात्मं २-भावना ३-ध्यानं ४-समता ५-वृत्तिसंक्षयः । किमित्याह 'मोक्षेण' सह 'योजनात्'-संयोगकरणात् 'योग एष' उक्तभेदः 'श्रेष्ठो' भावरूपतया निरुपचरितः, 'यथोत्तरं'-यो यस्योत्तर इति ॥३१॥ तथा—

**तात्त्विकोऽतात्त्विकश्चायं सानुबन्धस्तथापरः ।**
**सास्रवोऽनास्रवश्चेति संज्ञाभेदेन कीर्तितः ॥३२॥**

'तात्त्विकः'-परमार्थभवः 'अतात्त्विकश्च' तदितरः अयं-योगः, सानुबन्धो-ऽनुबन्धवान् 'तथा' इति समुच्चये, 'अपरो'-निरनुबन्धः तथा 'सास्रवो'-दीर्घसंसारफलकर्मबन्धयुक्तः 'अनास्रवश्च' तदितरः, 'इति'- एवम् 'संज्ञाभेदेन' नामान्तररूपेण 'कीर्तितो'-निरूपितो योगशास्त्रकारैरेष योग इति ॥३२॥ अथैनमेव तात्त्विकादिभेदं व्याचष्टे—

**तात्त्विको भूत एव स्यादन्यो लोकव्यपेक्षया ।**
**अच्छिन्नः सानुबन्धस्तु छेदवानपरो मतः ॥३३॥**

'तात्त्विको भूत एव' निर्वाणैकाभिलाषितया सद्भूत एव यः सः, 'स्याद् अन्यो' ऽतात्त्विकः स यो 'लोकव्यपेक्षया' लोकचित्ताराधनरूपतया, तथा 'अच्छिन्नः' आमुक्तिप्राप्तेरत्रुटितो यः सः 'सानुबन्धस्तु' पुनः, तथा 'छेदवान्'-छिन्नसन्तानो योगः 'अपरो'ऽसानुबन्धो मतो-मतिमतामिति ॥३३॥

**सास्रवो दीर्घसंसारस्ततोऽन्योऽनास्रवः परः ।**
**अवस्थाभेदविषयाः संज्ञा एता यथोदिताः ॥३४॥**

'सास्रवो' योग क इत्याह 'दीर्घो' भूयान्संसारो यत्र स दीर्घसंसारः, ततः सास्रवादन्यो विलक्षणोऽनास्रवो योगः 'परः' प्रकृष्टः । 'अवस्थाभेदविषयाः' अवस्थाभेदो विषयो गोचरो यासां तास्तथा 'संज्ञा' नामानि 'एता' अनन्तरनिरूपिताः 'यथोदिता'-यथार्थाः ॥३४॥

अथ तद्योगभेदगतमेव किंचिदाह—

**स्वरूपं सम्भवं चैव वक्ष्याम्यूर्ध्वमनुक्रमात् ।**
**अमीषां योगभेदानां सम्यक्शास्त्रानुसारतः ॥३५॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'स्वरूपं'-स्वलक्षणं तथा 'सम्भवं चैवो'त्पत्तिमेव च 'वक्ष्यामि'-भणिष्यामि 'ऊर्ध्वम्'-उपरि 'अनुक्रमात्'- परिपाट्या ।'अमीषाम्' अध्यात्मादीनां एकादशानां योगभेदानाम्, कथमित्याह 'सम्यक्शास्त्रं'-जिनागमरूपं तस्याऽनुसारतो-ऽनुसारेण ॥३५॥

**इदानीं तु समासेन योगमाहात्म्यमुच्यते ।**
**पूर्वसेवाक्रमश्चैव, प्रवृत्त्यङ्गतया सताम् ॥३६॥**

'इदानीं तु' सांप्रतं पुनः समासेन-संक्षेपेण योगमाहात्म्यं-योगसामर्थ्यलक्षणम् उच्यते-निरूप्यते । तथा 'पूर्वसेवाया'-योगस्यैव प्रथमभूमिकारूपाया गुरुदेवादिपूजादिलक्षणायाः 'क्रमश्चैव'-परिपाटिश्चोच्यते । कथमित्याह 'प्रवृत्त्यङ्गतया'-योगप्रवृत्तिहेतुत्वेन 'सतां'-प्रेक्षावतामिति ॥३६॥

यथोद्देशं निर्देशाद्योगमाहात्म्यमेवाह—

**योगः कल्पतरुः श्रेष्ठो योगश्चिन्तामणिः परः ।**
**योगः प्रधानं धर्माणां योगः सिद्धेः स्वयंग्रहः ॥३७॥**

'योग' उक्तनिरुक्तः 'कल्पतरुः'-कल्पद्रुमः 'श्रेष्ठो'ऽन्यकल्पद्रुमेभ्योऽतिशायी । तथा योगश्चिन्तामणिः- चिन्तारत्नं 'परः' प्रकृष्टः । 'योगः प्रधानं' वस्तु 'धर्माणां'-शेषधर्मस्थानानाम् । तथा 'योगः सिद्धेर्निर्वृतिलक्षणायाः स्वयंग्रहहेतुत्वात्-स्वयंग्रहः । यदत्र पुनः पुनर्योगशब्दोपादानं, तदस्यात्यन्तमादरणीयताख्यापनार्थमिति ॥३७॥

**तथा च जन्मबीजाग्निर्जरसोऽपि जरा परा ।**
**दुःखानां राजयक्ष्माऽयं मृत्योर्मृत्युरुदाहृतः ॥३८॥**

'तथा च' इति समुच्चये, 'जन्मबीजाग्निः' पुनःपुनर्जन्मकारणकर्मशक्तिदाहकारी । तथा 'जरसोऽपि'-जराया अपि 'जरा'-वयोहानिकारणत्वात् 'परा' प्रकृष्टा । तथा 'दुःखानां'-शारीरमानसबाधारूपाणां 'राजयक्ष्मा'-राजमान्द्यमिव 'अयं' योगः । तथा 'मृत्यो':-अन्तकस्य 'मृत्युरुदाहृतः' शास्त्रकारैर्निरूपितः ॥३८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**कुण्ठीभवन्ति तीक्ष्णानि मन्मथास्त्राणि सर्वथा ।**
**योगवर्मावृते चित्ते तपश्छिद्रकराण्यपि ॥३९॥**

'कुण्ठीभवन्ति'-मन्दानि जायन्ते 'तीक्ष्णानि'-निशितानि 'मन्मथास्त्राणि' शब्दादिविषयरूपाणि 'सर्वथा'-सर्वप्रकारैः । क्वेत्याह 'योगवर्मावृते'-योगसन्नाहवति 'चित्ते'-मनसि, कीदृशानीत्याह - तपश्छिद्रकराण्यपि मासक्षपणादितपोभ्रंशकारीण्यपि तथाविधयोगविकलानां तपस्विनामिति ॥३९॥

**अक्षरद्वयमप्येतत् श्रूयमाणं विधानतः ।**
**गीतं पापक्षयायोच्चैर्योगसिद्धैर्महात्मभिः ॥४०॥**

'अक्षरद्वयमपि' किं पुनः पञ्चनमस्कारादीन्यक्षराणीत्यपिशब्दार्थः । 'एतत्' 'योग' इति शब्दलक्षणं 'श्रूयमाणम्' आकर्ण्यमानम् तथाविधार्थानवबोधेऽपि । 'विधानतो'-विधानेन श्रद्धासंवेगादिशुद्धभावोल्लासकरकुड्मलयोजनादिलक्षणेन । 'गीतम्'-उक्तं 'पापक्षयाय'-मिथ्यात्वमोहाद्यकुशलकर्मनिर्मूलनाय 'उच्चैः'-अत्यर्थम्। कैर्गीतमित्याह 'योगसिद्धैः'-योगः सिद्धो निष्पन्नो येषां ते तथा, तैर्जिनगणधरादिभिः 'महात्मभिः'-प्रशस्तस्वभावैरिति ॥४०॥ तथा—

**मलिनस्य यथा हेम्नो वह्नेः शुद्धिर्नियोगतः ।**
**योगाग्नेश्चेतसस्तद्वदविद्यामलिनात्मनः ॥४१॥**

'मलिनस्य'-ताम्रादिमलबहुलस्य 'यथा' इति दृष्टान्तार्थः' 'हेम्नः'-सुवर्णस्य 'वह्नेः'-वैश्वानरात् 'शुद्धिः'-निर्मलता नियोगतो-नियोगे(यमे)न, शुद्धिकारणानां स्वकार्याव्यभिचारात्, 'योगाग्ने':-योगवह्नेः 'चेतसो'-मनसः शुद्धिः 'तद्वद्' हेमवद् कीदृशो मनस इत्याह 'अविद्यामलिनात्मनः'-सद्भूतवस्तुविषयभ्रान्तिवशाऽशुद्धीभूतस्वरूपस्येति ॥४१॥ तथा-

**अमुत्र संशयापन्नचेतसोऽपि ह्यतो ध्रुवम् ।**
**सत्स्वप्नप्रत्ययादिभ्यः, संशयो विनिवर्तते ॥४२॥**

'अमुत्र'-परलोकविषये 'संशयापन्नचेतसोऽपि हि'-भवान्तरं समस्ति न वेति भ्रान्तमनसः, किं पुनरन्यस्येत्यपिहीतिशब्दार्थः । 'अतो'-योगात्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'ध्रुवम्'–असंशयम् 'सत्स्वप्नप्रत्ययादिभ्यः'–सत्स्वप्नवन्निद्रायमाणावस्थायां स्वर्गादिभवान्तरदर्शनलक्षणाद्यः 'प्रत्ययः'–प्रतीतिर्भवान्तरस्य, आदिशब्दान्निजोहापोहतथाविधागमाभ्यासजन्यप्रत्ययग्रहस्तेभ्यः सकाशात् 'संशयः'–संदेहो 'विनिवर्तते'–उपरमति । 'शुद्धसमाचारा हि साधवः सत्स्वप्नलाभेन निजोहापोहयोगेन सदागमाभ्यासेन च प्राक् संशयितमनसोऽपि व्यावर्तितविपर्यासहेतुमिथ्यात्वादिमोहोदया अभ्रकगृहान्तर्ज्वलितप्रदीपप्रभोदाहरणेन भवान्तरं निर्णयन्त्येवेति' ॥४२॥ न च वक्तव्यं 'स्वप्नोऽपि कथं लभ्यते' इति यतः—

**श्रद्धा[1]लेशान्नियोगेन बाह्ययोगवतोऽपि हि ।**
**शुक्लस्वप्ना भवन्तीष्टदेवतादर्शनादयः ॥४३॥**

'श्रद्धा[2]लेशाद्'–बहुमानांशाद् 'नियोगेन'–नियमेन 'बाह्ययोगवतोऽपि हि'–तथाविधोपयोगशून्यतया भावयोगानुरूपक्रियामात्रयुक्तस्य, किंपुनरबाह्ययोगवत इत्यपिहीतिशब्दार्थः । किमित्याह 'शुक्लस्वप्नाः'–अमलीमसाः स्वप्नाः भवन्ति–जायन्ते 'इष्टदेवतादर्शनादयः'–दिवसारब्धाराधनजिनगुरुधार्मिकदर्शनादिलक्षणाः ॥४३॥ [3]तथा—

**देवान् गुरून् द्विजान् साधून् सत्कर्मस्था हि योगिनः ।**
**प्रायः स्वप्ने प्रपश्यन्ति हृष्टान् सन्नोदनापरान् ॥४४॥**

'देवान्'–आराध्यतमान् जिनादीन्, 'गुरून्'–धर्माचार्यादीन् मातापित्रादीन्वा 'द्विजान्'–लब्धदीक्षानामकद्वितीयजन्मनो मुनीन् 'साधून्'–शेषशिष्टलोकान् 'सत्कर्मस्थाः' स्वसिद्धान्ताऽविरुद्धक्रियास्थिता [4]हि–प्राग्वत् 'योगिनो'–योगाभ्यासपराः प्राणिनः किमित्याह 'प्रायः'–बाहुल्येन 'स्वप्ने'–प्रतीतरूप एव 'प्रपश्यन्ति'–प्रेक्षन्ते 'हृष्टान्'–हर्षवतः, तथा 'सन्नोदनापरान्' शुद्धार्थविषय[5]प्रेरणपरायणान् ॥४४॥ न चासौ भ्रान्तेति भावयन्नाह—

---

१. लेश्या–A; २. लेश्याद्–A; ३. तथा देवानित्यादि–B.C; ४. हिः–A.B.C.; ५. प्रेरणापरान्–A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**नोदनापि च सा [1]यतो यथार्थैवोपजायते ।**
**तथाकालादिभेदेन, हन्त नोपप्लवस्ततः ॥४५॥**

[2]'नोदनापि च' न केवलं देवतादर्शनादि 'सा' देवादिकृता [3]यतो यस्मात्कारणाद् 'यथार्थैव'-सूचितप्रयोजनफलैव उपजायते । कथमित्याह 'तथाकालादिभेदेन'-तत्प्रकारकालक्षेत्रभावविशेषेण । 'हन्त' इति प्राग्वत् । 'न'-नैव 'उपप्लवः'-वातादिधातुविकारजनितश्चित्तसंक्षोभो वर्तते प्रेरणा, 'ततः'-यथार्थत्वाद्धेतोः, न हि यथार्थफलभाजः अविसंवादिरूपत्वाल्लोक उपप्लवरूपतां लभन्ते, किं तु सत्यरूपतामेवेति ॥४५॥ तथा—

**स्वप्नमन्त्रप्रयोगाच्च सत्यः स्वप्नोऽभिजायते ।**
**विद्वज्जनेऽविगानेन सुप्रसिद्धमिदं तथा ॥४६॥**

'स्वप्नमन्त्रप्रयोगाच्च'-स्वप्नमन्त्रः स्वप्नलाभफलो मन्त्रविशेषः तत्प्रयोगाच्चकाराच्छुद्धयोगाच्च 'सत्यः स्वप्नो'-यथार्थस्वप्नः 'अभिजायते'-आविर्भवति । एतदेव दृढीकुर्वन्नाह 'विद्वज्जने'-मतिमल्लोके 'अविगानेन'-अविप्रतिपत्त्या 'सुप्रसिद्धं'-अतीव ख्यातिमागतं 'इदं'-स्वप्नमन्त्रप्रयोगात्सत्यः स्वप्नो जायत इत्येतत् 'तथा'-तेन प्रकारेण ॥४६॥

न च भूतहेतुकोऽयं व्यवहार इति दर्शयति-

**न ह्येतद् भूतमात्रत्वनिमित्तं सङ्गतं वचः ।**
**अयोगिनः समध्यक्षं यन्नैवंविधगोचरम् ॥४७॥**

'न हि'-नैव, एतदुक्तरूपं देवतादर्शनादि 'भूतमात्रत्वनिमित्तं'-भूतमात्रत्वं - केवलभूतभाव एव निमितं हेतुर्यस्य तत्तथा इत्येवं परेण प्रवर्तमानं 'सङ्गतं'-घटमानकं 'वचो'-वचनम्, 'एतत्स्वप्नदर्शनादि यत्कैश्चिद् भूतमात्रनिमित्तमित्युच्यते तदसङ्गतं वच' इत्यर्थः । कुत इत्याह 'अयोगिनः'-अर्वाग्दर्शिनः प्रमातुः 'समध्यक्षं'-प्रत्यक्षं चाक्षुषादि 'यत्'-यस्मात् न नैव 'एवंविधगोचरं'-एवंविधः स्वप्नदर्शनादिरतीन्द्रियोऽर्थो भूतमात्रनिमित्तो न तु

---

१. यस्माद्-A.B.C.; २. चोदना-A.B; ३. यतो-A.B.C. प्रतिषु नास्ति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

देवतानुग्रहमन्त्रप्रयोगादिनिमित्तक इत्यादिकोऽर्थो गोचरो विषयो यत्र तत्तथा । इदमुक्तं भवति–छद्मस्थस्य पृथिव्यादिरूपभूतमात्रपरिहारेणातीन्द्रिये देवतादावर्थे विधिप्रतिषेधयोः प्रत्यक्षमक्षममेव, तस्य तदविषयत्वादिति ॥४७॥ एतदेव भावयति–

**प्रलापमात्रं च वचो यदप्रत्यक्षपूर्वकम् ।**
**यथेहाप्सरसः स्वर्गे मोक्षे चानन्द उत्तमः ॥४८॥**

प्रलापमात्रम्–अनर्थकमेव 'चः' समुच्चये 'वचो'–वचनम् । कीदृशमित्याह–'यदप्रत्यक्षपूर्वकं'–प्रत्यक्षेणानुपलभ्य यद्भाषितम्, दृष्टान्तमाह–यथेह मर्त्यलोके कश्चिद्वक्त्यसर्वज्ञवादी मीमांसकादिः, अप्सरसः–मेनका–रम्भाद्याः 'स्वर्गे' सन्ति 'मोक्षे च'–मुक्तौ पुनः 'आनन्दः'–आह्लाद 'उत्तमः'–सर्वातिशायी,साक्षाददृष्टे हि वाच्य अप्सरःप्रमुखे ब्रुवाणो मीमांसकादिः प्रलापमात्रकार्येव स्यात् । एवं नास्तिकोऽप्यतीन्द्रियं देवतादिकं निह्नुवान इति ॥४८॥

अथैवमनवकाशीकृतः कदाचित्परलोकसंशयवादी मीमांसको वा ब्रूयाद्यथा—

**योगिनो यत्समध्यक्षं ततश्चेदुक्तनिश्चयः ।**
**आत्मादेरपि युक्तोऽयं तत एवेति चिन्त्यताम् ॥४९॥**

'योगिनो'–दिव्यदृशः प्रमातुः, 'यत्समध्यक्षं–'प्रत्यक्षज्ञानं ततस्तत्समध्यक्षात् 'चेद्'–यदि उक्तनिश्चयोऽप्सरसः स्वर्गे, मोक्षे चानन्द इति प्रागुक्तार्थनिर्णयो जायते । एवं तर्हि 'आत्मादेरपि' अतीन्द्रियार्थस्य किं पुनः प्रस्तुतस्येत्यपि शब्दार्थः । युक्तो घटमानोऽयं निश्चयः 'तत एव' योगिसमध्यक्षादेव 'इति' एतद् 'चिन्त्यतां'– विमृश्यतामिति ॥४९॥ एतदेव भावयति—

**अयोगिनो हि प्रत्यक्षगोचरातीतमप्यलम् ।**
**विजानात्येतदेवं च, बाधाऽत्रापि न विद्यते ॥५०॥**

'अयोगिनो'ऽर्वाग्दृशः प्रमातुः 'हि'–यस्मात् 'प्रत्यक्षगोचरातीतमपि'

---

१. प्रत्यक्षं–A.B.;


Jain Education International For Personal & Private Use Only www.jainelibrary.org

ऐन्द्रियकाध्यक्षविषयभावातिक्रान्तमप्यात्मादिवस्तु किं पुनरितररूपमित्यपि-शब्दार्थः, 'अलम्'-अत्यर्थं हस्ततलन्यस्तनिस्तलस्थूलमुक्ताफलाव लोकनोदा-हरणेन 'विजानाति'-प्रेक्षते, एतद् - योगिसमध्यक्षं, दिव्यदर्श- नत्वात्तस्य । यदि नामैवं ततः किं सिद्धमित्याह 'एवं च'-अस्मिंश्च प्रकारे सति, 'बाधा'-अघटनालक्षणा 'अत्रापि'-आत्मादिनिश्चये न केवलमप्सरःप्रभृतावर्थ इत्यपि-शब्दार्थः 'न विद्यते'- नास्ति ॥५०॥

इत्थमागमगम्यत्वमभिधायाऽधुनानुमानविषयत्वमाह—

**आत्माद्यतीन्द्रियं वस्तु, योगिप्रत्यक्षभावतः ।**
**परोक्षमपि चान्येषां, न हि युक्त्या न युज्यते ॥५१॥**

'आत्मादि'-आत्मकर्मसर्वज्ञादि 'अतीन्द्रियम्'-इन्द्रियविषयभावातीतं वस्तु, 'न हि न युज्यते' इत्युत्तरेण योगः । कीदृशमित्याह 'योगिप्रत्यक्षभावतः'-सर्वज्ञज्ञानविषयभावेन 'परोक्षमपि च' इन्द्रियज्ञानाऽगोचरमपि किं पुनरपरोक्ष-मित्यपि[1]शब्दार्थः, 'अन्येषां'- अस्मादृशामर्वाग्दृशाम्, 'न हि'-नैव 'युक्त्या'-शुद्धहेतुप्रयोगरूपया 'न युज्यते' किं तु युज्यत एव । तत्र युक्तिः—

*"अचेतनानि भूतानि, न तद्धर्मो न तत्फलम् ॥*
*चेतनास्ति च यस्येयं, स एवात्मेति बुध्यताम् ॥३१॥*
*यदीयं भूतधर्मः स्यात्प्रत्येकं तेषु सर्वदा ॥*
*उपलभ्येत सत्त्वादि-कठिनत्वादयो यथा ॥३२॥*
*काठिन्यादिस्वभावानि, भूतान्यध्यक्षसिद्धितः ॥*
*चेतना तु न तद्रूपा, सा कथं तत्फलं भवेत् ॥३३॥"* [शा०वा०स०]

इत्यादि ॥

*"तुल्यप्रतापोद्यमसाहसानां केचिल्लभन्ते निजकार्यसिद्धिम् ॥*
*परे न तामत्र निगद्यतां [2]मे कर्मास्ति हित्वा यदि कोऽपि हेतुः ॥१॥*
*विचित्रदेहाकृति-वर्ण-गन्ध-प्रभाव-जातिप्रभवस्वभावाः ।*
*केन क्रियन्ते भुवनेऽङ्गिवर्गाश्चिरन्तनं कर्म निरस्य चित्राः ॥२॥*

---

१ त्यपिच-A.B.C.; २. भो-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

*विवर्ध्य मासान्नव गर्भमध्ये, बहुप्रकारैः कललादिभावैः ।*
*उद्वर्त्य निष्कासयते सवित्र्याः को गर्भतः कर्म विहाय पूर्वम् ॥३॥"*
इत्यादि॥

*"वीतरागोऽस्ति सर्वज्ञः, प्रमाणाऽबाधितत्वतः ।*
*सर्वदा विदितः सद्भिः सुखादिकमिव ध्रुवम् ॥१॥*
*क्षीयते सर्वथा रागः, क्वापि कारणहानितः ।*
*ज्वलनो हीयते किं न, काष्ठादीनां वियोगतः ॥२॥*
*प्रकर्षस्य प्रतिष्ठानं, ज्ञानं क्वापि [1]प्रपठ्यते ।*
*परिमाणमिवाकाशे, तारतम्योपलब्धितः ॥३॥* इत्यादि ॥५१॥

अत्रैवाभ्युच्चयमाह–

**किं चान्यद्योगतः स्थैर्यं धैर्यं श्रद्धा च जायते ।**
**मैत्री जनप्रियत्वं च, प्रातिभं तत्त्वभासनम् ॥५२॥**

'किं च' इत्यभ्युच्चये अन्यत्–प्रागुक्ताद्विलक्षणं योगफलमस्ति, तदेव दर्शयति 'योगतो'–योगात् 'स्थैर्यं'–स्थिरभावः प्रतिपन्ननिर्वाहणे, 'धैर्यं'–व्यसनाशनिसन्निपातेऽप्यविचलितप्रकृतिभावः 'श्रद्धा च' रुचिस्तत्त्वमार्गानुगा 'जायते'–आविर्भवति । 'मैत्री'–सर्वसत्त्वेषु मित्रभावः 'जनप्रियत्वं च'–शिष्टलोकवल्लभभावः 'प्रातिभं'–सहजप्रतिभाप्रभवम् 'तत्त्वभासनं'जीवादितत्त्वावलोकनं भवतीति ॥५२॥ तथा—

**विनिवृत्ताऽऽग्रहत्वं च, तथा द्वन्द्वसहिष्णुता ।**
**तदभावश्च लाभश्च, बाह्यानां कालसङ्गतः ॥५३॥**

'विनिवृत्ताग्रहत्वं च'–निर्मुक्तानुचितार्थाभिनिवेशित्वं च, 'तथा द्वन्द्वसहिष्णुता' निरुपक्रमक्लिष्टकर्मोदयापादितानामिष्टवियोगानिष्टसम्प्रयोगादीनां व्यसनानां सम्यक्सहनभावः, 'तदभावश्च'–द्वन्द्वविनाशश्च, प्रायः परिशुद्धयोगोपहतशक्तिकत्वात् द्वन्द्वसम्पादकापायानाम्, 'लाभश्च'–प्राप्तिश्च 'बाह्यानां'–निर्वाहादीनां समाधिहेतूनाम् 'कालसङ्गतो'–यो यत्र काले योग्य इति ॥५३॥

---

१. प्रपद्यते-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तथा–

**धृतिः क्षमा सदाचारो, योगवृद्धिः शुभोदया ।**
**आदेयता गुरुत्वं च, शमसौख्यमनुत्तरम् ॥५४॥**

(त्रिभिर्विशेषकम्)

धृतिर्येनकेनचिद्ग्रसनभोजनादिना निर्वाहमात्रनिमित्तेन सन्तोषः, 'क्षमा'–सत्येतरदोषश्रवणेन कार्यतत्त्वमविचार्यान्तर्बहिश्च कोपोदयाद्विक्रियामापद्यमान–स्यात्मनो निरोधनम्, 'सदाचारः'–सर्वोपकारप्रियवचनाकृत्रिमोचितस्नेहादिका सज्जनचेष्टा । 'योगवृद्धिः'–सम्यग्दर्शनादिमुक्तिबीजोत्कर्षरूपा 'शुभोदया'–प्रशस्तफलोद्गमहेतुः, ¹धृत्यादेः प्रत्येकविशेषणमेतत् । 'आदेयता'–परैरादरणीयवचनचेष्टन²रूपा । 'गुरुत्वं च'–सर्वत्र गौरवलाभलक्षणम्। तथा 'शमसौख्यम्'–अतिमन्दीभूतकषायविषदोषतया प्रशमशर्म 'अनुत्तरं'–विषयसेवाजनितानन्दातिशायि । यतः पठ्यते (प्रशमरतौ –२३८)–*'निर्जितमदमदनानां, वाक्कायमनोविकाररहितानाम् ॥ विनिवृत्तपराशानामिहैव मोक्षः सुविहितानाम् ॥२३८॥'* इति । अत्र च श्लोकत्रये चकारास्तथाशब्दश्च समुच्चयार्थाः ॥५४॥

**आविद्वदङ्गनासिद्धमिदानीमपि दृश्यते ।**
**एतत्प्रायस्तदन्यत्तु, सुबह्वागमभाषितम् ॥५५॥**

'आविद्वदङ्गनासिद्धम्'–आविद्वद्भ्य आअङ्गनाभ्यश्च यो लोकस्तस्येत्यर्थः, 'सिद्धं'–प्रतीतम् 'इदानीमपि'–दुःषमायां किं पुनः सुषमदुःषमादावित्यपिशब्दार्थः, 'दृश्यते'ऽवलोक्यते 'एतत्'–प्रागुक्तं योगफलम् 'प्रायो'–बाहुल्येन, 'तदन्यत्तु'–उक्तादन्यत्पुनर्योगफलम् 'सुबहु'–अतिभूरि आमर्षौषध्यादिकर्द्धिप्राप्तिरूपम् 'आगमभाषितम्'–आवश्यकनिर्युक्त्यादिनिरूपितम् ॥ यदुक्तं तत्र–

*'आमोसहिविप्पोसहि–खेलोसहिजल्लमोसही चेव' ।*
*संभिन्नसोयउज्जुमई, सव्वोसही चेव बोधव्वा ॥१॥*
*चारणआसीविसकेवली य, मणणाणिणो य पुव्वधरा ।*

---

१. धृत्यादिप्रत्ये-A.B.C.; २. रूपता-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

*अरहन्तचक्कवट्टी बलदेवा वासुदेवा य ॥२॥ (आव. नि. ६९-७०)*
*तथा*-अलौल्यमारोग्यमनिष्ठुरत्वं, गन्धः शुभो मूत्रपुरीषमल्पम् ॥*
*कान्तिः प्रसादः स्वरसौम्यता च, योगप्रवृत्तेः प्रथमं हि लिङ्गम् ॥1॥*
*मैत्र्यादियुक्तं विषयेष्वचेतः, प्रभाववद्धैर्यसमन्वितं च ।*
*द्वन्द्वैरधृष्यत्वमभीष्टलाभो, जनप्रियत्वं च तथा परं स्यात् ॥2॥*
*दोषव्यपायः परमा च तृप्तिरौचित्ययोगः समता च गुर्वी ॥*
*वैरादिनाशोऽथ ऋतम्भराधीर्निष्पन्नयोगस्य तु चिह्नमेतत् ॥3॥ ॥५५॥*

अथोक्तादेव योगफलात्तत्त्वान्तरप्रसिद्ध्यर्थमाह-

**न चैतद् भूतसङ्घातमात्रादेवोपपद्यते ।**
**तदन्यभेदकाभावे, तद्वैचित्र्याऽप्रसिद्धितः ॥५६॥**

'न च'-नैव 'एतद्'-योगमाहात्म्यं भावयोगिषूपलभ्यमानम् 'भूतसङ्घातमात्रादेव'-पृथ्व्यादिमहाभूतसङ्घातात् केवलादात्मादिरूपतत्त्वान्तरशून्याद् 'उपपद्यते'-घटते । कुत इत्याह 'तदन्यभेदकाभावे'-तस्माद्भूतसङ्घाताद्यदन्यत्तत्त्वन्तरमात्मादिलक्षणं भेदकं विशेषकारि तस्याभावे 'तद्वैचित्र्याऽप्रसिद्धितः' तेषां भूतसङ्घातानां कायाकारपरिणतानामपि वैचित्र्यस्य नानात्वस्य योगमाहात्म्ययुक्तत्वेतरलक्षणस्याऽप्रसिद्धेरघटनात्, अतो बलादनुमिमीमहे भूतसङ्घातातिरिक्तं विचित्रशक्तिसङ्गतं तत्त्वान्तरं समस्ति यद्वशादयं योगमाहात्म्यभावाभावलक्षणो भेदः सम्पद्यते ॥५६॥

अथ योगमाहात्म्यादेव प्रकारान्तरेण परलोकसिद्धिमाह-

**ब्रह्मचर्येण तपसा, सद्वेदाध्ययनेन च ।**
**विद्यामन्त्रविशेषेण, सत्तीर्थासेवनेन च ॥५७॥**
**पित्रोः सम्यगुपस्थानाद्, ग्लानभैषज्यदानतः ।**
**देवादिशोधनाच्चैव, भवेज्जातिस्मरः पुमान् ॥५८॥ (युग्मम्)**

'ब्रह्मचर्येण'-भावतो बस्तिनिरोधरूपेण, 'तपसा'-उपवासादिना 'सद्वेदाध्ययनेन च', सता-सुन्दरेणात्मानुग्रहादिपरिणामयुक्ततया, वेदस्य-

---

* एतास्तिस्रो गाथाः योगदृष्टिसमुच्चयेऽपि श्लोक १६१ वृत्तौ सन्ति.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सद्भूतार्थागमस्याध्ययनेन वाचनापृच्छनादिस्वभावेन । चः समुच्चये । 'विद्यामन्त्रविशेषेण' –ससाधना स्त्रीस्वामिका वा विद्या, मन्त्रश्च तदितररूपः, ततो मन्त्रव्याकरणप्रसिद्धयोर्विद्यामन्त्रयोर्विशेषेण भेदेन 'सत्तीर्थासेवनेन च' सतः सातिशयस्य व्यसनसलिलनिधिनिस्तारणोपायस्य स्थावरजङ्गम-भेदभिन्नस्य तीर्थस्यासेवनेन पर्युपासनेन । चः प्राग्वत् ॥५७॥ तथा–

'पित्रोः-'जननीजनकयोः 'सम्यग्'-यथावद्, 'उपस्थानात्'-त्रिसन्ध्य-प्रणामादिविनयरूपात्, *'पूजनं चास्य विज्ञेयं त्रिसन्ध्यं नमनक्रिया'* (श्लो-१११) इत्यादिवक्ष्यमाणात्, 'ग्लानभैषज्यदानतो'-ग्लानानां-ज्वरादिरोगो-पहतशरीरशक्तीनां भैषज्यस्य-औषधस्य दानतो-वितरणात्, 'देवादिशो-धनाच्चैव'-देवदेवस्थानपुस्तकसाधूपाश्रयादेर्धर्मकार्योपयोगिनः शोधनात्तथा-विधमलापनयनेन निर्मलीकरणाद्, 'भवेत्'-जायेत 'जातिस्मरो'ऽनुभूत-भवस्मर्ता 'पुमान्' प्राणी, ब्रह्मचर्यादीनां योगविशेषाणां ज्ञानावरणह्रासान्त-रङ्गकारणत्वात् ॥५८॥ अत्रैव प्रसङ्गसिद्धिमाह–

**अत एव न सर्वेषामेतदागमनेऽपि हि।**
**परलोकाद्यथैकस्मात्स्थानात्तनुभृतामिति ॥५९॥**

'अत एव'-ब्रह्मचर्यादेर्जातिस्मरणहेतुत्वादेव, न-नैव, सर्वेषां-देहिनाम् । एतद्-जातिस्मरणम्, 'आगमनेऽपि हि'-आगतावपि किं पुनर्लोकायतमतेन तदभाव इत्यपिहिशब्दार्थः । 'परलोकात्' परभवात् 'यथा'-इति दृष्टान्तार्थे, एकस्मात्स्थानात्पाटलिपुत्रकादेरागमनेऽपि 'तनुभृतां'-तत्रानुभूतार्थस्मरणम् 'इतिः' वाक्यपरिसमाप्तौ । इदमुक्तं भवति-यथैकस्मात्पाटलिपुत्रकादेः स्थानादागतानामपि सुबहूनां पथिकानां क्वचिद्विवक्षिते स्थाने न सर्वेषां प्रागनुभूतार्थस्मृतिरुपजायते, किन्तु केषाञ्चिदेव, एवं भवान्तरस्मृतावपि योजना कार्येति । न चाल्पबहुत्वेन स्मर्तृणां दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमुद्भावनीयं, स्मर्तृसम्भवमात्रस्य प्रतिपादयितुमिष्टत्वाद् दृष्टान्तदार्ष्टान्तिकयोः सर्वथा साधर्म्याभावाच्च ॥५९॥ एतदेव भावयन्नाह—

**न चैतेषामपि ह्येतदुन्मादग्रहयोगतः ।**
**सर्वेषामनुभूतार्थस्मरणं स्याद्विशेषतः ॥६०॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'न च'- नैव 'एतेषामपि'-एकस्थानादागतानां, किं पुनर्भवान्तरादागतानामपीत्यपिशब्दार्थः 'हि' यस्माद् 'एतद्'-इदम् 'उन्मादग्रहयोगतः'-उन्मादो मोहावेशो, ग्रहश्च भूतावेशस्तत उन्मादग्रहयोर्योगः सम्बन्धस्तस्मात् 'सर्वेषां' समस्तानाम् किमित्याह-अनुभूतार्थस्मरणं स्यात्'-भवेत्, 'विशेषतः'-सर्वान्विशेषान्प्रतीत्य, किन्तु सामान्येनैव ॥६०॥

अथ दार्ष्टान्तिके सर्वेषां सामान्येन स्मृतिर्यथा स्यात्तथाह-

**सामान्येन तु सर्वेषां, स्तनवृत्त्यादिचिह्नितम् ।**
**अभ्यासातिशयात्स्वप्नवृत्तितुल्यं व्यवस्थितम् ॥६१॥**

'सामान्येन'-साधारणतया 'तुः' विशेषणार्थः 'सर्वेषां'-समस्तानां प्राणिनाम् 'स्तनवृत्त्यादिचिह्नितं'-स्तनवृत्तिस्तदहर्जातानां स्तनपानरूपा आदिशब्दाद्रमणीयरूपकन्दुकाद्यवलोकनकुतूहलादिका विविधा चेष्टा गृह्यते, तया चिह्नितं व्यक्तिभावमानीतम् 'जातिस्मरणं' इति गम्यते । कीदृशमित्याह 'अभ्यासातिशयात्पुनःपुनरासेवनमभ्यासस्तस्यातिशय उत्कर्षस्तस्मात् 'स्वप्नवृत्तितुल्यं'-स्वप्नकालोपलभ्यमानदिवसानुभूतवनदेवकुलादिविहारादिव्यवहारसमम् 'व्यवस्थितं'-प्रतिष्ठितम् । यथाभ्यासातिशयात्स्वप्ने दिनानुभूतोऽर्थ उपलभ्यते, एवं स्तनवृत्त्यादिको व्यवहारः प्राग्भवानुभूतो भवान्तरं इति ॥६१॥ ननु स्वप्नवृत्तिः पश्चादपि स्मर्यते न त्वेवं स्तनादिवृत्तिर्भवान्तरसम्बन्धिनीह स्मर्यत इति कथमनयोर्दृष्टान्तदार्ष्टान्तिकभाव इत्याशंक्याह-

**स्वप्ने वृत्तिस्तथाभ्यासाद्विशिष्टस्मृतिवर्जिता ।**
**जाग्रतोऽपि क्वचित्सिद्धा, सूक्ष्मबुद्ध्या निरूप्यताम् ॥६२॥**

'स्वप्ने वृत्तिः'-उक्तरूपा 'तथाभ्यासात्'-तत्प्रकारादभ्यासात्, मन्दाभ्यासादित्यर्थः 'विशिष्टस्मृतिवर्जिता' स्फुटप्रतिभासरूपस्मरणरहिता 'क्वचित्सिद्धा' इत्युत्तरेण योगः । तथा 'जाग्रतोऽपि'-क्षीणनिद्रस्य कस्यचित्किं पुनरन्यस्येति, 'क्वचित् क्षेत्रे काले वा' 'सिद्धा'-सर्वलोकसंमत्या प्रतिष्ठिता वृत्तिः-गच्छत्तृणस्पर्शादिका तथाभ्यासादेव स्मृतिवर्जिता । एतदर्थप्रतीतावुपदेशमाह 'सूक्ष्मबुद्ध्या'-परिभाव्यतामेतत्, अन्यथोक्तस्याप्यर्थस्य

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सम्यगवगमाभावात् ॥६२॥

अथ प्रकारान्तरत एव जातिस्मरणादात्मसिद्धिमभिधित्सुराह-

**श्रूयन्ते च 'महात्मान एते दृश्यन्त' इत्यपि ।**
**क्वचित्संवादिनस्तस्मादात्मादेर्हन्त निश्चयः ॥६३॥**

'श्रूयन्ते'-समाकर्ण्यन्ते कथानकेषु **भरु( भृगु )कच्छादौ** शकुनिका-जीवराजपुत्रीसुदर्शनादयः, चकारो हेत्वन्तरसमुच्चये, 'महात्मानः' प्रशस्तस्वभावाः 'एते'-जातिस्मरकाः 'दृश्यन्त इत्यपि' दृश्यन्ते साक्षादेव क्वचिदिदानीमप्युपलभ्यन्ते । कीदृशा इत्याह 'संवादिनः'-विसंवादवि-कलवचनाः । ततः किमित्याह 'तस्मात्'-जातिस्मरकादिसंवादात्, 'आत्मादेः'-जीवकर्मादिरतीन्द्रियस्यापि कस्यचित् 'हन्त' इति कोमलामन्त्रणे 'निश्चयः' सम्पद्यत इति ॥६३॥ अथ निगमयन्नाह-

**एवं च तत्त्वसंसिद्धेर्योग एव निबन्धनम् ।**
**अतो यन्निश्चितैवेयं, नान्यतस्त्वीदृशी क्वचित् ॥६४॥**

'एवं च'-उक्तन्यायेनैव 'तत्त्वसंसिद्धेः'-आत्मादृष्टादिप्रतीतेः 'योग एव' नापरं किञ्चिद्, 'निबन्धनं'-हेतुर्वर्तते । एतदपि कुत इत्याह 'अतः'-योगात् 'यत्'-यस्मात् 'निश्चितैव'-अविपर्यासवत्येव, 'इयं'-तत्त्वसिद्धिः स्यात्, न-नैव 'अन्यतः'-अन्यस्माद्वादप्रतिवादादेः 'तुः' पुनरर्थे, 'ईदृशी'-निश्चितरूपा तत्त्वसंसिद्धिः 'क्वचित्' क्षेत्रादौ ॥६४॥

**अतोऽत्रैव महान् यत्नस्तत्तत्तत्त्वप्रसिद्धये ।**
**प्रेक्षावता सदा कार्यो, वादग्रन्थास्त्वकारणम् ॥६५॥**

'अतो'ऽस्मात्कारणात् 'अत्रैव' योगे 'महान्'-अन्योपायातिशायी 'यत्न' आदरः, तस्य 'तत्त्वस्य'-स्वर्गनरकादेः, 'प्रसिद्धये'-[1]प्रतीत्यर्थम् 'प्रेक्षावता'-बुद्धिमता 'सदा'-सर्वकालम् 'कार्यो'-विधेयः । उपायान्तरप्रतिषेधमाह 'वादग्रन्थाः'-परपक्षनिराकरणेन स्वपक्षप्रतिष्ठापनानि तर्कप्रकरणानि 'तुः' प्राग्वत् 'अकारणं'-तत्त्वप्रतीतेरहेतवः । एतदेव समर्थयमान आह-

---

१. प्रतीत्यर्थः-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**उक्तं च योगमार्गज्ञैस्तपोनिर्धूतकल्मषैः ।**
**भावियोगिहितायोच्चैर्मोहदीपसमं वचः ॥६६॥**

'उक्तं च'-निरूपितं पुनः 'योगमार्गज्ञैः'- अध्यात्मविद्भिः पतञ्जलि-प्रभृतिभिः, 'तपोनिर्धूतकल्मषैः'-प्रशमप्रधानेन तपसा क्षीण[1]प्रायमार्गानुसारिबोधबाधकमोहमलैः । 'भावियोगिहिताय'-भविष्यद्विवादबहुलकलिकाल-योगिहितार्थम् 'उच्चैः'-अत्यर्थम् 'मोहदीपसमं-' 'मतिमोहान्धकारप्रदीपस्थानीयम्' 'वचो'- वचनम् ॥ ६६॥ एतदेव दर्शयति-

**वादांश्च प्रतिवादांश्च, वदन्तो निश्चितांस्तथा ।**
**तत्त्वान्तं नैव गच्छन्ति, तिलपीलकवद्गतौ ॥६७॥**

'वादांश्च'-पूर्वपक्षरूपान् 'प्रतिवादांश्च' -परोपन्यस्तपक्षप्रतिवचनरूपान् चौ-समुच्चये 'वदन्तो'-ब्रुवाणाः 'निश्चितान्'-असिद्धानैकान्तिकादिहेतुदोष-परिहारेण । 'तथा'-तेन प्रकारेण तत्तच्छास्त्र(तदवस्थासु)प्रसिद्धेन सर्वेऽपि दर्शनिनो मुमुक्षवोऽपि। किमित्याह 'तत्त्वान्तं' आत्मादितत्त्वप्रसिद्धिरूपं नैव गच्छन्ति प्रतिपद्यन्ते 'तिलपीलकवत्'- निरुद्धाक्षसंचारतिलयन्त्रवाहन-नियुक्तैकगोमहिषादिवत् 'गतौ'-वहनरूपायां सत्यामिति । यथासौ तिलपीलको गवादिर्निरुद्धाक्षतया नित्यं भ्राम्यन्नपि न तत्परिमाणमवबुध्यते, एवमेतेऽपि वादिनः स्वपक्षाभिनिवेशान्धा विचित्रं वदन्तोऽपि नोच्यमानतत्त्वं प्रतिपद्यन्त इति ॥६७॥ तर्हि [2]कस्तत्र प्रतिपत्त्युपाय इत्याशंक्याह-

**अध्यात्ममत्र परम उपायः परिकीर्तितः ।**
**गतौ सन्मार्गगमनं, यथैव ह्यप्रमादिनः ॥६८॥**

'अध्यात्मं'-वक्ष्यमाणरूपम् अत्र-तत्त्वप्रतिपत्तौ 'परमः'-प्रकृष्टः । उपायो-हेतुः । 'परिकीर्तितः'-प्रज्ञप्तः । दृष्टान्तमाह-'गतौ'-विशिष्टनगर-प्राप्तौ 'सन्मार्गगमनं'- सताऽविसंवादकेन मार्गेण पथा गमनम् 'यथैव' इति दृष्टान्तार्थः, 'हि'-स्फुटम् 'अप्रमादिनः' गन्तुरुपाय इति ॥ ६८॥

---

१. प्राय इति -A.C. प्रत्योः नास्ति; २ कस्तत्त्वप्रति -A.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवं सति यद्विधेयं तदाह -

**मुक्त्वाऽतो वादसङ्घट्टमध्यात्ममनुचिन्त्यताम् ।**
**नाविधूते तमःस्कन्धे ज्ञेये ज्ञानं प्रवर्तते ॥६९॥**

मुक्त्वा-प्रोज्झ्य अतोऽध्यात्मस्यैव तत्त्वप्रतिपत्त्युपायत्वाद्धेतोः वादसङ्घट्टं-सभ्यसभापतिनिरुल्बणेन वादप्रतिवादरूपम् अध्यात्ममनुचिन्त्यताम् । कुतः ? यतो न-नैव, अविधूते-ऽनिर्घाटिते, तमःस्कन्धे-मिथ्यात्वाभिनिवेशाद्यन्धकारप्रबन्धेऽध्यात्मानुचिन्तनदीपेन ज्ञेय-आत्मादौ ज्ञानं-प्रतीतिरूपं प्रवर्तते-सञ्जायत इति ॥ ६९॥ एतदेव भावयन्नाह-

**सदुपायाद्यथैवाप्तिरुपेयस्य तथैव हि ।**
**नेतरस्मादिति प्राज्ञः, सदुपायपरो भवेत् ॥७०॥**

सदुपायाद्-उपायाभासपरिहारेण सामान्येन सम्यगुपायात् 'यथैव' इति दृष्टान्तार्थः 'आप्तिः'-उपलम्भः उपेयस्य-साध्यस्य 'तथैव हि' सदुपायादेव न-नैव इतरस्माद्-असदुपायात् इति-अस्माद्धेतोः 'प्राज्ञो'-युक्तायुक्तविभागज्ञः पुमान् 'सदुपायपरः'-सर्वत्र विमृश्य सम्यगुपायपरायणो भवेद्-जायेत अन्यथा प्राज्ञतैव न स्यात् ॥७०॥ अथ प्रस्तुतमेवाधिकृत्याह -

**सदुपायश्च नाध्यात्मादन्यः सन्दर्शितो बुधैः ।**
**दुरापं किन्त्वदोऽपीह भवाब्धौ सुष्ठु देहिनाम् ॥७१॥**

'सदुपायश्च'-सम्यगुपायः पुनः 'नाध्यात्मादन्यो' विलक्षणः 'सन्दर्शितो' - निरूपितः बुधैः-पूर्वशास्त्रकारैस्तत्त्वप्रतीताविति दुरापं-दुर्लभम् किन्तु-किं पुनः 'अदोऽपि'-अध्यात्ममपि किं पुनस्तत्त्वप्रतीतिरित्यपिशब्दार्थः इह भवाब्धौ-भवसमुद्रे सुष्ठु-अतिशयेन देहिनां-जन्तूनामिति ॥७१॥

अध्यात्मदुरापत्वमेव भावयति-

**चरमे पुद्गलावर्ते, यतो यः शुक्लपाक्षिकः ।**
**भिन्नग्रन्थिश्चरित्री च तस्यैवैतदुदाहृतम् ॥७२॥**

चरमे-पर्यन्तवर्तिनि पुद्गलावर्ते-द्रव्यतः सामान्येन सर्वपुद्गलग्रहणोज्झनरूपे प्रवृत्ते सति यतो-यस्मात् यः-कश्चिद्भव्यविशेषः, तत्रापि शुक्लपाक्षिकोऽपार्धपुद्गलावर्तान्तर्गतसंसारः । यत उक्तम्-'जेसिं अवड्ढो पोग्गल-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परियट्टो सेसओ उ संसारो । ते सुक्कपक्खिया खलु, अहिगे पुण किण्हपक्खि त्ति ॥ १ ॥' तत्रापि 'भिन्नग्रन्थिः'-अपूर्वकरणवज्रप्रहारविदारितघनरागद्वेष-मोहपरिणामः, तत्रापि 'चरित्री'-देशतः सर्वतो वा सावद्याचारनिवृत्तः 'चः' प्राग्वत् । 'तस्यैव'- नान्यस्य एतदध्यात्मं उदाहृतं-उक्तमिति ॥७२॥ अथ कथमन्यथा न भवतीत्याशङ्क्याह -

**प्रदीर्घभवसद्भावाद् मालिन्यातिशयात्तथा ।**
**अतत्त्वाभिनिवेशाच्चा, नान्येष्वन्यस्य जातुचित् ॥७३॥**

प्रदीर्घभवसद्भावात्- प्रदीर्घस्यातिद्राघीयसो भवस्य संसारस्य सद्भावात्-संभवात् 'मालिन्यातिशयात्तथा'-भव्यत्वापरिपाकलक्षणात् 'तथा' इति हेत्वन्तरसमुच्चये 'अतत्त्वाभिनिवेशाद्'-विपरीतवस्तुस्वभावात्यन्ताऽऽग्रहात् 'चः' [1]प्राग्वत् 'नान्येषु'-पुद्गलावर्तेषु, चरमेऽपि नान्यस्योक्तगुणविकलस्य भव्यस्यापि जातुचित्-कदाचिदपि ॥७३॥ चरमे पुदगलावर्त इत्युक्तम्, अथान्येऽपि किं ते सन्तीत्याशङ्क्याह-

**अनादिरेष संसारो, नानागतिसमाश्रयः ।**
**पुद्गलानां परावर्ता, अत्रानन्तास्तथा गताः ॥७४॥**

अनादिरविद्यमानमूलारम्भः 'एष' प्रत्यक्षतो दृश्यमानः 'संसारो'- भवः कीदृश इत्याह 'नानागतिसमाश्रयः' नरकादिचित्रपर्यायपात्रं वर्तते । ततश्च 'पुद्गलानाम्'-औदारिकादिवर्गणारूपाणां सर्वेषां, 'परावर्ता' ग्रहणमोक्षात्मकाः 'अत्र' संसारे 'अनन्ता'-अनन्तवारस्वभावाः 'तथा'-तेन समयप्रसिद्धप्रकारेण 'गता'- अतीताः ॥७५॥ केषामित्याह-

**सर्वेषामेव सत्त्वानां, तत्स्वाभाव्यनियोगतः ।**
**नान्यथा संविदेतेषां, सूक्ष्मबुद्ध्या विभाव्यताम् ॥७५॥**

सर्वेषामेव 'सत्त्वानां'-[2]प्राणिनाम् तत्स्वाभाव्यमनन्तपुद्गलपरावर्तपरि-भ्रमणस्वभावता, तस्य 'नियोगो'-व्यापारस्तस्मात्, अत्रैव व्यतिरेकमाह न-नैव 'अन्यथा'- तत्स्वाभाव्यनियोगमन्तरेण 'संविद्'-अवबोधो घटते एतेषां

---

१. समुच्चये-A.; २. प्राणिनाम् यत्-A.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनन्तपुद्गलपरावर्तानाम् 'सूक्ष्मबुद्ध्या'-निपुणाभोगेन 'विभाव्यतां' अनुचिन्त्यतामेतत् ॥७५॥ एतदेव भावयति-

**यादृच्छिकं न यत्कार्यं, कदाचिज्जायते क्वचित् ।**
**सत्त्वपुद्गलयोगश्च, तथा कार्यमिति स्थितम् ॥७६॥**

'यादृच्छिकं'-यदृच्छानिमित्तम् न-नैव यद्यस्मात् कार्यं कदाचित्कुत्रापि काले 'जायते' भवति क्वचित्क्षेत्रे, इत्थं सामान्येन कारणपूर्वकत्वं कार्यस्य प्रसाध्य प्रस्तुते योजयन्नाह-'सत्त्वपुद्गलयोगश्च तथा कार्यं' इति तथा च सत्त्वपुद्गलयोगो-जीवपुदगलसम्बन्धः कार्यं, ततोऽनुमीयतेऽस्या(स्य) किञ्चित्कारणम्, यच्च तत्कारणं तन्नियमाज्जीवतत्स्वाभाव्यनियोगमन्तरेण नान्यदुपपद्यते, 'इति स्थितं' एवं प्रतिष्ठितं तत्स्वाभाव्यनियोगनिमित्तत्वं पुद्गलपरावर्तानामिति ॥७६॥ अथ तत्स्वाभाव्यस्यैव वैचित्र्यं [1]साधयन्नाह—

**चित्रस्यास्य तथाभावे, तत्स्वाभाव्यादृते परः ।**
**न कश्चिद्धेतुरेवं च, तदेव हि तथेष्यताम् ॥७७॥**

चित्रस्य-कस्यचिज्जन्तोः कियत्संख्यारूपतया विचित्ररूपभाजः, अस्यानन्तपुद्गलपरावर्तरूपकार्यस्य तथा-देशकालनियमेन भावे सम्भवे तत्स्वाभाव्यादृते-तत्स्वाभाव्यमन्तरेण परो-विलक्षणः न-नैव कश्चिद्धेतुः, एवं च-अनेन च कार्यवैचित्र्यप्रकारेण 'तदेव हि' तत्स्वाभाव्यमेव तथा विचित्रतया, इष्यताम् अङ्गीक्रियतामिति ॥७७॥

अत्रैव परमतमाशं[2]क्य परिहरन्नाह—

**स्वभाववादापत्तिश्चेदत्र को दोष उच्यताम् ।**
**तदन्यवादाभावश्चेत्र तदन्याऽनपोहनात् ॥७८॥**

स्वभाववादापत्तिः 'कः कण्टकानां प्रकरोति तैक्ष्ण्यं, विचित्रभावं मृगपक्षिणां च । स्वभावतः सर्वमिदं प्रवृत्तं, न कामचारोऽस्ति कुतः प्रयत्नः' ॥ [बुद्ध च/9 ॥६२॥] एवंलक्षणो यः स्वभाववादस्तस्यापत्तिः प्रसङ्गस्तत्स्वाभाव्यात्कार्योत्पत्त्यभ्युपगमे, चेद्-यदि ब्रूषे, अत्र-स्वभाववादापत्तौ

---

१.भावयन्नाह-A.; २. क्याशङ्क्य परिहरन्नाह-A.B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

को दोष 'उच्यतां'-भण्यताम् । 'तदन्यवादाभावः'- कालादिशेषकारणापलापः 'चेत्'- यदि ब्रूषे, आचार्यः,-न-नैव, तत्-परोक्तम्, कुत इत्याह 'तदन्याऽनपोहनात् '- तस्मात्तत्स्वाभाव्याद्येऽन्ये कालादयस्तेषामनपोहनादनिराकरणात्, तेषामपि कारणतत्त्वेनाभ्युपगमात् ॥७९॥ एतदेव भावयन्नाह-

**कालादिसचिवश्चायमिष्ट एव महात्मभिः ।**
**सर्वत्र व्यापकत्वेन, न च युक्त्या न युज्यते ॥७९॥**

'कालादिसचिवश्च' कालादिसहायः पुनः अयं-स्वभावः 'इष्ट एव'-सम्मत एव महात्मभिः **सिद्धसेनमल्लवादिप्रभृतिभिरस्मत्**[1]**स्वयूथ्यैः** । कथमित्याह 'सर्वत्र' कार्ये 'व्यापकत्वेन' कात्स्न्र्यवृत्त्या **संमति**प्रभृतिशास्त्रेषु, न चेष्टमात्रमेवेदं किन्तु युक्तियुक्तमपीत्याह 'न च'- नैव युक्त्या-उपपत्त्या 'न युज्यते' किन्तु युज्यत एव ॥७९॥ तथा हि-

**तथात्मपरिणामात्तु, कर्मबन्धस्ततोऽपि च ।**
**तथादुःखादि कालेन, तत्स्वभावादृते कथम् ॥८०॥**

'तथात्मपरिणामात्तु'-तत्प्रकारात्मपरिणतेरेव, 'कर्मबन्धः'-कर्मोपादानं सम्पद्यते 'ततोऽपि च'-कर्मबन्धाच्च 'तथा दुःखादि'- तत्प्रकारसुखदुःखलक्षणं कार्यमुज्जृम्भते 'कालेन'-ग्रीष्मवर्षादिरूपेण 'तत्स्वभावादृते'-तत्स्वभावं विना 'कथं'-केन प्रकारेण, नैवेत्यर्थः । तत्स्वाभाव्ये तु सति स्वपरिणामादेवोपात्तकर्मा तथाविधकालबलेन सुखदुःखभागात्मा भवतीति ॥८०॥ एवं तत्स्वाभाव्याधीने सति सर्वस्मिन् कार्ये-

**वृथा कालादिवादश्चेन्न तद्वीजस्य भावतः ।**
**अकिञ्चित्करमेतच्चेन्न स्वभावोपयोगतः ॥८१॥**

वृथा-विफलः, कालादिवादस्तत्स्वाभाव्यविलक्षणकारणाभ्युपगमः, चेद्-यदि ब्रूषे । न-नैवैतद्यदुक्तं परेण, कुत इत्याह 'तद्वीजस्य'-कालादिबीजस्य तच्छक्तिरूपस्य 'भावतः' -सत्त्वात्, तत्स्वाभाव्याधीनतायामपि कार्याणाम् अकिंचित्करं-कार्याऽकारि एतत् कार्यादि ( ?कालादि)बीजम् 'चेत्' यद्युच्यते

---

१. स्वपूज्यैः-A.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परेण, न-नैव, एतत्कुत इत्याह ' स्वभावोपयोगतः '-स्वभावे सर्वभावानां कार्येषु स्वत एव प्रवर्तमाने 'उपयोगतः'-कालादिबीजानां सहकारित्वेन व्यापारान्मृद इव घटपरिणतौ चक्रचीवरादीनामिति[1] ॥८१॥ एतदेव भावयति-

**सामग्र्याः कार्यहेतुत्वं, तदन्याभावतोऽपि हि ।**
**तदभावादिति ज्ञेयं, कालादीनां नियोगतः ॥८२॥**

'सामग्र्याः'-समग्रसंयोगलक्षणायाः 'कार्यहेतुत्वं'-सामान्येन घटादि-साध्यनिमित्तत्वम् 'तदन्याभावतोऽपि हि'-तस्य परिणामिकारणस्य यान्यन्यानि सहकारिकारणानि तेषामभावतोऽभावात्, किं पुनः परिणामिहेतोरभाव इत्य-पिहिशब्दार्थः । तदभावात्-कार्याभावात् इत्यस्मात्कारणात् ज्ञेयमवगन्तव्यम् । प्रस्तुतमपि कार्यं कालादीनां-सहकारिणां, नियोगतो व्यापारात्तत्स्वाभाव्ये सत्यपि न पुनरन्यथेति ॥८२॥ प्रस्तुतमेवार्थमाश्रित्याह-

**एतच्चान्यत्र महता प्रपञ्चेन निरूपितम् ।**
**नेह प्रतन्यतेऽत्यन्तं लेशतस्तूक्तमेव हि ॥83॥**

'एतच्च'- एतत्पुनः सामग्र्याः कालादिकायाः कार्यहेतुत्वम् 'अन्यत्र'-**शास्त्रवार्तासमुच्चयादिषु** महता-बृहता, 'प्रपञ्चेन निरूपितं'-चर्चितं यतः ततो न-नैव, इह शास्त्रे, प्रतन्यते-विस्तार्यते अत्यन्तं-अतीव । लेशतस्तु-संक्षेपेण पुनः, ऊक्तमेव हि-[2]दर्शितमेव हि ॥८३॥ अत एवाह -

**कृतमत्र प्रसङ्गेन प्रकृतं प्रस्तुमोऽधुना ।**
**नाध्यात्मं योगभेदत्वादावर्तेष्वपरेष्वपि ॥८४॥**

कृतं-पर्याप्तम् अत्र-स्थाने प्रसङ्गेन-प्रबन्धेन कालादिसामग्रीविषयेण, प्रकृतं-प्रारब्धम् प्रस्तुमः- प्रवर्तयामः अधुना-सम्प्रति । तदेव च दर्शयति न-नैव, अध्यात्मं योगभेदत्वाद्- योगविशेषत्वात् आवर्तेषु-पुद्गलपरावर्तरूपेषु अपरेष्वपि चरमव्यतिरिक्तेषु, चरमे तावद्भवत्येवेत्यपिशब्दार्थः ॥८४॥

अत्र हेतुमाह -

---

१. चक्रचीवरादीनामपि-A.; २. दर्शितमेवेति-A.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तीव्रपापाभिभूतत्वाज्ज्ञानलोचनवर्जिताः ।**
**सद्वर्त्मावतरन्त्येषु, न सत्त्वा गहनान्धवत् ॥ ८५ ॥**

'तीव्रपापाभिभूतत्वात् तीव्रेणातिदारुणेन पापेन मिथ्यात्वादिना अभिभूतत्वात्परतन्त्रीकृतत्वात्, अत एव ज्ञानलोचनवर्जिता-युक्तायुक्तविवेचननिपुणसंवेदननयनरहिताः किमित्याह सद्वर्त्म-सन्मार्ग अवतरन्ति-आगच्छन्ति, एषु-अन्येषु परावर्तेषु न-नैव सत्त्वाः-जन्तवः, दृष्टान्तमाह गहनान्धवत्'-महाकान्तारपतितजात्यन्ध इवेति ॥ ८५ ॥ एतदपि कुत इत्याह-

**भवाभिनन्दिनः प्रायस्त्रिसंज्ञा एव दुःखिताः ।**
**केचिद्धर्मकृतोऽपि [1]स्युर्लोकपंक्तिकृतादराः ॥८६ ॥**

जातिजरामरणाद्युपद्रवव्रातविधुरितमपि भवमभिनन्दन्ति तच्छीलाश्च ये ते तथा, प्रायो-बाहुल्येन 'त्रिसंज्ञा एव'-तिस्र आहारभयपरिग्रहरूपाः संज्ञा येषां ते तथा, मैथुनसंज्ञायाश्च कदाचित् केषाञ्चिदव्यक्तावस्थाया अपि भावात् प्रायस्त्रिसंज्ञा एवेत्येवमुक्तमिति । अत एव 'दुःखिता'- दुःखापोहकविवेकस्य स्वप्नेऽप्यभावात् सततमेव दुःखभाजः, तथा केचित् न सर्वे 'धर्मकृतोऽपि'-लौकिकलोकोत्तरप्रव्रज्यादिधर्मकारिणः किं पुनस्तदकारिण इत्यपिशब्दार्थः, स्युः-भवेयुः । कीदृशा इत्याह लोकपंक्तिकृतादराः लोकपंक्तिर्लोकसदृशभावसम्पादनरूपा, तस्यां कृतयत्नाः, 'अन्यावर्तेषु' इति अनुवर्तत इति ॥८६ ॥ अथ भवाभिनन्दिस्वरूपमाह -

**क्षुद्रो [2]लाभरतिर्दीनो, मत्सरी भयवान् शठः ।**
**अज्ञो भवाभिनन्दीस्यान्निष्फलारम्भसङ्गतः ॥८७ ॥**

क्षुद्रः-कृपणो, [2]लाभरतिर्याञ्चाशीलः, दीनः-सदैवादृष्टकल्याणः, मत्सरी-परकल्याणदुःस्थितः, भयवान्नित्यभीतः, शठो-मायावी अज्ञो-मूर्खः, भवाभिनन्दी-'*असारोऽप्येष संसारः सारवानिव लक्ष्यते । दधिदुग्धाम्बुताम्बूलपुष्पपण्याङ्गनादिभिः* ॥१ ॥' इत्यादिवचनैः संसाराभिनन्दनशीलः, स्याद्-

---

१. अत्र मूले वृत्तौ च यत्र यत्र पंक्तिशब्दः तत्र तत्र-A. प्रतौ पक्तिशब्दः । २. लोभ -B.C.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भवेत् कीदृश इत्याह 'निष्फलारम्भसङ्गतः'-सर्वत्राऽतत्त्वाभिनिवेशाद्वन्ध्य-क्रियासम्पन्न इति ॥८७॥ सम्प्रति लोकपंक्तिस्वरूपं व्याचष्टे-

**लोकाराधनहेतोर्या, मलिनेनान्तरात्मना ।**
**क्रियते सत्क्रिया साऽत्र, लोकपंक्तिरुदाहृता ॥८८॥**

लोकाराधनहेतोः लोकचित्तावर्जननिमित्तं या 'मलिनेन'-कीर्तिस्पृहा-दिमालिन्यवता अन्तरात्मना-चित्तरूपेण क्रियते-विधीयते सत्क्रियाशिष्ट-समाचार[1]रूपा, सा अत्र-योगनिरूपणायाम् 'लोकपंक्तिः'-प्रागुद्दिष्टा-'उदाहृता' योगशास्त्रज्ञैः ॥८८॥ अथैतां दूषयन्नाह-

**भवाभिनन्दिनो लोकपंक्त्या धर्मक्रियामपि ।**
**महतो हीनदृष्ट्योच्चैर्दुरन्तां तद्विदो विदुः ॥८९॥**

भवाभिनन्दिनो-जीवस्य, लोकपंक्त्योक्तरूपया 'धर्मक्रियामपि' किं पुनरितरक्रियामित्यपिशब्दार्थः, किमित्याह महतः- अधरीकृतकल्पद्रुम-चिन्तामणिकामधेनोर्धर्मस्य, हीनदृष्ट्या-बुद्धिमतामत्यन्तमनादेयस्य कीर्त्यादिमात्रस्य हेतुभावेन नियोजनाद्धीनतयावलोकनेन 'उच्चैः' - अत्यर्थं शेषानर्थहेतुभ्यः सकाशात्, दुरन्तां-दारुणपरिणामां तद्विदः-लोकपंक्तिस्वरूपविदः विदुः जानते, इति लोकपंक्तिस्त्याज्यैवेति ॥८९॥ अथैषापि विवेकिनः सुन्दरपरिणामा स्यादित्यभिधित्सुराह-

**धर्मार्थं लोकपंक्तिः स्यात् कल्याणाङ्गं महामतेः ।**
**तदर्थं तु पुनर्धर्मः, पापायाल्पधियामलम् ॥९०॥**

धर्मार्थं-सम्यग्दर्शनादिमोक्षबीजाधाननिमित्तम्, लोकपंक्तिर्दानसम्मानो-चितसम्भाषणादिभिश्चित्रैरुपायैः स्याद्-भवेत्, कल्याणाङ्गं-श्रेयःकारणं, महामतेः-प्रशस्तबुद्धेः अत एवोच्यते-

*"युक्तं जनप्रियत्वं, शुद्धं सद्धर्मसिद्धिफलदमलम्*
*धर्मप्रशंसनादेर्बीजाधानादिभावेन ॥१॥" इति*

व्यतिरेकमाह-तदर्थं तु लोकपंक्तिनिमित्तमेव, पुनर्धर्मः सदाचाररूपः

---

१. रुपा या सा- A.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पापाय-पापकर्मनिमित्तं अल्पधियां-तुच्छबुद्धीनां पुंसां, अलं-अत्यर्थमिति ॥९०॥
अत्रैव कश्चिद्विशेषमाह-

**लोकपंक्तिमतः प्राहुरनाभोगवतो वरम् ।**
**धर्मक्रियां न महतो, हीनताऽत्र यतस्तथा ॥९१॥**

लोकपंक्तिमतो-लोकचित्ताराधनप्रधानस्य प्राहुः ब्रुवते कीदृशस्येत्याह 'अनाभोगवतः' -सम्मूर्छनजप्रायस्य स्वभावत एव वैनयिकप्रकृतेः 'वरं'-पूर्वोक्ताल्पबुद्धिधर्मक्रियायाः सकाशात् प्रधानं यथा भवति 'धर्मक्रियां'-सदाचाररूपाम् । कुत इत्याह न नैव महतो धर्मस्य हीनता-हीनभावः अत्र अनाभोगवतो धर्मक्रियायां यतः- यस्मात् कारणात् तथा-तेन प्रकारेण, यथा मलिनात्मारब्धधर्मक्रियायाम् । इदमुक्तं भवति-अनाभोगवतो लोकाराधनप्रधानस्य कीर्त्यादिस्पृहामलिनात्मधर्मक्रियायाः सकाशात् मनाक् सुन्दरैव धर्मक्रिया, महतो धर्मस्य तत्र हीनतयानवलोकनादिति ॥९१॥

**तत्त्वेन तु पुनर्नैकाप्यत्र धर्मक्रिया मता ।**
**तत्प्रवृत्त्यादिवैगुण्याल्लोभक्रोधक्रिया यथा ॥९२॥**

तत्त्वेन तु पुनः-तत्त्ववृत्त्या पुनः न नैव 'एकापि' किं पुनर्द्वे इत्यपिशब्दार्थः, अत्राऽनयोर्मलिनान्तरात्मानाभोगवत्पुरुषकृतयोर्धर्मक्रिययोर्मध्ये धर्मक्रिया 'मता' संमता । कुत इत्याह तत्प्रवृत्त्यादिवैगुण्यात्-तत्र धर्मे प्रवृत्तिविघ्नजयसिद्धिविनियोगानां वैगुण्यादभावात् । दृष्टान्तमाह 'लोभक्रोधक्रिया'-प्रतीतरूपा यथा-येन प्रकारेणेति ॥९२॥ अथ निगमयन्नाह-

**तस्मादचरमावर्तेष्वध्यात्मं नैव युज्यते ।**
**कायस्थितितरोर्यद्वत्तज्जन्मस्वामरं सुखम् ॥९३॥**

'ततः'-तस्माल्लोकपंक्तिमात्रफलाया धर्मक्रियाया अधर्मत्वाद्धेतोः अचरमावर्तेषु-उक्तरूपेषु अध्यात्मं नैव युज्यते । अत्र दृष्टान्तमाह 'कायस्थितितरोः' काये वनस्पतिकाय एवानन्तोत्सर्पिण्यवसर्पिणीप्रमाणा स्थितिरवस्थानं यस्य स तथा तस्य तरोर्वनस्पतेः यद्वद्-यथा तज्जन्मसु-वनस्पति[1]जन्मस्वनन्तानन्तरूपेषु आमरं अमरसम्बन्धि सुखं, तत्सुखकारणानाम-

---
१. [illegible]-A.;



Jain Education International For Personal & Private Use Only www.jainelibrary.org

णुव्रतमहाव्रतादीनां तेषु कदाचिदप्यभावात् ॥९३॥ तथा-

**तैजसानां च जीवानां, भव्यानामपि नो तदा ।**
**यथा चारित्रमित्येवं, नान्यदा योगसम्भवः ॥९४॥**

तैजसानां-चकाराद्वायूनां च मनुष्यत्वमात्रत्वस्याप्ययोग्यानां 'जीवानाम् भव्यानामपि' किं पुनरितरेषाम् नो-नैव [१]च तदा-तैजसावस्थाकाले 'यथा' इति दृष्टान्तार्थः 'चारित्रं' देशतः सर्वतो वा । इत्येवं दार्ष्टान्तिकार्थः नान्यदा-ऽन्यावर्तेषु 'योगसम्भव' इति ॥९४॥ तथा-

**तृणादीनां च भावानां, योग्यानामपि नो यथा ।**
**तदा घृतादिभावः स्यात्, तद्वद्योगोऽपि नान्यदा ॥९५॥**

तृणादीनां-तृणपत्रपुष्पफलखलादीनां गवादिचारणार्हाणाम्, चकारो दृष्टान्तान्तरसमुच्चये, भावानां-पदार्थानाम् योग्यानामपि-घृतादि प्रतीत्याऽनन्त-रमेवोपपन्नहेतुरूपाणां किं पुनरितरेषामित्यपिशब्दार्थः 'नो यथा तदा' तृणादिकाले घृतादिभावो-घृतदुग्धदध्यादिभावः, स्याद् -भवेत् । तद्वत् तथा योगोऽपि [२]अध्यात्मादिकं 'तृणादिकाले'इत्यपिशब्दार्थः नान्यदेति ॥९५॥

**नवनीतादिकल्पस्तत्तद्भावेऽत्र निबन्धनम् ।**
**पुद्गलानां परावर्तश्चरमो न्यायसङ्गतम् ॥९६॥**

नवनीतं-म्रक्षणम् आदिशब्दाद्दधिदुग्धादिग्रहः ततो घृतादिपरिणामे नवनीता-दिकल्पः तत्-तस्मात् तद्भावेऽध्यात्मादिपरिणामे अत्र-योगविचारे निबन्धनं-हेतुः 'पुद्गलानां परावर्त' उक्तरूपः चरमोऽपश्चिमः, न्यायसंगतं-[३]युक्तमेतत् ॥९६॥

**अत एवेह निर्दिष्टा, पूर्वसेवापि या परैः ।**
**साऽऽसन्नाऽन्यगता मन्ये, भवाभिष्वङ्गभावतः ॥९७॥**

'अत एव'-चरमावर्तेऽध्यात्मभावादेव इह-योगप्रज्ञापनायां निर्दिष्टा निरूपिता । पूर्वसेवापि- [४]योगाद्यर्थं यमनियमाराधनरूपा किं पुनर्लोकपंक्ति-

---

१. 'च'-A.B.C.: प्रतिषु नास्ति; २. अध्यात्मादि-A.; अध्यात्मादिः-C.; ३. युक्तियुक्तमेतत्-A.B.C.; ४. भोगार्थं-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मात्रमित्यपिशब्दार्थः या 'परैः' **कापिलादिभिः** सा आसन्नान्यगता चरमावर्तासन्नान्यतरपरावर्तवर्तिनीति मन्येऽहं, न पुनश्चरमावर्तगतेति, कुत इत्याह 'भवाभिष्वङ्गभावतः'- अत्यन्तदृढसांसारिक[1]फलबन्धात् ॥९७॥

एनामेवाधिकृत्याह–

**अपुनर्बन्धकादीनां, भवाब्धौ चलितात्मनाम् ।**
**नासौ तथाविधा युक्ता, वक्ष्यामो युक्तिमत्र तु ॥९८॥**

अपुनर्बन्धकादीनां–अपुनर्बन्धकसम्यग्दृष्ट्यादीनाम् । भवाब्धौ–संसारजलधौ चलितात्मनां–विनिवर्तमानात्मनाम् । किमित्याह नासौ –पूर्वसेवा तथाविधा अपरोपन्यस्तपूर्वसेवासदृशी युक्ता । कुतः ? यतः 'वक्ष्यामो'(१५२ श्लोके) भणिष्यामो युक्तिं–हेतुं अत्र तु–अनयोः पुनः पूर्वसेवयोर्विशेषगतामिति ॥९८॥ युक्तिमेवाह–

**मुक्तिमार्गपरं युक्तया, युज्यते विमलं मनः ।**
**सद्बुद्ध्यासन्नभावेन, यदमीषां महात्मनाम् ॥ ९९॥**

मुक्तिमार्गपरं–निर्वाणपथपरायणम् युक्तया युज्यते–घटते । किमित्याह विमलं अतितीव्रमिथ्यात्वादिमलविकलं मनः–अन्तःकरणं सद्बुद्ध्यासन्नभावेन–सम्यक्त्वाद्युत्तरोत्तरशुद्धगुणस्थानसमीपभावेन यत्–यस्मात् अमीषां–अपुनर्बन्धकादीनां महात्मनां–प्रशस्तस्वभावानां, न पुनरावर्तान्तरवर्तिनां, यमनियमानुष्ठानेऽप्यतिदृढभवाभिष्वङ्गभावादिति ॥ ९९॥ अथैतदेव तीर्थान्तरीयमतेन संवादयन्नाह–

**तथा चान्यैरपि ह्येतद्योगमार्गकृतश्रमैः ।**
**सङ्गीतमुक्तिभेदेन, यद्गौपेन्द्रमिदं वचः ॥ १००॥**

'तथा च' इति पूर्वोक्तार्थभावनार्थः 'अन्यैरपि हि' किं पुनरस्माभिरित्यपिशब्दार्थः, एतत्–चरमावर्त एव विमलमनोलक्षणं वस्तु योगमार्गकृतश्रमैः–योगमार्गविहिताभ्यासैः सङ्गीतं उक्तम् उक्तिभेदेन शब्दविशेषलक्षणेन । कुतः ? यद्–यस्मात् 'गौपेन्द्रं'–भगवद्गोपेन्द्रोक्तम् इदमनन्तरमेव वक्ष्यमाणं

---

१. फलप्रतिबन्धात्-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वचो-वचनम् ॥ १००॥ [1]एतदेव दर्शयति –

**अनिवृत्ताधिकारायां प्रकृतौ सर्वथैव हि ।**
**न पुंसस्तत्त्वमार्गेऽस्मिञ्जिज्ञासापि प्रवर्तते ॥ १०१॥**

अनिवृत्ताधिकारायां अनिवृत्तोऽव्यावृत्तोऽधिकारः पुरुषाभिभवरूपो यस्याः सा तथा तस्याम् प्रकृतौ-प्रधानाभिधानायाम् 'सर्वथैव हि' सर्वैरेव प्रकारैर-पुनर्बन्धकत्वस्याप्यप्राप्तावित्यर्थः न-नैव पुंसः पुरुषस्य तत्त्वमार्गेऽ-स्मिन्वक्तुमुपक्रान्ते 'जिज्ञासापि'- योगमार्गं ज्ञातुमिच्छा, किं पुनस्तदभ्यास इत्यपिशब्दार्थः प्रवर्तते-सञ्जायत इति ॥ १०१॥ एतदेव भावयति –

**क्षेत्ररोगाभिभूतस्य, यथात्यन्तं विपर्ययः ।**
**तद्वदेवास्य विज्ञेयस्तदावर्तनियोगतः ॥ १०२॥**

क्षेत्ररोगाभिभूतस्य-क्षेत्ररोगेण रोगान्तराधारभूतेन कुष्ठादिनाऽभिभूतस्य 'यथा' इति दृष्टान्तार्थः अत्यन्तं अतीव 'विपर्ययो'- मतिभ्रंशरूपः स्यात् 'तद्वदेव' इति दार्ष्टान्तिकार्थः अस्य-अनिवृत्तप्रकृत्यधिकारस्य पुंसः 'विज्ञेयो' विपर्ययो योगमार्गाऽप्रतिपत्तिरूपः, कुत इत्याह 'तदावर्त्तनियोगतः'- तस्याऽ-निवृत्ताधिकारप्रकृतिकालभाविन आवर्तस्य प्रकृतेरेव परिवर्तस्य नियोगतो व्यापारात् ॥१०२॥ एतदपि कथमित्याह-

**जिज्ञासायामपि ह्यत्र, कश्चित्सर्गो निवर्तते ।**
**नाक्षीणपाप एकान्तादाप्नोति कुशलां धियम् ॥ १०३॥**

'जिज्ञासायामपि'-ज्ञातुमिच्छायां किं पुनरभ्यास इत्यपिशब्दार्थः हिर्यस्मात् 'अत्र' योगे विषयभूते कश्चिदनिर्धारितरूपः 'सर्गः'-प्रकृतेः पुरुषाभिभवलक्षणः निवर्तते । एतदपि कुत इत्याह न-नैव, अक्षीणपापः- [2]अव्यावृत्तकल्मषः एकान्तात् एकान्तेनैव आप्नोति-लभते प्राणी, कुशलां-मुक्तिपथानुवर्तिनीं, धियं-बुद्धिमिति, किं तु कथंचित्क्षीणपापः ॥ १०३॥

**ततस्तदात्वे कल्याणमायत्यां तु विशेषतः ।**
**मन्त्राद्यपि सदा चारु, सर्वावस्थाहितं मतम् ॥ १०४॥**

---

१. तदेव-A.B.C.; २. अव्यावृत्तकश्मलः-A.; अव्यावृत्तकश्मलपङ्कातङ्कः-B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततः-कुशलधीप्राप्तेः तदात्वे-कुशलधीप्राप्तिकाले कल्याणं-श्रेयःसमागमरूपम् आयत्यां तु-आगामिनि काले पुनःकुशलबुद्धिप्रभावोपात्तपुण्यपरिपाकवशेन विशेषतो विशेषेण । एतदेव प्रतिवस्तूपमया दर्शयति 'मन्त्राद्यपि'-मन्त्रमण्यौषध्यादि 'किं पुनः 'प्राकृतो योगः' सदा-सर्वकालम् 'चारु'-सुन्दरस्वभावम् सर्वावस्थाहितं'- सर्वावस्थासु व्यापारणाऽव्यापारणरूपासु हितं कल्याणावहम् मतं-इष्टं मतिमतामिति ॥ १०४॥

इत्थं गोपेन्द्रमतमनूद्य वस्तुस्थितिं प्रतिपादयन्नाह -

**उभयोस्तत्स्वभावत्वात्तदावर्त्तनियोगतः ।**
**युज्यते सर्वमेवैतन्नान्यथेति मनीषिणः ॥ १०५॥**

उभयोः-पुरुषप्रकृत्योः तत्स्वभावत्वात्-प्रकृतेर्व्यावृत्त्यधिकारस्वभावत्वात् तद्व्यावृत्त्यधिकारत्वे च पुरुषस्य कुशलबुद्धिप्रापकस्वभावत्वात् 'तदावर्तनियोगतः'-तस्य चरमावर्तस्य नियोगतः सामर्थ्यात् युज्यते-घटते सर्वमेवैतत् कुशलधीप्राप्त्यादि नान्यथा-उभयोस्तत्स्वभावत्वाभावे, इत्येतत्प्राहुः मनीषिणो-मतिमन्तः ॥ १०५॥ तथा-

**अत्राप्येतद्विचित्रायाः, प्रकृतेर्युज्यते परम् ।**
**इत्थमावर्तभेदेन, यदि सम्यग्निरूप्यते ॥ १०६॥**

अत्राप्युभयोस्तत्स्वभावत्वे, 'किं पुनस्तदभावे न घटत' इत्यपिशब्दार्थः, एतद्निवृत्ताधिकारत्वम् विचित्रायास्तत्सामग्रीबलेन नानारूपायाः प्रकृतेः-कर्मरूपायाः युज्यते परं-केवलम् । इत्थमुक्तप्रकारेण 'आवर्तभेदेन'-चरमावर्तरूपेण, यदि-चेत् सम्यग्यथावत् 'निरूप्यते'-विमृश्यत इति ॥१०६॥

अत्रैव विपक्षे बाधामाह -

**अन्यथैकस्वभावत्वादधिकारनिवृत्तितः ।**
**एकस्य सर्वतद्भावे, बलादापद्यते सदा ॥ १०७॥**

अन्यथा-प्रकृतिवैचित्र्याभावे 'एकस्वभावत्वाद्' एकः कथञ्चिदविचलितः स्वभावो यस्याः सा तथा, तद्भावस्तत्त्वं तस्मात् 'अधिकारनिवृत्तितो'-

---

२. प्रकृतो-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ऽधिकारनिवृतौ सत्यामित्यर्थः एकस्य-पुंसः 'सर्वतद्भावः'-सर्वेषु पुरुषेष्वधिकारनिवृत्तिभावः बलाद्-एकस्वभावत्वसामर्थ्यात् आपद्यते-प्राप्नोति सदा-सर्वकालम्, अन्यथा सर्वत्रापि जगति तस्या एकस्वभावत्वाऽयोगात् ॥१०७॥ दूषणान्तरमाह –

**तुल्य एव तथा सर्गः, सर्वेषां सम्प्रसज्यते ।**
**ब्रह्मादिस्तम्बपर्यन्त एवं मुक्तिः ससाधना ॥ १०८॥**

'तुल्य एव'-सदृश एव 'तथा' इति दूषणान्तरार्थः 'सर्गः'- स्वर्गादि-सृष्टिरूपः 'सर्वेषां'-सृष्टिमताम् सम्प्रसज्यत-आपद्यते ।'ब्रह्मादि'-ब्रह्मलोक-प्रभृतिकः, 'स्तम्बपर्यन्तो'- नारकतिर्यग्रूपलोकपर्यवसानः सांख्यसमयप्रसिद्धः । तथा च ते पठन्ति । *'उर्ध्वं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः ॥ मध्ये रजोविशालो, ब्रह्मादिस्तम्बपर्यन्तः* ॥१॥' एवं-सर्गवत् मुक्तिः- मोक्षः सर्वपुरुषाणां ससाधना यमनियमानुष्ठानसहिता तुल्या सम्पद्यते ॥१०८॥ इत्थं योगमाहात्म्यं तद्रूपतां चाभिधाय साम्प्रतं प्रागुद्दिष्टपूर्वसेवाक्रममाह–

**पूर्वसेवा तु तन्त्रज्ञैर्गुरुदेवादिपूजनम् ।**
**सदाचारस्तपो [1]मुक्त्यद्वेषश्चेह प्रकीर्तिता ॥ १०९॥**

'पूर्वसेवा तु'-योगप्रासादप्रथमभूमिकारूपा पुनः 'तन्त्रज्ञैः'-सम्यगधिगत-शास्त्रैः 'प्रकीर्तिता' इत्युत्तरेण योगः । कीदृशीत्याह 'गुरुदेवादिपूजनं' वक्ष्यमाणरूपं १, तथा सदाचारः २, तपो ३, मुक्त्यद्वेषश्च ४, इह-योगचिन्तायां, प्रकीर्तिता-निरूपिता ॥१०९॥ एतदेव क्रमेण व्याचष्टे –

**माता पिता कलाचार्य एतेषां ज्ञातयस्तथा ।**
**वृद्धा धर्मोपदेष्टारो, गुरुवर्गः सतां मतः ॥ ११०॥**

माता-जननी पिता-जनकः कलाचार्यो-लिप्यादिकलाशिक्षणोपाध्यायः एतेषां मातृप्रभृतीनां, ज्ञातयो- भ्रातृभगिन्यादयः 'तथा' इति समुच्चये 'वृद्धाः' श्रुतवयोवृद्धलक्षणाः कीदृशा इत्याह 'धर्मोपदेष्टारः' धर्मोपदेशप्रवर्तकाः । किमित्याह 'गुरुवर्गः'-[2]गौरव्यलोकसमुदायरूपः 'सतां'-शिष्टानां 'मतः'

---

१. मुक्त्यद्वेषतेह-B.C.; २. गौरववल्लोकसमुदायरूपः-B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अभीष्ट इति ॥११०॥

**पूजनं चास्य विज्ञेयं, त्रिसन्ध्यं नमनक्रिया ।**
**तस्यानवसरेऽप्युच्चैश्चेतस्यारोपितस्य तु ॥१११॥**

पूजनं च-पूजनं पुनः अस्य-गुरुवर्गस्य विज्ञेयं-अवगन्तव्यम्, किमित्याह त्रिसन्ध्यं-सन्ध्यात्रयाराधनेन, नमनक्रिया-प्रणामरूपा । यदि कथञ्चित्साक्षादसौ प्रणन्तुं न पार्यते तदा किं कृत्यमित्याह-तस्य- गुरुवर्गस्य अनवसरेऽपि-तथाविधप्रघट्टकवशात्- 'किं पुनरवसर' इत्यपिशब्दार्थः उच्चैः-अत्यर्थं, चेतसि-मनसि, आरोपितस्य तु-पूर्ववद्गुरुवर्गस्य पूजनमिति ॥१११॥ तथा -

**अभ्युत्थानादियोगश्च, तदन्ते निभृतासनम् ।**
**नामग्रहश्च नाऽस्थाने, नावर्णश्रवणं क्वचित् ॥ ११२॥**

अभ्युत्थानादियोगो-ऽभ्युत्थानासनप्रदानस्थितपर्युपासनादिविनयव्यापाररूपः, चः समुच्चये, तदन्ते-गुरुवर्गान्ते निभृतासनं अप्रगल्भतयावस्थानम्, नामग्रहश्च नामोच्चारणरूपः न-नैव 'अस्थाने'-[1]मूत्रपुरीषोत्सर्गादिस्थानरूपे । न-नैव अवर्णश्रवणं-अवर्णवादाकर्णनम् क्वचित् परपक्षमध्यावस्थानेऽपीति ॥११२॥ तथा-

**साराणां च यथाशक्ति, वस्त्रादीनां निवेदनम् ।**
**परलोकक्रियाणां च, कारणं तेन सर्वदा ॥११३॥**

साराणां च उत्कृष्टानाम् यथाशक्ति-यस्य यावती शक्तिस्तया वस्त्रादीनां वसनपानभोजनालङ्कारादीनाम् निवेदनं-समर्पणम् तथा 'परलोकक्रियाणां च'-देवातिथिदीनानाथप्रतिपत्ति[2]प्रभृतीनाम् कारणं-विधापनम् । तेन गुरुवर्गेण सर्वदा सर्वकालम् ॥११३॥ तथा -

**त्यागश्च तदनिष्टानां, तदिष्टेषु प्रवर्तनम् ।**
**औचित्येन त्विदं ज्ञेयं,प्राहुर्धर्माद्यपीडया ॥११४॥**

'त्यागश्च'-प्रोज्झनम् 'तदनिष्टानां'-गुरुवर्गासंमतानां व्यवहाराणाम्, 'तदिष्टेषु'- गुरुवर्गप्रियेषु व्यवहारेष्वेव 'प्रवर्तनम्', -अत्रापवादमाह 'औचित्येन

---

१. मूत्रपुरीषोज्झनादिस्थानरूपे-A.; २. प्रभूतानाम्-B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तु'-औचित्यवृत्त्या पुनः, इदं-पूजनं, ज्ञेयं प्राहुः उक्तवन्तः । पूर्वं औचित्यमेव व्यनक्ति-धर्माद्यपीडया धर्मादीनां पुरुषार्थानामबाधया । 'यदि तदनिष्टेभ्यो निवृत्तौ तदिष्टेषु च प्रवृत्तौ धर्मादयः-पुरुषार्था बाध्यन्ते, तदा न [1]तन्निवृत्तिपरेण भाव्यं, किं तु पुरुषार्थाराधनपरेणैव, अतिदुर्लभत्वात्पुरुषार्थाराधनकालस्येति' ॥११४॥ तथा -

**तदासनाद्यभोगश्च तीर्थे तद्वित्तयोजनम् ।**
**तद्बिम्बन्याससंस्कार ऊर्ध्वदेहक्रिया परा ॥११५॥**

'तदासनाद्यभोगश्च'-गुरुवर्गस्यासनशयनभोजनपात्रादीनामभोगोऽपरिभोगः 'तीर्थे' -देवतायतनादौ 'तद्वित्तयोजनं' अलङ्कारादिगुरुवर्गद्रव्यनियोजनम्, अन्यथा तत्स्वयंग्रहे गुरुवर्गमरणाद्यनुमतिप्रसङ्गः स्यात् । तद्बिम्बन्याससंस्कारः तस्य गुरुवर्गस्य यो बिम्बन्यासः प्रतिबिम्बस्थापनारूपस्तस्य संस्कारो धूपपुष्पादिपूजारूपः, 'तत्कारितदेवतादेः पूजारूप इत्यन्ये ।' 'ऊर्ध्वदेहक्रिया'-गुरुदेवपूजनादिमृतकार्यकरणरूपा परा-दर्शितादरा ॥११५॥

अथ देवपूजाविधिमाह -

**पुष्पैश्च बलिना चैव, वस्त्रैः स्तोत्रैश्च शोभनैः ।**
**देवानां पूजनं ज्ञेयं, शौचश्रद्धासमन्वितम् ॥११६॥**

पुष्पैः-जातिशतपत्रिकादिसम्भवैः, बलिना-पक्वान्नफलाद्युपहाररूपेण, वस्त्रैर्वसनैः स्तोत्रैः-स्तवनैः । चशब्दौ चैवशब्दश्च समुच्चयार्थाः । शोभनैरादरोपहितत्वेन सुन्दरैः देवानां-आराध्यतमानां पूजनं ज्ञेयम् । कीदृशमित्याह-शौचश्रद्धासमन्वितं-शौचेन शरीरवस्त्रद्रव्यव्यवहारशुद्धिरूपेण श्रद्धया च बहुमानेन समन्वितं युक्तमिति ॥११६॥ एतच्च -

**अविशेषेण सर्वेषामधिमुक्तिवशेन वा ।**
**गृहिणां माननीया यत्, सर्वे देवा महात्मनाम् ॥११७॥**

'अविशेषेण'-साधारणवृत्त्या सर्वेषां-पारगतसुगतहरहरिहिरण्यगर्भादीनाम्, पक्षान्तरमाह-अधिमुक्तिवशेन वा-अथवा यस्य यत्र देवतायामतिशयेन श्रद्धा

---

१. तदनुवृत्तिपरेण-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तद्वशेन । कुत इत्याह 'गृहिणां'-अद्यापि कुतोऽपि मतिमोहादनिर्णीतदेवता-विशेषाणां, माननीयाः- गौरवार्हाः, यत्-यस्मात् 'सर्वे देवाः' -उक्तरूपाः 'महात्मनां'-परलोकप्रधानतया प्रशस्तात्मनामिति ॥११७॥ एतदपि कथमित्याह

**सर्वान्देवान्नमस्यन्ति, नैकं देवं समाश्रिताः ।**
**जितेन्द्रिया जितक्रोधा, दुर्गाण्यतितरन्ति ते ॥११८॥**

सर्वान्देवान्नमस्यन्ति-नमस्कुर्वते । व्यतिरेकमाह 'नैकं' कंचन 'देवं समाश्रिताः' प्रतिपन्ना [1]वर्तन्ते, यतो 'जितेन्द्रियाः'- निगृहीतहृषीकाः 'जितक्रोधाः' -अभिभूतकोपाः 'दुर्गाणि' नरकपातादीनि व्यसनानि अतितरन्ति- [2]व्यतिक्रामन्ति, ते-सर्वेदेवनमस्कर्तारः ॥११८॥ ननु [3]नैव ते लोके व्यवह्रियमाणाः सर्वेऽपि देवा मुक्तिपथप्रस्थितानामनुकूलाचरणा भवन्तीति कथमविशेषेण नमस्करणीय-तेत्याशंक्याह -

**चारिसञ्जीवनीचारन्याय एष सतां मतः ।**
**नान्यथात्रेष्टसिद्धिः स्याद्विशेषेणादिकर्मणाम् ॥११९॥**

चारेः- प्रतीतरूपाया मध्ये संजीवन्यौषधिविशेषश्चारिसंजीवनी तस्याश्चाारः -चरणं स एव 'न्यायो' दृष्टान्तश्चारिसंजीवनीचारन्यायः । एषोऽविशेषेण देवतानमस्करणीयतोपदेशः सतां-शिष्यनाम् मतो-अभिप्रेतः ।

भावार्थस्तु कथागम्यः, सा चेयमभिधीयते ।
अस्ति स्वस्तिमती नाम, नगरी नागराकुला ॥ १ ॥
तस्यामासीत्सुता काचिद्, ब्राह्मणस्य तथा सखी ।
तस्या एव परं पात्रं, सदा प्रेम्णो [4]गतावधेः ॥ २ ॥
तयोर्विवाहवशतो, भिन्नस्थाननिवासिता ।
जज्ञेऽन्यदा द्विजसुता, जाता चिन्तापरायणा ॥ ३ ॥
कथमास्ते सखीत्येवं, ततः प्राघूर्णिका गता ।
दृष्टा विषादजलधौ, निमग्ना सा तया ततः ॥ ४ ॥

---

१. वर्तन्ते, ये ततो-A.B.C.; २. अतिक्रा-A.B.C.; ३. नैते-A.B.C.; ४. गतावधिः-A.; गतावधि-C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पप्रच्छ-किं त्वमत्यन्तविच्छायवदना सखी ?
तयोचे पापसद्माहं, पत्युर्दुर्भगतां गता ॥ ५॥
मा विषीद विषादोऽयं, निर्विशेषो विषात्सखि ।
करोम्यनड्वाहमहं, पतिं ते मूलिकाबलात् ॥ ६॥
तस्याः सा मूलिकां दत्त्वा, संनिवेशं निजं ययौ ।
अप्रीतमानसा तस्य, प्रायच्छत् तामसौ ततः ॥ ७॥
अभूद् गौरुद्धुरस्कन्धो, झगित्येव च सा हृदि ।
[1]विद्राणैष कथं सर्वकार्याणामक्षमो भवेत् ॥ ८॥
गौयूथान्तर्गतो नित्यं, बहिश्चारयितुं सकः ।
तयारब्धो वटस्याधः, सोऽन्यदा विश्रमं गतः ॥ ९॥
तच्छाखायां नभश्चारिमिथुनस्य कथंचन ।
विश्रान्तस्य मिथो जल्पप्रक्रमे रमणोऽब्रवीत् ॥ १०॥
नात्रैष गौः स्वभावेन, किं तु वैगुण्यतोऽजनि ।
पत्नी प्रतिबभाषे सा, पुनर्नासौ कथं भवेत् ॥ ११॥
मूल्यन्तरोपयोगेन, क्वास्ते सास्य तरोरधः ।
श्रुत्वैतत्सा पशोः पत्नी, पश्चात्तापितमानसा ॥१२॥
[2]अभेदज्ञानतश्चारिं, सर्वां चारयितुं तकम् ।
प्रवृत्ता मूलिकाभोगात्, सद्योऽसौ पुरुषोऽभवत् ॥ १३॥
अजानानो(ना) यथा भेदं, मूलिकायास्तया पशुः ।
चारितः सर्वतश्चारिं, पुनर्नृत्वोपलब्धये ॥ १४॥
तथा धर्मगुरुः शिष्यं, पशुप्रायं विशेषतः ।
प्रवृत्तावक्षमं ज्ञात्वा देवपूजादिके विधौ ॥ १५॥
सामान्यदेवपूजादौ, प्रवृत्तिं कारयन्नपि ।
विशिष्टसाध्यसिद्ध्यर्थं, न स्याद्दोषी मनागपि ॥ १६॥ इति ।

विपक्षे बाधामाह न-नैव अन्यथा-चारिसंजीवनीचारन्यायमन्तरेण अत्र देवपूजनादौ प्रस्तुते इष्टसिद्धिः- विशिष्टमार्गावताररूपा स्यात्-भवेत् । अयं

१. विद्राणाथ कथं-B.; २. अभेदज्ञा ततश्चारि-A.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चोपदेशो यथा येषां दातव्यस्तदाह-विशेषेण-सम्यग्दृष्ट्याद्युचितदेशना-परिहाररूपेण, आदिकर्मणां-प्रथममेवारब्धस्थूलधर्माचाराणाम् । न ह्यत्यन्तमुग्धतया कंचन देवतादिविशेषमजानाना विशेषप्रवृत्तेरद्यापि योग्याः, किं तु सामान्यरूपाया एवेति ॥ ११९ ॥

तर्हि कदा विशेषेण प्रवृत्तिरनुमन्यत इत्याशंक्याह –

**गुणाधिक्यपरिज्ञानाद्, विशेषेऽप्येतदिष्यते ।**
**अद्वेषेण तदन्येषां, वृत्ताधिक्ये तथात्मनः ॥ १२० ॥**

'गुणाधिक्यपरिज्ञानाद्'-देवतान्तरेभ्यो गुणाधिक्यस्य गुणवृद्धेरवगमात् विशेषेऽप्यर्हदादौ किं पुनः सामान्येन एतत्पूजनमिष्यते । कथमित्याह अद्वेषेण अमत्सरेण, तदन्येषां-पूज्यमानदेवताव्यतिरिक्तानां देवतान्तराणां, वृत्ताधिक्ये-आचाराधिक्ये सति 'तथा' इति विशेषणसमुच्चये 'आत्मनः'- स्वस्य देवतान्तराणि प्रतीत्येति ॥१२० ॥ गुरुदेवादिपूजनमित्यत्रादि[1]शब्दप्रगृहीतं पूजनीयान्तमधिकृत्याह—

**पात्रे दीनादिवर्गे च, दानं विधिवदिष्यते ।**
**पोष्यवर्गाऽविरोधेन, न विरुद्धं स्वतश्च यत् ॥ १२१ ॥**

पात्रे-दायकलोकरक्षाकरे [2]निर्दिक्ष्यमाणलक्षणे दीनादिवर्गे च भणिष्यमाणरूप एव दानं-स्वविभवातिसर्गरूपम् विधिवद्-विधियुक्तं 'इष्यते' मतिमद्भिः, कथमित्याह पोष्यवर्गाऽविरोधेन-मातापित्रादिपोषणीयलोकस्य वृत्तेरनुच्छेदनेन । न विरुद्धं न दायकग्राहकयोर्धर्मबाधाकारि हलोदूखलादिवत् स्वतश्च-स्वात्मना च यत्-दीयमानमिति ॥१२१ ॥

एतदेव भावयति —

**व्रतस्था लिङ्गिनः पात्रमपचास्तु विशेषतः ।**
**स्वसिद्धान्ताऽविरोधेन, वर्तन्ते ये सदैव हि ॥१२२ ॥**

व्रतस्था-हिंसानृतादिपापस्थानविरतिमन्तः 'लिङ्गिनो'- व्रतसूचकतथा-विधनेपथ्यवन्तः 'पात्रम्' अविशेषेण वर्तन्ते । अत्रापि विशेषमाह-

---

१. शब्दोपगृहीतं-A.B.C.; २. निर्देक्ष्य-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अपचास्तुस्वयमेवापाचका: पुनरुपलक्षणत्वात्परैरपाचयितार: [1]पच्यमानानननुमन्तारश्च लिङ्गिन एव विशेषतो-विशेषेण पात्रमिति । तथा स्वसिद्धान्ताऽविरोधेन-स्वशास्त्रोक्तक्रियानुल्लङ्घनेन 'वर्तन्ते'-चेष्टन्ते ये सदैव हि-सर्वकालमेवेति ॥१२२॥

**दीनान्धकृपणा ये तु, व्याधिग्रस्ता विशेषतः ।**
**निःस्वाः क्रियान्तराऽशक्ता, एतद्वर्गो हि मीलकः ॥१२३॥**

दीनान्धकृपणा-दीना: क्षीणसकलपुरुषार्थशक्तय:, अन्धा:- नयनरहिता:, कृपणा:- स्वभावत एव सतां कृपास्थानम् । ये तु ये च 'व्याधिग्रस्ता:'-कुष्ठाद्यभिभूता: 'विशेषतो'-अत्यन्तम् तथा 'नि:स्वा' -निर्धना: कीदृशा एत इत्याह 'क्रियान्तराशक्ता'-निर्वाहहेतुव्यापारान्तराऽसमर्था ये प्राणिविशेषा: किमित्याह 'एतद्वर्ग:'- दीनादिवर्गो य: प्रागुद्दिष्ट: हि: पादपूरणार्थ: 'मीलक:'-दीनादीनामेवेति ॥१२३॥ विधिवदित्युक्तमथ तदेव व्याचष्टे-

**दत्तं यदुपकाराय, द्वयोरप्युपजायते ।**
**नातुरापथ्यतुल्यं तु तदेतद्विधिवन्मतम् ॥१२४॥**

दत्तं-वितीर्णम् यदन्नादि उपकारायाऽनुग्रहाय द्वयोरपि- दायकग्राहकयो:, उपजायते-न पुनरेकस्यैवेत्यपिशब्दार्थ: । व्यतिरेकमाह न-नैव आतुरापथ्यतुल्यं तु ज्वरादिरोगविधुरस्य घृतादिदानसदृशं पुन: [2]यन्मुसलहलादि तद्दायकग्राहकयोरपकारि एतद्दत्तं विधिवन्मतमभीष्टम् ॥१२४॥

अथ दानमेव स्तुवन्नाह -

**धर्मस्यादिपदं दानं, दानं दारिद्र्यनाशनम् ।**
**जनप्रियकरं दानं, दानं कीर्त्यादिवर्धनम् ॥ १२५॥**

धर्मस्य-श्रेयोरूपस्य 'आदिपदं' प्रथमस्थानम् दानमुक्तलक्षणम्, 'दानं दारिद्र्यनाशनं'- इहपरभवयोर्लाभान्तरायकर्मोपघातेन विशिष्टलाभसम्भवाद्दौर्गत्यापोहकारि 'जनप्रियकरं'- लोकसंतोष[3]हेतुर्दानम्, 'दानं कीर्त्यादिवर्धनं'-कीर्तिः "स्वचित्तसंतोषजननसौभाग्यादिवृद्धिहेतु:" । यदत्र पुन: पुनर्दानशब्दोच्चारणं

---

१. पच्यमानाननुमन्तारश्च-A.B.C.; २. यदूखल-A.B.C.; ३. हेतु दानम्-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदत्यन्तादरणीयताज्ञापनार्थमिति ॥१२५॥ अथ सदाचारमाह–

**१लोकापवादभीरुत्वं, २दीनाभ्युद्धरणादरः ।**
**३कृतज्ञता ४सुदाक्षिण्यं, सदाचारः प्रकीर्तितः ॥१२६॥**

'लोकापवादभीरुत्वं'– यतः कुतोऽपि लोकापवादान्मरणान्निर्विशिष्यमाणाद् भीतभावः । 'दीनाभ्युद्धरणादर' – उपलक्षणत्वाद्दीनानाथोपकारप्रयत्नः । 'कृतज्ञता'–परकृतोपकारपरिज्ञानम् । सुदाक्षिण्यं–गम्भीरधीरचेतसो निर्मत्सरस्य च प्रकृत्यैव परकृत्याभियोगपरता । किमित्याह 'सदाचारः' प्रागुपन्यस्तः प्रकीर्तितः–प्रज्ञप्तः ॥१२६॥ तथा –

**५सर्वत्र निन्दासन्त्यागो, ६वर्णवादश्च साधुषु ।**
**७ आपद्यदैन्यमत्यन्तं ८ तद्वत्सम्पदि नम्रता ॥१२७॥**

'सर्वत्र'- जघन्यमध्यमोत्तमजनेषु 'निन्दासन्त्यागः'-परिवादापनोदः 'वर्णवादश्च'-प्रशंसारूपः, 'साधुषु'- सदाचारेषु जनेषु 'आपदि'-व्यसने अदैन्यमदीनभावः अत्यन्तमतीव्र, तद्वदापद्यदैन्यवत् 'सम्पदि' विभवसमागमे नम्रताऔचित्येन नमनशीलता॥ १२७॥ तथा –

**९प्रस्तावे मितभाषित्वमविसंवादनं१० तथा ।**
**११प्रतिपन्नक्रिया चेति, कुलधर्मानुपालनम्१२ ॥१२८॥**

'प्रस्तावे'–भाषणावसर उपलब्धे, मितभाषित्वं–मितहितभाषणशीलता, 'अविसंवादनं'– विसंवादवतः स्ववचनस्याकरणम् । 'तथा प्रतिपन्नक्रिया चेति' प्रतिपन्नस्य व्रतनियमादेः क्रिया–निर्वाहणं, इतिः पदसमाप्तौ । कुलधर्मानुपालनं अविरुद्धस्वकुलाचारानुवर्तनम् ॥१२८॥

**१३असद्व्ययपरित्यागः, स्थाने चैतत्क्रिया१४ सदा ।**
**१५प्रधानकार्ये निर्बन्धः, १६प्रमादस्य विवर्जनम् ॥१२९॥**

असद्व्ययपरित्यागो–ऽसतः पुरुषार्थानुपयोगित्वेनासुन्दरस्य व्ययस्य वित्त–विनियोगरूपस्य परित्यागः, स्थाने च–स्थान एव देवपूजनादौ एतत्क्रिया व्ययक्रिया सदा सर्वकालम्, 'प्रधानकार्ये'–विशिष्टफलदायिनी प्रयोजने निर्बन्धः आग्रहः, प्रमादस्य –मद्यपानादिरूपस्य विवर्जनमुज्झनम् ॥१२९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**१७लोकाचारानुवृत्तिश्च १८सर्वत्रौचित्यपालनम् ।**
**१९प्रवृत्तिर्गर्हिते नेति, प्राणैः कण्ठगतैरपि ॥१३०॥**

'लोकाचारानुवृत्तिश्च'-बहुजनरूढाऽविरोधिलोकव्यवहारानुपालनरूपा सर्वत्र स्वपक्षे परपक्षे च 'औचित्यपालनं'-समुचिताचाररूपम् प्रवृत्तिर्गर्हिते कुत्सिते कुलदूषणादौ न-नैव । इतिः प्राग्वत् । प्राणैरुच्छ्वासरूपैः कण्ठगतैरपि-गलस्थानप्राप्तैः, किं पुनः स्वभावस्थैरित्यपिशब्दार्थः ॥१३०॥

अथ तपः प्राह-

**तपोऽपि च यथाशक्ति, कर्तव्यं पापतापनम् ।**
**तच्च चान्द्रायणं कृच्छ्रं, मृत्युघ्नं पापसूदनम् ॥१३१॥**

तपो पि च-किं पुनः प्रागुक्तमनुष्ठानम् यथाशक्ति-यस्य यावती शक्तिः-तया 'कर्तव्यं'-विधेयम् । कीदृशमित्याह 'पापतापनं'-स्मृत्यादिप्रसिद्धं तथा-विधापराधवशसमुत्पन्नाशुभकर्मतापकारि 'तच्च'-तत्पुनः १चान्द्रायणं २कृच्छ्रं ३मृत्युघ्नं ४पापसूदनं इति चतुष्प्रकारम् ॥१३१॥

इदमेव श्लोकचतुष्टयेन व्याचष्टे—

**एकैकं वर्धयेद् ग्रासं, शुक्ले कृष्णे च हापयेत ।**
**भुञ्जीत नामावास्यायामेष चान्द्रायणो विधिः ॥१३२॥**

एकैकं-न तु द्रव्यादिरूपम् वर्धयेद्-वृद्धिमानयेत् ग्रासं-कवलमन्नस्य, शुक्ले शुक्लपक्षे प्रतिपत्तिथेरारभ्य यावत्पौर्णमास्यां पञ्चदश कवलाः । तथा कृष्णे च कृष्णपक्षे पुनश्चतुर्दशादौ कृत्वा हापयेद्-हीनं कुर्यादेकैकं [1]ग्रासमेवं यावत् अमावास्या, ततो 'भुञ्जीत नामावस्यायां'-तस्यां सकलकवलक्षयात् । 'एष' उक्तरूपश्चान्द्रायणः- चन्द्रेण वृद्धिभाजा क्षयभाजा च [2]सहेयते गम्यते [3]यत्तच्चान्द्रायणं, तस्यायमिति चान्द्रायणो 'विधिः'-करणप्रकार इति । एतच्च चान्द्रायणं लौकिकशास्त्रोक्तं प्रथमधार्मिकयोग्यतया चेहोपन्यस्तं, लोकोत्तरं त्वित्थमन्यथा च शास्त्रान्तरादवसेयमिति ॥१३२॥

---

१. ग्रासमेकं-A.; २. सह ईयते-A.; ३. यत्तच्चान्द्रायणं-A.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सन्तापनादिभेदेन, कृच्छ्रमुक्तमनेकधा ।**
**अकृच्छ्रादतिकृच्छ्रेषु, हन्त सन्तारणं परम् ॥१३३॥**

इह कृच्छ्रमनेकधा यथा–सन्तापनकृच्छ्रं, पादकृच्छ्रं, सम्पूर्णकृच्छ्रमित्यादि । तत्र सन्तापनकृच्छ्रम् – "*त्र्यहमुष्णं पिबेदम्बु, त्र्यहमुष्णं घृतं पिबेत् । त्र्यहमुष्णं पिबेन्मूत्रं, त्र्यहमुष्णं पिबेत्पयः ॥१॥ तथा–एकभक्तेन भुक्तेन, तथैवाऽयाचितेन च । उपवासेन चैकेन पदकृच्छ्रं विधीयते ॥२॥*" सम्पूर्णकृच्छ्रं पुनरेतदेव चतुर्गुणमिति ततः 'सन्तापनं' सन्तापनकृर्च्छ्रमादौ यस्य स तथा । स चासौ भेदश्च [१]विशेषस्तेन कृच्छ्रंनामकम्, उक्तमनेकधानेकप्रकारं तपः शास्त्रेषु । कीदृशमित्याह–अकृच्छ्रात्–अकृच्छ्रेण अतिकृच्छ्रेषु– नरकादिपातफलेष्वरपराधेषु विषये 'हन्त' इति प्रत्यवधारणे [२]पुनः सन्तारणं–सन्तरणहेतु परं–प्रकृष्टं प्राणिनामिति ॥१३३॥

**मासोपवासमित्याहुर्मृत्युघ्नं तु तपोधनाः ।**
**मृत्युञ्जयजपोपेतं परिशुद्धं विधानतः ॥ १३४॥**

मासं यावदुपवासो यत्र तत्तथा इत्येतत् आहुरुक्तवन्तः मृत्युघ्नं तु–मृत्युघ्ननामकं पुनस्तपः तपोधनाः तपःप्रधाना मुनयः । मृत्युञ्जयजपोपेतं–पञ्चपरमेष्ठिनमस्कारादिरूपं मृत्युञ्जयसंज्ञमन्त्रस्मरणसमन्वितम् परिशुद्धमिह–लोकाशंसादिपरिहारेण विधानतः– कषायनिरोधब्रह्मचर्यदेवपूजादिरूपाद्विधानात् ॥१३४॥

**पापसूदनमप्येवं तत्तत्पापाद्यपेक्षया ।**
**चित्रमन्त्रजपप्रायं प्रत्यापत्तिविशोधितम् ॥ १३५॥**

पापसूदनमपि–किं पुनर्मृत्युघ्नमित्यपिशब्दार्थः 'एवं'–परिशुद्धं विधानतश्च ज्ञेयम् । कथमित्याह– तत्तत्पापाद्यपेक्षया–तत्तच्चित्ररूपं यत्पापं साधुद्रोहादि आदिशब्दाज्ज्ञानावरणाद्यष्ट[३]विधं कर्मापेक्ष्येति, तत्र "*महुराए जउणराया, जउणावङ्के य डण्डमणगारे । वहणं च कालकरणं, सक्कागमणं च पव्वज्जा*

---

१. विशेषस्तेन कृच्छ्रं कृच्छ्रनामकम्-A.B.C.; २. पुनः इति-A.B.C. प्रतिषु नास्ति; ३. विधकर्मा-A.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

॥१॥'' (आ.नि.) इति । अत्र कथानके डण्डानगारहन्तुर्यमुनराजस्य तत्पापशुद्ध्यर्थमङ्गीकृतप्रव्रज्यस्य साधुवधस्मरणे तद्दिनप्रतिपन्नाऽभोजनाभिग्रहस्य षण्मासान्यावज्जातव्रतपर्यायस्य सम्यक्सम्पन्नाराधनस्य किल न क्वचिद्दिने भोजनमजनीति, तत् तपः [1]तत्तत्पापापेक्षया पापसूदनमिति । कर्मसूदनतपस्तु प्रतिकर्मेत्थमाचरितं दृश्यते-उपवासैकाशनैकसिक्थैकस्थानकैकदत्ति-निर्विकृतिकाचाम्लाष्टकवलानि । कीदृशमेतदित्याह 'चित्रमन्त्रजपप्रायं'-चित्रो नानाविधः "ॐ ह्रीं अ सि आ उ सा नमः" इत्यादिमन्त्रस्मरणरूपो जपः प्रायो बहुलो यत्र तत्तथा । 'प्रत्यापत्तिविशोधितं' प्रत्यापत्तिस्तत्त-दपराधस्थानान्महता संवेगेन प्रतिक्रान्तिस्तया विशोधितं विशुद्धिमानीतम् ॥१३५॥

अथ मुक्त्यद्वेषमभिधित्सुराह -

**कृत्स्नकर्मक्षयान्मुक्तिर्भोगसंक्लेशवर्जिता ।**
**भवाभिनन्दिनामस्यां द्वेषोऽज्ञाननिबन्धनः ॥ १३६॥**

कृत्स्नकर्मक्षयाद्-निखिलमलप्रलयात्, मुक्तिः-निर्वृतिः सञ्जायते, कीदृशी-त्याह 'भोगसंक्लेशवर्जिता'-इन्द्रियार्थाभिष्वङ्गरूपदुःखविकला । ततो भवा-भिनन्दिनामत्यन्तासारमपि संसारं प्रति बहुमानवतां जन्तूनाम् 'अस्यां'-मुक्तौ सर्वाङ्गसुखखानिभूतायां केषांचिद्यो 'द्वेषो'-मत्सरः, सोऽज्ञाननिबन्धनो-मुक्तिस्वरूपापरिज्ञाननिमित्तः । न हि स्वभावसुन्दरे वस्तुनि तथैव च ज्ञाते कश्चिद्विपश्चिद् द्वेषं प्रतिपद्यत इति ॥१३६॥

न च वक्तव्यं असौ [2]द्वेषोऽसम्भव्येव इत्याशंक्याह[3] -

**श्रूयन्ते चैतदालापा लोके तावदशोभनाः ।**
**शास्त्रेष्वपि हि मूढानामश्रोतव्याः सदा सताम् ॥१३७॥**

श्रूयन्ते-आकर्ण्यन्ते चकारः पूर्वोक्तभावनार्थः-एतदालापा- मुक्तिद्वेष-वचनानि लोके-संव्यवहारार्हे जने तावच्छब्दः क्रमार्थः 'अशोभना'-अश्रेयोरूपाः । तथा च पठन्ति-[3]*जइ तत्थ नत्थि सीमंतिणीओ मणहरपियंगुवन्नाओ । ता*

---

१. तत्पापापेक्षया-A.B.; २. द्वेषोऽसम्भाव्यते-A.;

३. "यदि तत्र नास्ति सीमन्तिन्यो मनोहरप्रियंगुवर्णाः ।
तत् रे ! सिद्धान्तिक ! बंधनं खलु मोक्षो न स मोक्षः ॥ १॥"

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रे *सिद्धन्तिय ! बन्धणं खु मोक्खो न सो मोक्खो* ॥१॥ तथा 'शास्त्रेष्वपि हि'-तथाविधस्मृतिपुराणरूपेषु 'किं पुनर्लोक' इत्यपिहीतिशब्दार्थः 'मूढानां' तत्त्वं प्रति व्यामोहवतां शास्त्रकृताम् कीदृशा इत्याहः- 'अश्रोतव्या'-श्रोतुमनर्हाः 'सदा'-सर्वकालं 'सतां'-शिष्टानाम् ॥१३७॥ एतदेव दर्शयति-

**वरं वृन्दावने रम्ये क्रोष्टुत्वमभिवाञ्छितम् ।**
**न त्वेवाऽविषयो मोक्षः कदाचिदपि गौतम ॥१३८॥**

वरं-प्रधानम् वृन्दावने-यमुनानदीतटवर्तिनि मथुरोपवनविशेषे रम्ये-रमणीये क्रोष्टुत्वं-श्रृगालत्वम् अभिवाञ्छितं- अभिलषितम्, न त्वेव नैव पुनः अविषयः- कयाचित्क्रियया भावयितुमयोग्यः मोक्षोऽपवर्गः । कदाचिदपि-क्वाप्यवस्थाविशेषे वाञ्छितः । '**गौतम !**' इति **गालवेन** निजशिष्यविशेष-स्यामन्त्रणं कृतमिति ॥१३८॥

**महामोहाभिभूतानामेवं द्वेषोऽत्र जायते ।**
**अकल्याणवतां पुंसां तथा संसारवर्धनः ॥१३९॥**

महामोहाभिभूतानामतिनिबिडमिथ्यात्वादिमोहनीय[१]विपाकविसंस्थुलानाम् एवमुक्तप्रकारेण द्वेषोऽत्र-मुक्तौ जायते । अकल्याणवतां- संमुखीभूता-तिप्रभूताशुभानां पुंसाम् 'तथा संसारवर्धनः' तथा तत्प्रकारस्यानन्तकालप्रमितस्य संसारस्य वर्धनो वृद्धिहेतुः ॥१३९॥ विपर्यये गुणमाह-

**नास्ति येषामयं तत्र तेऽपि धन्याः प्रकीर्तिताः ।**
**भवबीजपरित्यागात् तथा कल्याणभागिनः ॥१४०॥**

न-नैव अस्ति-विद्यते येषां भव्यविशेषाणाम् अयं-द्वेषः तत्र-मुक्तौ तेऽपि- किं पुनस्तत्रानुरागभाज इत्यपिशब्दार्थः धन्या-धर्मधनलब्धारः प्रकीर्तिताः । पुनरपि कीदृशा इत्याह 'भवबीजपरित्यागात्'- मनाक् स्वगतसंसार-योग्यतापरिहाणेः सकाशात्, तथा-तेन प्रकारेण चरमपुद्गलपरिवर्तव्यवधानादिना 'कल्याणभागिनः'- तीर्थकरादिपदप्राप्तिद्वारेण शिवशर्मभाज इति ॥१४०॥ किं च-

१. विपाकविभविसंस्थु-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सज्ज्ञानादिश्च यो मुक्तेरुपायः समुदाहृतः ।**
**मलनायैव तत्रापि न चेष्टैषां प्रवर्तते ॥१४१॥**

'सज्ज्ञानादिश्च' सम्यग्ज्ञानदर्शनचारित्ररूपः पुनः यो मुक्तेर्निर्वृतेः उपायः- पन्थाः, समुदाहृतः तीर्थकरैः प्रज्ञप्तः तस्य 'मलनायैव'-विनाशनिमित्तमेव, 'किं तु कदाराधनार्थमपि',तत्रापि तस्मिन्नपि मुक्त्यद्वेषे सति किं पुनस्तदनुराग इत्यपिशब्दार्थः न-नैव चेष्टा- मनोवाक्कायप्रवृत्तिरूपा एषां-मुक्त्यद्वेषवतां जन्तूनाम् प्रवर्तते-समस्ति ॥१४१॥

अथ मुक्त्युपायस्यैवाऽमलनादृष्टान्तात् मलनायाः फलमाह-

**स्वाराधनाद्यथैतस्य फलमुक्तमनुत्तरम् ।**
**मलनातस्त्वनर्थोऽपि महानेव तथैव हि ॥१४२॥**

स्वाराधनाद्-विधिवदनुवर्तनात् यथा-येन प्रकारेण, एतस्य मुक्त्युपायस्य फलं-कार्यम्, उक्तमनुत्तरं-सर्वफलातिशायि । मलनातस्तु-मलनायाः सकाशात्पुनः मुक्त्यु[1]पायस्यैव अनर्थोपि, किं पुनराराधनातोऽनुत्तरं- फलमित्यपिशब्दार्थः । महानेव नरकादिपातरूपः । तथैव हि-स्वाराधनाफलप्रकारेणैव ॥१४२॥ एतदेव भावयति-

**उत्तुङ्गारोहणात्पातो विषान्नात्तृप्तिरेव च ।**
**अनर्थाय यथात्यन्तं मलनापि तथेक्ष्यताम् ॥१४३॥**

उत्तुङ्गारोहणात्पर्वतशिखराद्यध्यासनात्, पातोऽधस्तात्पतनम्, विषान्नाद्विषमिश्रभोजनात्, तृप्तिरेव च-तृप्तिश्च, अनर्थायाऽकल्याणाय यथा-येन प्रकारेण, अत्यन्तं, मलनापि मुक्त्युपायस्य, तथेक्ष्यतां अवलोक्यतामिति ॥१४३॥ एतदेव समर्थयमान आह-

**अत एव च शस्त्राग्निव्यालदुर्ग्रहसन्निभः ।**
**श्रामण्यदुर्ग्रहोऽस्वन्तः शास्त्र उक्तो महात्मभिः ॥१४४॥**

अत एव-मुक्त्युपायमलनस्यानर्थहेतुत्वादेव हेतोः, चकारः पूर्वोक्तभावनार्थः, शस्त्राग्निव्यालदुर्ग्रहसन्निभः-शस्त्रस्य-क्षुरिकादेः, अग्नेः प्रतीतरूपस्य,

---

१. पायस्यैको वाऽ-A.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

व्यालस्य च दुष्टश्वापदभुजगलक्षणस्य यो दुर्ग्रहो- दुर्गृहीतत्वं तेन सन्निभः सदृशः । क इत्याह श्रामण्यदुर्ग्रहः असम्यक्तदङ्गीकारः, अस्वन्तः- असुन्दरपरिणामः, शास्त्रे योगस्वरूपनिरूपके ग्रन्थे, उक्तः निरूपितः, महात्मभिः- पूर्वमुनिभिः । तथा च पठन्ति-[1] *जह चेव उ मोक्खफला, आणा आराहिया जिणिंदाणं । संसारदुक्खफलया, तह चेव विराहिया नवरं* ॥१॥ [पंचवस्तु ११९]

ननु दुर्गृहीतादपि श्रामण्यात् सुरलोकलाभो भवति, अतः कथमस्याऽस्वन्ततेत्याशंक्याह- ग्रैवेयक इत्यादि -

**ग्रैवेयकाप्तिरप्येवं नातः श्लाघ्या सुनीतितः ।**
**यथाऽन्यायार्जिता सम्पद् विपाकविरसत्वतः ॥१४५॥**

ग्रैवेयकाप्तिरपि-शुद्धसमाचारवत्सु साधुषु चक्रवर्त्यादिभिः [2]परपुरुषैः पूज्यमानेषु दृष्टेषु सम्पन्नतत्पूजास्पृहाणां तथाविधान्यकारणवतां च केषाञ्चिद्व्यापन्नदर्शनानामपि प्राणिनां या नवमग्रैवेयकप्राप्तिः किं पुनः शेषसुरस्थानाप्तिरित्यपिशब्दार्थः एवमस्वन्तत्वेन न-नैव अतो दुर्गृहीतश्रामण्यात् श्लाघ्या- प्रशंसनीया सुनीतितः- परिणामविमर्शकविचारात् । अत्र दृष्टान्तमाह 'यथाऽन्यायार्जिता'-चौर्यद्यूतरमणस्वामिद्रोहादिनाऽन्यायेन लब्धा सम्पत् - विभूतिर्न श्लाघ्या । कुत इत्याह विपाकविरसत्वतःपरिणतिविरसभावात् । ते हि ग्रैवेयकेभ्यश्च्युता निर्वाणबीजस्यैकान्तेनाऽसत्त्वेनेहोदीर्णदुर्निवारमिथ्यात्वादिमोहा अत एव सर्वेष्वप्यकार्येष्वस्खलितप्रवृत्तयो नरकादिपातहेतुमुपार्ज्य पापप्राग्भारं पश्चादधस्तान्नरकभाजो भवन्तीति ॥१४५॥ अथ व्यापन्नदर्शनानामप्यखण्डद्रव्यश्रामण्यपरिपालनातो या नवमग्रैवेयकप्राप्तिः, तत्रापि मुक्त्यद्वेष एव कारणमित्यभिधातुकामः प्राह-

**अनेनापि प्रकारेण द्वेषाभावोऽत्र तत्त्वतः ।**
**हितस्तु यत्तदेतेऽपि तथा कल्याणभागिनः ॥१४६॥**

---

१. "यथैव तु मोक्षफला आज्ञा आराधिता जिनेन्द्राणाम् ।
संसारदुःखफलका तथैव विराधिता नवरम् ॥"

२. पदपुरुषै-A.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनेनापि प्रकारेण-लब्धिपूजाद्यर्थत्वरूपेण किं पुनरितरथेत्यपिशब्दार्थः द्वेषाभावोमुक्त्यमत्सरः अत्र-द्रव्यश्रामण्ये तत्त्वत-ऐदम्पर्यात् 'हितस्तु'-हितः, पुनर्न तु द्रव्यक्रियैव यद्यस्मात्कारणात् तत्तस्मात् एतेऽपि-द्रव्यश्रामण्यभाजः किं पुनस्तदन्य इत्यपिशब्दार्थः तथाकल्याणभागिनः- ग्रैवेयकाद्युत्पत्तिरूपश्रेयःस्थानभाजनमिति ॥१४६॥ अथ प्रस्तुतमेवाधिकृत्याह -

**येषामेवं न मुक्त्यादौ द्वेषो गुर्वादिपूजनम् ।**
**त एव चारु कुर्वन्ति नान्ये तद्गुरुदोषतः ॥१४७॥**

येषां-भव्यविशेषाणाम् एवं-चरमपुद्गलावर्तवर्तित्वेन न-नैव मुक्त्यादौ मुक्तौ मुक्त्युपाये मुक्तिपथप्रस्थितेषु च जनेषु द्वेषो-मत्सरः । गुर्वादिपूजनं योगपूर्वसेवास्वभावम् त एव मुक्त्याद्यद्वेषिणः 'चारु' विधिसमन्वितं कुर्वन्ति, व्यवच्छेद्यमाह- 'नान्ये'- मुक्त्यादिद्वेषिणः कुत इत्याह 'तद्गुरुदोषतः' स मुक्त्यादिद्वेषलक्षणो गुरुर्महान् यो दोषस्तस्मात् ॥१४७॥ एतदेव भावयति-

**सच्चेष्टितमपि स्तोकं गुरुदोषवतो न तत् ।**
**भौतहन्तुर्यथाऽन्यत्र पादस्पर्शनिषेधनम् ॥१४८॥**

सच्चेष्टितमपि-सुन्दरमपि चेष्ठितमनुष्ठानम् गुरुदोषवतः- सच्चेष्टितापेक्षया बृहदपराधसमन्वितस्य । न-नैव तत्सच्चेष्टितं वर्तते । दृष्टान्तमाह भौतहन्तुर्भौतानां भस्मवृत्तीनां हन्तुर्घातकस्य [1]'यथा' इति दृष्टान्तार्थः अन्यत्र सच्चेष्टिते कर्तव्ये पादस्पर्शनिषेधनं-पादस्पर्शस्य चरणसङ्घट्टनरूपस्य निषेधनं हन्तव्यान् भौतान्प्रतीत्येति । तथाहि-"किल कस्यचिच्छबरस्य कुतोऽपि प्रस्तावात् 'तपोधनानां पादेन स्पर्शनं महतेऽनर्थाय सम्पद्यते' इतिश्रुतधर्मशास्त्रस्य कदाचिन्मयूरपिच्छैः प्रयोजनमजायत । यदासौ निपुणमन्यत्रान्वेषमाणो न लेभे तदा श्रुतमनेन यथा भौतसाधुसमीपे तानि सन्ति । ययाचिरे च [2]तानि तेभ्यः, परं न किंचिल्लेभे, ततोऽसौ शस्त्रव्यापारपूर्वकं तान्निगृह्य जग्राह तानि, पादेन स्पर्शं च परिहृतवान्" यथास्य पादस्पर्शपरिहारो गुणोऽपि शस्त्रव्यापारेणोपहतत्वान्न गुणः किंतु दोषः, एवं मुक्तिद्वेषिणां गुरुदेवादिपूजनं योजनीयमिति ॥१४८॥ एतदेवाह-

---

१. शबरस्य यथा-A.; २. तानि तेन तेभ्यः-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**गुर्वादिपूजनान्नेह तथा गुण उदाहृतः ।**
**मुक्त्यद्वेषाद्यथात्यन्तं महापायनिवृत्तितः ॥१४९॥**

गुर्वादिपूजनादुक्तरूपात्सकाशात् न-नैव इह पूर्वसेवायाम् 'तथा गुणः' पूजकोपकारः उदाहृतो-मतिमद्भिः । मुक्त्यद्वेषाद्- गुर्वादिपूजाभावेऽपि यथात्यन्तमतीव गुणो; महापायनिवृत्तितो-महापायस्य [१]संसारनामकस्याऽपारस्य पारकरणान्निवृत्तेः ॥१४९॥

**भवाभिष्वङ्गभावेन तथाऽनाभोगयोगतः ।**
**साध्वनुष्ठानमेवाहुर्नैतान् भेदान् विपश्चितः ॥१५०॥**

भवाभिष्वङ्गभावेन-भवप्रतिबन्धसत्तया द्वयोरनुष्ठानयोः 'तथा' इति हेत्वन्तरसमुच्चये अनाभोगयोगतः सम्मूर्छनजप्रवृत्तितुल्यतयाऽऽभोगविरहादेकत्रानुष्ठाने किमित्याह साध्वनुष्ठानमेव- परिपूर्णयत्यनुष्ठानमेव [परिपूर्णयत्यनुष्ठानमपि सदा] आहुः- ब्रुवते न-नैव साध्वनुष्ठानतयेति गम्यते । कानित्याह 'एतान्' वक्ष्यमाणान्, 'भेदान्' अनुष्ठानविशेषांस्त्रीन्विषादीन्, विपश्चितः- विद्वांसः, एकान्तेनैव द्रव्यानुष्ठानत्वात्तेषामिति ॥१५०॥

अमुमेवार्थं भावयन्नाह-

**इहामुत्रफलापेक्षा, भवाभिष्वङ्ग उच्यते ।**
**तथाऽनध्यवसायस्तु स्यादनाभोग इत्यपि ॥१५१॥**

इह-मनुष्यभवे अमुत्र-स्वर्गादौ 'फलापेक्षा'-इह कीर्त्यादेरमुत्र च सुरविभूत्यादेः [२]फलापेक्षा स्पृहारूपा किमित्याह-भवाभिष्वङ्ग उक्तरूपः, उच्यते-निगद्यत इति, 'तथा' इति समुच्ये । अनध्यवसायस्तु विधीयमानानुष्ठानोचिताध्यवसायाभावः पुनः स्याद्-भवेत् 'अनाभोगो' यः प्रागुक्तः 'इत्यपि' एष एवेति ॥१५१॥ ततः किमित्याह-

**एतद्युक्तमनुष्ठानमन्यावर्तेषु तद्ध्रुवम् ।**
**चरमे त्वन्यथा ज्ञेयं सहजाल्पमलत्वतः ॥१५२॥**

एतद्युक्तं-भवाभिष्वङ्गानाभोगसङ्गतम्, अनुष्ठानं- गुरुदेवादि[३]पूजनरूपम्

---

१. संसारनामकस्य पारकरस्यापारस्य पारकरणात् निवृत्तेः-B.C., करणेन निवृत्तेः-A.; २. फलस्यापेक्षा-A.B.C.; ३. पूजनारूपम्-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अन्यावर्तेषु–चरमावर्तविलक्षणेषु, तत्पूर्वसेवारूपतयोपन्यस्तम् ध्रुवं–निश्चितम्, चरमे तु–चरमे पुनः परावर्ते अन्यथा–ऽन्यप्रकारं ज्ञेयम्, कुत इत्याह 'सहजाल्पमलत्वतः'– स्वाभाविककर्मबन्धयोग्यतालक्षणमलतुच्छभावात् ॥१५२॥

ततोऽपि किमित्याह–

**एकमेवह्यनुष्ठानं कर्तृभेदेन भिद्यते ।**
**सरुजेतरभेदेन भोजनादिगतं यथा ॥१५३॥**

एकमेव ह्येकाकारमेव–अनुष्ठानं–देवतापूजनादि कर्तृभेदेन चरमाऽचरमावर्तवर्तितया कारकजन्तुनानात्वेन भिद्यते–विशिष्यते । दृष्टान्तमाह–सरुजेतरभेदेन, भोजनादिगतं– भोजनपानशयनासनादिगतं, यथा–येन प्रकारेण एतस्य रोगवृद्धिहेतुत्वादन्यस्य च बलोपचयार्थत्वादिति ॥१५३॥ एतदेव द्रढयन्नाह–

**इत्थं चैतद्यतः प्रोक्तं सामान्येनैव पञ्चधा ।**
**विषादिकमनुष्ठानं विचारेऽत्रैव योगिभिः ॥१५४॥**

इत्थमिदम्प्रकारम् 'चकारः' पूर्वोक्तभावनार्थः एतदनुष्ठानभेदलक्षणं वस्तु यतो–यस्मात्, प्रोक्तम् सामान्येनैव न तु चरमाऽचरमावर्तभेदमपेक्ष्य पञ्चधा–पञ्चभिः प्रकारैः, विषादिकं– विषगरादिभेदमनुष्ठानं प्रस्तुतमेव विचारे–[1]पर्यालोचने अत्रैवाऽस्मिन्नेव योगमते पतञ्जलिप्रभृतिभिः योगिभिः ॥१५४॥

इदमेव दर्शयति–

**विषं गरोऽननुष्ठानं तद्धेतुरमृतं परम् ।**
**गुर्वादिपूजानुष्ठानमपेक्षादिविधानतः ॥१५५॥**

विषं–स्थावरजङ्गमभेदभिन्नम् ततो विषमिव [2]विषम्, एवं गरोऽपि योजनीयः परं गरः–कुद्रव्यसंयोगजो विषविशेषः, अननुष्ठानं– अनुष्ठानाभासम्, तथा तद्धेतुरनुष्ठानहेतुः, अमृतमिवामृतममरणहेतुत्वात् । परं–प्रकृष्टं, गुर्वादिपूजानुष्ठानम् प्रकृतमेव वर्तते । कुत इत्याह अपेक्षादिविधानतः– अपेक्षाया

---

१. पर्यालोचे-A.B.; २. विषभेदम् A.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इहलोकपरलोकफलस्पृहानुरूपाया आदिशब्दादनाभोगादेश्च यद्विधानं विशेष-स्तस्मात् ॥१५५॥ विषादित्वमेव भावयन्नाह-

**विषं लब्ध्याद्यपेक्षात इदं सच्चित्तमारणात् ।**
**महतोऽल्पार्थनाज्ज्ञेयं लघुत्वापादनात्तथा ॥१५६॥**

विषं लब्ध्याद्यपेक्षातो-लब्धिकीर्त्यादिस्पृहालक्षणायाः सकाशात्, इदमनुष्ठानं वर्तते । कुत इत्याह सच्चित्तमारणात्-परिशुद्धान्तःकरणपरिणामविनाशनात् महतोऽनुष्ठानस्य अल्पार्थनाद्- अतितुच्छलब्ध्यादिस्पृहणात्सकाशात् लघुत्वापादनं लघुभावाधानं तस्मात् । 'तथा' इति हेत्वन्तरभावनार्थः । ज्ञेयमिदं विषमिति ॥१५६॥

**दिव्यभोगाभिलाषेण, गरमाहुर्मनीषिणः ।**
**एतद्विहितनीत्यैव कालान्तरनिपातनात् ॥१५७॥**

दिव्यभोगाभिलाषेण-ऐहिकभोगनिःस्पृहस्य स्वर्गस्थानभवभोगाभिष्व-ङ्गरूपेण गरमनुष्ठानम् आहुर्मनीषिणो मतिमन्तः एतद्देवादिपूजाद्यनुष्ठानं 'विहि-तनीत्यैव'- सच्चित्तमारणादिरूपयैव, परं कालान्तरनिपातनात्कालान्तरे-[1]भवभवान्तररूपेऽनर्थसम्पादनाद् आत्मनः, किल विषं सद्य एव विनाशहेतुः गरश्च कालान्तरेणेत्येवमुपन्यस्तमिति ॥१५७॥

**अनाभोगवतश्चैतदननुष्ठानमुच्यते ।**
**सम्प्रमुग्धं मनोऽस्येति ततश्चैतद्यथोदितम् ॥१५८॥**

अनाभोगवतश्च इहलोकपरलोकयोरपि संमूर्छनजतुल्यप्रवृत्तितया क्वचि-दप्रणिहितमनसः पुनः पुंसः 'एतद्' गुरुदेवपूजाद्यनुष्ठानं तथाविधसमुदयादिव-शाद्विधीयमानमपि अननुष्ठानमुच्यते-अनुष्ठानमेव न भवतीत्यर्थः । कुत एतदित्याह 'सम्प्रमुग्धं-सं इति सर्वतः प्रकर्षेण मुग्धं सन्निपातोपहतस्येव मोहम[2]नध्यवसा-यमात्ररूपमापन्नं मनः- अन्तःकरणं अस्य-अनाभोगवतः 'इतिः' पादपरिसमाप्तौ । यत एवं 'ततश्च'मनःसम्प्रमोहादेव हेतोः एतत्प्रागुक्तम् 'यथोदितं'-यथा निरूपितं तथैवेति ॥१५८॥

---

१. भवान्तररूपेऽनर्थ-A.C.; २. मनध्यवसायरूप-A.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एतद्रागादिदं हेतुः श्रेष्ठो योगविदो विदुः ।**
**सदनुष्ठानभावस्य शुभभावांशयोगतः ॥१५९॥**

एतद्रागात्-सदनुष्ठानभावबहुमानात् इदं=आदिधार्मिककालभावि देवपूजाद्यनुष्ठानं क्रियमाणम् हेतुः कारणम् श्रेष्ठो-ऽवन्ध्यो वर्तते एतद्योगविदो विदुः-जानते, कस्य हेतुरित्याह 'सदनुष्ठानभावस्य'-तात्त्विकदेवपूजाद्याचारपरिणामस्य । कुत इत्याह 'शुभभावांशयोगतः'- मुक्त्यद्वेषेण मनाग्मुक्त्यनुरागेण वा शुभभावलेशसङ्गमात् ॥१५९॥

**जिनोदितमिति त्वाहुर्भावसारमदः पुनः ।**
**संवेगगर्भमत्यन्तममृतं मुनिपुङ्गवाः ॥१६०॥**

जिनोदितं-जिननिरूपितं 'इति तु' अनेनैवाभिप्रायेण विधीयमानं आहुर्ब्रुवते 'भावसारं'- शुद्धश्रद्धाप्रधानम् । अदोऽनुष्ठानं पुनः तथा संवेगगर्भमन्तः-प्रवेशितनिर्वाणाभिलाषम् अत्यन्तमतीव अमृतममरणहेतुत्वादमृतसंज्ञम् 'मुनिपुङ्गवाः'- गौतमादिमहामुनय इति ॥१६०॥ अथ प्रस्तुतमेवाधिकृत्याह-

**एवं च कर्तृभेदेन चरमेऽन्यादृशं स्थितम् ।**
**पुद्गलानां परावर्ते गुरुदेवादिपूजनम् ॥१६१॥**

एवं चाऽस्मिंश्चानुष्ठानपञ्चविधत्वे स्थिते सति कर्तृभेदेनाऽनुष्ठातृविशेषेण चरमे-ऽपश्चिमे अन्यादृशं-मुक्त्यद्वेषादेः पूर्वपरावर्तकालभाविनो देवादिपूजनाद्विलक्षणम् स्थितं-प्रतिष्ठितम् पुद्गलानां परावर्ते गुरुदेवादिपूजनमुक्तरूपमेवेति ॥१६१॥ एतदेव समर्थयति—

**यतो विशिष्टः कर्तायं तदन्येभ्यो नियोगतः ।**
**तद्योगयोग्यताभेदादिति सम्यग्विचिन्त्यताम् ॥१६२॥**

यतः-यस्मात्कारणात् विशिष्टो-विलक्षणः कर्ता-देवपूजनादीनां अयं चरमावर्तवर्ती जन्तुः तदन्येभ्यः-प्राच्यपरावर्तवर्तिभ्यः कर्तृभ्यः, नियोगतो-नियमेन । कुत इत्याह 'तद्योगयोग्यताभेदात्'-स चासौ योगयोग्यतायाः योगनिमित्तभावस्य भेदो विशेषस्तस्मात् इति-एवम् सम्यग्विचिन्त्यतां-विमृश्यतामिति । पूर्वं ह्येकान्तेन योगाऽयोग्यस्यैव देवादिपूजनमासीच्चरमावर्ते तु समुल्लसितयोगयोग्यभावस्येति चरमावर्तदेवादिपूजनस्यान्यावर्तदेवादि-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पूजनादन्यादृशत्वमिति ॥१६२॥ एतेषु च यच्चरमावर्ते स्यात्तदाह-

**चतुर्थमेतत्प्रायेण ज्ञेयमस्य महात्मनः ।**
**सहजाल्पमलत्वं तु, युक्तिरत्र पुरोदिता ॥१६३॥**

चतुर्थं-तुरीयम्, एतदनुष्ठानं-तद्धेतुनामकं प्रायेण-बाहुल्येन ज्ञेयमस्य चरमावर्तभाज आदिधार्मिकस्य महात्मनः प्रशस्तभावस्य, अनाभोगादिभ्यः कदाचिदन्यथापि स्यादिदमिति प्रायोग्रहणम् । एतदपि कुतः, यतः 'सहजाल्पमलत्वं तु'-सहजो जीवसमानकालभावित्वेनाल्पस्तुच्छो मलो वक्ष्यमाणरूपो यस्य स तथा तद्भावस्तत्त्वं पुनः युक्तिः-हेतुः अत्राऽस्मिन्नर्थे पुरोदिता प्रागुपन्यस्तेति ॥१६३॥ अथ मलमेवाधिकृत्याह-

**सहजं तु मलं विद्यात् कर्मसम्बन्धयोग्यताम् ।**
**आत्मनोऽनादिमत्त्वेऽपि नायमेनां विना यतः ॥१६४॥**

सहजं तु-सहजं पुनः, मलं विद्याज्जानीयात् कामित्याह कर्मसम्बन्धयोग्यतां ज्ञानावरणादिकर्मसंश्लेषनिमित्तभवम् कस्येत्याह आत्मनः-जीवस्य । कुत इत्याह 'अनादिमत्त्वेऽपि' बन्धस्य, न-नैव, अयं-बन्धः, एनां-योग्यतां जीवस्य विना अन्तरेण, यतः-यस्मात्कारणात् । किलानादिमान् भावो गगनादिर्न कञ्चन हेतुं स्वस्वभावलाभेऽपेक्षते, बन्धश्च प्रवाहापेक्षयैवानादिमान्, ततो न जीवयोग्यतामन्तरेणैष[1] उपपद्यते, अन्यथाऽनेकदोषप्रसङ्गात् ॥१६४॥

एतदेव दर्शयति-

**अनादिमानपि ह्येष बन्धत्वं नातिवर्तते ।**
**योग्यतामन्तरेणापि भावेऽस्यातिप्रसङ्गता[2] ॥१६५॥**

अनादिमानपि हि-आदिभूतबन्धकालविकलोऽपि प्रवाहापेक्षया किं पुनर्व्यक्तिमपेक्ष्यादिमानित्यपिहिशब्दार्थः एष बन्धः बन्धत्वं-जीवेन गृह्यमाणकार्मणवर्गणापुद्गलरूपतया कृतकत्वम् नातिवर्तते-ऽतिक्रामति । ततो यो यो बन्धः स स बध्यमानयोग्यतामपेक्षते, यथा वस्त्रकम्बलादीनां मञ्जिष्ठालाक्षादिरागरूपः, बन्धश्च जीवस्य कर्मणः संयोगः, तस्मादवश्यं तयोर्योग्यतामपेक्षत

---

१. णैव A २. प्रसङ्गिता-A.B.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति ।अत्रैव विपक्षे बाधामाह-योग्यतां-योगकषायपरिणतिरूपाम्, अन्तरेणापि-विना 'किं पुनः प्राच्यप्राच्यतरादिबन्धमि'त्यपिशब्दार्थः भावे सत्तायाम् अस्य-बन्धस्याभ्युपगम्यमाने, [1]अतिप्रसंगता-[2]ऽतिव्याप्तेः सत्त्वमिति ॥१६५॥ इदमेव भावयति-

**एवं चानादिमान्मुक्तो योग्यताविकलोऽपि हि ।**
**बध्येत कर्मणा न्यायात् तदन्याऽमुक्तवृन्दवत् ॥१६६॥**

एवं चातिप्रसंगे च सति अनादिमान्मुक्तः-सदाशिवरूपः परपरिकल्पितः किमित्याह 'योग्यताविकलोऽपि हि' प्रस्तुतयोग्यतारहितः किं पुनरतद्युक्त इत्यपिहिशब्दार्थः । बध्येत-पारवश्यमानीयेत, कर्मणा-अदृष्टसंज्ञेन, न्यायात्-योग्यतावैकल्याविशेषलक्षणात् ।दृष्टान्तमाह'तदन्यामुक्तवृन्दवत्'-तस्मादनादिमतो मुक्ताद्यदन्यदमुक्तवृन्दं संसारिजीवलक्षणं तद्वत् ॥१६६॥

**तदन्यकर्मविरहाद् न चेत्तद्बन्ध इष्यते ।**
**तुल्ये तद्योग्यताऽभावे ननु किं तेन चिन्त्यताम् ॥१६७॥**

अत्र परः-तदन्यकर्मविरहात् तस्मात्संप्रतिबद्धुमिष्टाद्यदन्यत्प्राक्कालबद्धं कर्म तद्विरहात्, न चेद्यदि तद्बन्धस्तस्याऽनादिमतो मुक्तस्य बन्ध इष्यतेऽभिमन्यते आचार्यः, तुल्ये समाने सर्वजन्तुषु तद्योग्यताऽभावे कर्मबन्धयोग्यताया विरहे 'ननु' इति परपक्षाक्षमायाम्, किं प्रयोजनं 'तेन'-प्राच्यकर्मबन्धविरहेणोत्तरतया परिकल्पितेन चिन्त्यतां-परिभाव्यतामेतत् ।अयमभिप्रायः-यदि योग्यतामन्तरेणापि शेषसंसारिणां कर्मबन्धोऽभ्युपगम्यते [3]तदाऽनादिमुक्तेऽपि सोऽस्तु, उभयत्रापि योग्यताविरहाऽविशेषात् ॥१६७॥ अथोपसंहरन्नाह-

**तस्मादवश्यमेष्टव्या स्वाभाविक्येव योग्यता ।**
**तस्यानादिमती सा च मलनान्मल उच्यते ॥१६८॥**

तस्मादनादिमुक्तकर्मबन्धप्रसंगाद्धेतोः अवश्यं-नियमेन एष्टव्या 'स्वाभाविक्येव'-स्वभावभूतैव, योग्यता-कर्मबन्धं प्रति तस्यात्मनः अनादिमती-अनादिकालप्रवृत्ता, सा च-योग्यता पुनः मलनात्-जीवस्वभावविष्कम्भणात्,

---

१. अतिप्रसङ्गिता-A.B.C.; २. ऽतिव्याप्तिः-A; ३. तदना-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'मल उच्यत' इति ॥१६८॥ एनामेव तन्त्रान्तरमताविष्करणेन समर्थयमान आह-

**दिदृक्षाभवबीजादिशब्दवाच्या तथा तथा ।**
**इष्टा चान्यैरपि ह्येषा मुक्तिमार्गावलम्बिभिः ॥१६९॥**

पुरुषस्य प्रकृतिविकारान्द्रष्टुमिच्छा 'दिदृक्षा' सांख्यानां, 'भवबीजं' शैवानां, भ्रान्तिरूपाऽविद्या वेदान्तिकानां, अनादिक्लेशरूपा 'वासना' सौगतानां, ततो दिदृक्षाभवबीजादिभिः शब्दैरुच्यते या सा तथा तथा तेन तेन दर्शनभेदप्रकारेण इष्टा चाभिमतैव । अन्यैरप्यस्मद्विलक्षणैः किं पुनरस्माभिरित्यपिहिशब्दार्थः, एषा-कर्मबन्धयोग्यता मुक्तिमार्गावलम्बिभिर्निर्वृतिपुरपथप्रस्थितैरिति ॥१६९॥ एवं सति यत्सिद्धं तदाह-

**एवं चापगमोऽप्यस्याः प्रत्यावर्तं सुनीतितः ।**
**स्थित एव तदल्पत्वे भावशुद्धिरपि ध्रुवा ॥१७०॥**

एवं [1]चास्यां च कर्मबन्धयोग्यतायां सत्याम् 'अपगमोऽपि'-व्यावृत्तिरूपोऽनपगमस्तावदस्त्येवेत्यपिशब्दार्थः अस्या योग्यतायाः, प्रत्यावर्तं प्रतिपुद्गलपरावर्तं नैकस्मिन्नेव चरमावर्त इत्यर्थः 'सुनीतितो'-दोषाणां क्रमह्रासलक्षणात्सन्न्यायात् स्थित एव प्रतिष्ठित एव, ततस्तदल्पत्वे-मलाल्पत्वे 'भावशुद्धिरपि'-परिणति-निर्मलता, किं पुनः प्रत्यावर्तं मलापगम इत्यपिशब्दार्थः ध्रुवा-निश्चिता स्थिता, अन्यथा मलापगमस्यैवाभावादिति ॥१७०॥

**ततः शुभमनुष्ठानं सर्वमेव हि देहिनाम् ।**
**विनिवृत्ताग्रहत्वेन तथाबन्धेऽपि तत्त्वतः ॥१७१॥**

ततो भावशुद्धेः सकाशात्, शुभं श्रेयस्कार्यनुष्ठानं धर्मार्थादिगोचरं 'सर्वमेव' 'हि' स्फुटं देहिनां-शरीरभाजाम् । केनेत्याह 'विनिवृत्ताग्रहत्वेन' व्यावृत्तात्यन्तवितथाभिनिवेशभावेन तथाबन्धेऽपि-तत्प्रकाराल्पाल्पतरबन्धसद्भावे किं पुनस्तस्याप्यभाव इत्यपिशब्दार्थः, तत्त्वतो-निश्चयवृत्त्या जायत इति ॥१७१॥

**नात एवाणवस्तस्य प्राग्वत्संक्लेशहेतवः ।**
**तथान्तस्तत्त्वसंशुद्धेरुदग्रशुभभावतः ॥१७२॥**

---

१. चास्या यावत् कर्म-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न–नैव अत एव–विनिवृत्ताग्रहत्वादेव, अणवो–ज्ञानावरणादिकर्माणवः तस्य चरमपुद्गलपरावर्तवर्तिनो जन्तोः प्राग्वत् प्राच्यपरावर्तेष्विव । संक्लेशहेतवो–मालिन्यनिबन्धना जायन्ते 'तथा' इति हेत्वन्तरसमुच्चये । अन्तस्तत्त्वसं-शुद्धेरन्तस्तत्त्वमात्मा तस्य 'संशुद्धेः'–स्वभावभूतमलक्षयात्, य 'उदग्र' उत्कटः, शुभो भावस्तस्मात् ॥१७२॥ अयं चास्य तथाविधकर्मबन्धो भवन्नपि न तथाविधभयाय सम्पद्यत इति दर्शयन्नाह–

**सत्साधकस्य चरमा समयाऽपि बिभीषिका ।**
**न खेदाय यथात्यन्तं तद्वदेतद्विभाव्यताम् ॥१७३॥**

सत्साधकस्य–तथाविधां विद्यां सम्यक्साधयितुं प्रवृत्तस्य पुंसः चरमा–पर्यन्तवर्तिनी समयापि–सन्निहिताऽपि, बिभीषिका–वेतालादिदर्शनरूपा न खेदाय–श्रमाय यथाऽत्यन्तं–अतीव, तद्वत्साधकचरमबिभीषिकावत् एतच्चरमावर्त-कर्मबन्धरूपवस्तु विभाव्यतां–विमृश्यताम् । विवेकवतां प्रधानानागतव-स्तुप्रतिबन्धाच्चेतस इति ॥१७३॥ दृष्टान्तमेवाधिकृत्याह–

**सिद्धेरासन्नभावेन यः प्रमोदो विजृम्भते ।**
**चेतस्यस्य कुतस्तेन खेदोऽपि लभतेऽन्तरम् ॥१७४॥**

सिद्धेर्विद्याविवशीभावस्य आसन्नभावेन–सन्निहितत्वेन 'यः' कश्चिन्निर्देष्टु-मशक्यः प्रमोदो–हर्षः विजृम्भते–समुच्छलति चेतस्यन्तःकरणे अस्य सत्साधकस्य 'कुतः' कस्माद्धेतोः तेन–प्रमोदविजृम्भणेन 'खेदोऽपि' यः प्रागत्यसद्रूपतयोक्तः, प्रमोदस्तावज्जृम्भत एवेत्यपिशब्दार्थः लभते–प्राप्नोति, अन्तरं–अवकाशमिति ॥१७४॥ अथ दार्ष्टान्तिकमधिकृत्यैतद्विशेषमाह–

**न चेयं महतोऽर्थस्य सिद्धिरात्यन्तिकी न च ।**
**मुक्तिः पुनर्द्वयोपेता सत्प्रमोदास्पदं ततः ॥१७५॥**

न च–नैव इयं–विद्यादिविषया महतो–गरीयसः अर्थस्य–साध्यस्य सिद्धिरुक्तरूपा आत्यन्तिकी–अत्यन्तभवा 'न च', भूत्वापि पुनर्विनाशात् 'मुक्तिः पुनर्द्वयोपेता' महदात्यन्तिकभावयुक्ता 'सत्प्रमोदास्पदं' सतः सर्वातिशायिनः प्रमोदस्य स्थानम् ततो–द्वयोपेतत्वाद्धेतोरिति ॥१७५॥

ननु सन्निहितायां मुक्तौ स्यादेतत्परं तत्सन्निधानमप्यसंभाव्यमित्याशंक्याह–

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**आसन्ना चेयमस्योच्चैश्चरमावर्तिनो यतः ।**
**भूयांसोऽमी व्यतिक्रान्तास्तदेकोऽत्र न किंचन ॥१७६॥**

आसन्ना चाभ्यर्णवर्तिन्येव इयं-मुक्तिः अस्योच्चैरतीव चरमावर्तिनः-चरमपुद्गलपरावर्तभाजो जीवस्य, यतः-कारणात् भूयांसोऽतीवबहवः अमी आवर्ताः व्यतिक्रान्ताः-अनादौ संसारे व्यतीताः । तत्-ततः एकोऽपश्चिमः अत्र-जगति 'न किञ्चन'-न किंचिद्भयस्थानमेष इत्यर्थः ॥१७६॥

**अत एव च योगज्ञैरपुनर्बन्धकादयः ।**
**भावसारा विनिर्दिष्टास्तथापेक्षादिवर्जिताः ॥१७७॥**

'अत एव च'-मुक्त्यासन्नभावादेव च योगज्ञैः-शास्त्रकारैः अपुनर्बन्धकादयो-ऽपुनर्बन्धकसम्यग्दृष्टिचारित्रिणो धर्माधिकारिणः भावसारास्तत्त्वपरिणतिप्रधानाः विनिर्दिष्टाः-प्रज्ञप्ताः,-तथा इति विशेषणसमुच्चये । अपेक्षादिवर्जिता-उक्तरूपापेक्षानाभोगरहिताः ॥१७७॥

अपुनर्बन्धकप्रभृतिकत्वाद्धर्माधिकारिणाम् तमेवादौ व्याचष्टे-

**भवाभिनन्दिदोषाणां प्रतिपक्षगुणैर्युतः ।**
**वर्धमानगुणप्रायो ह्यपुनर्बन्धको मतः ॥१७८॥**

भवाभिनन्दिदोषाणां-"*क्षुद्रो लाभरतिर्दीनो मत्सरी*"(श्लो.८७)त्यादिना प्रागेवोक्तानां प्रतिपक्षगुणैरक्षुद्रतानिर्लोभतादिभिर्युतो 'वर्धमानगुणप्रायो'-वर्धमाना शुक्लपक्षक्षपापतिमण्डलमिव प्रतिकलमुल्लसन्तो गुणा औदार्यदाक्षिण्यादयः प्रायो बाहुल्येन यस्य स तथा, अपुनर्बन्धको-धर्माधिकारी मतोऽभिप्रेतः ॥१७८॥

**अस्यैषा मुख्यरूपा स्यात् पूर्वसेवा यथोदिता ।**
**कल्याणाशययोगेन शेषस्याप्युपचारतः ॥१७९॥**

अस्या-ऽपुनर्बन्धकस्य, एषा-प्रागुक्ता, मुख्यरूपा-निरुपचरिता स्याद् भवेत् पूर्वसेवा देवादिपूजारूपा यथोदिता यत्प्रकारा निरूपिता प्राक् कल्याणाशययोगेन-मनाग् मुक्त्यनुकूलशुभभावसम्बन्धेन, शेषस्यापि-अपुनर्बन्धकापेक्षया विलक्षणस्य सकृद्बन्धकादेः उपचारत-औपचारिकी पूर्वसेवा स्यात्,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अद्यापि तथाविधभववैराग्याभावात्तस्य ।

इह केचिन्मार्गपतितमार्गाभिमुखावपि शेषशब्देनाहुः । तच्च न युज्यते, अपुनर्बन्धकावस्थाविशेषरूपत्वात्तयोरपुनर्बन्धकग्रहणेनैव गतत्वात्, यतो **ललितविस्तरायां** मार्गलक्षणमित्थमुक्तम्-'इह *मार्गश्चेतसोऽवक्रगमनं* [1]*भुजंगमनलिकायानतुल्यो विशिष्टगुणस्थानावाप्तिप्रगुणः स्वरसवाही क्षयोपशमविशेष इति, तत्र प्रविष्टो मार्गपतितः, मार्गप्रवेशयोग्यभावापन्नो मार्गाभिमुखः ।*' एवं च नैतावपुनर्बन्धकावस्थायाः [2]पर-परतरावस्थाभाजौ वक्तुमुचितौ, भगवदाज्ञावगमयोग्यतया **पञ्चसूत्रकवृत्तावनयोरुक्तत्वात्** । यथोक्तं तत्र-" *इयं च भागवती सदाज्ञा सर्वैवापुनर्बन्धकादिगम्या । अपुनर्बन्धकादयो ये सत्त्वा उत्कृष्टां कर्मस्थितिं तथाऽपुनर्बन्धकत्वेन क्षपयन्ति, ते खल्वपुनर्बन्धकाः । आदिशब्दान्मार्गपतित-मार्गाभिमुखादयः परिगृह्यन्ते, दृढप्रतिज्ञालोच-नादिगम्यलिंगाः (लिङ्गगम्याः) ।*" एतद्गम्येयं न संसाराभिनन्दिगम्येति । संसाराभिनन्दिनश्चापुनर्बन्धकप्रागवस्थाभाजो जीवा इति ॥१७९॥

ननूपचरितं वस्त्वेव न भवति, तत्कथमुपचारतः शेषस्य पूर्वसेवा स्यादित्याशंक्याह-

**कृतश्चास्या उपन्यासः शेषापेक्षोऽपि कार्यतः ।**
**नासन्नोऽप्यस्य बाहुल्यादन्यथैतत्प्रदर्शकः ॥१८०॥**

कृतश्च-कृतः पुनरिह अस्याः पूर्वसेवायाः उपन्यासः-प्रज्ञापनारूपः शेषापेक्षोऽपि-अपुनर्बन्धकभावासन्नजीवानाश्रित्य कार्यतो-भाविनीं भावरूपां पूर्वसेवामपेक्ष्य 'नड्वलोदकं पादरोग' इत्यादिदृष्टान्तात्, [3]यतः न-नैव आसन्नोऽपि-समीपवर्त्त्यपि जीवः, अस्याऽपुनर्बन्धकभावस्य किं पुनरयमेवेत्यपि शब्दार्थः, बाहुल्यात्प्रायेण अन्यथाऽपुनर्बन्धा(बन्धका)चारविलक्षणो वर्तत इति एतस्यार्थस्य प्रदर्शको-ख्यापकः । न हि मृत्पिण्डादि कारणं कार्याद्घटादेर्बाहुल्येन वैलक्षण्यमनुभवद् दृश्यते, किं तु कथंचित्तुल्यरूपतामिति ॥१८०॥

इदमेवाधिकृत्याह-

---

१. भुजग-A.B.C.; २. परतरा-A.B.C.; ३. यः स-A.B.C

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**शुद्ध्यल्लोके यथा रत्नं जात्यं काञ्चनमेव वा ।**
**गुणैः संयुज्यते चित्रैस्तद्वदात्मापि दृश्यताम् ॥१८१॥**

शुद्ध्यच्छुद्धिमनुभवत्क्षारमृत्पुटपाकादिसंयोगेन लोके-व्यवहारार्हजनमध्ये यथा रत्नं-पद्मरागादि जात्यं-अकृत्रिमम् 'काञ्चनमेव वा'-चामीकरं वा, गुणैः-कान्त्यादिभिः संयुज्यते-संश्लिष्यति चित्रैर्नानाविधैस्तदुचितैः, तद्वद्रत्नकाञ्चनवत् आत्मापि-जीवः शुद्ध्यत्, किं पुना रत्नकाञ्चनं इत्यपिशब्दार्थः, दृश्यतां ऊहापोहचक्षुषावलोक्यतामिति ॥१८१॥ अत्रैव मतान्तरमाह-

**तत्प्रकृत्यैव शेषस्य केचिदेनां प्रचक्षते ।**
**आलोचनाद्यभावेन तथानाभोगसङ्गताम् ॥१८२॥**

सा वक्ष्यमाणविशेषणानुरूपा या प्रकृतिः स्वभावस्तया 'शेषस्य'-सकृद्बन्धकादेः केचिच्छास्त्रकाराः एनां पूर्वसेवां प्रचक्षते-व्याकुर्वते, न पुनः सर्वे, कीदृशीमित्याह 'आलोचनाद्यभावेन'-आलोचनस्योहस्यादिशब्दादपोहस्य च निर्णयस्य मार्गविषयस्याभावेन, 'तथानाभोगसङ्गतां' तथा तत्प्रकारः कथंचिदपि भवस्वरूपाऽनिर्णायको योऽनाभोग उपयोगाभावस्तत्सङ्गतां, पूर्वं कारणभावेनोपचरितत्वमुक्तमत्र चानाभोगद्वारेणेति ॥१८२॥

एतदेव समर्थयमान आह-

**युज्यते चैतदप्येवं तीव्रे मलविषे न यत् ।**
**तदावेगो भवासङ्गस्तस्योच्चैर्विनिवर्तते ॥१८३॥**

'युज्यते च'-घटत एव एतदप्यनन्तरोक्तं वस्तु, किं पुनः परंपरोक्तमित्यपिशब्दार्थः 'एवं'-यथा केचित्प्रचक्षते । अत्र हेतुः-तीव्रेऽत्यन्तमुत्कटे, मलविषे कर्मबन्धयोग्यतालक्षणे न-नैव यद्-यस्मात् तदावेगो-मलविषावेगः किंरूप इत्याह भवासङ्गः-संसारप्रतिबन्धः तस्य-शेषजीवस्य उच्चैः-अत्यन्तं विनिवर्तते । मनागपि हि तन्निवृत्तौ तस्याऽपुनर्बन्धकत्वमेव स्यादित्यौपचारिक्येव शेषस्य पूर्वसेवेति स्थितम् ॥१८३॥

अथ यां प्रकृतिमाश्रित्य पूर्वसेवा स्यात्तां तद्विपर्ययं चाह-

**संक्लेशाऽयोगतो भूयः कल्याणाङ्गतया च यत् ।**
**तात्त्विकी प्रकृतिर्ज्ञेया तदन्या तूपचारतः ॥१८४॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'संक्लेशाऽयोगतो भूयः'-पुनरपि तीव्रसंक्लेशाऽयोगेन कल्याणांगतया चोत्तरोत्तरभववैराग्यादिकल्याणनिमित्त[1]भावेन च यद्यस्माद्वर्तते या सा तस्मात्तात्त्विकी-वास्तवरूपा, प्रकृतिः-स्वभावलक्षणा धर्मार्हजीवस्य ज्ञेया । तदन्या तु-तस्या अन्या पुनः प्रकृतिः 'उपचारतः'-उपचरितरूपा, तात्त्विकप्रकृतिविलक्षणत्वात्तस्याः ॥१८४॥

**एनां चाश्रित्य शास्त्रेषु व्यवहारः प्रवर्तते ।**
**ततश्चाधिकृतं वस्तु नान्यथेति स्थितं ह्यदः ॥१८५॥**

एनां चैनामेव तात्त्विकीं प्रकृतिं आश्रित्यापेक्ष्य 'शास्त्रेषु'-योगप्रतिबद्धेषु 'व्यवहारः'-पूर्वसेवादिः 'प्रवर्तते'-प्रज्ञापनीयतामेति 'ततश्च'-तस्मादेव हेतोः 'अधिकृतं' पूर्वसेवालक्षणं 'वस्तु'-तात्त्विकम् नान्यथा-ऽपुनर्बन्धकं व्यतिरिच्य इति 'स्थितं'-प्रतिष्ठितम् हि-स्फुटम् 'अदः' एतत् ॥१८५॥

**शान्तोदात्तत्वमत्रैव शुद्धानुष्ठानसाधनम् ।**
**सूक्ष्मभावोहसंयुक्तं तत्त्वसंवेदनानुगम् ॥१८६॥**

'शान्त'स्तथाविधेन्द्रियकषायविकारविकलः, 'उदात्त' उच्चोच्चतराद्याचरणस्थितिबद्धचित्तः, ततः शान्तश्चासावुदात्तश्च शान्तोदात्तस्तस्य भावस्तत्त्वम् 'अत्रैव'-प्रोक्तप्रकृतौ सत्यां जायते 'शुद्धानुष्ठानसाधनं'-[2]निरवद्याचरणकारणम् । तथा 'सूक्ष्मभावोहसंयुक्तं'-बन्धमोक्षादिनिपुणभावपर्यालोचनयुतम् । अत एव 'तत्त्वसंवेदनानुगं'-तत्त्वसंवेदनसंज्ञितज्ञानविशेषसमन्वितम् ॥१८६॥

ततः

**शान्तोदात्तः प्रकृत्येह, शुभभावाश्रयो मतः ।**
**धन्यो भोग[3]सुखस्येव, वित्ताढ्यो रूपवान् युवा ॥१८७॥**

'शान्तोदात्त' उक्तरूपः 'प्रकृत्या' स्वभावेन इह-जने 'शुभभावाश्रयः'-परिशुद्धचित्तपरिणामस्थानम् 'मतो' जन्तुः । अत्र दृष्टान्तमाह धन्यः-सौभाग्यादेयतादिना धनार्हः 'भोग[3]सुखस्येव'-शब्दरूपरसगन्धस्पर्शसेवालक्षणस्य यथाऽऽश्रयः वित्ताढ्यो-विभवनायकः 'रूपवान्'-शुभशरीरसंस्थानः 'युवा'-

१. भावेन वा-A; २. निरवद्याचार-A.B.C.; ३. सुखस्येह-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तरुण: पुमान् ॥१८७॥ एतदेव व्यतिरेकत आह–

**अनीदृशस्य [1]च यथा, न भोगसुखमुत्तमम् ।**
**अशान्तादेस्तथा शुद्धं, नाऽनुष्ठानं कदाचन ॥१८८॥**

'अनीदृशस्य [2]च'-धन्यादिविशेषणविकलस्य पुन: 'यथा न भोगसुखं' शब्दादिविषयानुभवलक्षणम् 'उत्तमं'-प्रकृष्टम् । अशान्तादेरशान्तस्यानुदात्तस्य च तथा-भोगसुखवत् शुद्धं-निर्वाणावन्ध्यबीजकल्पं नाऽनुष्ठानं देवपूजनादि । 'कदाचन'-क्वचिदपि काले ॥१८८॥ तर्हि किं [3]स्यादित्याशंक्याह–

**मिथ्याविकल्परूपं तु, द्वयोर्द्वयमपि स्थितम् ।**
**स्वबुद्धिकल्पनाशिल्पिनिर्मितं न तु तत्त्वत: ॥१८९॥**

'मिथ्याविकल्परूपं तु'-मरुमरीचिकादिषु मुग्धमृगादीनां जलादिप्रतिभासाकारं पुन:, द्वयोरुक्तविलक्षणयोर्भोगिधार्मिकयो: द्वयमपि-भोगसुखानुरूपं किं पुनरेकैकमित्यपिशब्दार्थ: 'स्थितं'-प्रतिष्ठितम् । किमुक्तं भवति 'स्वबुद्धिकल्पनाशिल्पिनिर्मितम्'-स्वबुद्धिकल्पना-स्वच्छन्दमतिविकल्परूपा सैव 'शिल्पी'-वैज्ञानिकस्तेन निमि घटितम् । न तु-न पुन: तत्त्वत:-परमार्थत: तद्भोगसुखं धर्मानुष्ठानं चेति ॥१८९॥ [4]तद्भावनार्थमाह–

**भोगाङ्गशक्तिवैकल्यात्, दरिद्राऽयौवनस्थयो: ।**
**सुरूपरागाशङ्के च, कुरूपस्य स्वयोषिति ॥१९०॥**

इह भोगाङ्गानि रूपादीनि वात्स्यायनोक्तानि । यदाह ***वात्स्यायन:***- *"रूपवयोवैचक्षण्यसौभाग्यमाधुर्यैश्वर्याणि भोगसाधनम् इति, तत्रापि रूपवयोवित्ताढ्यत्वानि प्रधानानि इति ।"* एतदेव त्रितयमपेक्ष्याह-भोगाङ्गशक्तिवैकल्यात् भोगाङ्गानां रूपादीनां [5]शक्तेर्भोगासेवनलक्षणाया वैकल्यमभाव: ॥ दरिद्राऽयौवनस्थयोर्दरिद्रस्य भोगाङ्गविरहोऽयौवनस्थस्य त्वशक्तिरिति ।'सुरूपरागाशङ्के च'-सुरूपे भोक्तुमारब्धे स्त्रीगते सुन्दरे संस्थाने रागोऽभिष्वङ्गातिरेक:, आशङ्का च स्त्रीगतानुरागसन्देहरूपा तस्मिन्, तत: सुरूपरागश्चाशङ्का च सुरूपरागाशङ्के

---

१. तु-A; २. 'च' A.B.C. प्रतिषु नास्ति ३. स्यादित्याह-A.B.; ४. एतद्भावनार्थमाह-A.B.C.;
५. शक्तेश्चभोगा-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुनः 'कुरूपस्य' तु पुंसः 'स्वयोषिति' स्वस्त्रियामिति ॥१९०॥ ततश्च-

**अभिमानसुखाऽभावे, तथा क्लिष्टान्तरात्मनः ।**
**अपायशक्तियोगाच्च, न हीत्थं भोगिनः सुखम् ॥१९१॥**

अभिमानसुखाभावे-'ऽहं सुखी'त्येवं चित्तप्रतिपत्तिरूपलक्षणस्याभिमानसुखस्याभावे सति 'तथा' इति विशेषणसमुच्चये, क्लिष्टान्तरात्मनो-ऽपूर्यमाणेच्छत्वेन साबाधचित्तस्य अपायशक्तियोगाच्च-अपायस्य निर्वाहशरीरव्यवच्छेदरूपस्य दरिद्राऽयौवनस्थयोः कुरूपस्य वा रुचिमत्स्त्रीकृतोच्चाटनादेर्या शक्तिर्योग्यता तस्या योगात्सम्बन्धात्, चः समुच्चये, किमित्याह न हि-नैव, इत्थं-अनाढ्यत्वादिविशिष्टस्य, 'भोगिनः सुखं' भोगजं यद्विचक्षणैर्मृग्यत इति ॥१९१॥ यथा च तद्भोगसुखमनुष्ठानं च दृष्टान्तदार्ष्टन्तिकभावेन स्यातां तथाह-

**अतोऽन्यस्य तु धन्यादेरिदमत्यन्तमुत्तमम् ।**
**यथा तथैव शान्तादेः, शुद्धानुष्ठानमित्यपि ॥१९२॥**

अतः-प्रागुक्ताद् भोगिनः सकाशात् 'अन्यस्य तु'-अन्यप्रकारभाजः पुनः धन्यादेरुक्तरूपस्य भोगिनः । इदं-भोगसुखम् अत्यन्तमुत्तमं शेषभोगसुखातिशायि यथा स्यात् तथैव 'शान्तादेः'-शान्तोदात्तप्रकृतेः 'अनुष्ठानं' प्रस्तुतम् 'इत्यपी'दमपि ज्ञेयमिति ॥१९२॥

एवं सति यत्स्यात्तदाह-

**क्रोधाद्यबाधितः शान्तः उदात्तस्तु महाशयः ।**
**शुभानुबन्धिपुण्याच्च, [1]विशिष्टमतिसङ्गतः ॥१९३॥**

क्रोधाद्यबाधितः शान्तः, उदात्तस्तूदात्तः पुनः महाशयो-गाम्भीर्यादिगुणोपेतत्वेन महाचेताः 'शुभानुबन्धिपुण्याच्च'-पुण्यानुबन्धिनः पुण्यात्सकाशात्पुनः 'विशिष्टमतिसङ्गतो'-मार्गानुसारिप्रौढप्रज्ञानुगतः सन् ॥१९३॥ किमित्याह-

**ऊहतेऽयमतः प्रायो, भवबीजादिगोचरम् ।**
**कान्तादिगतगेयादि, तथा भोगीव सुन्दरम् ॥१९४॥**

---

१. विशिष्टगुणसङ्गतः-C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'ऊहते'-वितर्कयति अयं अपुनर्बन्धकः अतो विशिष्टमतिसाङ्गत्यात् 'प्रायो'-बाहुल्येन । कथमित्याह 'भवबीजादिगोचरं'-भवबीजं-भवकारणम् आदिशद्वात् भवस्वरूपं भवफलं च गृह्यते । यथा "*एस णं अणाइ जीवे अणाइ जीवस्स भवे अणाइकम्मसंयोगनिव्वत्तिए दुक्खरूवे दुक्खफले दुक्खाणुबन्धित्ति*" (पंचसूत्र १) । ततो भवबीजादिगोचरो यत्र तत्तथा, क्रियाविशेषणमेतत्, अथवा भवबीजादि-गोंचरोविषय ऊहनीयतया भवबीजादिगोचरस्तम् । अत्र दृष्टान्तः कान्तादिगतगेयादि कान्ता-वल्लभा आदिशब्दात्तदन्य[1]गायनादिग्रहः, तद्गतं-तत्प्रतिबद्धं यद्गेयं गीतम्, आदिशब्दाद्रूपरसादिशेषेन्द्रियविषयग्रहः । तथा-तत्प्रकारो गेयाद्यूहयोग्यः भोगी, स इव सुन्दरं मनोहारीन्द्रियविषयस्थानमागतमिति, यथा विचक्षणो भोगी सुन्दरं कान्तादिगतगेयाद्यूहते, तथाऽयं भवबीजादिकमिति भावः ॥१९४॥

यथोहते तथैवाह-

**प्रकृतेर्भेदयोगेन, नासमो नाम आत्मनः ।**
**हेत्वभेदादिदं चारु, न्यायमुद्रानुसारतः ॥१९५॥**

प्रकृतेः-परपरिकल्पितायाः सत्त्वरजस्तमोरूपायाः, स्वप्र[2]क्रियया ज्ञानावरणादिलक्षणायाः भेदयोगेनैकान्तेनैव भेदेनेत्यर्थः न-नैव असमो-विसदृशो, नामः-परिणामश्चैतन्यश्रद्धानोन्मीलनादिकः प्रत्यक्षत एवोपलभ्यमानः, आत्मनो-जीवस्य स्यात्, किं तु सर्वजीवानां सर्वदैव सम एव प्राप्नोति, कुत इत्याह हेत्वभेदात्-हेतोः प्रकृतिलक्षणस्याऽभेदात् अनानात्वात्, न ह्यभिन्ने हेतौ क्वचिदपि फलभेद उपपद्यत इति कृत्वा, इदमेकान्तेनैव प्रकृतिभेदेषु आत्मनः परिणामवैसादृश्यासाङ्गत्यलक्षणं वस्तु चारु सङ्गतं वर्तते । कुत इत्याह 'न्यायमुद्रानुसारतः'-न्यायस्य न्याय एव वा मुद्रा कृतप्रयत्नैरपि परैरनुल्लङ्घनीयत्वाद्राजादिमुद्रावत्तस्या अनुसारतोऽनुवर्तनात् । तथाहि-यदि प्रकृतिभेदे सत्यपि परिणामनानात्वमात्मन इष्यते, तदा मुक्तानामपि प्राप्नोति, संसारिणां मुक्तानामपि च प्रकृतिभेदाऽविशेषात् ॥१९५॥

---

१. गाथकादिग्रहः-A; २. क्रियया च ज्ञाना-A.B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवं च सर्वस्तद्योगादयमात्मा तथा तथा ।**
**भवे भवेदतः सर्वप्राप्तिरस्याऽविरोधिनी ॥१९६॥**

एवं च-प्रकृतिभेद आत्मनः परिणामनानात्वसांगत्ये सति, पुनः किं स्यादित्याह 'सर्वः'-निरवशेषः, 'तद्योगात्'-प्रकृतिसंयोगात्कथंचिदैक्यापत्तिलक्षणात्, 'अयं'-अपुनर्बन्धकाद्यवस्थाभाक् 'आत्मा'-जीवः 'तथा तथा'-नरनारकादिपर्यायभाक्त्वेन, भवे-संसारे 'भवेत्'-स्यात् 'अतः'-तथा तथा भवनात् 'सर्वप्राप्तिः'-संसारापवर्गावस्थालाभरूपा 'अस्य'-आत्मनः 'अविरोधिनी'-अविघटमाना सम्पद्यते।[1]प्रकृतियोगात्तस्य संसारावस्था विप्रयोगाच्च मुक्तावस्थेति भावः ॥१९६॥

**सांसिद्धिकमलाद् यद्वा, न हेतोरस्ति सिद्धता ।**
**तद्भिन्नं यदभेदेऽपि, तत्कालादिविभेदतः ॥१९७॥**

सांसिद्धिकमलात्-कर्मबन्धयोग्यतालक्षणादनादिस्वभावात्, सांसिद्धिकमलं परिहृत्येत्यर्थः, 'यद्वा' इत्यूहस्यैव पक्षान्तरसूचकः न-नैव हेतोरन्यस्येश्वरानुग्रहादेः, परिणामचित्रतायां साध्यायां 'सिद्धता'-प्रमाणप्रतिष्ठितता ।

ईश्वरो ह्यप्रतिस्खलितवैराग्यवान्, यतः पठ्यते-"*ज्ञानमप्रतिघं यस्य, वैराग्यं च जगत्पतेः । ऐश्वर्यं चैव धर्मश्च, सहसिद्धं चतुष्टयम् ॥१॥*" ततः कथमसौ कंचनानुगृह्णीयान्निगृह्णीयाद्वा ? किं चासौ योग्यतामपेक्ष्य प्रवर्तत इतरथा वेति द्वयी गतिः। किं चातः? यदि प्रथमः पक्षः, तदा सैव योग्यता हेतुः, किमीश्वरानुग्रह-निग्रहाभ्याम् ? अथेतरथा, तदा सार्वत्रिकावेवानुग्रहनिग्रहौ स्यातां न वा क्वचित्, निमित्ताभावात् । यतः पठ्यते-"*नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणात् । अपेक्षातो हि भावानां, कादाचित्कत्वसम्भवः* ॥१॥" (प्र. वार्तिक ३-३४) इति सांसिद्धिकमलमेवात्मनां परिणामवैचित्र्यहेतुः ।

अत्र हेतुः तत्-सांसिद्धिकमलम् 'भिन्नं'-नानारूपम् यद्यस्मात्कारणात् 'अभेदेऽपि'-कथंचित्सामान्यरूपतया, एतदपि कुत इत्याह 'तत्कालादिविभेदतः'-ते शास्त्रान्तरप्रसिद्धा ये कालादयः कालस्वभावनियतिपूर्वकृतपुरुषकारलक्षणा हेतवः सर्वजगत्कार्यजनकाः, तेषां विभेदतो वैसदृश्यात् । इदमुक्तं भवति-

---

१. प्रकृतियोगात् तास्ताः-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'कालादिभेदात्तत्सांसिद्धिकं मलमात्मना सह भेदाभेदवृत्ति सद्यतो नानारूपं वर्तते, ततस्तद्वशादेव परिणामवैचित्र्यमात्मनामनुपचरितमेवोपपद्यते न पुनरीश्वरानुभावात्, प्रागुक्तयुक्त्या तस्य निराकृतत्वात्' इति वा चिन्तयत्यसाविति ॥ १९७ ॥ इदमेव समर्थयति–

**विरोधिन्यपि चैवं स्यात्, तथा लोकेऽपि दृश्यते ।**
**स्वरूपेतरहेतुभ्यां, भेदादेः फलचित्रता ॥१९८॥**

'विरोधिन्यपि च' विघटमानैव च 'सर्वार्थप्राप्तिः' इत्यनुवर्तते, न पुनः कथंचिदपि अविरोधिनी 'एवं'–सांसिद्धिकमलादन्यहेत्वभ्युपगमे सति, 'स्याद्'–भवेत् । यथा च विरोधिनी सर्वप्राप्तिः, तथाऽनन्तरमेव दर्शितेति । 'तथा' इति हेत्वन्तरसमुच्चये ।'लोकेऽपि'–शास्त्रे तावद्दर्शितैवेत्यपिशब्दार्थः 'दृश्यते'–विलोक्यते 'स्वरूपेतरहेतुभ्यां'–स्वरूपहेतुः परिणामिकारणम् यथा मृद् घटस्य, इतरः पुनर्निमित्तहेतुर्यथा तस्यैव चक्रचीवरादि, ताभ्यां–तावाश्रित्येत्यर्थः । भेदादेः–भेदादभेदाच्च यथायोगं सम्बन्धात्स्वरूपहेतुमपेक्ष्याभेदादितरापेक्षया च भेदात्, किमित्याह 'फलचित्रता–' कार्याणां नानारूपता ।

यदि हि मृन्मात्रहेतुक एव घटः स्यात्तदा सर्वघटानां मृन्मयत्वाऽविशेषादेकाकारतैव स्यात्, तथा बाह्यमात्रनिमित्तत्वे परिणामिकारणविरहेण कूर्मरोमादेरिव न कस्यचित्कार्यस्योत्पत्तिः स्यादिति स्वरूपेतरहेतू समाश्रित्याऽभेदवृत्त्या (भेदवृत्त्या) च कार्यमुत्पद्यमानं चित्ररूपतां प्रतिपद्यते । [1]एवं सांसिद्धिके मले सर्वजीवानां परिणामिकारणे सति तत्कालादिबाह्यकारणसव्यपेक्षतायां चित्रकर्मबन्धकानां नानापरिणामप्राप्त्या सर्वो लोकः शास्त्रप्रसिद्धो नरनारकादिपर्यायः, तद्ह्रासात्पुनरपुनर्बन्धकत्वादि यावत् सर्वक्लेशप्रहाणिलक्षणा मुक्तिरिति सर्वमनुपचरितमुपपद्यत इत्यूहत इति ॥१९८॥ ततः किमित्याह–

**एवमूहप्रधानस्य, प्रायो मार्गानुसारिणः ।**
**एतद्वियोगविषयोऽप्येष सम्यक् प्रवर्तते ॥१९९॥**

एवमुक्तरूपेण ऊहप्रधानस्य–वितर्कसारस्य प्रायो–बाहुल्येन 'मार्गानुसारिणो'– निर्वाणपथानुकूलस्य, अपुनर्बन्धकत्वेन क्वचिदन्यथापि प्रवृत्तिरस्य

१. एवं च–A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्यादिति प्रायोग्रहणम्, एतद्वियोगविषयोऽप्यात्मना सह प्रकृतिवि[1]घटनगोचरः किं पुनर्भवबीजादिगोचर इत्यपिशब्दार्थः 'एष' ऊहः सम्यगूहनीयार्थाऽव्यभिचारी प्रवर्तते-समुन्मीलति । इदमुक्तं भवति-यथा भवबीजादिगोचरमतिनिपुणमूहते, तथा [2]क्रमेणात्मनः कर्मणा वियोगो घटत एवमप्यूहत इति ॥१९९॥ एवं सति यत्सिद्धं तदाह-

**एवंलक्षणयुक्तस्य प्रारम्भादेव चापरैः ।**
**योग उक्तोऽस्य विद्वद्भिर्गोपेन्द्रेण यथोदितम् ॥२००॥**

'एवंलक्षणयुक्तस्य'-पूर्वोक्तोहगुणसमन्वितस्य 'प्रारम्भादेव'-प्रारम्भमेव पूर्वसेवालक्षणमाश्रित्य अपरैस्तीर्थान्तरीयैः 'योगो' वक्ष्यमाणनिरुक्तः, उक्तोऽस्या-ऽपुनर्बन्धकस्य विद्वद्भिः-विचक्षणैः । गोपेन्द्रेण-योगशास्त्रकृता 'यथोदितं'-यत्प्रकारमिदं वस्तु तथोदितमिति ॥२००॥ तदेव दर्शयति-

**योजनाद्योग इत्युक्तो, मोक्षेण मुनिसत्तमैः ।**
**स निवृत्ताधिकारायां, प्रकृतौ लेशतो ध्रुवः ॥२०१॥**

योजनाद्-घटनात् 'मोक्षेण' इत्युत्तरेण सम्बन्धः, योग इति अस्माद्धेतोः, उक्तो मुनिसत्तमैः-ऋषिपुङ्गवैः । स योगः 'निवृत्ताधिकारायां'-व्यावृत्तपुरुषाभिभवायां प्रकृतौ 'लेशतः'-किंचिद्वृत्त्या 'ध्रुवो'-निश्चितः ॥२०१॥ कीदृश इत्याह-

**वेलावलनवन्नद्यास्तदापूरोपसंहृतेः ।**
**प्रतिस्रोतोनुगत्वेन, प्रत्यहं वृद्धिसंयुतः ॥२०२॥**

'वेलावलनवद्' वेला-जलवृद्धिस्तस्या वलनं-व्यावृत्तिस्तद्वत् नद्या गंगादिकायाः, कुतो य(त)द्वलनमित्याह तदापूरोपसंहृतेः-महासमुद्रक्षोभेण यस्तस्या नद्या आपूरः-आपूरणं तस्योपसंहृतेः-उपसंहारात्, निवृत्तप्रकृत्यधिकारस्य पुंसः, प्रतिस्रोतोनुगत्वेन हेतुना, "इन्द्रियकषायानुकूला वृत्तिरनुस्रोतस्तत्प्रतिकूला तु प्रतिस्रोतः", ततः प्रतिस्रोतोऽनुगच्छति यः स प्रतिस्रोतोनुगः, तद्भावस्तत्त्वं तेन । किमित्याह प्रत्यहं प्रतिदिवसं 'वृद्धिसंयुतः' वृद्धिमनुभवन् । यथा

---
१. निघटनागोचरः-A; २. कथमस्यात्मनः-A. C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नद्या आपूरोपसंहाराद्वेलावलनं प्रत्यहं [1]प्रवर्तते, तथा प्रतिस्रोतोनुगामित्वा-न्निवृत्तप्रकृत्यधिकारस्य योग इति भावः ॥२०२॥

द्रव्यत एवायं योग इत्यर्थाद्दर्शयन्नाह-

**भिन्नग्रन्थेस्तु यत्प्रायो, मोक्षे चित्तं भवे तनुः ।**
**तस्य तत्सर्व एवेह, योगो योगो हि भावतः ॥२०३॥**

भिन्नग्रन्थेस्तु-विदारितातितीव्ररागद्वेषपरिणामस्य पुंसः पुनः यद् यस्मात् प्रायो बहून्वारान् मोक्षे-[2]निवृत्तौ चित्तं-अन्तःकरणम् । तथा [3]भवे भवकृत्येष्वित्यर्थः तनुः-शरीरं वर्तते, तस्य-भिन्नग्रन्थेः । तत्तस्मात् 'सर्व एवेह' योगविचारे, धर्मार्थादिगोचरो योगो-व्यापारः । किमित्याह 'योगो हि' योग एव सम्यग्दर्शनादिरूपः, 'भावतः'-निश्चयवृत्त्या, ''चित्तानुरूपफलत्वात्सर्वव्यापाराणा-मिति मोक्षाकांक्षाऽक्षणिकचित्तस्य सम्यग्दृष्टेर्या या चेष्टा सा सा मोक्षप्राप्तिपर्यवसानफला' इत्युपपद्यत एवास्य भावतो योग इति ॥२०३॥ एतदेव दृष्टान्ततो भावयन्नाह-

**नार्या यथान्यसक्तायास्तत्र भावे सदा स्थिते ।**
**तद्योगः पापबन्धश्च, तथा मोक्षेऽस्य दृश्यताम् ॥२०४॥**

नार्यास्तथाविधायाः [4]स्त्रियः 'यथा' इति दृष्टान्तार्थः 'अन्यसक्ताया'-अन्यस्मिन्स्वभर्तुः पुरुषान्तरे रिरंसातिरेकात्प्रतिबद्धचित्तायाः सम्बन्धिनि तत्रा-ऽन्यस्मिन्, भावे-मनःपरिणामे सदा-सर्वकालम् 'स्थिते' आरूढे सति किमित्याह-'तद्योगः' तस्मिन्-अनुरागविषये पुरुषे 'योगो'-व्यापारः, स्वभर्तृशुश्रूषणादिकोऽपि तथा 'पापबन्धो' जायते, भावतः परपुरुषपरिभोगजन्यः । चः पूर्ववत् 'तथा' इति दार्ष्टान्तिकार्थः, 'मोक्षे'-मोक्षविषये, अस्य-भिन्नग्रन्थेः, कुटुम्बचिन्तना-दिकोऽपि व्यापारो योगो निर्जराफलश्च 'दृश्यतां' विमृश्यतामिति ॥२०४॥ इदमेव भावयन्नाह-

**न चेह ग्रन्थिभेदेन, पश्यतो भावमुत्तमम् ।**
**इतरेणाकुलस्यापि, तत्र चित्तं न जायते ॥२०५॥**

---

१. प्रवर्धते-A; २. निर्वृतौ-C.; ३. भवकृत्ये इत्यर्थः-A; ४. स्त्रियाः-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न चेह-नैवेह ग्रन्थिभेदेनोक्तरूपग्रन्थिविघटनेन पश्यतो-निरीक्षमाणस्य, भावं-पदार्थम् उत्तमं-मोक्षरूपम् किमित्याह इतरेण-पुत्रकलत्रप्रतिबन्धादिरूपेण भावेन, आकुलस्यापि-दुर्निवारतया कर्मपरिणतेराक्षिप्यमाणस्य, किं पुनरनाकुलस्येत्यपिशब्दार्थः तत्रोत्तमभावे चित्तमन्तःकरणं, न जायते, किं तु जायत एवोत्तमभावदर्शनस्य, अन्यथा तत्त्वाऽयोगादिति ॥२०५॥ ननु किमनेन मोक्षचित्तेन येन भिन्नग्रन्थेर्भावतो योग उच्यते, क्रियाया एव फलदानप्रत्यलत्वात्, यतः पठ्यते "*क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम् । यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात्सुखितो भवेत् ॥१॥*" इत्याशंक्याह-

**चारु चैतद्यतो ह्यस्य, तथोहः सम्प्रवर्तते ।**
**एतद्वियोगविषयः शुद्धानुष्ठानभाक् स यत् ॥२०६॥**

चारु च-सुन्दरमेव एतद्-मोक्षचित्तमभिलाषरूपम् यतो-यस्मात् । हिस्फुटम् अस्य-भिन्नग्रन्थेः तथा-तत्प्रकारः, ऊहो-विमर्शः सम्प्रवर्तते-स्वयमेव जायते, एतद्वियोगविषयो-भवपार्थक्यगोचरः । तथा शुद्धानुष्ठानभाक् परिशुद्धशुश्रूषा-धर्मरागादिसमाचारभाक् स भिन्नग्रन्थिर्जीवः यद्-यस्माद्वर्तत इति ॥२०६॥ [1]अस्यैवाभ्युच्चयमाह-

**प्रकृतेरा यतश्चैव, नाप्रवृत्त्यादिधर्मताम् ।**
**तथा विहाय घटत ऊहोऽस्य विमलं मनः ॥२०७॥**

प्रकृतेः-कर्मसंज्ञितायाः आ-अर्वाक् यतश्चैव-यत एव च हेतोः न-नैव अप्रवृत्त्यादिधर्मतां-अप्रवृत्तिर्निवृत्ताधिकारित्वं, आदिशब्दात्तथाविधान्यप्र-कृतिधर्मसंग्रहः ततोऽप्रवृत्त्यादयो धर्मा यस्याः सा तथा, तद्भावस्तत्ता, ताम् । तथा-तेन प्रकारेण, विहाय-विरहय्य, घटते-युज्यते ऊहः-उक्तरूपः अस्य-भिन्नग्रन्थेः । किंलक्षणोऽसावित्याह 'विमलं'-अमलीमसं मनः चित्तमिति । अयमभिप्रायः प्रकृतेरप्रवृत्त्यादिधर्मतां विहायार्वाक् न संसारिणो जीवस्योक्तलक्षण ऊहो घटते, किं तु निवृत्त्यादिषु सतीष्विति ॥२०७॥ ततः-

**सति चास्मिन्स्फुरद्रत्नकल्पे सत्त्वोल्बणत्वतः ।**
**भावस्तैमित्यतः शुद्धमनुष्ठानं सदैव हि ॥२०८॥**

---

१. अत्रैवाभ्युच्चयमाह-B.C.; अथैवा-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सति च-विद्यमाने पुनः अस्मिन्नूहे-विमलमनोरूपे स्फुरद्रत्नकल्पे समुज्जृम्भमाणरुचिजालजटिलपद्मरागादिमणिविशेषसमाने, किमित्याह 'सत्त्वोल्बणत्वतः' सत्त्वं वीर्यं तस्योल्बणत्वमुदग्रत्वं तस्मात् 'भावस्तैमित्यतो-' भावोऽन्तःकरणं, तस्य स्तैमित्यं-क्षुद्रतादिभिर्भवाभिनन्दिचित्तदोषैरक्षोभणीयता; तस्मात् शुद्धं अनवद्यम् अनुष्ठानं-धर्मशास्त्रशुश्रूषणादि 'सदैव हि-' सर्वकालमेव स्यात्, परिशुद्धोहापोहयोगस्य सम्यगनुष्ठानावन्ध्यकारणत्वात् । एवं च सदूहभाजः शुद्धानुष्ठानभाक्त्वं प्रागाक्षिप्तं साधितं भवतीति ॥२०८॥

इदमेवानुष्ठानमधिकृत्याह-

**एतच्च योगहेतुत्वाद्योग इत्युचितं वचः ।**
**मुख्यायां पूर्वसेवायामवतारोऽस्य केवलम् ॥२०९॥**

'एतच्चैतत्पुनः शुद्धमनुष्ठानम् योगहेतुत्वाद्-मोक्षसंयोगकारणत्वाद्योगो वर्तते' इत्येवंरूपम् उचितं-योग्यं, वचो-वचनं सार्थकत्वादिन्द्रपुरन्दरादिशब्दवत्, न पुनरन्यदपुनर्बन्धकादिगतमिति भावः । अत्रैव विशेषमाह मुख्यायां-प्रकृष्टायां, पूर्वसेवायां-देवगुरुपूजादिरूपायां अवतारः-अवकाशः अस्य-शुद्धानुष्ठानस्य केवलं-परम् । अन्यदा तु जायमानमप्येतत्तदाभासमेव स्यात् ॥२०९॥ अथ योगमेवाधिकृत्याह-

**त्रिधा शुद्धमनुष्ठानं, सच्छास्त्रपरतन्त्रता ।**
**सम्यक्प्रत्ययवृत्तिश्च, तथात्रैव प्रचक्षते ॥२१०॥**

"त्रिधा-त्रिभिः प्रकारैर्वक्ष्यमाणैः शुद्धं अनुष्ठानं, तथा 'सच्छास्त्रपरतन्त्रता'-सम्यक्श्रुतग्रन्थाधीनभावः, 'सम्यक्प्रत्ययवृत्तिः'-सम्यक्प्रत्यय आत्मगुरुलिङ्गशुद्धिभेदात् त्रिधा तस्मिन्सति वृत्तिः-प्रवर्तनम्, चकार उक्तसमुच्चये 'तथा' इति वक्तव्यान्तरसमुच्चये, अत्रैव-योगप्रक्रमे योगो वर्तते" इति 'प्रचक्षते'-ब्रुवते धार्मिका इति ॥२१०॥ एतदेव भावयन्नाह-

**विषयात्मानुबन्धैस्तु, त्रिधा शुद्धमुदाहृतम् ।**
**अनुष्ठानं, प्रधानत्वं ज्ञेयमस्य यथोत्तरम् ॥२११॥**

'विषयात्मानुबन्धैस्तु' विषयेण-गोचरेण, आत्मना स्वरूपेणः अनुबन्धेन चोत्तरत्रानुवृत्तिलक्षणेन पुनः त्रिधा शुद्धं-अनवद्यम्, उदाहृतं उक्तम्, अनुष्ठानं-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्प्रवृत्तिलक्षणम् । अत्र प्रधानत्त्वं-[1]ज्येष्ठत्वं ज्ञेयं-अवगम्यम्, अस्य त्रिधानुष्ठानस्य यथोत्तरम्-यद्यतोऽनुष्ठानमुत्तरं तत्तदपेक्षया प्रधानमिति भावः ॥२११॥ अथेदमेव क्रमेण दर्शयति-

**आद्यं यदेव मुक्त्यर्थं, क्रियते पतनाद्यपि ।**
**तदेव मुक्त्युपादेयलेशभावाच्छुभं मतम् ॥२१२॥**

आद्यं'-विषयशुद्धमनुष्ठानम् यदेव किंचित् मुक्त्यर्थं-मुक्तये 'मुक्तिर्मे भूयादितोऽनुष्ठानादि'ति प्रणिधानेन क्रियते-पतनाद्यपि तत्र पतनं हिमपथभृगु-पातादिलक्षणं आदिशब्दाच्छस्त्रपाटनगृध्रपृष्ठार्पणादिः शेषः स्वघातोपायः परिगृह्यते, किं पुनः शेषं [2]त्वस्याहिंसकमित्यपिशब्दार्थः, तदेव-तदप्यनुष्ठानम् मुक्त्यु-पादेयलेशभावाद्-भावप्रधानत्वान्निर्देशस्य मुक्त्युपादेयतासम्भवात् शुभं-शोभनम्-मतं अभिप्रेतम्, न तु स्वरूपतः, अत्यन्तसावद्यरूपत्वात् ॥२१२॥

**द्वितीयं तु यमाद्येव, लोकदृष्ट्या व्यवस्थितम् ।**
**न यथाशास्त्रमेवेह, सम्यग्ज्ञानाद्ययोगतः ॥२१३॥**

'द्वितीयं तु'-क्रमप्रामाण्यात्स्वरूपशुद्धानुष्ठानं पुनः 'यमाद्येव-पञ्चयमपञ्चनियमरूपमेव, तत् कीदृशमित्याह 'लोकदृष्ट्या'-स्थूलव्यवहारिणो लोकस्य मतेन, व्यवस्थितं-प्रसिद्धम् । अत एव न-नैव, यथाशास्त्रमेव, शास्त्रसद्भावः शासनाद् दुःखत्राणाच्चोच्यते, तच्च जैनमेव । यथोक्तम् "*शासनसामर्थ्येन तु, संत्राणबलेन चानवद्येन । युक्तं यत्तच्छास्त्रं, तच्चैतत्सर्वविद्वचनम्*" ॥ (प्र. रति १८८) ॥ ततो यथा-येन प्रकारेण, शास्त्रं व्यवस्थितं तेनैव, इह-योगचिन्तायाम्, कुत इत्याह 'सम्यग्ज्ञानाद्ययोगतः'-सम्यग्ज्ञानश्रद्धानाऽभावात्, न हि सम्यग्ज्ञानाद्यभावे दूरं संसारविरक्तोऽपि यथाशास्त्रमेव प्रवृत्तिमवलम्बितुं क्षमः, किं तु घुणाक्षरवृत्त्यैव कदाचित्किंचिदेव । अयमत्र भावः-येऽमी पूरणादयः प्रथमगुणस्थानकवर्तिनोऽपि तथाविधसंसारवैराग्याल्लोकदृष्टि-प्रतिष्ठितयमान्नियमांश्च जीवादितत्त्वमजानानाः सन्तः समनुतिष्ठन्ति तत्स्वरू-पशुद्धमनुष्ठानमुच्यत इति ॥२१३॥

---

१. पूज्यत्वं-A; २. स्वस्या-B; स्वास्या-C;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**तृतीयमप्यदः किंतु, तत्त्वसंवेदनानुगम् ।**
**प्रशान्तवृत्त्या सर्वत्र, दृढमौत्सुक्यवर्जितम् ॥२१४॥**

तृतीयमप्यनुष्ठानम् अदो–यमाद्येव, किन्तु–पुनः 'तत्त्वसंवेदनानुगं'–जीवादितत्त्वसम्यक्परिज्ञानानुगतम् तथा 'प्रशान्तवृत्त्या'–कषायादिविकार-निरोधरूपया सर्वत्र–कार्ये, दृढं–अत्यर्थम् 'औत्सुक्यवर्जितं'–त्वरापरिहीणं, अप्रशान्तवृत्तावेवौत्सुक्यदोषावकाशात् ॥२१४॥ अथैतदनुष्ठानत्रयस्य प्रत्येकं फलमाह–

**आद्यान्न दोषविगमस्तमोबाहुल्ययोगतः ।**
**तद्योग्यजन्मसन्धानमत एके प्रचक्षते ॥२१५॥**

आद्याद्विषयानुष्ठानात् न–नैव 'दोषविगमो'–मोक्षलाभबाधकदोषपरिहाणिरूपः, कुत इत्याह– 'तमोबाहुल्ययोगतः'–तमसोऽज्ञानस्य बाहुल्यं बहुलभावस्तद्योगात्, आत्मघातादिप्रवृत्तिव्यङ्ग्यो ह्यसौ, एतत्प्रधानं च प्रथमानुष्ठानम्। अत्रैव मतान्तरमाह 'तद्योग्यजन्मसन्धानं'–दोषविगमोचितस्य जातिकुलादिगुणयुक्तत्वेन जन्मनो भवान्तरोत्पत्तिलक्षणस्य सन्धानं घटनम् अतः–अनुष्ठानात्, 'एके' शास्त्रकृतः 'प्रचक्षते'–प्रज्ञापयति ॥२१५॥ अत्र हेतुः–

**मुक्ताविच्छापि यच्छ्लाघ्या, तमःक्षयकरी मता ।**
**तस्याः समन्तभद्रत्वादनिदर्शनमित्यदः ॥२१६॥**

मुक्ताविच्छापि किं पुनरेतद्विषया क्रियेत्यपिशब्दार्थः यद्–यस्मात् श्लाघ्या–प्रशस्या 'तमःक्षयकरी'–मोहविध्वंसकारिणी 'मता' मतिमतां, परं तस्या मुक्तेः 'समन्तभद्रत्वात्'–सर्वतः कल्याणरूपत्वात्, अनिदर्शनं–अतीववैसदृश्यादननुरूपम् इति–एवमतिसावद्यप्रकृतित्वेन अदो–विषयानुष्ठानं वर्तते । सदृशो हि भावः सदृशस्य हेतुर्भवति, यथा मृद् घटस्य, विषयानुष्ठानं त्वतीवसावद्यरूपत्वात्कथमेकान्तनिरवद्यरूपाया मुक्तेर्हेतुः स्यात्, अतो न तन्मुक्तिहेतुः, किंतु तद्गतमुक्तीच्छामात्रमेव ॥२१६॥

**द्वितीयाद्दोषविगमो, न त्वेकान्तानुबन्धनात् ।**
**गुरुलाघवचिन्तादि, न यत्तत्र नियोगतः ॥२१७॥**

द्वितीयाद्–अनुष्ठानात् दोषविगमः–कषायादिनिरोधरूपः सम्पद्यते, न तु–

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न पुनः एकान्तानुबन्धनाद्भस्मीकृतदर्दुरचूर्णविनाशवदेकान्तेन सर्वथोत्तरत्राप्यनुवृत्तिमान् । अत्र हेतुः 'गुरुलाघवचिन्तादि' गुणदोषविषया गुरुलघुभावमीमांसा गुरुलाघवचिन्ता आदिशब्दात्प्रवृत्तिश्च न यद्-यस्मात् तत्र स्वरूपशुद्धानुष्ठाने नियोगतो-नियमेन । तथाहि-तथाविधविवेकवैकल्येन कायमात्रक्रियाप्रधानत्वात्नात्यन्तिको दोषविगमोऽत्र । यतः पठ्यते-"*कायकिरियाए, दोसा, खविया मण्डुक्कचुण्णतुल्ल त्ति । 'सव्वावणए ते पुण, नेया तच्छारसारिच्छा*" (यो. श. ८६) ॥२१७॥

**अत एवेदमार्याणां, बाह्यमन्तर्मलीमसम् ।**
**कुराजपुरसच्छालयत्नकल्पं व्यवस्थितम् ॥२१८॥**

अत एव दोषविगमैकान्तानुबन्धाभावादेव 'इदं'-स्वरूपशुद्धानुष्ठानं 'आर्याणां'-सर्वहेयधर्मेभ्य आराद्यागयायिनां मतेन बाह्यम्-अप्रधानम्, अत एवान्तर्मध्ये 'मलीमसं' मलिनम् 'कुराजपुरसच्छालयत्नकल्पं' कुराजस्य कुनृपतेर्यत्पुरं नगरं तस्य यः सन्सुन्दरः परैरधृष्यत्वाच्छालः प्राकारस्तत्र यो यत्न आदरातिरेकः कुराजस्यैव तत्कल्पं तत्तुल्यं, 'व्यवस्थितं'-प्रतिष्ठितम् । यथा हि विहितपराधृष्यप्राकारमपि पुरं कुत्सितराजाधिष्ठितं न च तथाविधां वृद्धिं लब्धुमलं, लोकलुण्ठनादिभिस्तदुपद्रवैर्नित्यमेव तस्य दुःस्थीकृतत्वात्, एवं स्वरूपशुद्धानुष्ठानमिति बाह्यदोषाभावेऽपि तत्त्वज्ञानविकलस्य पुंसोऽत एव कुराजसदृशस्य न परां गुणवृद्धिं प्राप्तुमुत्सहते, अज्ञानदोषोपघातादेव ॥२१८॥

**तृतीयाद्दोषविगमः, सानुबन्धो नियोगतः ।**
**गृहाद्यभूमिकाऽऽपाततुल्यः कैश्चिदुदाहृतः ॥२१९॥**

तृतीयात्सानुबन्धनानुष्ठानात् दोषविगमः सानुबन्धो 'नियोगतो'-नियमेन वर्तते । अयं च 'गृहाद्यभूमिकापाततुल्यो'-गृहस्य देवगृहादेराद्यभूमिका दृढपीठबन्धरूपा तस्या आपात आरम्भस्तत्तुल्यस्तत्सदृशः कैश्चित्तीर्थान्तरीयैः उदाहृतः-उक्तः, अयं चास्माकमपि संमत एव । यथा हि गृहस्य सम्यगादिभूमिकाप्रारम्भो नोपरिविरच्यमानगृहभङ्गफलः सम्पद्यते, किं तु तदनुबन्धप्रधान एव, एवं तत्त्वसंवेदनानुगतमनुष्ठानमुत्तरोत्तरदोषविगमावहमेव भवति, न तु

१. सब्भावणाए-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कदाचनाप्यन्यथारूपमिति ॥२१९॥ एतदेव भावयति–

**एतद्ध्युदग्रफलदं, गुरुलाघवचिन्तया ।**
**अतः प्रवृत्तिः सर्वैव, सदैव हि महोदया ॥२२०॥**

एतद्–अनुबन्धप्रधानमनुष्ठानम् हिः–यस्मात् उदग्रफलदं–उदारफलदायि कथमित्याह 'गुरुलाघवचिन्तया'–सर्वकार्येषु गुणदोषयोर्गुरुलघुभावालोचनेन, एतदपि कथमित्याह 'अतः'–गुरुलाघवचिन्तातः प्रवृत्तिः–चेष्टा 'सर्वैव'–न पुनः काचिदेव, सदैव–सर्वकालमेव हिः–यस्मात् महोदया अतिप्रशस्तफला स्यादिति ॥२२०॥ अथ सच्छास्त्र[१]पारतन्त्र्यमधिकृत्याह–

**परलोकविधौ शास्त्रात्, प्रायो नान्यदपेक्षते ।**
**आसन्नभव्यो मतिमान्, श्रद्धाधनसमन्वितः ॥२२१॥**

'परलोकविधौ'–परलोकफले प्रयोजने कर्तव्ये शास्त्रादुक्तनिरुक्तात् प्रायो–बाहुल्येन न–नैव अन्यल्लोकरूढ्यादि अपेक्षते–आलम्बते । क इत्याह 'आसन्नभव्यः'–दूरभव्यव्यवच्छेदार्थमेतत् 'मतिमान्'–मार्गानुसारी प्राज्ञः तथा 'श्रद्धाधनसमन्वितः'–श्रद्धानुष्ठानाभिलाषरूपधनसमन्वितः ॥२२१॥

**उपदेशं विनाप्यर्थकामौ प्रति पटुर्जनः ।**
**धर्मस्तु न विना शास्त्रादिति तत्रादरो हितः ॥२२२॥**

उपदेशं–शास्त्रप्रज्ञापनं विनाप्यन्तरेणापि किं पुनरितरथेत्यपिशब्दार्थः 'अर्थकामौ'–प्रतीतरूपावेव [२]प्रतीत्याश्रित्य पटुर्जनो, लोकरूढिप्रामाण्यादपि तत्सिद्धिसम्भवात् । धर्मस्तु–धर्मः पुनरुक्तनिरुक्तः 'न विना शास्त्रात्' इत्यस्माद्धेतोः तत्र–शास्त्रे आदरो–यत्नः–कल्याणरूपः सम्पद्यते इति ॥२२२॥

**अर्थादावविधानेऽपि, तदभावः परं नृणाम् ।**
**धर्मेऽविधानतोऽनर्थः, क्रियोदाहरणात्परः ॥२२३॥**

अर्थादावर्थकामलक्षणविषये अविधानेऽप्यविधावपि क्रियमाणे 'विधौ तावत्सर्वानर्थाभाव' इत्यपिशब्दार्थः तदभावोऽर्थाद्यभावः 'परं' केवलं, नान्यः कश्चिदनर्थः नृणां–पुंसां सम्पद्यत इति । धर्मे–धर्मविषये अविधानतोऽविधानात्

१. परतन्त्रतेत्यधिकृत्याह–A.B.C.; २. प्रत्याश्रित्य–A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनर्थोऽकल्याणम् क्रियोदाहरणाच्चिकित्सादृष्टान्तात् परः प्रकृष्टः ।

यथोक्तम्-*"पडिवज्जिऊण किरियं, तीए विरुद्धं निसेवइ जो उ । अपवत्तगाउ अहियं, सिग्घं च [1]संपावइ विणासं"* ॥२२३॥

**तस्मात्सदैव धर्मार्थी, शास्त्रयत्नः प्रशस्यते ।**
**लोके मोहान्धकारेऽस्मिन् शास्त्रालोकः प्रवर्तकः ॥२२४॥**

तस्माद्धर्मेऽविधानतः परानर्थभावात् सदैव-सर्वकालमेव धर्मार्थी-धर्माभिलाषुकः शास्त्रयत्नः-शास्त्रादरपरः प्रशस्यते-श्लाघ्यते । कुतः ? यतः लोके-जगति मोह एवान्धकारस्तमो यत्र स तथा तत्र, शास्त्रालोकः-शास्त्रप्रकाशः, प्रवर्तकः प्रवर्तयिता परलोकक्रियासु ॥२२४॥ अथ शास्त्रमेव स्तुवन्नाह-

**पापामयौषधं शास्त्रं, शास्त्रं पुण्यनिबन्धनम् ।**
**चक्षुः सर्वत्रगं शास्त्रं शास्त्रं सर्वार्थसाधनम् ॥२२५॥**

पापामयौषधं-पापव्याधिशमनीयं शास्त्रम् । तथा शास्त्रं पुण्यनिबन्धनं-पवित्रकृत्यनिमित्तम् । चक्षुर्लोचनं सर्वत्रगं-सूक्ष्मबादरादावर्थे गच्छति यत्तत्सर्वत्रगं शास्त्रम्, शास्त्रं सर्वार्थसाधनं-सर्वप्रयोजननिष्पत्तिहेतुः ॥२२६॥ ततः

**न यस्य भक्तिरेतस्मिंस्तस्य धर्मक्रियापि हि ।**
**अन्धप्रेक्षाक्रियातुल्या, कर्मदोषादसत्फला ॥२२६॥**

न यस्य-धर्मार्थिनः भक्तिः-बहुमानरूपा एतस्मिन्-शास्त्रे, तस्य धर्मक्रियापि हि-देववन्दनादिरूपा किं पुनरन्यरूपेत्यपिहिशब्दार्थः अन्धप्रेक्षाक्रियातुल्या-अन्धस्यावलोकनकृते या प्रेक्षणकक्रिया तत्तुल्या, कर्मदोषात्-तथाविधमोहोदयात् असत्फला-अविद्यमानाभिप्रेतार्था सम्पद्यत इति ॥२२६॥

एतदपि कुतः ? यतः-

**यः श्राद्धो मन्यते मान्यानहङ्कारविवर्जितः ।**
**गुणरागी महाभागस्तस्य धर्मक्रिया परा ॥२२७॥**

यः श्राद्धः-सन्मार्गश्रद्धालुः मन्यते-बहुमानविषयीकुरुते मान्यान्-देवतादीन् 'अहङ्कारविवर्जितो'-मुक्ताभिमानः । अत एव 'गुणरागी'-गुणानुरागवान्

---

१. स पावइ-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'महाभागः'–प्रशस्याचिन्त्यशक्तिः, किमित्याह तस्य शास्त्रपरतन्त्रतया मान्यमन्तुः धर्मक्रिया–उक्तरूपा परा–प्रकृष्टेति ॥२२७॥ व्यतिरेकमाह 'यस्य' इत्यादि–

**यस्य त्वनादरः शास्त्रे, तस्य श्रद्धादयो गुणाः ।**
**उन्मत्तगुणतुल्यत्वान्न प्रशंसास्पदं सताम् ।।२२८॥**

यस्य त्वनादरोऽगौरवरूपः शास्त्रे, तस्य श्रद्धादयः–श्रद्धासंवेगनिर्वेदादयो गुणाः किमित्याह उन्मत्तगुणतुल्यत्वात्–तथाविधग्रहावेशात्सोन्मादपुरुष–शौर्यौदार्यादिगुणसदृशत्वात् न प्रशंसास्पदं–न श्लाघास्थानं सतां–विवेकिनामिति ॥२२८॥एतदपि कथम् ? यतः–

**मलिनस्य यथात्यन्तं, जलं वस्त्रस्य शोधनम् ।**
**अन्तःकरणरत्नस्य, तथा शास्त्रं विदुर्बुधाः ॥२२९॥**

मलिनस्य–मलवतः, यथात्यन्तं–अतीव जलं–पानीयम् वस्त्रस्य–प्रतीतरूपस्य शोधनं–शुद्धिहेतुः, 'अन्तःकरणरत्नस्य' अन्तःकरणं–मनः तदेव रत्नं, तस्य चिन्तारत्नादिभ्योऽप्यतिशायिनः 'तथा शास्त्रं' विदुर्जानते शोधनं, बुधाः–बुद्धिमन्तः ॥२२९॥ अत एव—

**शास्त्रे भक्तिर्जगद्वन्द्यैर्मुक्तेर्दूती परोदिता ।**
**अत्रैवेयमतो न्याय्या, [1]तत्प्राप्त्यासन्नभावतः ॥२३०॥**

शास्त्रे भक्तिरुक्तरूपा जगद्वन्द्यैर्जगत्त्रयपूजनीयैस्तीर्थकृद्भिः [2]मुक्तेर्दूती अवशीभूतमुक्तियोषित्समागमविधायिनी परा–प्रकृष्टा उदिता–निरूपिता, 'अत्रैव' शास्त्र एव इयं भक्तिः अतो–मुक्तिदूतीभावादेव हेतोः न्याय्या–सङ्गता कुत इत्याह [3]'तत्प्राप्त्यासन्नभावतः'–मुक्तिप्राप्तेरासन्नभावात् । न हि मुक्तिप्राप्तेरनासन्नः शास्त्रभक्तिमान्सम्पद्यते, अतः शास्त्र एवेयं न्याय्येति ॥२३०॥

अथ सम्यक्प्रत्ययवृत्तिश्चेत्यधिकृत्याह–

**तथात्मगुरुलिङ्गानि, प्रत्ययस्त्रिविधो मतः ।**
**सर्वत्र सदनुष्ठाने, योगमार्गे विशेषतः ॥२३१॥**

'तथा' इति वक्तव्यान्तरसमुच्चये । 'आत्मगुरुलिङ्गानि' आत्मा च गुरुश्च

---

१. तत्प्रत्यासन्न–A; २. मुक्तिदूती–B.C.; ३. तत्प्रत्यासन्न–A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लिङ्गानि चेति समासः । प्रतीयते भाव्यर्थोऽस्मादिति 'प्रत्ययः' त्रिविधस्त्रिप्रकारो 'मतः सर्वत्र सदनुष्ठाने' फलाविसंवादिनि प्रयोजने, 'योगमार्गे' प्रस्तुत एव विशेषतो-विशेषेण मत इति, अस्य सर्वसदनुष्ठानातिशायित्वात् ॥२३१॥ एनमेव त्रिविधं प्रत्ययं भावयन्नाह-

**आत्मा तदभिलाषी स्याद्, गुरुराह तदेव तु ।**
**तल्लिङ्गोपनिपातश्च, सम्पूर्णं सिद्धिसाधनम् ॥२३२॥**

आत्मा-सदनुष्ठानारम्भिणः पुंसोऽन्तरात्मरूपः स्वत एव तावत्तदभिलाषी-सदनुष्ठानाभिलाषवान्, स्याद्-भवेत् । ततो गुरुर्धर्मोपदेष्टा आह ब्रूते तदेव तु-यदेवात्मनाभिलषितमासीत्, तल्लिङ्गोपनिपातः-तस्याभिलषितस्य सिद्धिसूचकानि लिङ्गानि यानि "*नन्दीतूरं पुन्नस्स दंसणं सङ्खपडहसद्दो य । भिंगारछत्तचामरज्झयपडागा पसत्थाइं* ॥१॥" इत्यादिसूत्रसिद्धानि, तेषामुपनिपातः-संनिहितता । चः समुच्चये । किमित्याह सम्पूर्ण-समस्तं, सिद्धिसाधनं-विवक्षित[1]फलनिष्पत्तिसूचकम् ॥२३२॥

अथ सिद्धिमेव भावयन्नाह-

**सिद्ध्यन्तरस्य सद्बीजं, या सा सिद्धिरिहोच्यते ।**
**ऐकान्तिक्यन्यथा नैव, पातशक्त्यनुवेधतः ॥२३३॥**

सिद्ध्यन्तरस्य-फलान्तरसिद्धिरूपस्य, सद्-अवन्ध्यं बीजं-हेतुः या, सा सिद्धिरिह विद्वल्लोके उच्यते । कीदृशीत्याह 'ऐकान्तिकी'-नियमेनाऽसिद्धिरूपपरिहारवती अन्यथा-सिद्ध्यन्तरसद्बीजभावाऽभावे नैव-न सर्वथा सिद्धिर्भवति । कुत इत्याह 'पातशक्त्यनुवेधतः'-भ्रंशसामर्थ्यानुवेधात् ।

तथा हि, तथाविधप्रासादादि अस्थ्यादिशल्योपघातान्महता यत्नेनोपरच्यमानमपि नोदयमासादयति किं त्ववश्यं पतति, एवं विवक्षितसिद्धिरपि मिथ्याभिनिवेशादिपातशक्त्यनुवेधान्न निर्वाणावसानफलाय सम्पद्यते ॥२३३॥ अमुमेवार्थमधिकृत्याह-

---

१. फलनिष्पन्नसूचकम्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सिद्ध्यन्तरं न सन्धत्ते, या सावश्यं पतत्यतः ।**
**तच्छक्त्याप्यनुविद्धैव, पातोऽसौ तत्त्वतो मतः ॥२३४॥**

'सिद्ध्यन्तरं'-प्रस्तुतकार्यसिद्धेः कार्यान्तरसिद्धिरूपम् न-नैव सन्धत्ते-घटयति या-सिद्धिः, साऽवश्यं-नियमेन, पतति-निवर्तते । अतोऽवश्यंपातात् तच्छक्त्यापि-पातशक्त्यापि अनुविद्धा-व्याप्ता, एवशब्दस्य भिन्नक्रमत्वात्, ततः पात एव असौ-सिद्धिः, सम्प्रत्यपातेऽपि परतस्तावत्पात एवेत्यपिशब्दार्थः, तत्त्वतः(परमार्थतः) मतः(मता)- संमतो(संमता) विदुषाम् । यथा ह्यविद्यमानपुत्रपौत्रादिसन्तानः पुमान्स्वकालेऽपतन्नपि पातशक्त्यनुवेधात्परमार्थतः पात एव, तथा प्रस्तुता यमनियमादिसिद्धिरप्यनुबन्धविकला योजनीया पातत्वेनेति ॥२३४॥ अथैतद्विपर्ययमाह-

**सिद्ध्यन्तराङ्गसंयोगात्, साध्वी चैकान्तिकी भृशम् ।**
**आत्मादिप्रत्ययोपेता तदेषा नियमेन तु ॥२३५॥**

सिद्ध्यन्तराङ्गसंयोगात्-सिद्ध्यन्तराणां प्रस्तुतसिद्धेरन्यसिद्धिविशेषाणां यान्यङ्गानि हेतवस्तेषां संयोगान्मीलनात् साध्वी च-सङ्गता पुनः 'ऐकान्तिकी' सिद्धिः पातविकला भृशमत्यर्थं, परंपरयाप्यसिद्धिरूपपरिहारात् 'आत्मादिप्रत्ययोपेता'-आत्मगुरुलिङ्गप्रतीतिसङ्गता । तत्-तस्मात् एषा-ऐकान्तिकी सिद्धिः, नियमेन त्ववश्यंतयैव वर्तते, आत्मादिप्रत्ययस्यैव सिद्ध्यन्तराऽवन्ध्यहेतुत्वात् ॥२३५॥ एतदेव समर्थयते-

**न ह्युपायान्तरोपेयमुपायान्तरतोऽपि हि ।**
**हाठिकानामपि यतस्तत्प्रत्ययपरो भवेत् ॥२३६॥**

न हि-नैव उपायान्तरोपेयं-मृत्पिण्डाद्युपायान्तरसाध्यं घटादिकार्यम्, उपायान्तरतोऽपि हि-सूत्रपिण्डाद्युपायान्तरादपि भवति हाठिकानामपि-बलात्कारचारिणां, किं पुनस्तदन्यथाचारिणामित्यपिशब्दार्थः यतो-यस्मात्, तत्-तस्मात् 'प्रत्ययपरः-' आत्मादिप्रत्ययपरायणः भवेत्-स्यादै[१]कान्तिकीं सिद्धिमभिलषन् [२]योगी, तस्यास्तदेकहेतुत्वात् । यथा हि कुम्भकारादिः

---

१. कान्तिकीसिद्धि-A.B.C.; २. सन् योगी-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सन्निहितमृत्पिण्डादिसर्वस्वोपकरणोऽपि न पटादि साधयितुमलं तदुपकरणाभावात्, तथात्मादिप्रत्ययविकलस्तदन्यानुष्ठानवानपि योगी नैकान्तिकीं सिद्धिमाराधयितुं समर्थः स्यात् ॥२३६॥ अथामुमेव पुरस्कुर्वन्नाह-

**पठितः सिद्धिदूतोऽयं, प्रत्ययो ह्यत एव हि ।**
**सिद्धिहस्तावलम्बश्च, तथान्यैर्मुख्ययोगिभिः ॥२३७॥**

पठितो-निरूपितः सिद्धिदूतः-सिद्धिसमागमहेतुः अयमात्मादिप्रत्ययः हिः स्फुटम् 'अत एव हि' ऐकान्तिकसिद्धिहेतुत्वादेव हेतोः, 'सिद्धिहस्ताव-लम्बश्च'-सिद्धौ तथाविधप्रासादश्रृंग इवारोढुमनसां हस्तावलम्बसदृशः, चः-समुच्चये, 'तथा' इति तत्प्रकारैरन्यैः-नेपथ्यमात्रभेदतोऽस्मद्विलक्षणैः 'मुख्ययोगिभिः' शुद्धमार्गदर्शितया तत्त्वरूपैर्धार्मिकैरिति ॥२३७॥

**अपेक्षते ध्रुवं ह्येनं, सद्योगारम्भकस्तु यः ।**
**[1]नान्यः प्रवर्तमानोऽपि, तत्र दैवनियोगतः ॥२३८॥**

अपेक्षते-ऽवलम्बते ध्रुवं हि-ध्रुवमेव एनमात्मादिप्रत्ययम् क इत्याह 'सद्योगारम्भकस्तु' सानुबन्धयोगारम्भक एव, यः-कश्चित् । व्यवच्छेद्यमाह न-नैव, [2]अन्यः-विषयस्वरूपशुद्धप्रथमद्वितीयानुष्ठानविधाता कीदृश इत्याह 'प्रवर्तमानोऽपि' किं पुनरितररूप इत्यपिशद्बार्थः, तत्र योगे 'दैवनियोगतः' तथाविधकर्मपारतन्त्र्यात् ।

[3]अन्यस्य हि तत्त्वपरिज्ञानशून्यतयाऽलब्धात्मलाभस्य सर्वत्र प्रवृत्तौ कर्मपारन्त्र्यमेव हेतुर्न पुनस्तत्त्वज्ञानं, विवेकिलोकापेक्षणीयत्वात्तस्य ॥२३८॥

किं च-

**आगमात्सर्व एवाऽयं, व्यवहारः स्थितो यतः ।**
**तत्रापि हाठिको यस्तु, हन्ताऽज्ञानां स शेखरः ॥२३९॥**

आगमाद्-गुरुवचनप्रत्ययरूपात् सर्व एव-निखिलोऽपि अयं-योगमा-र्गोपयोगी व्यवहारो-हेयोपादेययोर्हानोपादानरूपः स्थितः-प्रतिष्ठितः यतो यस्मादतीन्द्रियफलत्वात्तस्य, अतीन्द्रियफलेषु चानुष्ठानेषु शास्त्रस्यैव [4]प्रतीति-

---

१. नाज्ञः प्रवर्त-A; २. 'अज्ञो'-A; ३. अज्ञस्य-A; ४ प्रवृत्तिहेतुत्वात्-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हेतुत्वात्, ततस्तत्राप्यागमाधीने व्यवहारे किं पुनरितररूप इत्यपिशब्दार्थः, हाठिकः-स्वविकल्पप्रवृत्त्यागमनिरपेक्षत्वेन बलात्कारचारी 'यस्तु' यः पुनर्योगी 'हन्त' इति सन्निहितसभ्यामन्त्रणं, (अज्ञानां)स शेखरः-शिरोमणिर्वर्तते, अनुपायप्रवृत्तत्वात्तस्य ॥२३९॥ किं च-

**तत्कारी स्यात्स नियमात् तद्द्वेषी चेति यो जडः ।**
**आगमार्थे तमुल्लंघ्य, तत एव प्रवर्तते ॥२४०॥**

तत्कारी-तत्करणशीलः, स्याद्-भवेत्, स नियमाद्-अवश्यंभावेन, तद्द्वेषी च-स्वयमेव क्रियमाणवस्तुद्वेषवाँश्च इत्येतद्रूपः सम्पद्यते यः कश्चित् जडो-मन्दः आगमार्थे-आगमविहिते चैत्यवन्दनादौ विधातुमिष्टे तमागममुल्लंघ्य-अतिक्रम्य तत एवागमादेव, प्रवर्तते आगमनिरूपितविधिनिरपेक्षतयाऽऽ-गमार्थमनुतिष्ठन्नपि न तद्भक्तः किं तु तद्द्विष्ट एव, द्वेषमन्तरेण तदुल्लङ्घनाभावादिति भावः ॥२४०॥ एतदेव व्यतिरेकतो भावयति-

**न च सद्योगभव्यस्य, वृत्तिरेवंविधापि हि ।**
**न जात्वजात्यधर्मान्यज्जात्यः सन् भजते शिखी ॥२४१॥**

न च-नैव सद्योगभव्यस्य-परिशुद्धयोगयोग्यस्य जन्तोः वृत्तिः-समाचाररूपा एवंविधापि हि-तत्कारित्वतद्द्वेषित्वलक्षणा किं पुनस्तद्द्वेषित्वलक्षणैवेत्य-पिहिशब्दार्थः । एतदेव प्रतिवस्तूपमया भावयन्नाह न-नैव जातु-कदाचित् अजात्यधर्मान्-कुजातमयूरचेष्टितरूपान् यत्-यस्मात्, जात्यः-सर्वोपाधिविशुद्धः, सन्-भवन्, भजते-सेवते शिखी-मयूरः ॥२४१॥

एतदेव समर्थयमान आह-

**एतस्य गर्भयोगेऽपि, मातृणां श्रूयते परः ।**
**औचित्यारम्भनिष्पत्तौ, जनश्लाघ्यो महोदयः ॥२४२॥**

एतस्य-सद्योगभव्यस्य तीर्थकरादेर्जीवस्य 'गर्भयोगेऽपि' किं पुनरुत्तरकाल इत्यपिशब्दार्थः मातृणां-जनयितृणाम् । श्रूयते-शास्त्रेषु परः-प्रकृष्टः औचित्या-रम्भनिष्पत्तौ-समुचितानुष्ठाननिवृत्तौ विषये जनश्लाघ्यो-लोकप्रशंसनीयः महोदयः-प्रशस्तमाहात्म्यलाभलक्षणः । 'तथा चैवं पठ्यते-' *'जणणी सव्वत्थ*

१. तथा च एवं पठ्यते-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

*विणिच्छएसु, सुमइत्ति तेण 'सुमइजिणे ।'* तथा "*गब्भगए जं जणणी, जाय सुधम्मत्ति तेण धम्मजिणो ।*" तथा "*जाया जणणी जं सुव्वयत्ति मुणिसुव्वओ तम्हा ।*" (आ.नि.) इत्यादि ॥२४२॥ यत एवम्–

**जात्यकाञ्चनतुल्यास्तत्प्रतिपच्चन्द्रसन्निभाः ।**
**सदोजोरत्नतुल्याश्च, लोकाभ्युदयहेतवः ॥२४३॥**

'जात्यकाञ्चनतुल्या' अकृत्रिमसुवर्णतुल्या अविसंवादिस्वभावा इत्यर्थः, तत्तस्मात्कारणात्, तथा 'प्रतिपच्चन्द्रसन्निभाः'–शुक्लपक्षप्रतिपच्चन्द्रमण्डलसमाः प्रवर्धमानशुद्धियोग्या इत्यर्थः–'सदोजोरत्नतुल्याश्च'–सत्सुन्दरमोजस्तेजो यथा स्यात् तथा, तच्च तद्रत्नं च चिन्तामण्यादि तत्तुल्याः । अत एव 'लोकाभ्युदयहेतवो'–जगत्त्रयमाहात्म्यलाभनिमित्तभूताः ॥२४३॥

इत्थं गर्भावस्थामधिकृत्योक्तं, साम्प्रतं तदन्यावस्थाश्रयेणाह–

**औचित्यारम्भिणोऽक्षुद्राः, प्रेक्षावन्तः शुभाशयाः ।**
**अवन्ध्यचेष्टाः कालज्ञा योगधर्माधिकारिणः ॥२४४॥**

'औचित्यारम्भिणः'–सर्वार्थेषु योग्यारम्भभाजः अक्षुद्राः–गम्भीराशयाः प्रेक्षावन्तो–ऽतिनिपुणबुद्धिभाजः शुभाशयाः–शुभपरिणामाः अवन्ध्यचेष्टाः अनिष्फलव्यापाराः कालज्ञाः–प्रस्तावविदः, किमित्याह 'योगधर्माधिकारिणः' योगधर्मयोग्या [2]अधिकारवन्तो वर्तन्त इति ॥२४४॥

अथ शिखिदृष्टान्तमधिकृत्याह–

**यश्चात्र शिखिदृष्टान्तः, शास्त्रे प्रोक्तो महात्मभिः ।**
**स तदण्डरसादीनां, सच्छक्त्यादिप्रसाधनः ॥२४५॥**

यश्च–यः पुनः अत्र–योगधर्माधिकारचिन्तायाम् 'शिखिदृष्टान्तः'–जात्यशिखिनिदर्शनरूपः शास्त्रे–योगविषय एव प्रोक्तः–प्रज्ञप्तः महात्मभिः–योगशास्त्रचिन्तकैः । स–शिखिदृष्टान्तः 'तदण्डरसादीनां'–जात्यशिख्यण्डके रसस्य, आदिशब्दाच्चञ्चुचरणाद्यवयवानां च 'सच्छक्त्यादिप्रसाधनः' सच्छक्तेः–सुसामर्थ्यस्य, आदिशब्दात्तत्फलस्य च प्रसाधनः–प्रकाशकः । न ह्यण्डकावस्थायां

---

१. सुमइजिणो-A.B.C.; २. 'अधिकारवन्तो' इति-A.B.C.; प्रतिषु नास्ति;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

रसादिषु सर्वथाऽसन्तो जात्यशिखिधर्मा उत्तरकालमपि भवितुमर्हन्ति, सर्वथाऽसतः कस्यचिदुत्पादाभावात्, एवं धर्माधिकारिणोऽपि प्राणिनो गर्भाद्यवस्थास्वप्युत्तर-कालाभिव्यज्यमानगुणसंदोहबीजभाजो वर्तन्त इति ॥२४५॥[१]

**प्रवृत्तिरपि चैतेषां, धैर्यात् सर्वत्र वस्तुनि ।**
**अपायपरिहारेण, दीर्घालोचनसङ्गता ॥२४६॥**

प्रवृत्तिश्चेष्टा 'अपि च' इत्यभ्युच्चये । एतेषां-योगधर्माधिकारिणां धैर्या-त्परैरक्षोभ्यभावलक्षणात् सर्वत्र वस्तुनि-धर्मार्थादौ, कीदृशीत्याह 'अपायपरिहरणेन' -भाव्यपायपरिहरणेन, 'दीर्घालोचनसङ्गता'-कार्यपरिणामा[२]लोचनवती ॥२४६॥ तथा

**तत्प्रणेतृसमाक्रान्तचित्तरत्नविभूषणा ।**
**साध्यसिद्धावनौत्सुक्यगाम्भीर्यस्तिमितानना ॥२४७॥**

'तस्याः'-प्रवृत्तेर्यः 'प्रणेता'-प्रज्ञापकस्तीर्थकरादिस्तेन प्रतिक्षणं स्मृति-पथव्यवस्थितेन 'समाक्रान्तं'-व्याप्तं यच्चित्तरत्नं तदेव विभूषणमलङ्कारो यस्याः प्रवृत्तेः सा तथा । तथा 'साध्यसिद्धौ'-धर्मार्थादिप्रयोजननिष्पत्तौ अनौत्सुक्येना-ऽत्वरारूपेण 'गाम्भीर्येण'-चाऽलक्षितविकाररूपेण स्तिमितं प्रसन्नमाननं-मुखं यस्यां सा तथा ॥२४७॥ अत एवाह-

**फलवद्द्रुमसद्बीजप्ररोहसदृशं तथा ।**
**साध्वनुष्ठानमित्युक्तं, सानुबन्धं महर्षिभिः ॥२४८॥**

'फलवतो'-फलप्राग्भारभाजो 'द्रुमस्य'-न्यग्रोधादेः सद्-अवन्ध्यं यद्बीजं तस्य यः प्ररोहो-ऽङ्कुरोद्भेदरूपस्तेन सदृशं-समं यत्तत्तथा । 'तथा' इति वक्तव्यान्तरसमुच्चये । [३]एतेषां योगाधिकारिणां साधु-सुन्दरम्, 'अनुष्ठानं'-यमनियमादिरूपम्, इत्यनेन प्रकारेण उक्तं शास्त्रेषु सानुबन्धम्-उत्तरोत्तरानुबन्धवत् महर्षिभिः-परममुनिभिः, शुद्धाधिकारिसमारब्धत्वात्तस्य ॥२४८॥ अत एव-

**अन्तर्विवेकसम्भूतं, शान्तोदात्तमविप्लुतम् ।**
**नाऽग्रोद्धवलताप्रायं, बहिश्चेष्टाधिमुक्तिकम् ॥२४९॥**

---

१. ॥२४५॥ ततः -A; २. लोचनावती-AC; ३. एषां योगा-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अन्तर्विवेकसम्भूतं-अन्तर्विवेकेन तत्त्वसंवेदननाम्ना सम्भूतं-प्रवृत्तम् (शान्तोदात्तं) शान्तोदात्तपुरुषारब्धत्वात्, अत एवाविप्लुतं-सर्वथा विप्लवरहितम् । व्यवच्छेद्यमाह न-नैव अग्रोद्भवलताप्रायमग्राद् वृक्षप्रान्तादुद्भवो यस्याः सा चासौ लता च तत्प्रायम्, सा हि लताग्रोद्भवत्वेन न लतान्तरमनुबद्धुं क्षमा, इदं चानुष्ठानमुत्तरोत्तरानुबन्धप्रधानमिति, अतः उक्तं 'नाग्रोद्भवलताप्रायं' इति । तथा बहिश्चेष्टायां चैत्यवन्दनादिरूपायामधिमुक्तिः श्रद्धा यत्र तत्तथा ॥२४९॥

इत्थं विषयस्वरूपानुबन्धशुद्धिप्रधानमनुष्ठानत्रयमभिधाय साम्प्रतं त्रयस्याप्यवस्थाभेदेन संमतत्वमाविश्चिकीर्षुराह-

**इष्यते चैतदप्यत्र, विषयोपाधि सङ्गतम् ।**
**निदर्शितमिदं तावत्, पूर्वमत्रैव लेशतः ॥२५०॥**

इष्यते-मन्यते मतिमद्भिः, चः-समुच्चये, 'एतदपि' प्रागुक्तम् अत्र-योग-चिन्तायां 'विषयोपाधि'-विषयशुद्धमनुष्ठानं, किं पुनः स्वरूपशुद्धानुबन्धशुद्धे इत्यपिशब्दार्थः कीदृशमित्याह 'सङ्गतं'-युक्तमेव, 'निदर्शितं'-निरूपितं, इदं-सङ्गतत्वम्, तावच्छब्दः क्रमार्थः पूर्वं-प्राक्, 'अत्रैव'-शास्त्रे, 'लेशतः' संक्षेपेण *"मुक्ताविच्छाऽपि यच्छ्लाघ्या, तमःक्षयकरी मता"* (श्लो. २१६) इत्यादिना ग्रन्थेन । विस्तरतस्तु विशेषग्रन्थादवसेयमिति ॥२५०॥

अथ प्रस्तुतमनुष्ठानं यस्य भवति तमधिकृत्याह-

**अपुनर्बन्धकस्यैवं सम्यग्नीत्योपपद्यते ।**
**तत्तत्तन्त्रोक्तमखिलमवस्थाभेदसंश्रयात् ॥२५१॥**

अपुनर्बन्धकस्योक्तरूपस्य एवमुक्तरूपेण 'सम्यग्नीत्या'—[1]शुद्धियुक्तरूपया 'उपपद्यते'- घटते किमित्याह 'तत्तत्तन्त्रोक्तं'-**कापिलसौगत**ादिशास्त्रप्रणीतं मुमुक्षुजनयोग्यमनुष्ठानं 'अखिलं'-समस्तं कुत इत्याह 'अवस्थाभेदसंश्रयात्'-अपुनर्बन्धकस्यानेकस्वरूपाङ्गीकरणात् । अनेकस्वरूपाभ्युपगमे ह्यपुनर्बन्धकस्य किमप्यनुष्ठानं कस्यामप्यवस्थायामवतरतीति ॥२५१॥

अथापुनर्बन्धकोत्तरं यद्भवति तद्दर्शयति-

---

१. शुद्ध्युक्तिरूपया-B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**स्वतन्त्रनीतितस्त्वेव, ग्रन्थिभेदे तथा सति ।**
**सम्यग्दृष्टिर्भवत्युच्चैः, प्रशमादिगुणान्वितः ॥२५२॥**

'स्वतन्त्रनीतितस्त्वेव'-जैनशास्त्रनीतेरेव न पुनस्तन्त्रान्तराभिप्रायेणापि 'ग्रन्थिभेदे'-रागद्वेषमोहपरिणामस्यातीवदृढस्य विदारणे 'तथा'-यथाप्रवृत्त्यादिकरणप्रकारेण 'सति'-विद्यमाने किमित्याह 'सम्यग्दृष्टिः'-शुद्धसम्यक्त्वधरः, भवति-सम्पद्यते । कीदृश इत्याह 'उच्चैः'-अत्यर्थं प्रागवस्थातः सकाशात्, 'प्रशमादिगुणान्वितः'-उपशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तियुक्तः ॥२५२॥ अथास्य लिङ्गान्याह-

**शुश्रूषा धर्मरागश्च, गुरुदेवादिपूजनम् ।**
**यथाशक्ति विनिर्दिष्टं, लिङ्गमस्य महात्मभिः ॥२५३॥**

'शुश्रूषा'-सद्धर्मशास्त्रविषया 'धर्मरागश्च'-चारित्रधर्मानुरागरूपः 'गुरुदेवादिपूजनं '-धर्माचार्यजिनसाधर्मिकादिसमभ्यर्चनम् 'यथाशक्ति'-स्वसामर्थ्यानुरूपं विनिर्दिष्टम् 'लिङ्गं'- चिह्नम् 'अस्य'-सम्यग्दृष्टेर्जीवस्य 'महात्मभिः'-शास्त्रकारैरिति ॥२५३॥ अथ लिङ्गमेव भावयति-

**न किंनरादिगेयादौ, शुश्रूषा भोगिनस्तथा ।**
**यथा जिनोक्तावस्येति, हेतुसामर्थ्यभेदतः ॥२५४॥**

न किंनरादिगेयादौ-किंनरादीनां गायकविशेषाणां यद्गेयादि गीतवर्णपरिवर्ताभ्यासकथाकथनादि श्रवणेन्द्रियाक्षेपकारि तत्र 'शुश्रूषा' श्रोतुमिच्छा 'भोगिनः' पुरुषस्य यूनो वैदग्ध्यवतः कान्तायुक्तस्यातिशयकामिनश्च तथा-तेन प्रकारेण 'यथा ज़िनोक्तौ' जिनशासने 'अस्य'-सम्यग्दृष्टेः 'इति' पादसमाप्तौ, कुत इत्याह 'हेतुसामर्थ्यभेदतः-' किंनरादिगेयादिशुश्रूषाहेतोः सकाशाज्जिनोक्तिशुश्रूषाया हेतोः सामर्थ्यवैशिष्ट्यात् ॥२५४॥ एतदेव भावयति-

**तुच्छंच तुच्छनिलया( ? य )प्रतिबद्धं च तद्यतः ।**
**गेयं, जिनोक्तिस्त्रैलोक्य-[१]भोगसंसिद्धिसङ्गता ॥२५५॥**

'तुच्छं च'-क्षणिकश्रवणेन्द्रियसुखमात्रकारित्वादल्पम् 'तुच्छनिलयाप्रतिबद्धं

---

१. भोगसत्सिद्धि-B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

य(च)'-शुक्रशोणितादिमलनिलयललनावर्णनप्रवृत्तत्त्वात् तद्'यतो' यस्माद्धेतोः 'गेयं'-किंनरादिकृतम्, 'जिनोक्तिः'-जिनशासनं पुनः 'त्रैलोक्य[1]भोगसंसिद्धिसङ्गता'-त्रैलोक्यभोगेन शक्रचक्र[2]धरादिपदलक्षणेन [3]संसिद्ध्या च कर्मक्षयलक्षणया सङ्गता युक्ता वर्तत इति ॥२५५॥

**हेतुभेदो महानेवमनयोर्यद्व्यवस्थितः ।**
**चरमात्तद्युज्यतेऽत्यन्तं, भावातिशययोगतः ॥२५६॥**

'हेतुभेदः'-क(का)रणयोर्विशेषो 'महान्' एवमुक्तप्रकारेण 'अनयोः'-[4]प्रस्तुतशुश्रूषयोः यद्यस्मात् 'व्यवस्थितः'-प्रतिष्ठितः चरमाद् द्वितीयात्, तत्तस्माद्धेतोः 'युज्यते'-घटते जिनोक्तौ शुश्रूषा, अत्यन्तं-अतीव, प्रथमशुश्रूषायाः सकाशाद्, 'भावातिशययोगतः'-उपादेयतारूपभावप्रकर्षात् ॥२५६॥

अथ द्वितीयलिङ्गभावनार्थमाह-

**धर्मरागोऽधिकोऽस्यैवं, भोगिनः स्त्र्यादिरागतः ।**
**भावतः कर्मसामर्थ्यात्, प्रवृत्तिस्त्वन्यथापि हि ॥२५७॥**

धर्मरागश्चारित्रधर्मस्पृहारूपः अधिकः-प्रकर्षवान् अस्य-सम्यग्दृष्टेः एवं-शुश्रूषावत् भोगिनः-पुरुषस्य, यः स्त्र्यादिष्विन्द्रियविषयेषु रागोऽभिलाषस्तस्मात्सकाशात् भावतोऽन्तःकरणपरिणत्या न पुनर्बहिर्वृत्त्यापि, यतः कर्मसामर्थ्याच्चारित्रमोहप्राबल्यात् प्रवृत्तिस्तु-व्यापारः पुनः 'अन्यथापि हि'-चारित्रधर्मप्रातिकूल्येन, अनुकूलतया भवत्येवेत्यपिहिशब्दार्थः ॥२५७॥ नन्वन्यथापि प्रवृत्तौ कथं भावतो धर्मरागोऽस्येत्याशंक्याह-

**न चैवं तत्र नो राग इति युक्त्योपपद्यते ।**
**हविःपूर्णप्रियो विप्रो, भुङ्क्ते यत्पूयिकाद्यपि ॥२५८॥**

न च-न पुनः एवमन्यथापि प्रवृत्तौ तत्र-चारित्रधर्मे, 'नो रागः'-किंतु राग एव इत्येतत् युक्त्योपपद्यते-घटते । एनामेव प्रतिवस्तूपमया प्राह-'हविःपूर्णा'-घृतपूर्णाः 'प्रियाः'-वल्लभा यस्य स तथा । 'विप्रो'-ब्राह्मणः 'भुङ्क्ते'-जेमति, यद्यस्मात् तथाविधविषमप्रघट्टकवशात् 'पूयिकाद्यपि'-पूयं

---

१. भोगसत्सिद्धि-B.C.; २. धराधिपल-A; ३. सत्सिद्ध्या-B.C.; ४. प्रकृत-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नाम कुथितो रसस्तदस्यास्तीति पूयिकं, आदिशब्दाद्रूक्षं पर्युषितं च वल्लचनकादि, किं पुनरितररूपं घृतपूर्णादिरित्यपिशब्दार्थः । 'यदत्र विप्रग्रहणं कृतं तदस्य जातिप्रत्ययादेवान्यत्र भोक्तुमिच्छाया अभावादि'ति ॥२५८॥

अथैनमेवाधिकृत्याह-

**पातात्त्वस्येत्वरं कालं भावोऽपि विनिवर्तते ।**
**वातरेणुभृतं चक्षुः स्त्रीरत्नमपि नेक्षते ॥२५९॥**

'पातात्'-तथाविधनिकाचितमिथ्यात्वमोहोदयेन सम्यग्दर्शनस्य भ्रंशात् पुनः अस्य-सम्यग्दृष्टेः इत्वरं-परि[१]मितमपार्धपुद्गलपरावर्तादिरूपं कालम् किम् इत्याह-'भावोऽपि'-तत्त्वश्रद्धानादिः, किं पुनर्भावकार्यं शुश्रूषा-दीत्यपिशब्दार्थः, विनिवर्तते । एतदेव प्रतिवस्तूपमया भावयति-वातरेणुभृतं-वातहार्यं रजो [२]वातरेणुः-वातोद्धतं रजस्तेन भृतं-पूरितम् चक्षुरक्षिगोलरूपम् 'स्त्रीरत्नमपि'-रम्भातिलोत्तमादि किं पुनः शेषं दृश्यमित्यपिशब्दार्थः, न-नैव ईक्षते-[३]पश्यतीति । यथालब्धात्मलाभमपि चक्षुस्तथाविधोपद्रवात्र [४]दृश्यमपि रूपं किंचित्कालं क्षममीक्षितुं, तथा सम्यग्दर्शनचक्षुरपि जीवादितत्त्वमिति ॥२५९॥ अथतृतीयलिङ्गभावनामाह—

**भोगिनोऽस्य स दूरेण भावसारं तथेक्षते ।**
**सर्वकर्तव्यतात्यागाद् गुरुदेवादिपूजनम् ॥२६०॥**

भोगिनो-भोक्तुः पुरुषात्सकाशात् अस्य-स्त्रीरत्नस्य 'स'-सम्यग्दृष्टिः दूरेणातिशयेन भावसारमन्तःपरिणतिप्रधानम् 'तथा' इति समुच्चये 'ईक्षते'-निभालयति हृदयचक्षुषा, किं तदित्याह 'सर्वकर्तव्यतात्यागात्' -त्यागभोगादिसर्वशेषप्रयोजनकरणीयतापरिहारेण 'गुरुदेवादिपूजनं'-उक्तरूपम् । इदमुक्तं भवति-यादृशं तद्भोक्ता स्त्रीरत्नगोचरं गौरवमवलम्बते, ततोऽनन्तगुणमसौ सम्यग्दृष्टिर्गुरुदेवादिपूजाविषयं बहुमानमातिष्ठत इति ॥२६०॥ तथा-

**निजं न हापयत्येव कालमत्र महामतिः ।**
**सारतामस्य विज्ञाय सद्भावप्रतिबन्धतः ॥२६१॥**

---

१. मितमुपार्ध-A.B.; २. वातरेणुस्तेन भृतं-A.C.; ३. पश्यति-A.B.C.; ४. रम्यमपि-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निजं-स्वकं त्रिसन्ध्यादिरूपं, न हापयत्येव न हारयत्येव,-कालमवसरं अत्र-देवतापूजनादौ महामतिः प्रशस्तबुद्धिरेष सम्यग्दृष्टिः । कथमित्याह 'सारतां' सर्वप्रयोजनेषु प्रधानतां अस्य-गुरुदेवादिपूजनस्य विज्ञाय 'सद्भाव-प्रतिबन्धतः'-तात्त्विकपरिणामप्रतिबन्धात् ॥२६१॥ किं च-

**शक्तेर्न्यूनाधिकत्वेन नात्राप्येष प्रवर्तते ।**
**प्रवृत्तिमात्रमेतद्यद् यथाशक्ति तु सत्फलम् ॥२६२॥**

'शक्तेर्न्यूनाधिकत्वेन' न्यूनत्वेनाधिकायामधिकत्वेन हीनायां शक्तौ न-नैव अत्रापि-देवपूजनादौ किं पुनः शेषकृत्येष्वित्यपिशब्दार्थः एष [1]स सम्यग्दृष्टिः प्रवर्तते, कुतः ? यतः प्रवृत्तिमात्रं-प्रवृत्तिरेव केवला फलविकला एतदयथाशक्ति गुरुदेवादिपूजनम् यद्यस्मात्, कथं तर्हि [2]सत्फलमेतत्स्यादित्याशं-क्याह 'यथाशक्ति तु'-शक्त्यनुरूपं पुनः, 'स्तफलं'-विद्यमानफलं देवादिपूजनं क्रियमाणं स्यात् ॥२६२॥ अयं तु सम्यग्दृष्टिर्यथा स्यात्तथा दर्शयति-

**एवंभूतोऽयमाख्यातः सम्यग्दृष्टिर्जिनोत्तमैः ।**
**यथाप्रवृत्तिकरणव्यतिक्रान्तो महाशयः ॥२६३॥**

'एवम्भूतः'- शुश्रूषादिगुणभाक् 'अयमाख्यातो'-निरूपितः सम्यग्दृष्टि-र्यथावद्दर्शी, 'जिनोत्तमैः' । कीदृश इत्याह 'यथाप्रवृत्तिकरणव्यतिक्रान्तः'-यथाप्रवृत्ति[3]नामकरणादुपलक्षणत्वादपूर्वानिवृत्तिकरणाभ्यां चातीतः 'महाशयः'-प्रशस्तपरिणामः ॥२६३॥ करणान्येव दर्शयति-

**करणं परिणामोऽत्र सत्त्वानां तत्पुनस्त्रिधा ।**
**यथाप्रवृत्तमाख्यातमपूर्वमनिवृत्ति च ॥२६४॥**

'करणं'-क्रियतेऽनेनेति करणं-कर्तुः साधकतमं तच्चेह परिणामः 'अत्र'-यथाप्रवृत्त्यादिकरणस्वरूपनिर्णये प्रक्रान्ते सति सत्त्वानाम् । तत्करणं पुनस्त्रिधा । त्रैविध्यमेव दर्शयति-यथाप्रवृत्तमेकमाख्यातं शास्त्रान्तरेषु, द्वितीयमपूर्वं, तृतीयमनिवृत्ति चानिवृत्तिनामकं पुनरिति ॥२६४॥

अथैतानि येषां यत्कालानि च भवन्ति तदाह-

---

१. 'स' इति A.B.C. प्रतिषु नास्ति; २. सफलमेत-B.C.; ३. नामकादुपलक्ष-A.B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एतत् त्रिधाऽपि भव्यानामन्येषामाद्यमेव हि ।**
**ग्रन्थिं यावत्त्विदं तं तु समतिक्रामतोऽपरम् ॥२६५॥**

एतत्करणं त्रिधापि-त्रिभिरपि प्रकारैः किं [1]पुनरेकैकेनेत्यपिशब्दार्थः, भव्यानां-निर्वाणार्हजीवानाम् । अन्येषामभव्यानामित्यर्थः आद्यमेव हि-यथाप्रवृत्तमेव करणम् । ग्रन्थिमुक्तरूपम् यावत्तु-यावत्पुनः 'इदं'-यथा[2]प्रवृत्तं करणम्, आ अनादेः संसारात् । तं तु-तं पुनर्ग्रन्थिं 'समतिक्रामतः'-समुल्लङ्घयतः सतः अपरं-द्वितीयमपूर्वकरणमित्यर्थः ॥२६५॥

**भिन्नग्रन्थेस्तृतीयं तु सम्यग्दृष्टेरतो हि न ।**
**पतितस्याऽऽप्यते बन्धो ग्रन्थिमुल्लङ्घ्य देशितः ॥२६६॥**

भिन्नग्रन्थेस्तृतीयं त्वनिवृत्तिकरणं पुनर्भवति । एवं सति यत्सिद्धं तदाह सम्यग्दृष्टेः- जीवस्य अतो हि-अत एव करणत्रयलाभादेव हेतोः न-नैव पतितस्य-तथाविधसंक्लेशात्सम्यक्त्वात्परिभ्रष्टस्य, आप्यते-लभ्यते, 'बन्धः' ज्ञानावरणादिपुद्गलग्रहरूपः, कीदृशोऽयमित्याह ग्रन्थि-ग्रन्थिभेदकालभाविनीं कर्मस्थितिमित्यर्थः, उल्लङ्घ्य-अतिक्रम्य, देशितः-सप्ततिकोटिकोट्यादिप्रमाणतया प्रज्ञप्तः, *''बन्धेण न वोलइ कयाइ''* (आ.नि.) इत्यादिवचनप्रामाण्यात् ॥२६६॥

**एवं सामान्यतो ज्ञेयः परिणामोऽस्य शोभनः ।**
**मिथ्यादृष्टेरपि सतो महाबन्धविशेषतः ॥२६७॥**

एवं ग्रन्थेरुल्लङ्घनेनाऽबन्धात् सामान्यतो-न [3]विशेषात्, 'ज्ञेयः परिणामोऽस्य' सम्यग्दृशः शोभनः- प्रशस्तः मिथ्यादृष्टेरपि सतस्तथाविधमिथ्यात्वमोहोदयात् । कुत इत्याह 'महाबन्धविशेषतः', इह द्विधा बन्धः, महाबन्ध इतरश्च, तत्र मिथ्यादृष्टेर्महाबन्धः, शेषश्चेतरस्य, ततो महाबन्धस्य विशेषतो-ऽवस्थान्तरविशेषात् । इदमुक्तं भवति-लब्धसम्यक्त्वस्य प्राणिनो मिथ्यादृष्टित्वेऽपि न सामान्यमिथ्यादृष्टेरिव बन्धः, किं तु कश्चिदत्यन्तन्यूनस्तद्विशेष एवेति ॥२६७॥ कुत इत्याह-

---

१. पुनरेकेनेत्य-A.C.; २. प्रवृत्तकरणम्-A.B.; ३. विशेषेण-C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सागरोपमकोटीनां कोट्यो मोहस्य सप्ततिः ।**
**अभिन्नग्रन्थिबन्धो यद् न त्वेकापीतरस्य तु ॥२६८॥**

सागरोपमकोटीनां कोट्यो मोहस्य सप्ततिः कर्म[1]ग्रन्थे प्रसिद्धाः अभिन्नग्रन्थेर्जीवस्योत्कर्षतो बन्धः यद्-यस्मात्कारणात् न तु-न पुनः एकापि सागरोपमकोटी बन्धः इतरस्य तु-भिन्नग्रन्थेः पुनः मिथ्यादृष्टेरपि सन् ॥२६८॥

अथोपसंहरन्नाह-

**तदत्र परिणामस्य भेदकत्वं नियोगतः ।**
**बाह्यं त्वसदनुष्ठानं प्रायस्तुल्यं द्वयोरपि ॥२६९॥**

यतो ग्रन्थिमतिक्रम्यास्य न बन्धः तत्-तस्माद्, अत्रानयोर्भिन्नग्रन्थीतरयोर्जीवयोर्विषये, परिणामस्याऽन्तःकरणस्य, भेदकत्वं-भेदकभावः नियोगतो नियमेन, बाह्यं तु बहिर्भावः पुनः असदनुष्ठानं-अर्थोपार्जनादि प्रायो-बाहुल्येन तुल्यं-समम् द्वयोरप्यनयोरिति ॥२६९॥ किं च-

**अयमस्यामवस्थायां बोधिसत्त्वोऽभिधीयते ।**
**अन्यैस्तल्लक्षणं यस्मात् सर्वमस्योपपद्यते ॥२७०॥**

अयं-भिन्नग्रन्थि[2]र्जीवः अस्यां-सम्यग्दर्शनरूपायामवस्थायां 'बोधिसत्त्वो' वक्ष्यमाणनिरुक्तः 'अभिधीयते'-निर्दिश्यते 'अन्यैरपि'-सौगतैः, तल्लक्षणं बोधिसत्त्वलक्षणम् यस्मात्सर्वं-निरवशेषं अस्य-सम्यग्दृष्टेः उपपद्यते-घटते ॥२७०॥ एतदेव दर्शयति-

**कायपातिन एवेह बोधिसत्त्वाः परोदितम् ।**
**न चित्तपातिनस्तावदेतदत्रापि युक्तिमत् ॥२७१॥**

'कायपातिन एव'- कायमात्रेणैव सावद्यक्रियावतारिणः 'इह'-जगति प्राक् प्रस्तुता बोधिसत्त्वाः, परोदितं-परनिरूपितमेतत् । व्यवच्छेद्यमाह-'न चित्तपातिनो'-न चित्तेन पतनशीलाः, "*तप्तलोहपदन्यासतुल्या वृत्तिः क्वचिद्यदि*" इति वचनप्रामाण्यात् । तावच्छब्दः क्रमार्थः । विस्तरतस्त्वन्यदपि परोदितमस्तीति भावः । एतद्बोधिसत्त्वलक्षणम् अत्रापि सम्यग्दृष्टौ किं पुनर्बोधिसत्त्वे,

---

१ ग्रन्थप्रसिद्धाः-B; २. जीवः-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

युक्तिमद्युक्तिसङ्गतम् ॥२७१॥ युक्तिमेवाह-

**परार्थरसिको धीमान् मार्गगामी महाशयः ।**
**गुणरागी तथेत्यादि सर्वं तुल्यं द्वयोरपि ॥२७२॥**

परार्थरसिकः-परोप[1]कारबद्धचित्तः 'धीमान्'-बुद्ध्यनुगतः 'मार्गगामी' कल्याणप्रापकपथयायी 'महाशयः'-स्फीतचित्तः 'गुणरागी'-गुणानुरागवान् 'तथा' इति बोधिसत्त्वगुणान्तरसमुच्चयार्थः । 'इत्यादि' शास्त्रान्तरोक्तं सर्वं तुल्यं-समम् 'द्वयोरपि' सम्यग्दृष्टिबोधिसत्त्वयोः ॥२७२॥

अन्वर्थतोऽपि तुल्यतां दर्शयति-

**यत्सम्यग्दर्शनं बोधिस्तत्प्रधानो महोदयः ।**
**सत्त्वोऽस्तु बोधिसत्त्वस्तद्धन्तैषोऽन्वर्थतोऽपि हि ॥२७३॥**

यद्-यस्मात् सम्यग्दर्शनं-सम्यक्त्वं बोधिः, तत्प्रधानो-बोधिसारः 'महोदयः'- [2]प्रशस्तगुणोद्गमः 'सत्त्वः'-सर्वजीवः अस्तु-भवतु बोधिसत्त्वः तत्-तस्मात् 'हन्त' इति पूर्ववत् 'एष' सम्यग्दृष्टिः अन्वर्थतोऽपि ह्यन्वर्थादपि किं पुनर्विशेषणैरित्यपिशब्दार्थ इति ॥२७३॥ अत्रैव पक्षान्तरमाह-

**वरबोधिसमेतो वा तीर्थकृद्यो भविष्यति ।**
**तथाभव्यत्वतोऽसौ वा बोधिसत्त्वः सतां मतः ॥२७४॥**

'वरबोधिसमेतो वा'-तीर्थकरपदप्रायोग्यसम्यक्त्वसमेतो वा 'बोधिसत्त्वः' इति [3]सम्बध्यते । स च कीदृश इत्याह तीर्थकृत्-तीर्थकर्ता यः जीवः भविष्यति -सम्पत्स्यते 'तथाभव्यत्वतः'-भव्यत्वं नाम सिद्धिगमनयोग्यत्वमनादिपारिणामिको भावः, तथाभव्यत्वं चैतदेव कालनैयत्यादिना प्रकारेण वैचित्र्यमापन्नं तस्मात् 'असौ वा'-अयमेव बोधिसत्त्वः 'सतां'-साधूनां मतः ॥२७४॥

तथाभव्यत्वमेव भावयति-

**सांसिद्धिकमिदं ज्ञेयं सम्यक् चित्रं च देहिनाम् ।**
**तथाकालादिभेदेन बीजसिद्ध्यादिभावतः ॥२७५॥**

सांसिद्धिकमात्मसमकालोद्भवं इदं तथाभव्यत्वं ज्ञेयं सम्यग्-यथावत्

---

१. कारप्रतिबद्धचित्तः-A; २. प्रशस्तसर्वगुणो-A.B.C.; ३. सम्पद्यते-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चित्रं च-नाना[१]रूपं पुनः देहिनाम् । कथमित्याह तथा-तत्प्रकारा ये कालादयः-कालस्वभावादयः कारणप्रकारास्तेषां भेदेन-वैचित्र्येण बीजस्य-धर्मप्रशंसादेः, सिद्धिः-लाभः,आदिशब्दाद्धर्मचिन्ताश्रवणानुष्ठानादिग्रहः तेषां भावतो-भावात् ॥२७५॥ एतदेवाधिकृत्याह-

**सर्वथा योग्यताऽभेदे तदभावोऽन्यथा भवेत् ।**
**निमित्तानामपि प्राप्तिस्तुल्या यत्तन्नियोगतः ॥२७६॥**

सर्वथा-सर्वैः प्रकारैः योग्यताया अभेदे-एकाकारायां योग्यतायामित्यर्थः, तदभावश्चित्रबीजसिद्ध्याद्यभावः, अन्यथा-पूर्वोक्तार्थानभ्युपगमे सति भवेत् सम्पद्येत । नन्वेकाकारायामपि योग्यतायां सहकारिभेदेन फलभेदोपपत्तेः किं योग्यतावैचित्र्याभ्युपगमेनेत्याशंक्याह 'निमित्तानामपि'-कालादीनां 'प्राप्तिः'-सन्निधानलक्षणा [२]सर्वयोग्यतानां, तुल्या-समा भवेत्, किं पुनर्योग्यता, परमते योग्यतायास्तुल्येत्यपिशब्दार्थः। यत्-यस्मात् तन्नियोगतः-योग्यतापारवश्यात्, तुल्यायां हि सत्त्वेषु योग्यतायां सहकारिणोऽपि तुल्या एव भवेयुः, तुल्ययोग्यतासामर्थ्याक्षिप्तत्वात्तेषाम्, इति सर्वत्र तुल्यफलतापत्तिरिति ॥२७६॥ अत्रैव विपर्यये बाधकमाह-

**अन्यथा योग्यताभेदः सर्वथा नोपपद्यते ।**
**निमित्तोपनिपातोऽपि यत्तदाक्षेपतो ध्रुवम् ॥२७७॥**

अन्यथा-सहकारिणां तुल्यत्वाभावे, योग्यताया अभेदस्तुल्यता, सर्वथा नोपपद्यते-घटते । कुत इत्याह-निमित्तानामुक्तरूपाणां कालादीनामुपनिपातः सन्निहितता, किं पुनर्योग्यतासाध्यं फलमित्यपिशब्दार्थः, यद्-यस्मात्, तदाक्षेपतस्तुल्ययोग्यताकर्षणाद्, ध्रुवं निश्चितं भवेत् ॥२७७॥ अथ योग्यता एव तथाभव्यत्वमिति व्याचष्टे-

**योग्यता चेह विज्ञेया बीजसिद्ध्याद्यपेक्षया ।**
**आत्मनः सहजा चित्रा तथाभव्यत्वमित्यतः ॥२७८॥**

योग्यता च-योग्यभावः पुनर्जीवानां इह-प्रक्रमे विज्ञेया-अवगन्तव्या

---

१. रूपं च पुनः-B.C.; २. सर्वयोग्यानां-A.B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बीजसिद्ध्यादीनामुक्तरूपाणामपेक्षया-आलम्बनेन आत्मनो-जीवस्य सहजा-जीवसमानकालभाविनी चित्रा-नानारूपा । किमित्याह 'तथाभव्यत्त्वमिति' एतत्प्रागुक्तस्वरूपं, अतः-अस्माद्धेतोः ॥२७८॥ किमित्याह-

**वरबोधेरपि न्यायात्सिद्धिर्नो हेतुभेदतः ।**
**फलभेदो यतो युक्तस्तथा व्यवहितादपि ॥२७९॥**

'वरबोधेरपि'-सम्यक्त्वलक्षणाया [२]अपि न्यायाद् युक्तेः सिद्धिः-सम्भवः, किं पुनर्योग्यताया इत्यपिशब्दार्थः ।'नो हेतुभेदतो'-धर्माचार्यादिवैचित्र्यलक्षणात् किं तु स्वयोग्यतावैचित्र्यात् 'फलभेदः'-कार्यनानात्वम् 'यतो'-हेतुभेदात् 'युक्तो'-घटमानः स्यात् 'तथा'-तेन प्रकारेण 'व्यवहितादपि'-किं पुनरव्यवहितादित्यपिशब्दार्थः । इति स्वगत एव योग्यताभेदः सर्वत्र कार्यभेदनिबन्धनं प्रतिपत्तव्यमिति तात्पर्यमिति ॥२७९॥

एवं च सति यत्सिद्धं तदाह-

**तथा च भिन्ने दुर्भेदे, कर्मग्रन्थिमहाचले ।**
**तीक्ष्णेन भाववज्रेण, बहुसंक्लेशकारिणि ॥२८०॥**

'तथा च'-योग्यताभेदस्य फलभेदहेतुत्वे च सति 'भिन्ने' विदारिते 'दुर्भेदे' कृच्छ्रविदारणीये कर्मग्रन्थिरेवोक्तरूपः 'महाचलो'-हिमवदादिरूपः तत्र, केनेत्याह 'तीक्ष्णेन'-निशितेन 'भाववज्रेण'-अपूर्वकरणभावाशनिना, कीदृशे कर्मग्रन्थिमहाचल इत्याह 'बहुसंक्लेशकारिणि'-सम्यग्दर्शनोपघात(क)कषायोदयहेतौ ॥२८०॥

किमित्याह-

**आनन्दो जायतेऽत्यन्तं, तात्त्विकोऽस्य महात्मनः ।**
**सद्व्याध्यभिभवे यद्वद्व्याधितस्य महौषधात् ॥२८१॥**

'आनन्दः'-प्रमोदः 'जायते'-समुद्भवति अत्यन्तं-अतीव 'तात्त्विकः'-परमार्थभावः अस्य-भिन्नग्रन्थेः महात्मनः-प्रशस्तस्वभावस्य । अत्र दृष्टान्तमाह-सति पारमार्थिके 'व्याध्यभिभवे'-कुष्ठादिव्याधिनिग्रहे, 'यद्वत्'-यथा

२. 'अपि' इति A.B.C. प्रतिषु नास्ति;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'व्याधितस्य'-सञ्जातव्याधेः, 'महौषधात्- तथाविधक्वाथपानादिरूपात् ॥२८१॥

अथ ग्रन्थिभेदमेव व्याचष्टे-

**भेदोऽपि चास्य विज्ञेयो, न भूयो भवनं तथा ।**
**तीव्रसंक्लेशविगमात्, सदा निःश्रेयसावहः ॥२८२॥**

'भेदोऽपि च'-न केवलं भेद आनन्द इत्यपिचशब्दार्थः, अस्य ग्रन्थेर्विज्ञेयः किमित्याह 'न भूयः'-पुनः 'भवनं'-भावः, तथा-यथाप्रागुक्त (प्राकृत) इत्याह, 'तीव्रसंक्लेशविगमात्'-अतिदृढकषायोदयविरहात् सदा-सर्वकालं निःश्रेयसावहः-निर्वाणहेतुः ॥२८२॥ अत्रैवाभिप्रायान्तरमाह-

**जात्यन्धस्य यथा पुंसश्चक्षुर्लाभे शुभोदये ।**
**सद्दर्शनं तथैवास्य, ग्रन्थिभेदेऽपरे जगुः ॥२८३॥**

जात्यन्धस्य-जन्मकालादारभ्यान्धस्य 'यथा पुंसः' कस्यचित्, चक्षुर्लाभे-कमलदलकोमलामलावलोकलोचनयुगलप्राप्तौ क्व सतीत्याह 'शुभोदये' तथाविधप्राग्भवोपात्ताऽद्भुतभूतपुण्यपरिपाके सति 'सद्दर्शनं' भवति । तथैवास्याऽपुनर्बन्धकस्य ग्रन्थिभेदेऽपरे-योगिविशेषाः जगुर्गीतवन्त इति ॥२८३॥

ततः-

**अनेन भवनैर्गुण्यं, सम्यग्वीक्ष्य महाशयः ।**
**तथाभव्यत्वयोगेन, विचित्रं चिन्तयत्यसौ ॥२८४॥**

अनेन-सद्दर्शनेन भवनैर्गुण्यं-जरामरणादिव्यसनबहुलतया संसारनिर्गुणभावम्, सम्यग्-यथावत् वीक्ष्य-विलोक्य महाशयः-प्रशस्तपरिणामः तथाभव्यत्वयोगेनोक्तरूपेण विचित्रं-नानारूपम् चिन्तयति-भावयति असौ भिन्नग्रन्थिर्जन्तुः ॥२८४॥

एतदेव दर्शयति-

**मोहान्धकारगहने, संसारे दुःखिता बत ।**
**सत्त्वाः परिभ्रमन्त्युच्चैः, सत्यस्मिन्धर्मतेजसि ॥२८५॥**

मोहान्धकारगहने - मिथ्यात्वादिमोहनीयध्वान्तबहुले संसारे - भवे दुःखिताः-सञ्जातदुःखा 'बत'-इत्यामन्त्रणे 'सत्त्वाः'-प्राणिनः परिभ्रमन्ति सञ्चरन्ति

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उच्चैरतीव सति-विद्यमाने अस्मिन्-सर्वज्ञोपज्ञे धर्मतेजसि-धर्मलक्षण उद्योते ॥२८५॥

**अहमेतानतः कृच्छ्राद्, यथायोगं कथञ्चन ।**
**अनेनोत्तारयामीति वरबोधिसमन्वितः ॥२८६॥**

अहं-कर्ता एतान्-भीषणभवभ्रमणरीणान्प्राणिनः अतो-भवात् कृच्छ्राद्-[१]कृच्छ्ररूपात् यथायोगं उत्तारणघटनानतिक्रमेण कथञ्चन-केनापि प्रकारेण अनेन धर्मतेजसा उत्तारयाम्यपसारयामि इत्येतत् वरबोधिसमन्वितः-उक्तरूपवरबोधिसम्पन्नः ॥२८६॥

**करुणादिगुणोपेतः, परार्थव्यसनी सदा ।**
**तथैव चेष्टते धीमान् वर्धमानमहोदयः ॥२८७॥**

करुणादिगुणोपेतो-ऽनुकम्पास्तिक्यादिगुणालिङ्गितः तथा परार्थव्यसनी परोपकारकरणव्यसनवान् सदा-सन्ततम् तथैव-करुणादिगुणानुरूपमेव चेष्टते व्यवहरति धीमान् वर्धमानमहोदयः-प्रतिक्षणारोहन्नवनवप्रशस्तगुणोद्गमः ॥२८७॥ अत एव-

**तत्तत्कल्याणयोगेन, कुर्वन्सत्त्वार्थमेव सः ।**
**तीर्थकृत्त्वमवाप्नोति, परं सत्त्वार्थसाधनम् ॥२८८॥**

तस्य तस्य कल्याणस्य-परिशुद्धप्रवचनाधिगमातिशायिधर्मकथाऽविसंवादिनिमित्तादिलक्षणस्य योगेन-व्यापारणेन कुर्वन्-विदधानः सत्त्वार्थमेव-मोक्षबीजाधानादिरूपं न त्वात्मम्भरिरपि, स-वरबोधिमान् किमित्याह तीर्थकृत्त्वं तीर्थकरत्वरूपं अवाप्नोति-लभते । कीदृशमित्याह परं-प्रकृष्टं सत्त्वार्थसाधनं भव्यसत्त्वप्रयोजनकारि ॥२८८॥ तथा-

**चिन्तयत्येवमेवैतत् स्वजनादिगतं तु यः ।**
**तथानुष्ठानतः सोऽपि, धीमान् गणधरो भवेत् ॥२८९॥**

चिन्तयत्येवमेव-पूर्वोक्तप्रकारेणैव एतद्भवादुत्तारणम् 'स्वजनादिगतं तु'-स्वजनमित्रदेशादिविशेषगतं पुनः य उक्तरूपो बोधिप्रधानो जीवः, तथानुष्ठानतः-

---

१. कष्टरूपात्-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चिन्तानुरूपानुष्ठनात्परोपकाररूपात् सोऽपि-न केवलं परोपकारी तीर्थकृदित्यपिशब्दार्थः, धीमान्-प्रशस्तबुद्धिः 'गणधरो'-देवदानवमानवादिमाननीयमहिमा तीर्थकराग्रिमशिष्यः, भवेत्-जायेतेति ॥२८९॥ तथा -

**संविग्नो भवनिर्वेदादात्मनिःसरणं तु यः ।**
**आत्मार्थसम्प्रवृत्तोऽसौ, सदा स्यान्मुण्डकेवली ॥२९०॥**

संविग्नः *"तथ्ये धर्मे ध्वस्तहिंसाप्रबन्धे, देवे रागद्वेषमोहादिमुक्ते । साधौ सर्वग्रन्थसन्दर्भहीने, संवेगोऽसौ निश्चलो योऽनुरागः ॥१॥"* एवंलक्षणसंवेगभाक् । भवनिर्वेदात् संसारनैर्गुण्यात् आत्मनिःसरणं तु-जरामरणादिदारुणदहनदह्यमानभवनोदराद् [१]दूरमात्मनिष्काशनं पुनः यः 'चिन्तयति' इति गम्यते, आत्मार्थं सम्प्रवृत्तः-स्वप्रयोजनमात्रप्रतिबद्धचित्तः असौ-पूर्वोक्तरूपः सदा-सततमेव स्याद्-भवेत् द्रव्यभावमुण्डनप्रधानो मुण्डश्च केवली च केवलज्ञानदर्शनवान् 'मुण्डकेवली'-केवल्येव तथाविधबाह्यातिशयशून्यः । अत्र दृष्टान्तः **पीठमहापीठसाधुयुगलकमिति** ॥२९०॥

[२]अत्रैव चिन्तावैचित्र्ये तथाभव्यत्वमेव हेतुरित्याह-

**तथाभव्यत्वतश्चित्रनिमित्तोपनिपाततः ।**
**एवं चिन्तादिसिद्धिश्च, सन्न्यायागमसङ्गता ॥२९१॥**

'तथाभव्यत्वत' उक्तरूपात् कीदृशादित्याह 'चित्रो' नानारूपो 'निमित्तोपनिपातः' कालादिकारणसन्निधानं यस्य तत्तथा तस्मात् 'एवं चिन्तादिसिद्धिः'-पूर्वोक्तचिन्ता[३]नुष्ठानसम्भवः, चः समुच्चये, कीदृशीत्याह 'सन्न्यायागमसङ्गता'-युक्तिशास्त्रघटिता । न हि कारणवैचित्र्यमन्तरेण कार्यवैचित्र्यं लोकशास्त्रयोः क्वचित्केनापि प्रतिपन्नमस्ति । ततोऽधिकृतमपि चिन्तादिवैचित्र्यसिद्धिलक्षणं कार्यं नियमात्कारणवैचित्र्यमपेक्षते, तच्च भव्यत्ववैचित्र्यमपहायान्यत्र युज्यत इति ॥२९१॥ एतदेवोपसंहरन्नाह-

**एवं कालादिभेदेन, बीजसिद्ध्यादिसंस्थितिः ।**
**सामग्र्यपेक्षया न्यायादन्यथा नोपपद्यते ॥२९२॥**

---

१. दूरमात्मनो निष्का-A.B.C.; २. अथात्र-A.B.C.; ३. नुष्ठानविरोधसम्भवः-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एवमुक्तप्रकारेण कालादिभेदेन–कालक्षेत्रादिविशेषेण 'बीजसिद्ध्यादि-संस्थितिरुक्तरूपा सामग्र्यपेक्षया–तत्तद्गुर्वादिसहकारिकारणसामग्रीमपेक्ष्य न्यायाद्–युक्तेः स्यात् । कुतः ? यतोऽन्यथाऽन्येन प्रकारेण भव्यत्ववैचि-त्र्यपरिहारवतः न–नैव उपपद्यते–'घटते, सिद्ध्यादिसंस्थितिः प्रस्तुतेति ॥२९२॥

अथ न्यायमेव स्मारयति–

**तत्तत्स्वभावता चित्रा, तदन्यापेक्षणी तथा ।**
**सर्वाभ्युपगमव्याप्त्या, न्यायश्चात्र निदर्शितः ॥२९३॥**

तेषामात्मकालादीनां कारणानां 'तत्तत्स्वभावता'–विवक्षितकार्यभवनानु-कूलस्वभावता चित्रा–नानारूपा 'तदन्यापेक्षणी' परस्परापेक्षावती 'तथा' इति विशेषणसमुच्चये कथमित्याह 'सर्वाभ्युपगमव्याप्त्या' सर्वकार्येषु सामग्रीजन्यत्वा-भ्युपगमस्य व्यापनेन या वर्तते, न पुनः केषुचिदेव कार्येषु । [2]किमित्याह– 'न्यायश्च'–न्यायः पुनः, अत्र–[3]बीजस्य सिद्ध्यादौ विषये निदर्शितः–निरूपितः प्रागेव "*सामग्र्याः कार्यहेतुत्वम्*" (श्लो. ८२) इत्यादिनेति तत्स्वभावतैव चित्रा न्याय( ?य्या) इति परमार्थः ॥२९३॥ अत्रैवाभिप्रायान्तरमाह–

**अधिमुक्त्याशयस्थैर्यविशेषवदिहापरैः ।**
**इष्यते सदनुष्ठानं, हेतुरत्रैव वस्तुनि ॥२९४॥**

अधिमुक्त्याशयस्याप्त(स्यापूर्व)श्रद्धारूपस्य मनसो यत्स्थैर्यमुद्वेगविषा-दादिभिर्दोषैरक्षोभ्यत्वं तस्य विशेषोऽतिशयस्तारतम्यलक्षणः सोऽस्यास्ती-त्यधिमुक्त्याशयस्थैर्यविशेषवत् । इह–योगचिन्तायाम् अपरैर्योगिविशेषैः इष्यते मन्यते । सत्–संशुद्धम् अनुष्ठानं–यमनियमाभ्यासरूपं हेतुर्निबन्धनं अत्रैवास्मिन्नेव तीर्थकरत्वगणधरत्वमुण्डकेवलित्वलक्षणे, 'वस्तुनि'–साध्ये । तेन तेन नामभेदेन तैरप्युच्यमानेन पुनः सर्वोपकारादिः प्रागेवोपन्यस्तो हेतुरिति । इदमुक्तं भवति–अत्यन्ताप्तगोचरश्रद्धास्थैर्यवतोऽनुष्ठानात्तीर्थकृत्त्वं, मध्यमश्रद्धासमन्वितात् गणधरत्वं, जघन्यश्रद्धासहितान्मुण्डकेवलित्वमाप्यत इति परे जगुः ॥२९४॥

अत्रैव मतविशेषमाह–

---

१. घटते, बीजसिद्ध-ABC; २. सा किमित्याह–A; ३. बीजसिद्ध्यादौ–A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**विशेषं चास्य मन्यन्त, ईश्वरानुग्रहादिति ।**
**प्रधानपरिणामात्तु, तथाऽन्ये तत्त्ववादिनः ॥२९५॥**

'विशेषं च'-विशेषं पुनरुक्तरूपम् अस्याधिमुक्त्याशयस्थैर्यस्य मन्यन्ते इच्छन्ति ईश्वरकारणिका ईश्वरानुग्रहात्-महेशोपष्टम्भात् इत्येवमेके । प्रधानपरिणामात्तु-सत्त्वरजस्तमोरूपप्रकृतिपरिणतेः पुनः सकाशात् तथाऽन्ये तत्त्ववादिनः-सांख्याः ॥२९५॥ अत्र प्रतिविधत्ते-

**तत्तत्स्वभावतां मुक्त्वा, नोभयत्राप्यदो भवेत् ।**
**एवं च कृत्वा ह्यत्रापि हन्तैषैव निबन्धनम् ॥२९६॥**

'तत्तत्स्वभावतां'-तस्य तीर्थकरत्वादिरूपफलविशेषभाजो जीवस्य तत्स्वभावता विशेषार्हता ताम् मुक्त्वा-विहाय न-नैव उभयत्रापि-ईश्वरानुग्रहपक्षे च, अदः-प्रस्तुतविशेषवदनुष्ठानम् भवेत्-जायेत । एवं च कृत्वा अस्मिँश्चार्थे प्रतिष्ठाविषये कृते सतीत्यर्थः 'हि' स्फुटम् अत्रापीश्वराद्यनुग्रहाभ्युपगमे किं पुनरस्मदभ्युपगम इत्यपिशब्दार्थः-, हन्त इति पूर्ववत् एषैव-तत्स्वभावतैव निबन्धनं-हेतुरित्येत[1]दायत्तैव सर्वकार्यसिद्धिरभ्युपगन्तुमुचितेति ॥२९६॥

अथ कथञ्चित्परमतमप्यनुमन्यमान आह-

**आर्थ्यं व्यापारमाश्रित्य, न च दोषोऽपि विद्यते ।**
**अत्र माध्यस्थ्यमालम्ब्य, यदि सम्यग्निरूप्यते ॥२९७॥**

आर्थ्यं-सामर्थ्यप्राप्तम् व्यापारमीश्वराद्यनुग्रहरूपम् आश्रित्यापेक्ष्य न च नैव दोषोऽप्यपराधः स्वमतपरिहाररूपः विद्यते-समस्ति, युक्तियुक्तार्थाभ्युपगमे पुनर्गुण एवेत्यपिशब्दार्थः । कथमित्याह अत्र ईश्वरानुग्रहादौ, माध्यस्थ्यं-मध्यस्थभावं आलम्ब्य-आश्रित्य यदि-चेत् सम्यक्-यथावत् निरूप्यते-चिन्त्यते ॥२९७॥ अथार्थ्यमेव व्यापारमाचष्टे-

**गुणप्रकर्षरूपो यत्, सर्वैर्वन्द्यस्तथेष्यते ।**
**देवतातिशयः कश्चित्, स्तवादेः फलदस्तथा ॥२९८॥**

गुणप्रकर्षरूपो-ज्ञानादिप्रकृष्टगुणस्वभावः यद्-यस्मात् सर्वैर्मुमुक्षुभिः

---

१. दायत्तैव-B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वन्द्यो-वन्दनीयः तथा-तत्प्रकारः इष्यते-मन्यते देवतातिशयो-विशिष्टदेवताख्यः (रूपः) कश्चिज्जिनादिः, स्तवादेः-स्तवन-पूजन-नमनानुध्यानादेः क्रियायाः फलदः-स्वर्गापवर्गादिफलदायी, 'तथा' इति समुच्चये ।अत्र यद्यपि स्वकर्तृका स्तवादिक्रिया फलं प्रयच्छति, तथापि स्तवनीयालम्बनत्वेन तस्यास्तत्स्वामिकत्वमिति स्तोतव्यनिमित्त एव स्तोतुः फललाभ इति ॥२९८॥ अथ द्वितीयानु[1]ग्रहभावनायाह-

**भवंश्चाप्यात्मनो यस्मादन्यतश्चित्रशक्तिकात् ।**
**कर्माद्यभिधानादेर्नान्यथातिप्रसङ्गतः ॥२९९॥**

भवंश्चापि-जायमानोऽपि प्रस्तुतो विशेषः आत्मनो-जीवस्य यस्मात्कारणात् अन्यतो-व्यतिरिक्तात् चित्रशक्तिकात्रानारूपसामर्थ्यात् । कीदृशादित्याह 'कर्मादि' कर्म अविद्याक्लेशादिरूपं अभिधा[2]नादेः-अभिधानं आदिशब्दात् स्वरूपं वा यस्य तत्तथा तस्मात् । विपक्षे बाधामाह न-नैव अन्यथा-तत्तत्स्वभावतां मुक्त्वा कुत-इत्याह अतिप्रसङ्गतः-अतिव्याप्तेः । यदि हि स्वयोग्यतामन्तरेणापि कर्मकृतोऽनुग्रहः स्यात्, तदा सर्वजीवानामसावविशेषेण स्यादिति । तस्मात्सर्वत्र स्वयोग्यतैव प्रधानो हेतुरिति ॥२९९॥

उपसंहरन्नाह-

**माध्यस्थ्यमवलम्ब्यैवमैदम्पर्यव्यपेक्षया ।**
**तत्त्वं निरूपणीयं स्यात्, कालातीतोऽप्यदोऽब्रवीत् ॥३००॥**

माध्यस्थ्यं-स्वपक्षानुरागपरपक्षद्वेषयोरन्तरालस्थायित्वम् अवलम्ब्य एवमुक्तयुक्त्या ऐदम्पर्यव्यपेक्षया-परमार्थपर्यालोचनेन तत्त्वं-[3]दैवतादिरूपम् निरूपणीयं -चिन्तनीयम् स्याद्-भवेत्, तच्चिन्तने च गुणप्रकर्षरूपाणां देवताविशेषाणामात्म[4]विशेषाभिधायिनां बाह्यस्य च कर्मणः तथाविधसंज्ञाभेदेऽपि न कश्चिद् भेदोऽस्तीति । अथ परमतेनापि संवादयन्नाह-'**कालातीतोऽपि**' शास्त्रकृद्विशेषः किं पुनर्वयमित्यपिशब्दार्थः अदः-एतद्, अब्रवीत्-उक्तवान् ॥३००॥

---

१. ग्रह भावयन्नाह-BC २. नादि-अभिधानं-A.B.C.; ३. देवतादि-A; ४. विशेषाधानां-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यदब्रवीत्तदेव दर्शयति-

**अन्येषामप्ययं मार्गो, मुक्ताऽविद्यादिवादिनाम् ।**
**अभिधानादिभेदेन, तत्त्वनीत्या व्यवस्थितः ॥३०१॥**

अन्येषामपि-तीर्थान्तरीयाणां किं पुनरस्माकमित्यपिशब्दार्थः अयमस्मदुक्तः मार्गो-देवतादिगोचरः कीदृशानां मुक्ताऽदिवादिनामविद्यादिवादिनां च मतेन । कथमित्याह अभिधानादिभेदेन-अभिधानभेदेन, आदिशब्दात्क्वचित्किंचित्स्वरूप-भेदेन च तत्त्वनीत्या-परमार्थरूपया व्यवस्थितः-प्रतिष्ठितः ॥३०१॥

एतदेव भावयति-

**मुक्तो बुद्धोऽर्हन्वा'पि यदैश्वर्येण समन्वितः ।**
**तदीश्वरः स एव स्यात्, संज्ञाभेदोऽत्र केवलम् ॥३०२॥**

मुक्तः-परब्रह्मवादिनां बुद्धो-बौद्धानां अर्हन्-जैनानां 'वापि' इति समुच्चये यद्-यस्मात् 'ऐश्वर्येण'-ज्ञानाद्यतिशयलक्षणेन 'समन्वितो'-युक्तो वर्तते । तत्-तस्मात् ईश्वरोऽस्मदुक्तः स एव मुक्तादिः स्यात्, विशेषमाह 'संज्ञाभेदः'-नामनानात्वं, अत्र-मुक्तादिप्रज्ञापनायां, केवलं-नवरं, नान्यत्किंचन ॥३०२॥

अत्रैव स एव परपरिकल्पितविशेषनिराकरणायाह-[2]

**अनादिशुद्ध इत्यादिर्यश्च भेदोऽस्य कल्प्यते ।**
**तत्तत्तन्त्रानुसारेण, मन्ये सोऽपि निरर्थकः ॥३०३॥**

अनादिशुद्ध इत्येवंरूप आदिर्यस्य स तथा । तत्रानादिशुद्धः सर्वगश्च शैवानां, सादिरसर्वगतश्च जैनानां, स एव प्रतिक्षणं भङ्गुरः सौगतानां,यश्च-यः पुनः भेदो-विशेषः अस्येश्वरस्य कल्प्यते-समर्थ्यते । कथमित्याह तत्तत्तन्त्रानुसारेण-तस्य तस्य दर्शनस्यानुवृत्त्या । मन्ये-प्रतिपद्ये सोऽपि विशेषः किं पुनः प्रागभिहितः संज्ञाभेद इत्यपिशब्दार्थः निरर्थको-निष्प्रयोजनः ॥३०३॥

कुत इत्याह-

**विशेषस्यापरिज्ञानाद्युक्तीनां जातिवादतः ।**
**प्रायो विरोधतश्चैव, फलाभेदाच्च भावतः ॥३०४॥**

---

१. पीति यदैश्वर्यसमन्वितः-A; २. अनादीत्यादि-B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विशेषस्य–मुक्तादिदेवताविशेषगतस्य अपरिज्ञानाद्–असंवेदनादर्वाग्द–र्शिप्रत्यक्षेण । तथा युक्तीनामनुमानरूपाणां जातिवादतो–असिद्धादिहेतुदोषोपघाते–नानुमानाभासत्वात् प्रायो–बाहुल्येन विरोधतो–विरुद्धत्वात् । चैव इति पूर्ववत् ।

तथाहि–सांख्यः शैवश्च सर्वक्षणिकवादिनं सौगतं प्रत्याहतुर्यथा–भवदाराध्यो बुद्धोऽर्थक्रियां देशनादिकां स्वक्षणे, पूर्वं, पश्चाद्वा कुर्यादिति त्रयी गतिः । तत्र न तावदाद्यः पक्षः कक्षीकरणीयः, समकालभाविनि व्यापाराभावात्, इतरथैकक्षणवर्तिनां समस्तार्थक्षणानामितरेतरकार्यकारणभावः प्रसज्येत, न चैतद् दृष्टमिष्टं वा । अथ स्वक्षणात्पूर्वमेवार्थे (प्रवर्तते), एतदपि न, स्वयमसतो भविष्यच्छङ्खचक्रवर्त्यादेरिव पूर्वकालविवर्तिनि कार्ये व्यापाराभावात् । अथ स्वक्षणादूर्ध्वं कार्यं विधत्त इति मन्येथाः, एतदप्यसाधीयः, विनष्टस्य कार्यकरणाऽक्षमत्वात्, अन्यथा मृतस्य शिखिनः केकायितं स्यात् । एवं च क्षणिकादर्थाद्व्यावर्तमानार्थक्रिया तीराऽदर्शिशकुनिन्यायेन नित्यानेव भावानाश्रयतया प्रतिपद्यत इति नित्यरूपः । अत एवानादिशुद्ध ईश्वरनामा आप्तविशेषोऽभ्युपगन्तुमुचित इति ।

बौद्धः पुनः प्राह–ईश्वरोऽप्रच्युतानुत्पन्नस्थिरैकस्वभावो भवद्भिरभ्यु–पगम्यते । न च नित्यस्य कथंचिदप्यर्थक्रिया युज्यते । नित्यो ह्यर्थः क्रमेण यौगपद्येन वार्थक्रियां कुर्वीत ? न तावत्क्रमेण, सन्निहितसर्वशक्तेः सहकारिभिश्चा– नाधेयातिशयस्य युगपदेव त्रैकालिकसर्वकार्यकरणप्रसङ्गात् । नापि यौगपद्येन, यतस्तत्र युगपदेव सर्वकार्यकरणेन कृतस्य पुनःकरणाभावेन च द्वितीयक्षणेऽर्थक्रियाविरहलक्षणं बलादसत्त्वमाढौकमानं न केनापि निरोद्धुं पार्यत इति प्रतिक्षणं परिवर्तमानापरापररूपः सर्वार्थक्रियाक्षमोऽभ्युपगन्तुं युक्तोऽसाविति ।

'फलाभेदाच्च'–फलस्य क्लेशक्षयलक्षणस्य गुणप्रकर्षरूपपुरुषारा–धनासाध्यस्य क्वचिन्नित्यानित्यत्वादौ विशेष आराध्यगते सत्यप्यभेदादविशेषात् भावतः–परमार्थतः । गुणप्रकर्षविषयस्य बहुमानस्यैव फलदायकत्वात्तस्य सर्वत्र मुक्तादावविशेषादिति ॥३०४॥ तथा–

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अविद्याक्लेशकर्मादि, यतश्च भवकारणम् ।**
**ततः प्रधानमेवैतत्, संज्ञाभेदमुपागतम् ॥३०५॥**

अविद्या वेदान्तिकानां, क्लेशः सांख्यानां, कर्म जैनानां, अदिशब्दाद्वासना सौगतानां, [1]पाशः शैवानाम् । यतो-यस्मात् चकारो वक्तव्यान्तरसूचनार्थः, भवकारणं-संसारहेतुः ततः-तस्मादविद्यादीनां भवकारणत्वाद्धेतोः प्रधानमेव एतद्-अस्मदभ्युपगतं भवकारणं सत् किमित्याह संज्ञाभेदं-नामान्तररूपम् उपागतं-प्राप्तम्, न त्वन्यत्किञ्चित् ॥३०५॥

अत्रापि परपरिकल्पितविशेषनिराकरणायाह-

**अस्यापि योऽपरो भेदश्चित्रोपाधिस्तथातथा ।**
**नीयतेऽतीतहेतुभ्यो, धीमतां सोऽप्यपार्थकः ॥३०६॥**

अस्यापि-प्रधानस्य योऽपरो-भवकारणत्वात्सार्वाभ्युपगतादन्यः भेदो-विशेषः कीदृश इत्याह 'चित्रोपाधिः'-चित्रो नानारूप उपाधिर्मूर्तत्वाऽ-मूर्तत्वादिलक्षणो यस्य स तथा, 'तथातथा'-तत्तद्दर्शनभेदेन गीयते-वर्ण्यते। किमित्याह 'अतीतहेतुभ्यः'-अनन्तरमेव "विशेषस्याऽपरिज्ञानात्" (३०४) इत्यादिश्लोकोक्तेभ्यः सकाशात् धीमतां-बुद्धिमतां, सोऽपि-किं पुनर्दैवतागत इत्यपिशब्दार्थः । अपार्थको-ऽपगतपरमार्थप्रयोजनः, स(सा)वैरपि भवकारणत्वेन योगाभ्यासापनेयस्यास्योपगमात्, अन्यस्य-विशेषस्य सतोऽप्यकिंचित्करत्वादिति ॥३०६॥ यत एवम्

**ततोऽस्थानप्रयासोऽयं, यत्तद्भेदनिरूपणम् ।**
**सामान्यमनुमानस्य, यतश्च विषयो मतः ॥३०७॥**

ततः-विशेषस्यापार्थकत्वाद्धेतोः अस्थानप्रयासोऽयमस्थानप्रयत्न एष तत्त्वचिन्तकानां यत्तद्भेदनिरूपणं-देवादिविशेषगवेषणम् । किंचासौ न प्रत्यक्षसाध्यः किंत्वनुमानात्, तत्र च 'सामान्यं'-अस्तित्वमात्रादि न तु विशेषः, अनुमानस्य-प्रमाणविशेषस्य यतो-यस्मात् चः समुच्चये विषयो-गोचरः मतोऽभिप्रेतः । अयमभिप्रायः-निर्दोषपुरुषविशेषरूपो देवः कर्म चाप्रत्यक्षत्वाद-

---

१. पाशाः शैवानाम्-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नुमानविषयः । ते चानुमाने अमू-'ये ये चयापचयधर्माणस्ते ते क्वचित्सर्वथाप्युच्छेदं प्रतिपद्यन्ते, यथा क्वचिद्रोगिणि रोगा नभसि वा जलधाराः, चयापचयधर्माणश्च रागादयः, ततो यत्र ते सर्वथा समुच्छेदभाजः स कश्चित्पुरुषातिशयो मुक्तादिशब्दवाच्यो देवः । तथा यस्तुल्यसाधनयोर्द्वयोः फलविशेषो नासावदृष्टं कारणं विना युज्यते, कार्यत्वात्, यद्यत्कार्यं तत्तत्कारणं विना न स्यात्, यथा घटः, कार्यं च फलविशेषः । ततो यस्तत्र हेतुः स कर्मेतीत्याद्यनुमानैः साधितोऽपि देवतादिरर्थो न सर्वविशेषानुगतः प्रतिपत्तुं शक्यः, किं तु सामान्यरूपः, ततः किं विशेषचिन्तयाऽशक्यार्थविषयेति । न च वक्तव्यं 'शास्त्रात्तर्हि निश्चयो भविष्यति,' तस्याप्याप्तवचनत्वेनाभिधीयमानार्थान्यथानुपपन्नतया तत्त्वतोऽनुमानत्वात् ॥३०७॥

अथ कालातीतोक्तं शास्त्रकृत्स्वयमेव समर्थयमानः प्राह-

**साधु चैतद्यतो नीत्या, शास्त्रमत्र प्रवर्तकम् ।**
**तथाभिधानभेदात्तु, भेदःकुचितिकाग्रहः ॥३०८॥**

साधु च-सुन्दरं पुनः एतत्कालातीतोक्तम् । यतो-यस्मात् नीत्या-परमार्थचिन्तारूपया शास्त्रं आगमः अत्र देवतादावर्थे प्रवर्तकं-प्रवृत्तिहेतुः । तथाभिधानभेदात्तु-मुक्तबुद्धादिनामनानात्वेन पुनः भेदो देवताकर्मादीनां, किमित्याह कुचितिकाग्रहः-कौटिल्यावेशरूप इति ॥३०८॥ ततः-

**विपश्चितां न युक्तोऽयमैदम्पर्यप्रिया हि ते ।**
**यथोक्तास्तत्पुनश्चारू, हन्ताऽत्रापि निरूप्यताम् ॥३०९॥**

विपश्चितां-विदुषां न युक्तो-ऽघटमानः अयं-कुचितिकाग्रहः । कुत इत्याह 'ऐदम्पर्यप्रिया'-वल्लभपरमार्थाः हि यस्मात् ते-विपश्चितः यथोक्तास्तात्त्विकरूपाः । यदि नामैवं ततः किमित्याह-तत्पुनः ऐदम्पर्यं चारु-शुद्धं 'हन्त' इति प्राग्वत्, अत्रापि-अस्मिन्नपि कालातीतोक्ते, किं पुनः शेषविपश्चिदुक्ते, 'निरूप्यतां' निपुणाभोगेन ॥३०९॥

अथ कालातीतमतस्वमतयोर्विशेषेणाऽभेदं दर्शयन्नाह-

**उभयोः परिणामित्वं, तथाभ्युपगमाद् ध्रुवम् ।**
**अनुग्रहात्प्रवृत्तेश्च, तथाद्धाभेदतः स्थितम् ॥३१०॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उभयोरीश्वरप्रधानयो: परिणामित्वं-कथञ्चिद् ध्रौव्येऽप्यपरापरपर्यायवत्त्वं 'स्थितं' इत्युत्तरेण योगः । कुत इत्याह-'तथाभ्युपगमात्' तत्प्रकाराङ्गीकारात् ध्रुवं-निश्चितम् । तथाभ्युपगममेव दर्शयति अनुग्रहात्-उपष्टम्भात्तथाविधयोग्य-जीवानामीश्वरेण, 'प्रवृत्तेश्च' व्यापारणात्प्रधानस्य । कथमित्याह 'तथाद्धाभेदत:'-तत्प्रकारकालभेदेन स्थितं-प्रतिष्ठितम् । अयमत्र भाव: यदा कालभेदेन सत्त्वानामीश्वरस्तथातथानुग्राहक इष्यते प्रधानं च तथातथाप्रवृत्तिमत्, तदा नूनमेतयोर्न नित्यैकरूपता, किं त्वनेकरूपतैवेति बलात्परिणामित्वमापन्नमनयोरिति ॥३१०॥ एवं च सति किमित्याह-

**सर्वेषां तत्स्वभावत्वात्तदेतदुपपद्यते ।**
**नान्यथातिप्रसङ्गेन, सूक्ष्मबुद्ध्या निरूप्यताम् ॥३११॥**

सर्वेषामीश्वरप्रधानानुग्राह्यानां तत्स्वभावत्वाद्-अनु[1]ग्राहकनिवृत्ता-धिकारित्वा-नुग्राह्यरूपत्वात् तदेतदीश्वरानुग्रहादि उपपद्यते-घटते । विपक्षे बाधामाह-'नान्यथा' तत्स्वभावत्वमन्तरेण अतिप्रसङ्गेन-अतिव्याप्त्या सूक्ष्मबुद्ध्या -निपुणाभोगेन निरूप्यतां-चिन्त्यतामिति ॥३११॥

अथ प्रस्तुतमेव तीर्थकरादित्वमधिकृत्याह-

**आत्मनां तत्स्वभावत्वे, प्रधानस्यापि संस्थिते ।**
**ईश्वरस्यापि सन्न्यायाद्, विशेषोऽधिकृतो भवेत् ॥३१२॥**

आत्मनां-जीवानाम् 'तत्स्वभावत्वे'ऽनुग्राह्यस्वभावत्वे [2]संस्थिते-सिद्धे ईश्वरस्यापि-प्रागुपन्यस्तस्यानुग्राहकत्वरूपे तत्स्वभावत्वे सन्न्यायादनन्तरमे-वोपन्यस्तात् विशेषोऽधिकृततीर्थकरादिरूप: भवेत्-स्यात् ॥३१२॥

अथ यदेतत्तत्स्वभावत्वं तीर्थकरादिहेतुत्वेनोक्तं तत्स्वरूपमाह-

**सांसिद्धिकं च सर्वेषामेतदाहुर्मनीषिणः ।**
**अन्ये नियतभावत्वादन्यथा न्यायवादिनः ॥३१३॥**

सांसिद्धिकं च-स्वभावभवं पुनः सर्वेषामात्मादीनां एतत्स्वभावत्वं आहु:

---

१. ग्राहकत्वनिवृत्ता-A; २. प्रधानस्यापि निवृत्ताधिकारित्वलक्षणे तत्स्वभावत्वे संस्थिते-A,B;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मनीषिणो-जैनाः । अत्रैव मतान्तरमाह 'अन्ये'-नियतिमात्रजगत्कारणवादिनः 'नियतभावत्वात्'-नियतो द्रव्यक्षेत्रकालभावनियमेन प्रतिनियमवान् भावः [1]स्वभावः सत्ता येषां तीर्थंकरादीनां ते तथा, तद्भावस्तात्त्वं तस्मात् । अन्यथा-सांसिद्धिकवैलक्षण्येन नियतिजमित्यर्थः न्यायवादिनः-युक्तिभाषिणः । तथा च नियतिवादिमतं "यद्यदा तत्तदा, यद्यत्र तत्तत्र, यद्येन तत्तेन, यद्यस्य तत्तस्य, यद्भवति तद्भवति, यन्न भवति तन्न भवतीति" । तथा *"प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः, सोऽवश्यं भवति नृणां शुभोऽशुभो वा । भूतानां महति कृतेऽपि हि प्रयत्ने, नाऽभाव्यं भवति न भाविनोऽस्ति नाशः ॥"* इति ॥३१३॥ नियतभावत्वमपि सांसिद्धिकमेवेति दर्शयन्नाह-

**सांसिद्धिकमदोऽप्येवमन्यथा नोपपद्यते ।**
**योगिनो वा विजानन्ति, किमस्थानग्रहेण नः ॥३१४॥**

सांसिद्धिकं-स्वभावभवं अदोऽपि-नियतभावत्वं किं पुनस्तत्स्वभावत्वमित्यपिशब्दार्थः एवमुक्तप्रकारेण अन्यथा-सांसिद्धिकत्वमन्तरेण नोपपद्यते-न घटते । न हि वन्ध्यासुतादीनां स्वकीयस्वभावविरहेण नियतभावत्वलक्षणो विशेषः कश्चिद्युज्यते । इति सर्वकार्यकदम्बकव्यापकं सांसिद्धिकं तत्स्वभावत्वमवश्यमेष्टव्यमिति । योगिनो वा-अथवा योगिनो दिव्यदृशो 'विजानन्ति'-[2]इत्थमिदमित्थं वातीन्द्रियत्वादस्यार्थस्य, 'किं'-न किंचित्साध्यमित्यर्थः अस्थानग्रहेण-विशेषनिरूपणारूपेण नोऽस्माकम् ॥३१४॥

एतदेव दर्शयन्ति ([3]भावयन्ति)-

**अस्थानं रूपमन्धस्य, यथा सन्निश्चयं प्रति ।**
**तथैवातीन्द्रियं वस्तु, छद्मस्थस्यापि तत्त्वतः ॥३१५॥**

अस्थानमविषयः रूपं-नीलकृष्णादिलक्षणं अन्धस्य-लोचनव्यापारविकलस्य, यथा सन्निश्चयं-विशदावलोचनं प्रत्याश्रित्य । तथैवान्धरूपसन्निश्चयन्यायेन अतीन्द्रियं वस्त्वात्मादिविशेषरूपं छद्मस्थस्याप्यर्वाग्दृशः प्रमातुः किं पुनरन्धस्य रूपमित्यपिशब्दार्थः तत्त्वतः-परमार्थनीत्या ॥३१५॥

---

१. 'स्वभावः' इति A.B. प्रत्योर्नास्ति; २. इत्थमिदमनित्थं-A.B.C.; ३. भावयति-C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आह-यदि छद्मस्थस्यातीन्द्रियं [1]वस्तु न विषयः, कथं तस्य तत्प्रज्ञापना युज्यत इत्याह-

**हस्तस्पर्शसमं शास्त्रं, तत एव कथंचन ।**
**अत्र तन्निश्चयोऽपि स्यात्, तथाचन्द्रोपरागवत् ॥३१६॥**

हस्तस्पर्शसममन्धस्य हस्तस्पर्शेन वस्तूपलम्भतुल्यं शास्त्रमतीन्द्रियार्थगोचरं वर्तते । कुतः ? यतः 'तत एव'-शास्त्रादेव कथंचन-केनापि प्रकारेण अत्र-छद्मस्थे प्रमातरि तन्निश्चयोऽप्यतीन्द्रियवस्तुनिर्णयः स्यात्, किं पुनर्विशेषापेक्षया निश्चय इत्यपिशब्दार्थः । दृष्टान्तमाह 'तथाचन्द्रोपरागवत्' तथा तत्प्रकारोऽर्धविभागादिविषयतया चन्द्रस्योपरागो राहुस्पर्शस्तद्वत् । यथा शास्त्रात् सर्वविशेषानिश्चयेऽपि चन्द्रोपरागः केनापि विशेषेण निश्चीयत एव, तथान्यदप्यतीन्द्रियं वस्तु छद्मस्थेनेति ॥३१६॥ उपसंहारमाह-

**ग्रहं सर्वत्र सन्त्यज्य, तद्गम्भीरेण चेतसा ।**
**शास्त्रगर्भः समालोच्यो ग्राह्यश्चेष्टार्थसङ्गतः ॥३१७॥**

ग्रहं अतत्त्वाभिनिवेशं सर्वत्र-देवतादावर्थे सन्त्यज्य-विहाय तत्तस्मात् गम्भीरेणाऽनुत्तानेन 'चेतसा' हृदये(येन) 'शास्त्रगर्भः'-शास्त्रैदम्पर्यं समालोच्यः-सम्यक् पर्यालोचनीयः, ग्राह्यश्च-ग्रहणीयः इष्टार्थसङ्गतो-युज्यमानार्थसम्पन्न इति ॥३१७॥

अथ दैवपुरुषकारश्चेत्यादि [२१ तमे श्लोके] यत्प्रागुक्तमासीत्तत्तथैवानूद्य समर्थयमान आह[2]-

**दैवं पुरुषकारश्च, तुल्यावेतदपि स्फुटम् ।**
**एवं व्यवस्थिते तत्त्वे, युज्यते न्यायतः परम् ॥३१८॥**

'दैवं पुरुषकारश्च तुल्यावेतदपि स्फुटम्' इति प्राग्वत् । एवमुक्तरूपेण परिणामित्वादिना व्यवस्थिते-प्रतिष्ठिते तत्त्वे-जीवादौ युज्यते-घटते न्यायतो-नीत्या परं-केवलं, न पुनरन्यथेति ॥३१८॥ एतदेव भावयति-

---

१. वस्तु विषयं-A.B.C.; २. दैवपुरुषकाराधिकाराय उपदेशपदे श्लोक ३४१ तः ३५१ पर्यन्तानि श्लोकानि द्रष्टव्यानि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**दैवं नामेह तत्त्वेन, कर्मैव हि शुभाशुभम् ।**
**तथा पुरुषकारश्च स्वव्यापारो हि सिद्धिदः ॥३१९॥**

'दैवं नाम'-दैवमिति नामवत् 'इह'-दैवपुरुषकारयोस्तुल्यताचिन्तायां 'तत्त्वेन'-निश्चयवृत्त्या 'कर्मैव हि' कर्मैव केवलं शुभाशुभं-प्रशस्ताप्रशस्तलक्षणं, नापरं किञ्चित् देवस्येदमिति व्युत्पत्तेर्देवताकृतानुग्रहादि, 'तथा' इति समुच्चये । [1]पुरुषकारश्च स्वव्यापारो हि-आत्मव्यापार एव न पुनः परमपुरुषव्यापारः कश्चित् 'सिद्धिदो'-विवक्षितकार्यनिष्पत्तिप्रदः ॥३१९॥

**स्वरूपं निश्चयेनैतदनयोस्तत्त्ववेदिनः ।**
**ब्रुवते व्यवहारेण, चित्रमन्योन्यसंश्रयम् ॥३२०॥**

स्वरूपं-स्वभावलक्षणम् 'निश्चयेन'-निश्चयनयमतेन एतत्प्रागुक्तं अनयो-र्दैवपुरुषकारयोः तत्त्ववेदिनः-परमार्थदृशः ब्रुवते-वदन्ति, व्यवहारेण-व्यवहारनयमतेन[2] चित्रं-नानारूपम् अन्योन्यसंश्रयं-परस्परेण विहितोपष्टम्भं ब्रुवते । अयमत्र भावः- निश्चयनयः पुरुषकारप्रवृत्तौ तमेव कार्यहेतुतया प्रतिपद्यते, न पुनः सदपि दैवं, दैवप्रवृत्तौ च दैवमेव न तु सन्तमपि पुरुषकारं, अन्यथान्योन्यसापेक्षत्वेनानयोरसामर्थ्यं स्यात्, "सापेक्षमसमर्थं" इति वचनात् । तस्मिंश्च सत्यर्थक्रियाकारित्वविरहलक्षणमवस्तुत्वं बलादाढौकेत । तस्माद्यद्यदा प्रधानभावेन व्याप्रियते तदेव तदा कार्यहेतुरिति[3] । व्यवहारनयस्तु पर्यायेण प्रतिपन्नप्रधानोपसर्जनभावद्वयमप्येतत्तत्कार्यकरणक्षमं सम्पद्यत इति प्रतिजानीते ॥३२०॥ अथ व्यवहारमतमेव भावयति-

**न भवस्थस्य यत्कर्म विना व्यापारसम्भवः ।**
**न च व्यापारशून्यस्य फलं यत्कर्मणोऽपि हि ॥३२१॥**

न-नैव भवस्थस्य-जन्तोः यद्यस्मात् कर्म-दैवं विनान्तरेण व्यापारसम्भवो गमनादिचेष्टारूपः । न च व्यापारशून्यस्य-पुरुषकारविकलस्य फलं-पुरुषार्थसिद्धिरूपम् । यद्यस्मात् 'कर्मणोऽपि हि' किं पुनः कर्मशून्यस्य पुरुषकारस्येत्यपिहिशब्दार्थः । अतोऽन्योन्यसंश्रयमिदं द्वयमिति ॥३२१॥

---

१. पुरुषकारश्च पक्षे ये स्व-A.B.; २. मतेन तु चित्रं-A.B.C.; ३. प्रतिपत्तव्यम् ।-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथानयोः पुनरपि स्वरूपमाह–

**व्यापारमात्रात्फलदं, निष्फलं महतोऽपि च ।**
**अतो यत्कर्म तद्दैवं, चित्रं ज्ञेयं हिताहितम् ॥३२२॥**

व्यापारमात्रात्–तुच्छादपि व्यापारात् 'फलदं'–स्वफलप्रदायि, निष्फलं–फलविकलं क्वचित्तथाविधकालक्षेत्रादिबलवैकल्यात् 'महतोऽपि च अतः' पुरुषकारात् 'यत्कर्म तद्दैवं' दैवसंज्ञम् 'चित्रं' नानारूपं ज्ञेयं हिताहितं–शुभाशुभ[1]रूपम् ॥३२२॥

**एवं पुरुषकारस्तु, व्यापारबहुलस्तथा ।**
**फलहेतुर्नियोगेन, ज्ञेयो जन्मान्तरेऽपि हि ॥३२३॥**

एवं–कर्मवत् पुरुषकारस्तु–पुरुषकारोऽपि व्यापारबहुलो–व्यापारो बहुलो भूयान् कर्मापेक्षया यत्र स तथा । 'तथा' इति समुच्चये फलहेतुः–फलनिमित्तं, नियोगेन–निश्चयेन 'ज्ञेयो जन्मान्तरेऽपि हि' न केवलमिह भव इत्यपिहिशब्दार्थः । यथा हि पुरुषकार इह तत्तच्चित्रफलः प्रत्यक्षत एवोपलभ्यते तथा जन्मान्तरेऽप्यसौ तथाविधफलहेतुतया ज्ञातव्यः, तत्तद्व्यापारोपार्जितकर्मणः प्रेत्यफलमदत्त्वापि निवृत्त्यभावादिति ॥३२३॥ [2]उपसंहारमाह–

**अन्योन्यसंश्रयावेवं, द्वावप्येतौ विचक्षणैः ।**
**उक्तावन्यैस्तु कर्मैव, केवलं कालभेदतः ॥३२४॥**

अन्योन्यसंश्रयौ–परस्परो[3]पष्टम्भौ एवमुक्तक्रमेण द्वावप्येतौ–दैवपुरुषकारौ 'विचक्षणैः'–विपश्चिद्भिः उक्तौ–भणितौ फलहेतुतयेति । अत्रैव मतान्तरमाह 'अन्यैस्तु' अस्मद्विलक्षणैर्वादिभिः सांख्यैरित्यर्थः 'कर्मैव' प्रधानापराभिधानं, 'केवलं' पुरुषकारशून्यं 'फलदं' इत्यनुवर्तते 'कालभेदतः'–कालविशेषमासाद्योक्तम् ॥३२४॥ अथैत[illegible]धानायाह–

**दैवमात्मकृतं विद्यात् कर्म यत्पौर्वदेहिकम् ।**
**स्मृतः पुरुषकारस्तु, क्रियते यदिहापरम् ॥३२५॥**

'दैवमात्मकृतं'–मिथ्यात्वा[illegible]भिर्हेतुभिर्जीवेन विहितम् विद्यात्–जानीयात्

---

१. रूपं एवमित्यादि-B.C. २. उप[illegible]माह-A; ३. पष्टब्धौ-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किमित्याह 'कर्म यत्पौर्वदेहिकं-'पूर्वदेहभवं, स्मृतः-अनुध्यातः पुरुषकारस्तु-पुरुषकारः पुनः क्रियते-व्यवहारिभिः यदिहापरं-तथाविधे कर्मणि सत्यपि वाणीज्यराजसेवादि ॥३५५॥ एवं च-

**नेदमात्मक्रियाऽभावे, यतः स्वफलसाधकम् ।**
**अतः पूर्वोक्तमेवेह, लक्षणं तात्त्विकं तयोः ॥३२६॥**

न-नैव इदं-कर्म 'आत्मक्रियाभावे'-जीवव्यापारविरहे यतो-यस्मात् 'स्वफलसाधकं'-निजफलकारि क्वचिदुपलभ्यते । अतो-ऽस्माद्धेतोः 'पूर्वोक्तमेव' यत्परस्परोपष्टम्भवत् प्रागुपन्यस्तम् इह-प्रक्रमे लक्षणं स्वरूपम् । तात्त्विकं-सद्भूतम् तयोर्दैवपुरुषकारयोः ॥३२६॥ अत्रापि विशेषमाह-

**दैवं पुरुषकारेण, दुर्बलं ह्युपहन्यते ।**
**दैवेन चैषोऽपीत्येतन्नान्यथा चोपपद्यते ॥३२७॥**

दैवं पुरुषकारेण-[1]वीर्यातिरेकलक्षणेन दुर्बलं-तथाविधबलविकलम् 'हिः'-स्फुटम् 'उपहन्यते'-स्वफलमुपदधानं प्रतिस्खल्यते । **उपदेशपदप्रसिद्ध**-ज्ञानगर्भमहामन्त्रिपुरुषकारेणेव स्वकुटुम्बवधाढौककं कर्मेति । दैवेन च-दैवेन पुनर्बलवता 'एषोपि' पुरुषकारोप्युपहन्यते किं पुनः पुरुषकारेण दैवमित्य-पिशब्दार्थः, द्वारकावतीदाहप्रवृत्तौ वासुदेवबलदेवपुरुषकार इव । विपर्यये बाधामाह 'इत्येतत्' पूर्वोक्तं परस्परोपहतिलक्षणं वस्तु न-नैव अन्यथा असमबलतायां सत्यां उपपद्यते घटत इति ॥३२७॥

एवं परस्परोपघात्योपघातकभावे यत्सिद्धं तदाह-

**कर्मणा कर्ममात्रस्य, नोपघातादि तत्त्वतः ।**
**स्वव्यापारगतत्वे तु, तस्यैतदपि युज्यते ॥३२८॥**

कर्मणा-केवलेनैव कर्ममात्रस्य-केवलस्यैव कर्मणः नोपघातादि उपघा-तानुग्रहौ तत्त्वतो-ऽनुपचारेण । न हि केवलं कर्म [2]किञ्चिदनुग्रहीतुं वा क्षममसहायत्वात् । तर्हि कथं स्यादित्याह-स्वव्यापारगतत्वे तु-जीवक्रियाप्र-तिबद्धत्वे पुनः तस्य-कर्मणः 'एतदपि'-[3]परस्परोपघात्यादि युज्यते ॥३२८॥

१. पुरुषवीर्य-A; २. कश्चिद-A 'क्वचिद्' इति मुद्रितप्रतौ; ३. परस्योपघात्यादि A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ प्रस्तुतमेवाधिकृत्याह–

**उभयोस्तत्स्वभावत्वे, तत्तत्कालाद्यपेक्षया ।**
**बाध्यबाधकभावः स्यात्, सम्यग्न्यायाऽविरोधतः ॥३२९॥**

उभयोर्दैवपुरुषकारयोः तत्स्वभावत्वे–परस्परं बाध्यबाधकस्वभावत्वे 'तत्तत्कालाद्यपेक्षया–' तानि तानि कालादीनि सहकारिकारणान्यपेक्ष्य किमित्याह 'बाध्य–बाधकभावः–' उपघात्योपघातकभावः, 'स्यात्सम्यग्न्यायाविरोधतः'–सम्यग्युक्तेरविघटनेन ॥३२९॥ अत्रैवाभ्युच्चयमाह–

**तथा च तत्स्वभावत्वनियमात्कर्तृकर्मणोः ।**
**फलभावोऽन्यथा तु स्यान्न काङ्कटुकपक्तिवत् ॥३३०॥**

तथा च–एवं च सति तत्स्वभावत्वनियमात्–तत्स्वभावताप्रतिनियतभावात् कर्तृकर्मणोः–बाधकबाध्यादिलक्षणयोः फलभावः–बाधादिसिद्धिरूपः, विपक्षे बाधामाह–अन्यथा तु तत्स्वभावत्वनियमाभावात्पुनः 'स्यान्न काङ्कटुकपक्तिवत्'–पाकानर्हेषु मुद्गादिषु पक्तिरिवेति ॥३३०॥

अथानयोरेव प्रकारान्तरेण बाध्यबाधकभावमधिकृत्याह–

**कर्माऽनियतभावं तु, यत्स्याच्चित्रं फलं प्रति ।**
**तद्बाध्यमत्र दार्वादिप्रतिमायोग्यतासमम् ॥३३१॥**

कर्मानियतभावं त्वनियतपरिणाममेव यत्स्याच्चित्रं–नानारूपं, फलं–सुख–दुःखादिसमर्पणरूपं प्रति–समाश्रित्य, तद्बाध्यं–निवर्त्तनीयं पुरुषकारेण अत्र बाध्य–बाधकचिन्तायां कीदृशमित्याह दार्वादेर्दलविशेषस्य या प्रतिमायोग्यता तत्समम् ॥३३१॥ योग्यतामेवाधिकृत्याह–

**नियमात्प्रतिमा नात्र, न चातोऽयोग्यतैव हि ।**
**तल्लक्षणनियोगेन, प्रतिमेवास्य बाधकः ॥३३२॥**

नियमादवश्यंतया प्रतिमा–[1]दैवतादिप्रतिबिम्बरूपा न–नैव अत्र–दार्वादौ योग्यतायां सत्यामपि । न चातः प्रतिमाया अभवनादयोग्यतैव हि । कथमित्याह 'तल्लक्षणनियोगेन'–अयोग्यतालक्षणाभावेन तथा लोकरूढेः । ततः प्रतिमेव–

---

१. देवतादि–A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रतिबिम्बनिष्पत्तिरिव दार्वादेर्योग्यतायाः अस्य-कर्मणः 'बाधकः'-पुरुषकारः । [1]यथा हि दार्वादीनां योग्यता तावदेव व्यपदिश्यते यावत्प्रतिमालक्षणं कार्यं न निष्पद्यते, कार्यनिष्पत्तौ सर्वत्र कारणस्याकारणीभूततया रूढत्वात्, एवं कर्मापि यावत्पुरुषकारेण विक्रियामन्यथापरिणतिलक्षणां नानीयते तावत्तदबाधित-रूपमेवास्ते, पुरुषकारप्रवृत्तौ तु तयोर्बाध्य-बाधकभावः सम्पद्यत इति (दृष्टान्तस्पष्टत्वार्थं द्रष्टव्या द्वा. द्वा. १७-२१ कारिका) ॥३३२॥ न च वक्तव्यं योग्यतैव प्रतिमामाक्षेप्स्यति किं तद्बाधकेन पुरुषकारेणेत्याशंक्याह-

**दार्वादेः प्रतिमाक्षेपे, तद्भावः सर्वतो ध्रुवः ।**
**योग्यस्याऽयोग्यता चेति, न चैषा लोकसिद्धितः ॥३३३॥**

दार्वादेर्दलस्य स्वयोग्यतयैव प्रतिमाक्षेपे-प्रतिमानिष्पत्त्याकर्षणे तद्भावः-प्रतिमाभावः सर्वतः-सर्वस्माद्दार्वादेः ध्रुवो-निश्चितः प्रसज्येत, योग्यस्य-दार्वादेरेव, 'अयोग्यता' [2]प्रतिमानाक्षेपवतीत्यथवा इत्येतत्प्र[3]सज्येत । भवतु [4]नामैवं, तथापि को दोष इत्याशंक्याह न च-न पुनः, एषा-( ?अ)योग्यता लोकसिद्धितः-लोकप्रसिद्धेः । न हि दार्वादीनि प्रतिमानिष्पत्त्यभावेऽप्ययोग्यानीति प्रसिद्धिरस्ति, तत्रापि योग्यतयैव तेषां रूढत्वात् ॥३३३॥

अथेदमेव प्रस्तुते योजयन्नाह-

**कर्मणोप्येतदाक्षेपे, दानादौ भावभेदतः ।**
**फलभेदः कथं नु स्यात्, तथा शास्त्रादिसङ्गतः ॥३३४॥**

कर्मणोऽपि-दैवसंज्ञितस्य 'एतदाक्षेपे'-फलहेतुपुरुषकाराक्षेपे, न केवलं दार्वादियोग्यतायाः प्रतिमाक्षेपे सर्वत्र तद्भाव इत्यपिशब्दार्थः । दानादौ-सुकृतविशेषे विधीयमाने 'भावभेदतः' परिणामविशेषतः तत्तारतम्यलक्षणात् 'फलभेदः' प्रकृष्टाऽप्रकृष्टरूपः, कथं नु स्याद्-न कथंचिदित्यर्थः तथा-तेन तेन प्रकारेण शास्त्रादिसङ्गतः-शास्त्र[5]लोकप्रसिद्धः । कर्ममात्रात्तथाविधपु-रुषकारविकलात् फलाभ्युपगमे न कथंचित्तच्चित्रता युज्यते, फलहेतोः कर्मणः पुरुषकारमन्तरेणैकाकारतापत्तेरिति [6]परापेक्षमेतद्द्वितयं प्रतिपत्तव्यमिति ॥३३४॥

---

१. तथा हि-C.; २. प्रतिमानाक्षेपे चेतीत्यथवा-A.B.C.; ३. प्रसज्यते -A.B.C.; ४. नामैतत्-A.B.; ५. लोकसिद्धः-A.B.C.; ६. परस्परापेक्षमेत-A.B.;



Jain Education International For Personal & Private Use Only www.jainelibrary.org

नन्विदमपि कथं सिध्यति यथा दानादौ भावभेदस्ततोऽपि च फलभेद इत्याशंक्याह–

**शुभात्ततस्त्वसौ भावो हन्तायं तत्स्वभावभाक् ॥**
**एवं किमत्र सिद्धं स्यात्, तत एवास्त्वतो ह्यदः ॥३३५॥**

'शुभात्ततस्तु' शुभत एव कर्मणः प्राङ्नानानिमित्तोपार्जितात् असौ दानादिकाले भिन्नरूपतया प्रवृत्तः भावः–परिणामः 'हन्त' इति प्राग्वत् । अयं च फलभेदः 'तत्स्वभावभाक्' तं–[1]भावभेदोत्पत्तिरूपं स्वभावं–स्वरूपं भजते यः स तथा । [2]अथापरः पृच्छति–'एवं' परस्परापेक्षायां किं–इष्टं अत्र–विचारे सिद्धं–निष्पन्नं स्यात्–भवेत् । उच्यते 'तत एव'–कर्मणः शुभाशुभरूपात्सकाशात् अस्तु–भवतु भावः । तथा 'अतो हि'–अत एव भावत अदः–कर्मास्तु, तथाविधकर्मणः सकाशात्पुरुषकारस्तस्माच्च कर्मेति स्थितम् ॥३३५॥

अथोपसंहर्तुमाह–

**तत्त्वं पुनर्द्वयस्यापि, तत्स्वभावत्वसंस्थितौ ।**
**भवत्येवमिदं न्यायात् तत्प्राधान्याद्यपेक्षया ॥३३६॥**

तत्त्वं–बाध्य[3]बाधकलक्षणं स्वरूपं पुनर्द्वयस्यापि–दैवपुरुषकारलक्षणस्य, न पुनरेकैकस्येत्यपिशब्दार्थः, तत्स्वभावत्वसंस्थितौ–तत्स्वाभाव्यनियमे बाध्यबाधकस्वभाव[4]लक्षणे स्थिते सति भवत्येवमुक्तनीत्या इदं–प्रागुक्तम्, कथमित्याह न्यायात्–युक्तेः । सः (=बाध्यबाधकभावः) अपि कथमित्याह तत्प्राधान्याद्यपेक्षया–तयोर्दैवपुरुषकारयोः कदाचित्प्राधान्यं, आदिशब्दादुपसर्जनभावं चापेक्ष्येति ॥३३६॥

**एवं च चरमावर्ते, परमार्थेन बाध्यते ।**
**दैवं पुरुषकारेण, प्रायशो व्यत्ययोऽन्यदा ॥३३७॥**

एवं च–दैवपुरुषकारयोर्बाध्यबाधकभावे सिद्धे सति चरमावर्ते–पश्चिमपुद्गलपरावर्तरूपे परमार्थेन–कृत्स्नकर्मक्षयलक्षणमोक्षासन्नभावरूपेण

१. भावभेदापेक्षोत्पत्तिरूपं–A; २. अथ परः–A.B.C.; ३. बाधकत्वलक्षणं–A; ४. लक्षणस्थिते–A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बाध्यते-निराक्रियते दैवं पुरुषकारेण-जीववीर्यशुद्धिरूपेण प्रायशो-बाहुल्येन कदाचित्तथाविधसंक्लेशावस्थायां नन्दिषेणादीनामिवः व्यत्ययोऽपि स्यादिति प्रायोग्रहणम्। व्यत्ययः-पूर्वोक्तविधिविपर्यासरूपः अन्यदा-ऽचरमावर्तेषु, दैवेन पुरुषकारो बाध्यत इत्यर्थः ॥३३७॥

**तुल्यत्वमेवमनयोर्व्यवहाराद्यपेक्षया ।**
**सूक्ष्मबुद्ध्यावगन्तव्यं, न्यायशास्त्राऽविरोधतः ॥३३८॥**

तुल्यत्वं-सदृशभावः अनयोर्दैवपुरुषकारयोः व्यवहाराद्यपेक्षया व्यवहार-मादिशब्दान्निश्चयं चापेक्ष्येति सूक्ष्मबुद्ध्या-निपुणाभोगेन अवगन्तव्यम् । कथमित्याह न्यायशास्त्राऽविरोधतः-युक्तिशास्त्रयोरविघटनेन । अयमत्र भावः निश्चयनयमतेन-दैवपुरुषकारौ स्वकार्यकाले स्वप्रधानावेव वर्तेते इत्येवमन-योस्तुल्यतेति । व्यवहारनयमतेन त्वेतौ परस्पराश्रयौ पर्यायेण प्राप्तप्रधानगुणभावौ बाध्यबाधकभावापन्नौ वर्तेते इति तुल्यत्वमनयोर्भावनीयमिति ॥३३८॥

अथ प्रस्तुते योजयति-

**एवं पुरुषकारेण, ग्रन्थिभेदोऽपि सङ्गतः ।**
**तदूर्ध्वं बाध्यते दैवं, प्रायोऽयं तु विजृम्भते ॥३३९॥**

एवं-चरमावर्ते पुरुषकाराधिक्याद्धेतोः पुरुषकारेण-प्रसिद्धरूपेण 'ग्रन्थिभेदोऽपि' किं पुनः सामान्येन दैवबाधेत्यपिशब्दार्थः, सङ्गतो-घटमानः तदूर्ध्वं ग्रन्थिभेदोर्ध्वं बाध्यते-प्रतिहतशक्तिः क्रियते दैवम् । प्रायो-बाहुल्येन 'अयं तु'-पुरुषकारः विजृम्भते समुच्छलति ॥३३९॥

तस्मिंश्च विजृम्भिते यत्स्यात्तद्दर्शयति -

**अस्यौचित्यानुसारित्वात्, प्रवृत्तिर्नासती भवेत् ।**
**सत्प्रवृत्तिश्च नियमाद्, ध्रुवः कर्मक्षयो यतः ॥३४०॥**

अस्य-भिन्नग्रन्थेः औचित्यानुसारित्वात्-सर्वार्थेषूचितवृत्तिप्रधानत्वात् प्रवृत्तिर्धर्मार्थादिगोचरा[1] न-नैव असती-अशोभना भवेत्-जायेत । सत्प्रवृत्तिश्च-सुन्दरचेष्टारूपा, नियमान्निश्चयेन । अत्र हेतुः ध्रुवो-निश्चितः कर्मक्षयः-

---

१. गोचरः न-C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सत्प्रवृत्तिबाधककर्महासलक्षणो यतो-यस्माद्धेतोः सम्पन्नो वर्तते, अन्यथौचित्यानुसारित्वमेव न स्यात् ॥३४०॥

**संसारादस्य निर्वेदस्तथोच्चैः पारमार्थिकः ।**
**संज्ञानचक्षुषा सम्यक्, तन्नैर्गुण्योपलब्धितः ॥३४१॥**

संसाराद्-नरनारकादिपर्यायरूपात् अस्य-भिन्नग्रन्थेर्जीवस्य निर्वेदः-समुद्वेगरूपः 'तथा' इति समुच्चये उच्चैरतीव पारमार्थिको-ऽकृत्रिमो जायते, अत्र हेतुः संज्ञानचक्षुषा-निर्मलविवेकलोचनेन सम्यग्-यथावत् तस्य-संसारस्य नैर्गुण्योपलब्धितो-जरामरणादिव्यसनबहुलतयाऽसारतापरिज्ञानात् ॥३४१॥

**मुक्तौ दृढानुरागश्च, तथातद्गुणसिद्धितः ।**
**विपर्ययो महादुःखबीजनाशाच्च तत्त्वतः ॥३४२॥**

मुक्तौ-निर्वाणे दृढानुरागश्च-निष्ठुरप्रतिबन्धरूपश्च स्यात् । अत्र हेतुः तथा-तत्प्रकारास्तस्या मुक्तेर्ये गुणाः-जरामरणाद्यभावादयस्तेषां 'सिद्धितः'-परिज्ञानात् 'विपर्यय' एव तत्त्वं प्रति विपर्यासरूपः महादुःखं-शेषदुःखातिशायितया तस्य यद्बीजं हेतुर्मिथ्यात्वमोहादि तस्य नाशाद्-विरहात् । चकारः समुच्चये, तत्त्वतो-ऽ[1]पुनर्भावतया ॥३४२॥

अथ यदर्थमस्यौचित्यानुसारित्वं स्यात्तद्दर्शयति-

**एतत्त्यागाप्तिसिद्ध्यर्थमन्यथा तदभावतः ।**
**अस्यौचित्यानुसारित्वमलमिष्टार्थसाधनम् ॥३४३॥**

एतयोः-संसारमुक्तयोर्यथाक्रमं ये 'त्यागाप्ती' तयोः सिद्ध्यर्थं-निष्पत्तये 'औचित्यानुसारित्वं' इत्युत्तरेण योगः । अन्यथौचित्यानुसारित्वमन्तरेण तदभावतः संसारमुक्त्योस्त्यागाप्त्यभावात् अस्य-प्रस्तुतसत्त्वस्य किमित्याह 'औचित्यानुसारित्वं' उक्तरूपं, अलं-अत्यर्थं 'इष्टार्थसाधनं'-समीहितसकलप्रयोजनसिद्धिकारि प्रवर्तते ॥३४३॥ औचित्यमेवाश्रित्याह—

**औचित्यं भावतो यत्र, तत्रायं सम्प्रवर्तते ।**
**उपदेशं विनाप्युच्चैरन्तस्तेनैव चोदितः ॥३४४॥**

---

१. पुनर्भावितया-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

औचित्यं भावतः-परमार्थतो, यत्र वस्तुनि वर्तते तत्रायं वस्तुतः प्राणी सम्प्रवर्तते-सम्यक्प्रवृत्तिमान् भवति, नान्यत्र, यदि परं [१]क्वचिदुपचारत इति, उपदेशं विनाप्युच्चैरतीव, अन्तः-मध्ये, तेनैव-ग्रन्थिभेदबलोत्पन्नपुरुषकारेणैव, चोदितः-प्रेरित इति ॥३४४॥

**अतस्तु भावो भावस्य, तत्त्वतः सम्प्रवर्तकः ।**
**शिराकूपे पय इव, पयोवृद्धेर्नियोगतः ॥३४५॥**

अतस्त्वत एव पुरुषकारप्रेरणादौचित्येन प्रवृत्तेर्हेतोः भावो-वैराग्यादिः भावस्य-शुभभावान्तरलक्षणस्य तत्त्वतः-परमार्थेन सम्प्रवर्तक उद्भूतिहेतुः । दृष्टान्तमाह शिराकूपे स्वयमेव प्रवृत्तशिरे कूपे पय इव, पयोवृद्धेः शिरावृद्ध्याक्षेपाज्जलातिरेकस्य नियोगतः-नियमेन प्रवर्तकमिति ॥३४५॥

नन्वेवमुपदेशवैयर्थ्यमापन्नमित्याशंक्याह-

**निमित्तमुपदेशस्तु, पवनादिसमो मतः ।**
**अनैकान्तिकभावेन, सतामत्रैव वस्तुनि ॥३४६॥**

निमित्तं हेतुः उपदेशस्तु-उपदेशः पुनः कीदृश इत्याह 'पवनादिसमः'-पवनखननादिजलाभिव्यञ्जनहेतुसदृशः मतः । कथमित्याह 'अनैकान्तिकभावेन'-स्वसाध्यसिद्धावनियतरूपेण सतां-बुद्धिमतां अत्रैव-भवान्तरप्रवर्तने वस्तुनि । अयमत्र भावः-न हि कूपे जलोत्पत्तिः पवनखनना[२]दिनिमित्तं किन्तु भूमिसरसभावनिबन्धना, पवनादयस्तु सत एव जलस्याभिव्यक्तिहेतवः । एवं शुभभावः शुद्धपुरुषकारबलोद्भव एव, उपदेशस्तु सत एवाभिव्यक्तिहेतुस्तस्येति । अनैकान्तिकभावश्च पवनखननयोरुपदेशस्य च, क्वचिदभावेऽपि भावाद्भावेऽपि चाभावाज्जलशुभभावयोरिति ॥३४६॥ ननु किंफलस्तर्हि शास्त्रेषु तथातथोपदेशः प्रपञ्च्यत इत्याशंक्याह-

**प्रक्रान्ताद्यदनुष्ठानादौचित्येनोत्तरं भवेत् ।**
**तदाश्रित्योपदेशोऽपि, ज्ञेयो विध्यादिगोचरः ॥३४७॥**

प्रक्रान्तात्-स्वत एवारब्धात्सकाशात् यत्-अनुष्ठानं शास्त्रशुश्रूषादि

---

१. किञ्चिदुपचारत-A; २. निमित्ता किन्तु-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनुष्ठानात्-चैत्य[1]वन्दनरूपात् औचित्येन-तत्तद्द्रव्यक्षेत्रकालाद्यनुरूपेण उत्तरं अपरं भवेत् तदाश्रित्याऽपेक्ष्य 'उपदेशोऽपि' किं पुनः स्वत एव प्रवृत्तेऽनुष्ठाने उपदेशो विफल इत्यपिशब्दार्थः ज्ञेयोऽवगन्तव्यः फलवान् । कीदृश इत्याह 'विध्यादिगोचरो'-विधेयेतरयोर्विधिप्रतिषेधविषयः । अत एव पठ्यते - *''उवएसो वि हु सफलो, गुणठाणारम्भगाण जीवाण । परिवडमाणाण तहा, पायं न हु तट्ठियाणं पि ॥१॥''* (४९९, उ.प.) ॥३४७॥

अप्रारब्धानुष्ठानस्यापि जन्तोः कदाचिदुपदेशो दीयत इत्याह-

**प्रकृतेर्वानुगुण्येन चित्रः सद्भावसाधनः ।**
**गम्भीरोक्त्या मितश्चैव, शास्त्राध्ययनपूर्वकः ॥३४८॥**

प्रकृतेर्बालमध्यमबुद्धिबुद्धत्वलक्षणायाः 'वा' इत्यथवा आनुगुण्येनाऽनुवर्तनेन चित्रो-नानारूपः सद्भावसाधनः-शुद्धभावसम्पादक उपदेशो मतिमतां प्रवर्तते । पुनरपि कीदृश इत्याह गम्भीरोक्त्या-अतिनिपुणवचनरचनारूपयोपलक्षितः सूक्ष्मबुद्धिहेतुत्वात्, 'मितः'-परिमितोऽपरिमितस्य वैरस्य हेतुत्वात् ( ?विरसभावे हेतुत्वात्) 'चैव' इति समुच्चये, शास्त्राध्ययनपूर्वकः-शास्त्राध्ययनं शास्त्रगतपाठोच्चारणं पूर्वं प्रथमं यस्य स तथा, दृढप्रतीतिहेतुत्वात् ॥३४८॥ इदमेव भावयति—

**शिरोदकसमो भाव, आत्मन्येव व्यवस्थितः ।**
**प्रवृत्तिरस्य विज्ञेया, चाभिव्यक्तिस्ततस्ततः ॥३४९॥**

शिरोदकसमस्तथाविधकूपे सहजप्रवृत्तशिराजलतुल्यः 'भावः'-[2]शुद्धरूपः परिणामः 'आत्मन्येव' जीव एव सम्यग्दृष्ट्यादौ 'व्यवस्थितः' । ततः किमित्याह प्रवृत्तिरस्य भावस्य विज्ञेया चाभिव्यक्तिः-प्रकटभावः, ततस्ततः-चित्रादुपदेशात् कूपखननादिकल्पात् ॥३४९॥ एतदपि कुत इत्याह-

**सत्क्षयोपशमात्सर्वमनुष्ठानं शुभं मतम् ।**
**क्षीणसंसारचक्राणां, ग्रन्थिभेदादयं यतः ॥३५०॥**

सत्क्षयोपशमात् सानुबन्धमिथ्यात्वमोहादिमलप्रलयविशेषात् सर्वमनुष्ठानं-

---

१. वन्दनादिरूपात्-A.B.C.; २. शुभरूपः-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

देवपूजनादि शुभं-शोभनं मतम् । कुत इत्याह 'क्षीणसंसारचक्राणां'-निवृत्तप्रायभवभ्रमणानां सम्यग्दृष्ट्यादीनां ग्रन्थिभेदात्-उक्तरूपात् अयं क्षयोपशमः यतः-यस्मात्कारणान्मतः ॥३५०॥

**भाववृद्धिरतोऽवश्यं, सानुबन्धं शुभोदयम् ।**
**गीयतेऽन्यैरपि ह्येतत्, सुवर्णघटसन्निभम् ॥३५१॥**

भाववृद्धिः-भावोत्कर्षरूपा अतः-सत्क्षयोपशमात् अवश्यं-नियमवती भवतीति । अत्रैव परमतमाह 'सानुबन्धं शुभोदयं'-प्रशस्तफलं गीयते-प्रतिपाद्यते, अन्यैरपि हि सौगतादिभिर्न केवलमस्माभिरित्यपिशब्दार्थः, एतत् शुभमनुष्ठानं सुवर्णघटसन्निभं-यथा सुवर्णघटो भिद्यमानोऽपि न सुवर्णानुबन्धं मुञ्चति, एवं शुभमनुष्ठानं तथाविधकषायोदयाद्भग्नमपि शुभफलमेवेति ॥३५१॥

**एवं तु वर्तमानोऽयं, चारित्री जायते ततः ।**
**पल्योपमपृथक्त्वेन विनिवृत्तेन कर्मणः ॥३५२॥**

एवं त्वेवमेव सानुबन्धसत्क्षयोपशमानुरूपं वर्तमानोऽयं-भिन्नग्रन्थिर्जीवः चारित्री-देशविरतरूपो जायते । ततो-ग्रन्थिभेदात्सकाशात् पल्योपमपृथक्त्वेन-"*द्विप्रभृत्यानवभ्यः पृथक्त्वं*"तेन विनिवृत्तेन-क्षयमुपगतेन कर्मणश्चारित्रमोहादेः । सर्वविरतिचारित्री तु संख्यातेषु सागरोपमेषु निवृत्तेषु । तथा चार्षम्-"*सम्मत्तंमि उ लद्धे, पलियपुहुत्तेण सावओ होज्जा । चरणोवसमखयाणं, सागरसङ्खन्तरा होन्ति*" (१२२२-विशेषा.) ॥३५२॥

**लिङ्गं मार्गानुसार्येष, श्राद्धः प्रज्ञापनाप्रियः ।**
**गुणरागी महासत्त्वः, सच्छक्त्यारम्भसङ्गतः ॥३५३॥**

लिङ्गं-चिह्नम् कीदृशमस्येत्याह 'मार्गानुसारी' वक्ष्यमाणन्यायेन 'एष' चारित्री, तथा श्राद्धः-कान्तारोत्तीर्णब्राह्मणहविः पूर्णगोचररुचेरतिशायिन्या श्रद्धया सङ्गतः, प्रज्ञापनाप्रियः-गुणवत्पुरुषप्रज्ञापनाप्रीतिमान् सन्निधिलाभयोग्यजीव इव तद्गतक्रियां प्रतीति, गुणरागी-गुणानुरागी महासत्त्वः- प्रशस्तपुरुषकारः सच्छक्त्यारम्भसङ्गतः-सता-सुन्दरपरिणामेन शक्येन-कर्तुं पार्यमाणेनाऽऽरम्भेण धर्मार्थादिगोचरेण इति ॥३५३॥

अथ बहुविषयत्वान्मार्गानुसारित्वमेव भावयति—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**असातोदयशून्योऽन्धः, कान्तारपतितो यथा ।**
**गर्तादिपरिहारेण, सम्यक्तत्राभिगच्छति ॥३५४॥**

असातोदयशून्योऽसद्वेदनीयविपाकरहितः अन्धः प्रतीतरूपः कान्तारपतितो-दण्डकारण्यादिमहाटवीमध्यमग्नः 'यथा' इति दृष्टान्तार्थः गर्तादिपरिहारेण-गर्तादरीप्रभृतिविषममार्गत्यागेन सम्यग् = यथा विवक्षितस्थानावाप्तिः स्यात्तथा तत्र कान्तारे अभिगच्छति-गन्तुं प्रवर्तते ॥३५४॥

**तथायं भवकान्तारे, पापादिपरिहारतः ।**
**श्रुतचक्षुर्विहीनोऽपि, सत्सातोदयसंयुतः ॥३५५॥**

तथायं-चारित्री भवकान्तारे-संसाराटव्याम् पापादिपरिहारतः-पापकारण-पापफलपरित्यागेन श्रुतमेव-सद्भूतार्थावलोकहेतुत्वाच्चक्षुस्तेन विहीनोऽपि माषतुषादिवद्विरहितः किं पुनस्तदन्यरूप इत्यपिशब्दार्थः, सन्-अतिदृढतया यः सुन्दरः सातोदयस्तेन संयुतः ॥३५५॥ अत्रैव व्यतिरेकमाह-

**अनीदृशस्य तु पुनश्चारित्रं शब्दमात्रकम् ।**
**ईदृशस्यापि वैकल्यं, विचित्रत्वेन कर्मणाम् ॥३५६॥**

अनीदृशस्य तु पुनर्मार्गानुसारित्वादिलिङ्गविकलस्य पुनः चारित्रं-देशतः सर्वतो वा शब्दमात्रकं-शब्दरूपमेव न त्वर्थतोऽपि । ननु सम्यग्दृष्टेरविरतस्यापि मार्गानुसारित्वमस्ति कथं न चारित्रमित्याशंक्याह 'ईदृशस्यापि' मार्गानुसारिणोऽपि कस्यचित् 'वैकल्यं' चारित्रस्य कथमित्याह 'विचित्रत्वेन' निकाचितादिरूपतया कर्मणां-चारित्रमोहादीनाम् । तथा चोक्तम्-*कम्माइं नूणं घणचिक्कणाइ, गरुयाइं वज्जसाराइं ॥ नाणड्ढयं पि पुरिसं, [1]पहाओ उप्पहं नेन्ति* ॥३५६॥ अथ प्रकृतयोगसन्धानार्थमाह-

**देशादिभेदतश्चित्रमिदं चोक्तं महात्मभिः ।**
**अत्र पूर्वोदितो योगोऽध्यात्मादिः सम्प्रवर्तते ॥३५७॥**

देशादिभेदतो-देशसर्वविशेषात् चित्रं-नानारूपं इदं चैतत्पुनश्चारित्रम् उक्तं महात्मभिस्तीर्थंकरगणधरादिभिः, ततः किमित्याह अत्र-चारित्रे सति जीवस्य,

---

१. पंथाओ उप्पहं-B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पूर्वोदितः-ग्रन्थिविभागोक्तः 'योगोऽध्यात्मादिः'-अध्यात्मभावनाध्यानादिः 'सम्प्रवर्तते' स्वरूपं लभत इति ॥३५७॥ अमुमेव क्रमेण व्याचष्टे-

**औचित्याद् वृत्तयुक्तस्य, वचनात्तत्त्वचिन्तनम् ।**
**मैत्र्यादिसारमत्यन्तमध्यात्मं तद्विदो विदुः ॥३५८॥**

औचित्यादुचितप्रवृत्तिरूपात् वृत्तयुक्तस्याणुव्रतमहाव्रतसमन्वितस्य वचनात्-जिनप्रणीतात् तत्त्वचिन्तनं-जीवादिपदार्थसार्थपर्यालोचनं मैत्र्यादिसारं-मैत्री-प्रमोद-करुणा-माध्यस्थ्यप्रधानं सत्त्वादिषु अत्यन्तमतीव किमित्याह अध्यात्मं-योगविशेषं, तद्विदः-अध्यात्मज्ञातारः विदुः-जानते ॥३५८॥

अथास्य फलमाह-

**अतः पापक्षयः सत्त्वं, शीलं ज्ञानं च शाश्वतम्।**
**तथानुभवसंसिद्धममृतं ह्यद एव तु ॥३५९॥**

अतो-ऽध्यात्मात् पापक्षयो-ज्ञानावरणादिक्लिष्टकर्मप्रलयः सत्त्वं-वीर्योत्कर्षः शीलं-चित्तसमाधिः ज्ञानं च-वस्त्ववबोधरूपम्, शाश्वतमप्रतिपाति शुद्धरत्नतेजोवत्, तथेति वक्तव्यान्तरसमुच्चये, अनुभवसंसिद्धं-स्वसंवेदनप्रत्यक्षं [1]तद्वृत्तम् अमृतं-पीयूषम् हिः-स्फुटं अद एव तु इदमेवाध्यात्मं पुनः, अतिदा-रुणमोहविषविकारनिराकारकत्वादस्येति ॥३५९॥ (अथ भावनां व्याचष्टे)

**अभ्यासोऽस्यैव विज्ञेयः, प्रत्यहं वृद्धिसङ्गतः ।**
**मनःसमाधिसंयुक्तः पौनःपुन्येन भावना ॥३६०॥**

अभ्यासो-ऽनुवर्तनम् अस्यैवाध्यात्मस्य विज्ञेयः प्रत्यहं-प्रतिदिवसं वृद्धिसङ्गतः-समुत्कर्षमनुभवन् मनःसमाधिसंयुक्तश्चित्तनिरोधयुक्तः, कथमित्याह पौनःपुन्येन-भूयोभूय इत्यर्थः, भावना-द्वितीयो योगभेद इति ॥३६०॥

अथैतत्फलमाह-

**निवृत्तिरशुभाभ्यासाच्छुभाभ्यासानुकूलता ।**
**तथा सुचित्तवृद्धिश्च, भावनायाः फलं मतम् ॥३६१॥**

निवृत्तिरुपरतिः अशुभाभ्यासात्-कामक्रोधादिगोचरात् शुभाभ्यासानुकूलता-

१. तद्वताम्-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ज्ञानादिविषयशुभाभ्यासानुकूलभावः तथा सुचित्तवृद्धिश्च सत्प्रकारशुद्धचित्तसमुत्कर्षरूपा किमित्याह 'भावनायाः फलं मतं' इति ॥३६१॥

**शुभैकालम्बनं चित्तं, ध्यानमाहुर्मनीषिणः ।**
**स्थिरप्रदीपसदृशं, सूक्ष्माभोगसमन्वितम् ॥३६२॥**

शुभैकालम्बनं-प्रशस्तैकार्थविषयं चित्तं ध्यानं-धर्मध्यानादि आहुर्मनीषिणः । स्थिरप्रदीपसदृशं-निर्वातगृहोदरज्वलत्प्रदीपप्रतिमं सूक्ष्माभोगसमन्वितमुत्पादादिविषयसूक्ष्मोपयोगयुतम् ॥३६२॥ अथैतत्फलम्-

**वशिता चैव सर्वत्र, भावस्तैमित्यमेव च ।**
**अनुबन्धव्यवच्छेद उदर्कोऽस्येति तद्विदः ॥३६३॥**

वशिता चैवात्मायत्तमेव सर्वत्र कार्ये भावस्तैमित्यमेव च-स्तिमितभावतैव अनुबन्धव्यवच्छेदो-भवान्तरारम्भकाणामितरेषां च कर्मणां [1]बन्धाभावकरणमित्यर्थः उदर्कः-फलं अस्य-ध्यानस्य इत्येतदाहुः तद्विदो-ध्यानफलविदः ॥

**अविद्याकल्पितेषूच्चैरिष्टानिष्टेषु वस्तुषु ।**
**संज्ञानात् तद्व्युदासेन, समता समतोच्यते ॥३६४॥**

अविद्याकल्पितेषु-अनादिवितथवासनावशोत्पन्नविकल्पकल्पितशरीरेषु उच्चैः अतीव इष्टानिष्टेष्विन्द्रियमनःप्रमोदप्रदायिषु तदितरेषु च वस्तुषु-शब्दादिषु संज्ञानात्-"*तानेवार्थान् द्विषतस्तानेवार्थान् प्रलीयमानस्य । निश्चयतोऽ*[2]*निष्टं वा, न विद्यते किञ्चिदिष्टं वा ।*"(प्रशमरति-५२) इत्यादिभावनारूपाद्विवेकात् तद्व्युदासेनेष्टानिष्टवस्तुपरिहारेण या समता तुल्यरूपता मनसः, सा समता प्रागुपन्यस्तोच्यते[3] ॥३६४॥ अथैतत्फलम्-

**ऋद्ध्यप्रवर्तनं चैव, सूक्ष्मकर्मक्षयस्तथा ।**
**अपेक्षातन्तुविच्छेदः, फलमस्याः प्रचक्षते ॥३६५॥**

ऋद्धीनां आमर्षौषध्यादीनामनुपजीवनेनाऽप्रवर्तनमव्यापारणं, सूक्ष्मकर्मक्षयः -सूक्ष्माणां केवलज्ञानदर्शनयथाख्यातचारित्राद्यावारकाणां कर्मणां-क्षयः, चैवेति तथेति[4]शब्दावुक्तसमुच्चये । तथा, अपेक्षातन्तुविच्छेदोऽपेक्षैव बन्धहेतुत्वात्तन्तुरपे-

---

१. बन्ध्यकरण-A.B.C.; २. निश्चयतोऽस्यानिष्टं, इति पाठान्तरं ३. प्रतिपाद्यते-A.; ४. शब्दानुक्तसमुच्चये-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्षातन्तुस्तद्व्यवच्छेदः फलमस्याः-समतायाः 'प्रचक्षते' विचक्षणा इति ॥३६५॥

**अन्यसंयोगवृत्तीनां, यो निरोधस्तथा तथा ।**
**अपुनर्भावरूपेण, स तु तत्संक्षयो मतः ॥३६६॥**

इह स्वभावत एव निस्तरङ्गमहोदधिकल्पस्यात्मनो विकल्परूपाः परिस्पन्दरूपाश्च वृत्तयः सर्वा अन्यसंयोगनिमित्ता एव । तत्र विकल्परूपास्तथाविधमनोद्रव्यसंयोगात् परिस्पन्दरूपाश्च शरीरादिति । ततोऽन्यसंयोगेन या वृत्तयस्तासां यो निरोधः तथा तथा केवलज्ञानलाभकालेऽयोगिकेवलिकाले च अपुनर्भावरूपेण-पुनर्भवनपरिहाररूपेण स तु-स पुनः । तत्संक्षयो-वृत्तिसंक्षयो मत इति ॥३६६॥ अथैतत्फलम्-

**अतोऽपि केवलज्ञानं, शैलेशीसम्परिग्रहः ।**
**मोक्षप्राप्तिरनाबाधा, सदानन्दविधायिनी ॥३६७॥**

अतोऽप्यत एव वृत्तिसंक्षयात् [1]केवलं-सकलद्रव्यपर्यायगोचरत्वात्परिपूर्णज्ञानमुपयोगविशेषः ततः, शैलेशीसम्परिग्रहः-शीलं सर्वसंवररूपं तस्येशोऽधिपतिः शीलेशः, तस्येयमवस्था शैलेशी, तस्याः सम्परिग्रहः-स्वीकारः । ततोऽपि मोक्षप्राप्तिः-निर्वाणलाभः अनाबाधा-सर्वशरीरमानसव्यथाविकला । सदा-सर्वकालं आनन्दविधायिनी -परमानन्दरूपत्वात्तस्याः । यदत्रास्या विशेषणद्वयोपादानं तत्परपरिकल्पितमोक्षप्राप्तिव्यवच्छेदार्थम् । तथाहि काणादाः 'सुखदुःखव्यवच्छेदरूपा मुक्तिः' इति प्रतिपन्नाः, ततोऽनाबाधत्वेऽपि नानन्दरूपता स्यादित्युभयग्रहणं कृतम् ॥३६७॥

अथ प्रागुक्ततात्त्विकेतरयोगोपक्षेपार्थमाह-

**तात्त्विकोऽतात्त्विकश्चायमिति यच्चोदितं पुरा ।**
**तस्येदानीं यथायोगं, योजनाऽत्राभिधीयते ॥३६८॥**

'तात्त्विकोऽतात्त्विकश्चायं योग' इत्येवम् यच्च-यत्पुनः उदितं पुरा-ग्रन्थारम्भे(श्लो. ३२) तस्योदितस्य इदानीं-सम्प्रति यथायोगं-यथाघटनं योजना -ऽर्थसंयोजनरूपा अत्र-इहावसरे अभिधीयते-प्रोच्यत इति ॥३६८॥ तत्र-

---

१. केवलं-सकलं-सकल-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**अपुनर्बन्धकस्यायं,व्यवहारेण तात्त्विकः ।**
**अध्यात्मभावनारूपो, निश्चयेनोत्तरस्य तु ॥३६९॥**

अपुनर्बन्धकस्योपलक्षणत्वात्सम्यग्दृष्टेश्च अयं योगः व्यवहारेण-कारणस्यापि कार्यत्वोपचाररूपेण तात्त्विकः, कारणस्यापि कथंचित्कार्यत्वादिति । किंरूपः सन्नित्याह अध्यात्मभावनारूपः-अध्यात्मरूपो भावनारूपश्च । निश्चयेन-निश्चयनयमतेनोपचारपरिहाररूपेण उत्तरस्य तु-अपुनर्बन्धक-सम्यग्दृष्ट्यपेक्षया चारित्रिण इति ॥३६९॥

**सकृदावर्तनादीनामतात्त्विक उदाहृतः ।**
**प्रत्यपायफलप्रायस्तथावेषादिमात्रतः ॥३७०॥**

सकृदेकवारमावर्तन्त उत्कृष्टां स्थितिं बध्नन्ति ये ते सकृदावर्तनाः, आदिशब्दाद् द्विरावर्तनादिग्रहः, तेषाम् अतात्त्विको-व्यवहारतो निश्चयतश्चाऽतत्त्वरूपः उदाहृतो-ऽध्यात्मभावनारूपो योगः, अद्याप्यशुद्धपरिणामत्वात्तेषामिति । कीदृशोऽसावित्याह 'प्रत्यपायफलप्रायः'-प्रत्यपायोऽनर्थः फलं प्रायो बाहुल्येन यस्येति समासः । कुत इत्याह 'तथावेषादिमात्रतः' तत्प्रकारं भावसाराध्यात्मभावनायुक्तयोगियोग्यं यद्वेषादिमात्रं नेपथ्यचेष्टाभाषालक्षणं श्रद्धानशून्यं वस्तु, तस्मात् । तत्र हि वेषादिमात्रमेव स्यान्न पुनस्तेषां काचिच्छ्रद्धालुतेति ॥३७०॥

**चारित्रिणस्तु विज्ञेयः, शुद्ध्यपेक्षो यथोत्तरम् ।**
**ध्यानादिरूपो नियमात्, तथा तात्त्विक एव तु ॥३७१॥**

चारित्रिणः पुनः, विज्ञेयः शुद्ध्यपेक्षो यथोत्तरमुत्तरोत्तरां शुद्धिमपेक्ष्य किमित्याह ध्यानादिरूपः-ध्यानसमतावृत्तिसंक्षयलक्षणो योगः नियमात्-अवश्यंतया, न त्वन्यस्य 'तथा' इति समुच्चये । तात्त्विक एव तु तत्त्वरूप एवेति ॥३७१॥ अथ सानुबन्धेतराभिव्यक्त्यर्थमाह—

**अस्यैव त्वनपायस्य, सानुबन्धस्तथा स्मृतः ।**
**यथोदितक्रमेणैव, सापायस्य तथापरः ॥३७२॥**

अस्यैव तु-पूर्वोक्तयोगभाजो जीवस्य पुनः अनपायस्य-योगबाधकक्लि-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ष्टकर्मरहितस्य 'सानुबन्धस्तथा' तत्प्रकारः सन्, स्मृतः शास्त्रकारैः । यथोदितक्रमेणैवाध्यात्मादिरूपेणैव सापायस्या-ऽनपायविलक्षणस्य 'तथा' इति अपरोऽसानुबन्ध इति ॥३७२॥ अथापायमेव व्याचष्टे-

**अपायमाहुः कर्मैव, निरपायाः पुरातनम् ।**
**पापाशयकरं चित्रं, निरुपक्रमसंज्ञकम् ॥३७३॥**

अपायमाहुः कर्मैव-नापरं किंचित्, 'निरपाया' उपरतसकलक्लिष्टादृष्टाः तीर्थकरादयः पुरातनं-प्राक्कालोपार्जितं पापाशयकरं-मोक्षपथप्रतिकूलचित्त-वृत्तिहेतुः चित्रं-नानारूपं 'निरुपक्रमसंज्ञकं' उपक्रमणमुपक्रमः सर्वत उच्छेदः, ततो वास्तवविपाकसामर्थ्यहरणं, ततो विशिष्टानुष्ठानमिष्टयोगमपि, निर्गतमुपक्र-मान्निरुपक्रमं, तत्संज्ञा नाम यस्य तत्तथा ॥३७३॥

अपायमेवाधिकृत्य परमतसंवादमाह-

**कण्टकज्वरमोहैस्तु, समो विघ्नः प्रकीर्तितः ।**
**मोक्षमार्गप्रवृत्तानामत एवापरैरपि ॥३७४॥**

'कण्टकज्वरमोहैस्तु' कण्टकेन ज्वरेण मोहेन च पुनः समस्तुल्यः विघ्नः-प्रत्यूहो जघन्यमध्यमोत्कृष्टभेदभिन्नः प्रकीर्तितो-निरूपितः मोक्षमा-र्गप्रवृत्तानां-सम्यग्दर्शनाद्याराधनावहितात्मनाम्, 'अत एव' योगनिरनुबन्धत्वादेव हेतोः अपरैरपि योगिभिर्न केवलमस्माभिरित्यपिशब्दार्थः । यथा हि केषांचि-त्पथिकानां क्वचित्पाटलिपुत्रादौ गन्तुं प्रवृत्तानां कण्टकज्वरदिग्मोहैरभिभूतानां यथाक्रमं स्तोकबहुबहुतरकालं गमनभङ्गहेतुर्विघ्नः सम्पद्यते, एवं योगिनामपि सिद्धिपथप्रस्थितानां तथाविधकर्मोदयात्त्रिप्रकारोऽन्तरायः समुपजायत इति ॥३७४॥ *अथ सास्रवानास्रवौ योगावधिकृत्याह—*

**अस्यैव सास्रवः प्रोक्तो, बहुजन्मान्तरावहः ।**
**पूर्वव्यावर्णितन्यायादेकजन्मा त्वनास्रवः ॥३७५॥**

अस्यैव-सापायस्य योगिनः सास्रवो-वक्ष्यमाणास्रवयुक्तो योगः प्रोक्तो बहुजन्मान्तरावहो-देवमनुष्याद्यनेकजन्मविशेषहेतुः पूर्वव्यावर्णितन्यायान्नि-रुपक्रमकर्मणः पापाशयकरस्यावश्यमेव वेदनीयभावरूपात् । एकजन्मा त्वेकमेव वर्तमानं जन्म यत्र स तथा पुनर् अनास्रव इति ॥३७५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**आस्रवो बन्धहेतुत्वाद्बन्ध एवेह यन्मतः ।**
**स साम्परायिको मुख्यस्तदेषोऽर्थोऽस्य सङ्गतः ॥३७६॥**

आस्रवत्यापतति कर्म यस्मिन्स आस्रवः शुद्धोऽशुद्धश्च योगभूत आस्रवः, बन्धहेतुत्वाद्बन्धस्य कारणत्वात् बन्ध एव-ज्ञानावरणादिकर्मरूप एव, कारणे कार्योपचारात् इह प्रक्रमे यद्यस्मात् मतः-संमतः साम्परायिकः-कषायप्रभवः सूक्ष्मसम्परायगुणस्थानकावसानः मुख्यो-ऽनुपचरितः, तत्तस्मात् एषः साम्परायिकबन्धलक्षणः अर्थोऽभिधेयम्, अस्य-आस्रवस्य सङ्गतः ॥३७६॥

**एवं चरमदेहस्य सम्परायवियोगतः ।**
**इत्वरास्रवभावेऽपि, स तथानास्रवो मतः ॥३७७॥**

एवं यथा सकषायस्य सास्रवो योगस्तथा चरमदेहस्य-पश्चिमशरीरस्य सम्परायवियोगतः-कोपादिकषायविरहात् । 'इत्वरास्रवभावेऽपि'-केवलं योगप्रत्ययद्विसामयिकबलवेदनीयबन्धसद्भावे किं पुनस्तदभाव इत्यपिशब्दार्थः । एवंविधो यः सः 'तथा' तत्प्रकारो अनास्रवो द्वितीयो योगभेदो मतः ॥३७७॥

ननु कथं सास्रवोऽपि योगोऽनास्रव उक्त इत्याशंक्याह-

**निश्चयेनात्र शब्दार्थः, सर्वत्र व्यवहारतः ।**
**निश्चयव्यवहारौ च, द्वावप्यभिमतार्थदौ ॥३७८॥**

निश्चयेनोपलक्षितान्निश्चयप्रापकादित्यर्थः अत्र-योगाधिकारे शब्दार्थोऽनास्रवादिशब्दगतः सर्वत्र-[१]सर्वेषु व्यवहारतो-व्यवहारादेशात् । निश्चयेन ह्ययोगिकेवलिन्यनास्रवो योगः, यस्तु सयोगिन्यप्यनास्रत्वेन योगोऽभिधीयते स निश्चयहेतुना व्यवहारेणेति । एवं च सति 'निश्चयव्यवहारौ च' निश्चयो व्यवहारश्चेत्यर्थः द्वावप्यभिमतार्थदौ-इष्टफलदायकौ वर्तेत इति ॥३७८॥

अथोपसंहरन्नाह-

**संक्षेपात्सफलो योग, इति सन्दर्शितो ह्ययम् ।**
**आद्यन्तौ तु पुनः स्पष्टं, ब्रूमोऽस्यैव विशेषतः ॥३७९॥**

संक्षेपात्-समासात् सफलः सह फलेन योग इति-एवं सन्दर्शितः ।

---

१. सर्वेषु पदेषु व्यवहा-A.B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हि:-स्फुटवृत्त्या अयमध्यात्मादिभेद: । आद्यन्तौ तु पुनराद्यन्तावेव पुनरध्यात्मवृत्ति-संक्षयलक्षणौ भेदौ स्पष्टं-स्फुटं ब्रूमोऽस्यैव योगस्य विशेषतो-विशेषेण ॥

[1]एतदेवाह-

**तत्त्वचिन्तनमध्यात्ममौचित्यादियुतस्य तु ।**
**उक्तं विचित्रमेतच्च, तथावस्थादिभेदत: ॥३८०॥**

'तत्त्वचिन्तनं'-परमार्थभावनारूपं अध्यात्मं औचित्येन-सर्वार्थगोचरेण आदिशब्दान्मैत्र्यादिगुणैश्च युतस्य तु-युक्तस्यैव । उक्तं च "औचित्याद् वृत्तयुक्तस्य, वचनात्तत्त्वचिन्तनम् । मैत्र्यादिभावसंयुक्तमध्यात्मं तद्विदो विदु: ॥" (श्लोक ३५८) इत्यनेन ग्रन्थेन विचित्रं-नानारूपम् । एतच्च-एतत्पुनरध्यात्मम् । कुत इत्याह तथा-तत्प्रकारा येऽवस्थादयो द्रव्यक्षेत्रकालभावा: तेषां भेदा:-विशेषा: तेभ्य इति ॥३८०॥ तत्र-

**[2]आदिकर्मकमाश्रित्य जपो ह्यध्यात्ममुच्यते ।**
**देवतानुग्रहाङ्गत्वादतोऽयमभिधीयते ॥३८१॥**

[3]'आदिकर्मकं'-प्रधानधार्मिकलक्षणं आश्रित्य-अपेक्ष्य जपो हि-करजपादिरूप एव अध्यात्ममुच्यते । कुत इत्याह देवतानुग्रहाङ्गत्वात्-देवतानुग्रहस्य तदुपकाररूपस्याङ्गत्वात्-कारणभावत्वात् । अत ऊर्ध्वम् अयं जपोऽभिधीयत इति ॥३८१॥ यथा,

**जप: सन्मन्त्रविषय: स चोक्तो देवतास्तव: ।**
**दृष्ट: पापापहारोऽस्माद्, विषापहरणं यथा ॥३८२॥**

'जप:' पुन: पुन: परिवृत्तिरूप: सन्मन्त्रविषयो-विशिष्टमन्त्रगोचर: स च-स पुनर्मन्त्र:, उक्तो देवतास्तव:-ऋषभादिदेवतास्तवरूप: प्रणवनम: शब्दादिस्वा- हापर्यन्त:। अथास्य फलमाह 'दृष्ट: पापापहार:'-मिथ्यात्वादिपापप्रलय:, अस्मात्-सन्मन्त्ररूपाद्देवतास्तवात् विषापहरणं स्थावर-जङ्गमरूपविषोत्तारणं यथा-तथाविधमन्त्रात् ॥३८२॥ यथाऽसौ कर्तव्यस्तथाह—

---

१. एवमेवाह-A.; २. आदिकर्मिक-A.B.; ३. आदिकर्मिकं-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**देवतापुरतो वापि, जले वाऽकलुषात्मनि ।**
**विशिष्टद्रुमकुञ्जे वा, कर्तव्योऽयं सतां मतः ॥३८३॥**

देवताया-निष्कलदेवतारूपायाः पुरतोऽग्रतः वापीति विकल्पे वा 'जले वाऽकलुषात्मनि'-स्वच्छस्वभावेऽकलुषजलसमीपे वेत्यर्थः 'विशिष्टद्रुमकुञ्जे वा' बहलपत्रपुष्पफलशालिनां वनस्पतीनां गहने वा कर्तव्योऽयं-जपः, सतां मतः ॥३८३॥

**पर्वोपलक्षितो यद्वा, पुत्रंजीवकमालया ।**
**नासाग्रस्थितया दृष्टया, प्रशान्तेनान्तरात्मना ॥३८४॥**

'पर्वोपलक्षितः'-कराङ्गुलीपर्वप्रादक्षिण्यचिह्नतः 'यद्वा' इति पक्षान्तरे 'पुत्रंजीवकमालया'-रुद्राक्षनामकवनस्पतिफलमालया [1]नासाग्रभागप्रति-बद्धया दृष्ट्या' प्रतीतरूपया तथा प्रशान्तेन-प्रशमभाजा अन्तरात्मना मनोरूपेण ॥३८३॥ तत्र च यत्कृत्यान्तरं तदाह-

**विधाने चेतसो वृत्तिस्तद्वर्णेषु तथेष्यते ।**
**अर्थे चालम्बने चैव, त्यागश्चोपप्लवे सति ॥३८५॥**

विधाने-जपविषये चेतसो-मनसो वृत्तिः 'तद्वर्णेषु' सन्मन्त्राक्षररूपेषु तथा इति समुच्चये इष्यते-मन्यते मतिमद्भिः अर्थे चाभिधेये 'आलम्बने चैव' प्रतिमादौ चेतसो वृत्तिः । त्यागश्चोपसंहारः पुनर्जपस्य उपप्लवे मनोविस्रोत-सिकारूपे सति ॥३८५॥ अथैतत्त्यागफलमाह-

**मिथ्याचारपरित्याग आश्वासात्तत्र वर्तनम् ।**
**तच्छुद्धिकामता चेति, त्यागोऽत्यागोऽयमीदृशः ॥३८६॥**

उपप्लवावस्थायां जपपरित्यागे सति मिथ्याचारस्या[2]न्तरनिरुद्धेन्द्रियादिवि-कारस्य प्रणिधानाद्बहिः प्रशान्ताकारकरणं तल्लक्षणस्य 'परित्यागः', तथा आश्वासात्-त्राणपरिणामात् तत्र-जपे वर्तनं-प्रवृत्तिः कृता भवति । मा भूदन्यथा ममाय[3]मत्राधिकारीति भावः । 'तच्छुद्धिकामता च'-तच्छुद्धौ कामोऽभिलाषो यस्य स तथा तद्भावस्तत्ता सा चेत्येवं कारणत्रयात् त्यागो-जपस्य किमित्याह अत्यागः-[4]अनुष्ठानं, 'अयमीदृशः' उपप्लवकालभावः (भावी) शुद्धजपफलत्वा-

---

१. नासिकाग्रभाग-A.B; २. यान्तरानिरुद्धे-A.B; ३. मत्राणकारीति-A; ४. अनुज्ञनं-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्तस्येति ॥३८६॥ अथ जपस्यैव कालमानमाह-

**यथाप्रतिज्ञमस्येह, कालमानं प्रकीर्तितम् ।**
**अतो ह्यकरणेऽप्यत्र, भाववृत्तिं विदुर्बुधाः ॥३८७॥**

'यथाप्रतिज्ञं' यस्य यावती प्रतिज्ञा तदनतिक्रमेण । अस्य-जपस्य इह विचारे 'कालमानं' द्विघटिकादिरूपं प्रकीर्तितं 'अतो हि' प्रतिज्ञाया एवाभिग्रहरूपायाः 'अकरणेऽपि' प्रतिज्ञातकालादन्यत्र जपस्य किं पुनः करण इत्यपिशब्दार्थः । अत्र जपे 'भाववृत्तिं'-मनोवृत्तिरूपां विदुः- [1]जानन्ति बुधा इति ॥३८७॥ एतदेव भावयति-

**मुनीन्द्रैः शस्यते तेन, यत्नतोऽभिग्रहः शुभः ।**
**सदाऽतो भावतो धर्मः, क्रियाकाले क्रियोद्भवः ॥३८८॥**

मुनीन्द्रैः-मुनिवृन्दारकैः शस्यते- श्लाघ्यते तेनाऽकरणकालेऽपि शुभभाववृत्तिलक्षणेन हेतुना यत्नतो-यत्नात् 'अभिग्रहः शुभः' शुभार्थविषयः कुतो यतः 'सदा'-सर्वकालं अतो-ऽभिग्रहात् भावतः परिणामशुद्धेः धर्मः-शुभबन्धरूपः । क्रियाकाले-ऽभिग्रहानुष्ठानलक्षणे[2] क्रियोद्भवः धर्मः ॥३८८॥

अध्यात्म एव मतान्तरमाह-

**स्वौचित्यालोचनं सम्यक्, ततो धर्मप्रवर्तनम् ।**
**आत्मसम्प्रेक्षणं चैव, तदेतदपरे जगुः ॥३८९॥**

'स्वौचित्यालोचनं' निजयोग्यतापर्यालोचनं सम्यग्-यथावत्प्रथमम् । ततस्तदनन्तरं धर्मे-चैत्यवन्दनाद्यनुष्ठानरूपे प्रवर्तनं कार्यम् 'आत्मसम्प्रेक्षणं चैव' वक्ष्यमाणं किमित्याह तत्-अध्यात्मं एतत्-त्रितयं अपरे-शास्त्रकारा जगुः ऊचुरिति ॥३८९॥ अथैतदेव क्रमेण व्याचष्टे-

**योगेभ्यो जनवादाच्च, लिङ्गेभ्योऽथ यथागमम् ।**
**स्वौचित्यालोचनं प्राहुर्योगमार्गकृतश्रमाः ॥३९०॥**

योगेभ्यः कायवाङ्मनोव्यापारेभ्यः प्रशस्तगमनशुभभाषणनिरवद्यचिन्तनस्वभावेभ्यः जनवादाद्-लोकप्रवादरूपात् 'चः' समुच्चये लिङ्गेभ्यो-निमित्तेभ्यः अथ-

१. जानन्ते-A; २. लक्षणे पुनः क्रियो-A.B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनन्तरम् यथागमं आगमानुसारेण 'नन्दीतूरमि' त्यादिरूपेण । किमित्याह 'स्वौचित्यालोचनं' प्राहुः-ब्रुवते, 'योगमार्गकृतश्रमाः' उक्तरूपा एव ॥३९०॥
[1]अथ स्वयमेवैतत्त्रितयमाचष्टे-

**योगाः कायादिकर्माणि, जनवादस्तु तत्कथा ।**
**शकुनादीनि लिङ्गानि, स्वौचित्यालोचनास्पदम् ॥३९१॥**

'योगाः कायादिकर्माणि' कायप्रभृतिव्यापाराः 'जनवादस्तु'-लोकप्रवादः पुनः 'तत्कथा' प्रस्तुतधर्माधिकारिवृत्तान्तोऽक्लिष्टः, 'शकुनादीनि' शकुनोपश्रुतिशेष[2]निमित्तान्वेषणलक्षणानि 'लिङ्गानि' किमित्याह 'स्वौचित्यालोचनास्पदं' आस्पदं इत्याश्रयः ॥३९१॥

**एकान्तफलदं ज्ञेयमतो धर्मप्रवर्तनम् ।**
**अत्यन्तं भावसारत्वात् तत्रैव प्रतिबन्धतः ॥३९२॥**

'एकान्तफलदं' निश्चयेनाभीष्टफलदायि ज्ञेयं अतः स्वौचित्यालोचनादनंतरोक्ताद्धर्मप्रवर्तनम् । कुत इत्याह अत्यन्तं-अतीव भावसारत्वात्-भावप्रधानत्वात् तत्रैव-धर्मे प्रतिबन्धतः-धर्मप्रतिबन्धमन्तरेणौदयिकभावोपहतत्वेन स्वौचित्या[3]लोचनायोगात् ॥३९२॥ अत्रैव विशेषमाह-

**तद्भङ्गादिभयोपेतस्तत्सिद्धौ चोत्सुको दृढम् ।**
**यो धीमानिति सन्न्यायात्, स यदौचित्यमीक्षते ॥३९३॥**

तस्य-प्रस्तोतुमिष्टस्य योगस्य भङ्गादिभयेन-आदिशब्दादतिचारभयेन चोपेतो-युक्तः तत्सिद्धौ-चिकीर्षितधर्मनिष्पत्तिविषये 'चः' समुच्चये 'उत्सुकः'-श्रद्धातिरेकात्सत्वरः दृढमतीव यो धर्माधिकारी धीमान्-कार्यपरिणामपर्यालोचकबुद्धिधन इत्येवम् सन्न्यायात्-शुद्धयुक्तेः स यद्-यस्मात् औचित्यमुक्तरूपम् ईक्षतेऽपेक्षणीयतया पश्यतीति ॥३९३॥

**आत्मसम्प्रेक्षणं चैव ज्ञेयमारब्धकर्मणि ।**
**पापकर्मोदयादत्र, भयं तदुपशान्तये ॥३९४॥**

'आत्मसम्प्रेक्षणं चैव'-किं कृतं किं वा कर्तव्यशेषमित्याद्यात्मनिभालनरूपं

---

१. अथ क्रमेणैतत्त्रितय-A.; २. सनिमित्तत्वा-A.; ३. लोचनस्यायोगात्-A.B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुनः ज्ञेयमारब्धकर्मणि अणुव्रतादिपालनरूपे कुतः ? यतः पापकर्मोदयात्-पापकर्मविपाकात् अत्र धर्मकर्मणि भयं भङ्गादिविषयं सञ्जायते ततस्तदुपशान्तये-भयोपशमनिमित्तम् ॥३९४॥ किमित्याह-

**विस्रोतोगमने न्याय्यं, भयादौ शरणादिवत् ।**
**गुर्वाद्याश्रयणं सम्यक्, ततः स्याद्दुरितक्षयः ॥३९५॥**

विस्रोतोगमने विमार्गप्रवृत्तौ चेतसः सति न्याय्यं-युक्तम् भयादौ-भय-रोगविषविकारादिरूप उपस्थिते सति शरणादिवद्दुर्गादिप्रतिग्रहचिकित्सामन्त्रादेरिव गुर्वाद्याश्रयणं-गुर्वादेः-गुरुदेवसाधर्मिकादेर्विस्रोतसिकानिग्रहहेतोराश्रयणमङ्गीकरणं सम्यक्- यथावत् ततो-गुर्वाद्याश्रयणात् स्याद्-भवेत् दुरितक्षयो-विस्रोतोगमनहेतु-कर्मनाशोऽचिन्त्यशक्तियुक्तत्वादस्येति ॥३९५॥

अस्यैवाध्यात्मत्वं भावयन्नाह-

**सर्वमेवेदमध्यात्मं, कुशलाशयभावतः ।**
**औचित्याद्यत्र नियमाल्लक्षणं यत्पुरोदितम् ॥३९६॥**

[1]सर्वमेवेदमौचित्यालोचनादि अध्यात्मं कुशलाशयभावतः-प्रशस्त-चित्तसद्भावात्, अत्र हेतुः "औचित्याद्वृत्तयुक्त" (३५८) श्लोकोक्तं, यत्र स्वौचित्यालोचनादौ नियमाल्लक्षणं स्वरूपं यद्यस्मात् वर्तते इति पुरोदितम् ॥३९६॥

अत्रैव पुनरपि मतान्तरमाह-

**देवादिवन्दनं सम्यक्, प्रतिक्रमणमेव च ।**
**मैत्र्यादिचिन्तनं चैतत्, सत्त्वादिष्वपरे विदुः ॥३९७॥**

देवादीनां [2]देवप्रभृतीनां वन्दनं-स्तवनं नमनरूपम् । सम्यक्प्रतिक्रमणमेव च-"स्वस्थानाद्यत्[3]परं स्थानं, प्रमादस्य वशाद् गतः । भूयोऽप्यागमनं तत्र, प्रतिक्रमणमुच्यते ॥" - इत्येवंलक्षणम् मैत्र्यादिचिन्तनं चैतदध्यात्मम् सत्त्वादिषु-सत्त्वगुणाधिकक्लिश्यामानाविनयेषु विषये अपरे विदुर्जानते ॥३९७॥

अथ देवादिवन्दनाद्येव क्रमेण व्याचष्टे—

---

१. सर्वमेवेदमात्मौचित्या-A.B.; २. देवगुरुप्रभृतीनां-A.B.; ३. परस्थानं-A.B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**स्थानकालक्रमोपेतं, शब्दार्थानुगतं तथा ।**
**अन्याऽसंमोहजनकं, श्रद्धासंवेगसूचकम् ॥३९८॥**

स्थानेन-चैत्य[1]वन्दनायोग्यशरीरसंस्थानरूपेण, कालेन-संध्यात्रयादिना, क्रमेण-प्रणिपातदण्डकादिना उपेतं-युतम् । इष्टं देवादिवंदनं इत्युत्तरेण योगः, शब्दार्थानुगतं [2]देवादिवन्दनसूत्राभिधेयोपयोगयुक्तम् तथा इति विशेषणसमुच्चये अन्याऽसंमोहजनकं-युक्तस्वरप्रधानतया स्वव्यतिरिक्ततदनुष्ठानप्रवृत्तजनाऽसंमोहसंपादकम् तथा श्रद्धासंवेगसूचकं-श्रद्धासंवेगयोः प्रतीतरूपयोरभिव्यक्तिहेतुः ॥३९८॥ तथा-

**प्रोल्लसद्भावरोमाञ्चं, वर्धमानशुभाशयम् ।**
**अवनामादिसंशुद्धमिष्टं देवादिवन्दनम् ॥३९९॥**

[3]प्रोल्लसत्-जृम्भमाणो भावरोमाञ्चोऽकृत्रिमपुलकरूपो यत्र तत्तथा, वर्धमानः शुभ आशयो यत्र तत्तथा, अवनामादयोऽवनामयथाजातादयो वन्दनकोपयोगिनो ये क्रियाविशेषाः तैः संशुद्धं-अनवद्यं इष्टमभिमतं देवादिवन्दनं-प्रागुक्तरूपमिति ॥३९९॥

**प्रतिक्रमणमप्येवं, सति दोषे प्रमादतः ।**
**तृतीयौषधकल्पत्वाद्, द्विसन्ध्यमथवाऽसति ॥४००॥**

प्रतिक्रमणमपि-षड्विधावश्यकक्रियारूपं 'एवं' - देवादिवन्दनन्यायेनेष्टम् 'सति दोषे' गुप्तिसमितिगुरुविनयभङ्गादिलक्षणे प्रमादतस्तथाविधानाभोगादिप्रमादात् । अत्रैव पक्षान्तरमाह-तृतीयौषधकल्पत्वात् ।

इह त्रीण्यौषधानि । तत्रैकं प्रयुज्यमानं व्याधिभावे तं नाशयति अभावे पुनस्तं करोति । द्वितीयं पुनः सन्तं व्याधिमपनयति, तदभावे तु न गुणाय नापि दोषाय । तृतीयं तु सन्तं दोषमपनयति, असत्त्वे च रसायनतया परिणमति। ततस्तृतीयौषधकल्पत्वात् द्विसन्ध्यं-द्वे प्राभातिकसायन्तन्यौ सन्ध्ये यत्र तत्तथा 'अथवा' इति विकल्पान्तरे असति दोष इति ॥४००॥

अथ यद्विषयमेतत्तदाह-

---

१. वन्दनामित्यनेन-A.;- २. देवादिवन्दनासूत्राभि-A.B.; ३. प्रोल्लसतुज्जृम्भ-A.B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**निषिद्धासेवनादि यद्, विषयोऽस्य प्रकीर्तितः ।**
**तदेतद्भावसंशुद्धेः, कारणं परमं मतम् ॥४०१॥**

निषिद्धासेवनादि–"*पडिसिद्धाणं करणे १, किच्चाणमकरणे २ य पडिक्कमणं असद्दहणे ३ य तहा, विवरीयपरूवणाए ४ य ॥१॥*" इति [1]सूत्रोक्तात् यद्यस्मात्कारणात् विषयोऽस्य–प्रतिक्रमणस्य, प्रकीर्तितः तत्तस्मात् एतत्प्रतिक्रमणं भावसंशुद्धेरन्तःकरणनिर्मलतायाः कारणं परमं–प्रकृष्टं मतम् ॥४०१॥

**मैत्रीप्रमोदकारुण्यमाध्यस्थ्यपरिचिन्तनम् ।**
**सत्त्वगुणाधिकक्लिश्यमानाऽप्रज्ञाप्यगोचरम् ॥४०२॥**

मैत्री च प्रमोदश्च कारुण्यं च माध्यस्थ्यं च तेषां परिचिन्तनं–स्मरणम् । कीदृशमित्याह सत्त्वाश्च–सर्वे प्राणिनो, गुणाधिकाश्चात्मनः सकाशादधिकगुणवन्तः, क्लिश्यमानाश्च तथाविधशारीरमानसदुःखोपनिपातेन बाधावन्तो, अप्रज्ञाप्याश्च–प्रज्ञापयितुमयोग्या रक्ताद्विष्टादयः, तत एते यथाक्रमं गोचरा यस्य तत्तथा अध्यात्मं इति प्रकृतमेव ॥४०२॥ अत्रैव विशेषमाह–

**विवेकिनो विशेषेण, भवत्येतद्यथागमम् ।**
**तथा गम्भीरचित्तस्य, सम्यग् मार्गानुसारिणः ॥४०३॥**

विवेकिनो–लब्धपरमार्थविमर्शस्य विशेषेण विशिष्टवृत्त्या भवत्येतन्मैत्र्यादिचिन्तनरूपमध्यात्मं यथागमं आगमनिरूपितक्रमानतिक्रमेण, तस्य प्राय एतत्परिणामचतुष्टयाद्बहिश्चेतोवृत्तेरभावात् कीदृशस्येत्याह 'तथा' इति विशेषणसमुच्चये, गम्भीरचित्तस्य–अनुपलक्ष्यमाणहर्षविषादादिविकारस्य, अत एव 'सम्यग्मार्गानुसारिणः'– शुद्धनिवृत्तिपथस्थितस्येति ॥४०३॥ अथोपसंहारमाह–

**एवं विचित्रमध्यात्ममेतदन्वर्थयोगतः ।**
**आत्मन्यधीतिसंवृत्तेर्ज्ञेयमध्यात्मचिन्तकैः ॥४०४॥**

एवमुक्तन्यायेन विचित्रं अनेकरूपं अध्यात्ममेतत्प्रागुक्तं विज्ञेयं इत्युत्तरेण योगः। कुत इत्याह 'अन्वर्थयोगतः' । एषोऽपि कुत इत्याह आत्मनि–

१. सूत्रोक्तः–A.B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जीवे, अधीति आधारभूते, 'इति' इत्येतस्य पूर्वोक्तार्थस्य, 'संवृत्तेः'-साङ्गत्येन वर्तनात्, ज्ञेयमध्यात्मचिन्तकैः-भावयोगिभिरिति ॥४०४॥

अथ वृत्तिसंक्षयमधिकृत्याह-

**भावनादित्रयाभ्यासाद्, वर्णितो वृत्तिसंक्षयः ।**
**स चात्मकर्मसंयोगयोग्यतापगमोऽर्थतः ॥४०५॥**

भावनादि-भावनाध्यानसमतालक्षणं यद्योगत्रयं तस्याभ्यासात्, 'वर्णितो वृत्तिसंक्षयः' पञ्चमो योगभेदो योगशास्त्रेषु । स च-स पुनर्वृत्तिसंक्षयः आत्मनः कर्मसंयोगयोग्यताया अपगमो निवृत्तिरर्थतः परमार्थमपेक्ष्येति ॥४०५॥

इदमेव भावयति-

**स्थूरसूक्ष्मा यतश्चेष्टा आत्मनो वृत्तयो मताः ।**
**अन्यसंयोगजाश्चैता योग्यता बीजमस्य तु ॥४०६॥**

स्थूरा-गमनागमनादिरूपाः सूक्ष्माश्चोच्छ्वासनिःश्वासादिरूपाः यतो-यस्मात् चेष्टाः-जीवप्रदेशपरिस्पन्दलक्षणाः आत्मनो वृत्तयो-व्यापाराः मताः । ततः किमित्याह 'अन्यसंयोगजाश्च'-अन्येन कर्मणा सह यो जीवस्य संयोगस्तस्माज्जाता एव एताः चेष्टाः, योग्यता बीजं-हेतुः अस्य तु-[१]अस्य संयोगस्य पुनः ॥४०६॥ अत्रैव विपक्षे बाधामाह-

**तदभावेऽपि तद्भावो, युक्तो नातिप्रसङ्गतः ।**
**मुख्यैषा भवमातेति, तदस्या अयमुत्तमः ॥४०७॥**

तदभावेऽपि योग्यताविरहे योग्यतायां पुनः स्यादेव तद्भाव इत्यपिशब्दार्थः-तद्भावोऽन्यसंयोगभावः-युक्तो घटमानः न-नैव, अतिप्रसंगतोऽतिप्रसंगदोष-व्याघातात्, मुख्यैषा अन्यसंयोगयोग्यता, भवमाता-संसारजननी, इतिः पदसमाप्तौ, तत्-तस्मात् अस्या अन्ययोगयोग्यतायाः सकाशात् अयमन्यसंयोगः उत्तमोऽ-नुपचरितः ॥४०७॥ एतदेव भावयति-

**पल्लवाद्यपुनर्भावो, न स्कन्धापगमे तरोः ।**
**स्यान्मूलापगमे यद्वत्, तद्वद्भवतरोरपि ॥४०८॥**

---

१. अन्यसंयोगस्य-A.B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पल्लवादीनां पल्लवपुष्पफलादीनां अपुनर्भावः-पुनरभवनं न-नैव स्कन्धापगमे-स्थुडोच्छेदे तरोर्वटादेः स्याद्-भवेत् मूलापगमे-मूलोच्छेदे यद्वद्-यथा स्यात् तद्वत्-तथा भवतरोरपि-संसारवृक्षस्यापीति । यथा हि "मूलानुच्छेदे कन्दोच्छेदे कृतेऽपि न पल्लवादीनामत्यन्तसमुच्छेदः, मूलावष्टम्भेन पुनर्भावसम्भवात्, एवं नारकतिर्यगादिभावोच्छेदेऽपि न भववेद्यविकाराणा-मत्यन्तसमुच्छेदस्तद्भवयोग्यकर्मबंधयोग्यतोच्छेदमन्तरेणेति ॥४०८॥

अथामुमेव दृष्टान्तदार्ष्टान्तिकभावं भावयन्नाह-

**मूलं च योग्यता ह्यस्य, विज्ञेयोदितलक्षणा ।**
**पल्लवा वृत्तयश्चित्रा, हन्त तत्त्वमिदं परम् ॥४०९॥**

मूलं च-मूलं पुनः योग्यता हि - योग्यतैव अस्य भवतरोः, विज्ञेयोदितलक्षणा निरूपितरूपा प्राक् । पल्लवा वृत्तयो-व्यापाराः चित्रा-नानाप्रकाराः । 'हन्त' इति प्राग्वत् तत्त्वमिदं परं प्रकृष्टमिति ॥४०९॥ एवं यत्सिद्धं तदाह-

**उपायोपगमे चास्या, एतदाक्षिप्त एव हि ।**
**तत्त्वतोऽधिकृतो योग उत्साहादिस्तथास्य तु ॥४१०॥**

उपायोपगमे च सर्वकार्येषूपायतत्त्वाङ्गीकारे सति पुनः अस्या योग्यतायाः किमित्याह 'एतदाक्षिप्त एव हि' तथाभव्यत्वरूपया योग्यतयैवाक्षिप्तः तत्त्वतः परमार्थवृत्त्या अधिकृतः अध्यात्मादिः योगः वर्तते । अत्र विशेषहेतुनिर्धारणायाह 'उत्साहादिः' वक्ष्यमाणः 'तथा' इति समुच्चये अस्य तु-योगस्य पुनरुपायः ॥४१०॥ एतदेवाह-

**उत्साहान्निश्चयाद्धैर्यात्, संतोषात्तत्त्वदर्शनात् ।**
**मुनेर्जनपदत्यागात्, षड्भिर्योगः प्रसिद्ध्यति ॥४११॥**

उत्साहाद्-वीर्योल्लासात्, निश्चयात्-कर्तव्यैकाग्रपरिणामात् धैर्याद् व्यसनोपनिपातेऽपि प्रतिज्ञातोऽविचलनात्, सन्तोषादात्मारामतालक्षणात्, तत्त्वदर्शनाद्-'योग एवेह परमार्थ' इति [1]समालोचनात् मुनेः-योगिनः

---

१. समवलोकनात् मुनेः-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जनपद[1]त्यागात्-भवानुगतिकलोकव्यवहारपरित्यागात् किमित्याह षड्भिः- उत्साहादिभिः, योगः प्रसिद्ध्यति-निष्पत्तिं लभते ॥४११॥

अथास्य निश्चयोपायमाह-

**आगमेनानुमानेन, ध्यानाभ्यासरसेन च ।**
**त्रिधा प्रकल्पयन्प्रज्ञां, लभते योगमुत्तमम् ॥४१२॥**[2]

आगमेन-योगविषयेणैव अनुमानेन-तथोपपत्त्यऽन्यथानुपपत्तिरूपेण ध्यानस्याभ्यासः-पुनःपुनरनुशीलनं तस्य रसेन, चः प्राग्वत् । त्रिधा-त्रिभिरेतैः प्रकारैः प्रकल्पयन्-व्यापारयन् प्रज्ञां-बुद्धिं लभते-निश्चिनोति, योगमुत्तमं भावरूपमिति ॥४१२॥ कथमित्याह-

**आत्मा कर्माणि तद्योगः, सहेतुरखिलस्तथा ।**
**फलं द्विधा वियोगश्च, सर्वं तत्तत्स्वभावतः ॥४१३॥**

आत्मा-जीवः समस्ति, कर्माण्यात्मव्यतिरिक्तानि सन्ति, तद्योगस्तयोर्जीवकर्मणोर्वह्न्ययस्पिण्डयोरिव योगो मीलकः सहेतुर्मिथ्यात्वादिकारणनिमित्तः अखिलः-सकलकालगतः, तथा फलं कार्यं नारकत्वादि तद्योगस्य द्विधा-शुभाशुभप्रकारवत्, वियोगश्च-तद्योगविघटनलक्षणः समस्ति 'सहेतुः' इत्यनुवर्तते । सर्वमात्माद्येतत् तत्तत्स्वभावतः-तेषामात्मादीनां स आत्मादिपरिणतिरूपो यः स्वभावः स्वसत्तालक्षणस्तस्मात् । 'न हि स्वभावशून्यत्वे वन्ध्यासुतादीनामिव काचिदात्मत्वादिपरिणतिः कस्यचिदस्तीति तत्तत्स्व[3]भावनिबन्धनं सर्वं वस्तु स्वरूपं लभत इति' ॥४१३॥ एवं सति यद्भवति तदाह-

**अस्मिन्पुरुषकारोऽपि, सत्येव सफलो भवेत् ।**
**अन्यथा न्यायवैगुण्याद्, भवन्नपि न शस्यते ॥४१४॥**

[4]अस्मिन्स्वभावत्वे 'पुरुषकारोऽपि' न केवलं कालादय इत्यपिशब्दार्थः सत्येव विद्यमान एव सफलः स्वकार्यकृत् भवेत् । अन्यथा-तत्तत्स्वभावत्वाभावे न्यायवैगुण्यान्नीतिविरहलक्षणात् भवन्नपि पुरुषकारः तथाविधाऽज्ञानदोषात्, न

---

१. त्यागाद्गतानुगति-A.; २. पद्यमिदंयोगसारप्राभृते (७-४२) समाधतिन्त्रे (३) च वर्तते ॥ ३. स्वभाव्यं-A.B.C.; ४. अस्मिंस्तत्स्व-A.B.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शस्यते-न प्रशस्यते कङ्कटुकपाकप्रवृत्ततथाविधपाचकपुरुषकार इव ॥४१४॥

**अतोऽकरणनियमात्, तत्तद्वस्तुगतात्तथा ।**
**वृत्तयोऽस्मिन्निरुध्यन्ते, तास्तास्तद्बीजसम्भवाः ॥४१५॥**

अतस्तत्तत्स्वाभाव्यात् अकरणस्य नियमादैकान्तिकत्वलक्षणात् कीदृशादित्याह तत्तद्वस्तुगतात्-महारम्भमहापरिग्रहादिनारकादिहेतुलक्षणवस्तुगतात् तथा -[1]सर्वज्ञानुसारप्रकारेण वृत्तयो-नरकगमनादिलक्षणाः अस्मिन्पुरुषकारे सति निरुध्यन्ते-निवर्तन्ते तास्ताश्चित्ररूपाः तद्बीजसम्भवास्त[2]न्नरकगमनादिहेतुर्यद्बीजं कर्मलक्षणं तस्मात्सम्भवो यासां तास्तथा ॥४१५॥

इदमेव दृष्टान्तद्वारेण समर्थयमानः प्राह-

**ग्रन्थिभेदे यथैवायं, बन्धहेतुं परं प्रति ।**
**नरकादिगतिष्वेवं, ज्ञेयस्तद्धेतुगोचरः ॥४१६॥**

ग्रन्थिभेदे यथैवायमकरणनियमः बन्धहेतुं-मिथ्यात्वादिरूपं परं-प्रकृष्टं सप्ततिकोटिकोट्यादिस्थितिनिमित्तं प्रति-आश्रित्य निरूप्यते नरकादिगतिषु विषये एवं परमबन्ध[3]हेतुत्वकरणन्यायेन ज्ञेयस्तद्धेतुगोचरो नरकादिहेतुविषयोऽकरणनियमः ॥४१६॥ अत्रैव विपक्षे बाधामाह-

**अन्यथाऽऽत्यन्तिको मृत्युर्भूयस्तत्राऽगतिस्तथा ।**
**न युज्यते हि सन्न्यायादित्यादि समयोदितम् ॥४१७॥**

अन्यथाऽकरणनियमानभ्युपगमे आत्यन्तिको-ऽपुनर्भावी मृत्युर्नरकादिगोचरः भूयः-पुनरपि तत्र [4]नरकादि अगतिरात्यन्तिकी 'तथा' इति समुच्चये, न युज्यते हिर्यस्मात् सन्न्यायात्-[5]सद्युक्तेः किमित्याह इत्यादि-आत्यन्तिकमृत्व्वादि 'समयोदितं'-सिद्धान्तनिरूपितं वस्त्विति ॥४१७॥

अथास्य हेतुदर्शनायाह-

**हेतुमस्य परं भावं, सत्त्वाद्यागोनिवर्तनम् ।**
**प्रधानकरुणारूपं, ब्रुवते सूक्ष्मदर्शिनः ॥४१८॥**

---

१. सर्वज्ञानानुसार-A.C.; २. नरकादिहेतु-A; नरकगमनहेतु-B.C.; ३. हेत्वकरण-A.C.; ४. नरकादावगति-A.B.C.; ५. शुद्धयुक्तेः-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हेतुमस्याऽकरणनियमस्य तत्तत्पापस्थानविषयस्य परमुत्कृष्टं भावमन्तः-करणपरिणामं सत्त्वादीनां-शत्रुमित्रोदासीनानां जनानां आगसो-ऽशुभपरिणामरूप-स्यापराधस्य निवर्तनं-निवृत्तिहेतुम् । प्रधाना-यथावस्थितवस्तुविज्ञानानुगतत्वेन भावरूपा या 'करुणा' परदुःखसमुच्छेदनप्रवृत्तिस्तद्रूपं स्वभावो यस्य तत्तथा ब्रुवते-प्रचक्षते सूक्ष्मदर्शिनो-निपुणाभोगभाज इति । यया करुणया क्रियमाणया शत्रूणामपि क्लिष्टपरिणामलक्षणोऽपराधो निवर्तते चण्डकौशिकसर्पस्येव भगवति, सा सर्वपापानामकरणनियमनिमित्तमिति ॥४१८॥

अत्रैव मतान्तरमाह—

**समाधिरेष एवान्यैः, सम्प्रज्ञातोऽभिधीयते ।**
**सम्यक्प्रकर्षरूपेण, वृत्त्यर्थज्ञानतस्तथा ॥४१९॥**

समाधिरेष एवाध्यात्मादिर्योगः अन्यैस्तीर्थान्तरीयैः सम्प्रज्ञातः-सम्प्रज्ञातनामाऽभिधीयते । कुत इत्याह सम्यक्-यथावत् प्रकर्षरूपेण-सवितर्क-निश्चयात्मकेन, 'वृत्त्यर्थज्ञानतः' वृत्तीनां नरनारकाद्यात्मपर्यायाणामर्थानां-द्वीपाचलजलधिप्रभृतीनां ज्ञानतो-विकल्पनात् 'तथा' तेन प्रकारेण । यतः सम्यक् प्रकृष्टं वृत्त्यर्थज्ञानं तत्प्रकारमत्रास्ति ततोऽसौ समाधिः सम्प्रज्ञात इत्युच्यत इति ॥४१९॥

अथैतत्समाधिफलमाह-

**एवमासाद्य चरमं, जन्माऽजन्मत्वकारणम् ।**
**श्रेणिमाप्य ततः क्षिप्रं, केवलं लभते क्रमात् ॥४२०॥**

एवमुक्तरूपेण समाधिना समाहितः सन् आसाद्य-क्रमेणोपलभ्य चरमं अपश्चिमं जन्म-भवं अविद्यमानजन्माऽजन्मा तद्भावोऽजन्मत्वं तस्य कारणं-हेतुं श्रेणिं-क्षपकश्रेणिलक्षणं आप्य-लब्ध्वा ततः-प्राप्तेरनन्तरं क्षिप्रमचिरेण 'केवलं' ज्ञानं दर्शनं च लभते क्रमात्[1] ॥४२०॥ ततः-

**असम्प्रज्ञात एषोऽपि, समाधिर्गीयते परैः ।**
**निरुद्धाशेषवृत्त्यादितत्स्वरूपानुवेधतः ॥४२१॥**

---

१. क्रमात् तद्गुणस्थानरोहणलक्षणात्-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

असम्प्रज्ञातः-सम्प्रज्ञातविलक्षणः एषोप्येष एव योगः कैवल्यलक्षणावस्थान्तरप्राप्तः समाधिर्गीयते-प्रज्ञाप्यते परैस्तीर्थान्तरीयैः । कुत इत्याह निरुद्धमशेषं-समस्तं वृत्त्यादि-वृत्तिरुक्तलक्षणा आदिशब्दात्तद्बीजं च यत्र तत्तथा तच्च तत्स्वरूपं च-योगस्वरूपं तेनानुवेधात्-ऐक्यानयनादात्मनः । यत्र समाधौ वृत्त्याद्यशेषं निरुध्यत आत्मा च लब्धतत्समाधिस्वरूपानुवेधो भवति सोऽसम्प्रज्ञातो मानसविज्ञानवैकल्यादुच्यत इति ।

इह द्विधाऽसम्प्रज्ञातः समाधिः, (१) सयोगिकेवलिकालभावी (२) अयोगिकेवलिकालभावी च । तत्राद्यो मनोवृत्तीनां विकल्पज्ञानरूपाणां तद्बीजस्य ज्ञानावरणाद्युदयरूपस्य निरोधादुत्पद्यते, द्वितीयस्तु सकलाशेषकायादिवृत्तीनां तद्बीजानामौदारिकादिशरीररूपाणामत्यन्तोच्छेदात्सम्पद्यत इति ॥४२१॥

अथात्रैव वक्तव्यान्तरमाह-

**धर्ममेघोऽमृतात्मा च, भवशत्रुः शिवोदयः ।**
**सत्त्वानन्दः परश्चेति, योज्योऽत्रैवार्थयोगतः ॥४२२॥**

धर्ममेघो-धर्ममेघनामा समाधिविशेषः । अमृतात्मा चाऽमृतभावकारणत्वात् । भवशत्रुः शिवोदयः सत्त्वानन्दः परश्चेत्येवं समाधिविशेषस्तत्तत्तीर्थान्तरीयशास्त्रसिद्धः योज्यो-योजनीयः अत्रैवाऽध्यात्मादियोगे अर्थयोगतो-ऽर्थसाङ्गत्यात् । विचित्रावस्थो हि योगः, [1]ततस्तदवस्थामपेक्ष्य को नाम समाधिविशेषस्तत्रान्तर्भावं न लभत इति ॥४२२॥ अथ सर्वसमाधिफलमाह-

**मण्डूकभस्मन्यायेन, वृत्तिबीजं महामुनिः ।**
**योग्यतापगमाद्दग्ध्वा, ततः कल्याणमश्नुते ॥४२३॥**

मण्डूकभस्मन्यायेन-दर्दुरशरीरक्षारीकरणदृष्टान्तेन वृत्तिबीजं-शारीरमानसचेष्टानिमित्तं तत्तत्कर्मरूपं महामुनिः-क्षपकोऽनिवृत्तिबादरादिस्तत्तद्गुणस्थानकस्थः योग्यतापगमात्तत्तत्[2]कर्मसम्बन्धयोग्यतात्यन्तोच्छेदात् दग्ध्वा शुक्लध्यानदावानलेन भस्मभावमापाद्य ततः-सर्वदहनानन्तरं कल्याणं-निवृत्तिरूपं अश्नुते-लभते ॥४२३॥ अथात्रापि तथाभव्यत्वमेव हेतुरिति दर्शयन्नाह-

---

१. तत्तदवस्थामपेक्ष्य AB २. कर्मबन्धयोग्य-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**यथोदितायाः सामग्र्यास्तत्स्वाभाव्यनियोगतः ।**
**योग्यतापगमोऽप्येवं, सम्यग्ज्ञेयो महात्मभिः ॥४२४॥**

यथोदितायाः-अध्यात्मादिरूपायाः सामग्र्याः तत्स्वाभाव्यनियोगतस्तथाभव्यत्वव्यापारात् किमित्याह योग्यतापगमोऽपि-किं पुनर्योग्यतानिमित्तकर्मापगम इत्यपिशब्दार्थः 'एवं' उक्तरूपयोगाभ्यासेन सम्यक्-सूक्ष्माभोगेन ज्ञेयो महात्मभिरिति । यथाध्यात्मादियोगसहायात्तथाभव्यत्वात्तत्तद्बन्धापगमः सम्पद्यते, तथा तद्बन्धयोग्यतापगमोऽपीति ॥४२४॥

एवं योगविशेषसिद्धौ यद्भवति तदाह-

**साक्षादतीन्द्रियानर्थान्, दृष्ट्वा केवलचक्षुषा ।**
**अधिकारवशात् कश्चिद्, देशनायां प्रवर्तते ॥४२५॥**

साक्षाद्-ऽन्यानपेक्षितया अतीन्द्रियानिन्द्रियविषयातीतान् अर्थान्-जीवादीन् दृष्ट्वा-विलोक्य केवलचक्षुषा-केवलज्ञानदर्शनदृष्ट्या अधिकारवशाद्योग्यताविशेषलक्षणात् कश्चित्तीर्थकरपदप्रायोग्यो जीवः, देशनायां-स्वतन्त्रधर्मकथारूपायां प्रवर्तते ॥४२५॥

**प्रकृष्टपुण्यसामर्थ्यात्, प्रातिहार्यसमन्वितः ।**
**अवन्ध्यदेशनः श्रीमान्, यथाभव्यं नियोगतः ॥४२६॥**

प्रकृष्टपुण्यसामर्थ्यात्-तीर्थंकरवात्सल्यादि[1]हेतुभिरुपात्तोत्तमसुकृतानुभावात् प्रातिहार्यसमन्वितो-ऽशोकवृक्षादिदेवकृतपूजोपचारसहितः अवन्ध्यदेशनः-सम्यक्त्वादिनिर्वाणकारणफलधर्मकथी श्रीमान्-सर्वातिशायिज्ञानलक्ष्मीपात्रम् । यथाभव्यं-योग्यजीवानतिक्रमेण नियोगतः-प्रथमपश्चिमदिनप्रहराराधनारूपात् ॥४२६॥

अत्रैव मतान्तराण्याह[2]-

**केचित्तु योगिनोऽप्येतदित्थं नेच्छन्ति केवलम् ।**
**अन्ये तु मुक्त्यवस्थायां, सहकारिवियोगतः ॥४२७॥**

केचित्तु-जैमिनीयाः योगिनोऽप्यध्यात्मादियोगभेदवतो जीवस्य किं पुनस्तदन्यरूपस्येत्यपिशब्दार्थः एतत्प्रागुद्दिष्टं, इत्थमतीन्द्रियार्थविषयतया नेच्छन्ति

---

१. हेतूपात्तोत्तम-A; २. प्याह केचिदित्यादि-B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

केवलं-केवलज्ञानम् । तथा च ते पठन्ति-" *अतीन्द्रियाणामर्थानां, साक्षाद्द्रष्टा न विद्यते । वचनेन हि नित्येन, यः पश्यति स पश्यति*" ॥१॥ अन्ये तु-सांख्याः मुक्त्यवस्थायां केवलं नेच्छन्ति । कुत इत्याह सहकारिणो-मनोलक्षणस्य प्रकृतेर्विघटनेन वियोगतो-विसंयोगात् । एतच्च मतद्वयं यथा फल्गु तथोपरिष्टाद्वक्ष्यते इति ॥४२७॥

**चैतन्यमात्मनो रूपं, न च तज्ज्ञानतः पृथक् ।**
**युक्तितो युज्यतेऽन्ये तु, ततः केवलमाश्रिताः ॥४२८॥**

चैतन्यमात्मनो रूपं "चैतन्यं पुरुषस्य" इति वचनप्रामाण्यात्, न च-न पुनः तच्चैतन्यम् ज्ञानतो-ज्ञानात् पृथग्भिन्नम् युक्तितः-शुद्धहेतुप्रयोगात् युज्यते, किं तु ज्ञानमेव, अन्ये तु-जैनाः पुनः ततो-ज्ञानचैतन्ययोरभेदाद् घातिकर्मक्षयानन्तरं केवलं-परिपूर्णज्ञानरूपं संसारावस्थायां मुक्त्यवस्थायां च, आश्रिताः-प्रतिपन्नाः ॥४२८॥ अथैतत्फलमाह-

**अस्मादतीन्द्रियज्ञप्तिस्ततः सद्देशनागमः ।**
**नान्यथा छिन्नमूलत्वादेतदन्यत्र दर्शितम् ॥४२९॥**

अस्मात्-केवलात् अतीन्द्रियज्ञप्तिः-स्वर्गापवर्गादीनामतीन्द्रियविषयाभिगमभावज्ञानं सम्पद्यते । ततो-ऽनन्तरं सती-कषच्छेदतापशुद्धा या देशना वस्तुप्रज्ञापना मातृकापदत्रयोद्घाटरूपा, ततोऽप्यागमोऽङ्गानङ्गादिभेदः प्रवर्तते, अथवा सद्देशनैवागम इति समासः । अत्रैव विपक्षे बाधामाह न-नैव अन्यथा केवलिदेशनामन्तरेणागमः, कुत इत्याह 'छिन्नमूलत्वात्'-छिन्नं त्रुटितं मूलमागमार्थसाक्षाद्दर्शिपुरुषलक्षणं यस्य स तथा तद्भावस्तत्त्वं तस्मात्, यथा हि स्वातन्त्र्येणातिद्राघीयस्यापि जात्यन्धपरंपरया हस्त्यादिसंस्थानलक्षणोऽर्थः प्रज्ञाप्यमानो न सत्यरूपतां प्रतिपद्यते, तथा सर्वज्ञप्रणेतृक आगमोप्यवाग्दर्शिपरम्पराप्रज्ञापनापन्नो योजनीय इति । एतदागमान्यथानुपपन्नत्वं अन्यत्र-**शास्त्रवार्तासमुच्चयादौ** विस्तरेण दर्शितमिति ॥४२९॥

**तथा चेहात्मनो ज्ञत्वे, संविदस्योपपद्यते ।**
**एषा चानुभवात्सिद्धा, प्रतिप्राण्येव देहिनाम् ॥४३०॥**

'तथा च' इति पूर्वोक्तार्थभावनार्थः । इह लोके आत्मनो ज्ञत्वे-चिद्रूपत्वे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

संविद् ज्ञानं अस्या-ऽऽत्मनः उपपद्यते । अन्यथा [1]तत्स्वभावत्वे (अज्ञस्वभावत्वे) स्वव्यतिरिक्तज्ञानयोगेऽपि प्रदीपहस्तान्धवन्न किञ्चिदयमात्मा जानीयादिति ।

न च वक्तव्यं "संविदेवास्य न भविष्यति" इत्याह एषा च-संविद् बाह्याभ्यन्तरार्थ[2]विषयाणां पुनः अनुभवात्सिद्धा-संवेदनात्प्रतिष्ठिता कथमित्याह 'प्रतिप्राण्येव' सर्वजीवव्याप्त्यैव, देहिनां-जीवानामिति ॥४३०॥

ज्ञस्वभावतामेवाधिकृत्याह-

**अग्नेरुष्णत्वकल्पं तज्ज्ञानमस्य व्यवस्थितम् ।**
**प्रतिबन्धकसामर्थ्यान्न स्वकार्ये प्रवर्तते ॥४३१॥**

अग्नेरुष्णत्वकल्पं-स्वभावभूतमित्यर्थः तच्चैतन्यापरनामकं ज्ञानं केवलज्ञानलक्षणं अस्यात्मनः व्यवस्थितं-प्रतिष्ठितम् । यदि नामैवं, ततः किं न सर्वार्थविषयं सर्वदा प्रवर्तत इत्याह 'प्रतिबन्धकसामर्थ्यात्' ज्ञानावरणोदयलक्षणात्, न स्वकार्ये सर्वार्थपरिच्छेदरूपे प्रवर्तते ॥४३१॥

एतदेव व्यतिरेकत आह-

**ज्ञो ज्ञेये कथमज्ञः स्यादसति प्रतिबन्धके ।**
**दाह्योऽग्निर्दाहको न स्यात्, कथमप्रतिबन्धकः ॥४३२॥**

ज्ञो-ज्ञाता स्वभावत एव सन्नात्मा ज्ञेये-जीवादावर्थे कथमज्ञः स्यान्नैवेत्यर्थः असति 'प्रतिबन्धके' ज्ञानावरणाद्युदये सयोगिकेवल्याद्यवस्थायाम् । एतदेव प्रतिवस्तूपमयाह 'दाह्ये'-दग्धुं शक्ये सति तृणादौ अग्निर्दाहकः-भस्मावस्थाकारी न स्यात् कथमप्रतिबन्धकः-अविद्यमानमन्त्रादिस्तम्भः ॥४३२॥

सर्वाण्येव हि ज्ञानानि सन्निहितविषयाण्येव प्रवर्तन्ते यथा चक्षुर्ज्ञानं, ज्ञानं च भवतां केवलं, तथा दृष्टान्ततयोपन्यस्तोऽग्निः सन्निहितदाह्य[3]दाहक एवेति देशविप्रकर्षः एव प्रतिबन्धकः, कथमस्याऽस्मिन्सति सर्वार्थविषयत्व-मित्याशङ्क्य परिहरन्नाह-

**न देशविप्रकर्षोऽस्य, युज्यते प्रतिबन्धकः ।**
**तथानुभवसिद्धत्वादग्नेरिव सुनीतितः ॥४३३॥**

---

१. अस्य स्वभावत्वे-B.C.; २. विषया पुनः-A.B.C.; ३. दाह एवे-B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न-नैव देशविप्रकर्ष: स्वर्गपातालादिरूप: अस्य-केवलस्य युज्यते प्रतिबन्धक: । तथानुभवसिद्धत्वाद्-यथा देशविप्रकर्षो मेरुमकराकरादिविषयगतो ज्ञानविशेषप्रवृत्तौ प्रतिबन्धको न भवति, तथानुभवस्य स्वसंवेदनरूपस्य सिद्धत्वात् । 'अग्नेरिव' इति वैधर्म्यदृष्टान्त: सुनीतित:-सन्न्यायात् । यथाग्रेर्देशविप्रकर्ष: प्रतिबन्धक:, न तथा केवलस्येत्यर्थ: ॥४३३॥

तर्हि कथमनयोर्दृष्टान्तदार्ष्टान्तिकभाव इत्याशंक्याह-

**अंशतस्त्वेष दृष्टान्तो, धर्ममात्रत्वदर्शक: ।**
**अदाह्याऽदहनाद्येवमत एव न बाधकम् ॥४३४॥**

अंशतस्तु-देशादेव एषोऽग्नेर्दाहकत्वलक्षणो दृष्टान्त: कीदृश इत्याह 'धर्ममात्रत्वदर्शक:'-यथाऽग्नेर्दाहकत्वं स्वलक्षणं तथाऽऽत्मनो ज्ञानमिति ख्यापक:, न पुन: साधर्म्यात् । तत: किं सिद्धमित्याह 'अदाह्यस्य' वंशीमूलादेरदहनादि-अदहनं, आदिशब्दाद्विप्रकृष्टादहनं च । 'एवं' धर्ममात्रत्वदर्शने सिद्धे सति अत एवांशतो दृष्टान्तात् 'न बाधकं' केवलस्य सर्वार्थविषयत्वख्यापनेन(ख्यापने) नैव क्षतिकारि ॥४३४॥ अथ प्रस्तुतं सर्वज्ञत्वमेव भावयति-

**सर्वत्र सर्वसामान्यज्ञानाज्ज्ञेयत्वसिद्धित: ।**
**तस्याखिलविशेषेषु, तदेतन्न्यायसङ्गतम् ॥४३५॥**

'सर्वत्र' विषये दूरासन्नादिभेदभिन्ने 'सर्वसामान्यं' सर्वस्य साधारणं यत्सत्त्वादि तस्य ज्ञानाद्-अवबोधात् 'ज्ञेयत्वसिद्धितो' ज्ञेयभावसिद्धे: । एकस्मिन्नपि ह्युत्पादव्ययध्रौव्यरूपेण सत्त्वेन विशिष्टे घटादावर्थे [1]परिज्ञाते सत्यन्यस्यापि तद्रूपतानतिक्रमात्परिज्ञानं कथञ्चिदुपपन्नमेवेति, किमित्याह 'तस्य' आत्मन: प्रतिबन्धकाभावे 'अखिलविशेषेषु'-अतीतानागतादिभेदेषु, 'तदेतत्' प्रकृतमेव केवलज्ञानं 'न्यायसङ्गतं' उपपन्नमिति यतो, "यो य: सामान्यज्ञान-विषयोऽर्थ: स स कस्यचित्प्रत्यक्षो भवति, यथा धूमादनुमीयमानोऽग्नि:, सामान्यज्ञानविषयाश्च सर्वे भावा: तस्मात्ते कस्यचित्प्रत्यक्षा अपि स्युरिति" ॥

पुनरपीदमेव भावयति-

---

१. परिज्ञाने-B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सामान्यवद्विशेषाणां, स्वभावो ज्ञेयभावतः ।**
**ज्ञायते स च साक्षात्त्वाद् विना विज्ञायते कथम् ॥४३६॥**

सामान्यवत्-महा[1]सत्त्वादिसामान्यमिव विशेषाणामाम्रनिम्बकदम्बादिरूपाणां स्वभावः स्वलक्षणरूपः ज्ञेयभावतो-ज्ञेयत्वरूपात् ज्ञायते केनचित्पुरुषेण । स च-स्वभावः साक्षात्त्वात्-साक्षाद्भावलक्षणात् विनाऽन्तरेण 'विज्ञायते कथं' साक्षाद्भावगम्यत्वेन विशेषाणां सर्वैरस्याभ्युपगमात् ॥४३६॥ अथोपसंहरन्नाह-

**अतोऽयं ज्ञस्वभावत्वात्, सर्वज्ञः स्यान्नियोगतः ।**
**नान्यथा ज्ञत्वमस्येति, सूक्ष्मबुद्ध्या निरूप्यताम् ॥४३७॥**

अतो-विशेषाणां साक्षाद्भावगम्यत्वाद्धेतोः 'अयं'-जीवः ज्ञस्वभावत्वात्-ज्ञानरूपत्वात् सर्वज्ञः-सर्वार्थज्ञाता स्यान्नियोगतः-नियमेन । विपक्षे बाधामाह न-नैव अन्यथा-सर्वज्ञत्वाभावे ज्ञत्वमस्य जीवस्य इति-एतत् सूक्ष्मबुद्ध्या निरूप्यताम् । यदि हि प्रतिबन्धकाभावेऽपि सर्वज्ञोऽसावात्मा स्यात्( ? न स्यात्) तदा ज्ञस्वभाव एव न स्यात्, आकाशाद्यमूर्तभाववत् ॥४३७॥

इत्थं सर्वज्ञत्वे साधिते यत्सिद्धं तदाह-

**एवं च तत्त्वतोऽसारं, यदुक्तं मतिशालिना ।**
**इह व्यतिकरे किञ्चिच्चारुबुद्ध्या सुभाषितम् ॥४३८॥**

एवं चास्मिंश्च सर्वज्ञलक्षणेऽर्थे सिद्धे सति तत्त्वतः-परमार्थनीत्या असारं फल्गु यदुक्तं **मतिशालिना कुमारिलेन** इह व्यतिकरे-सर्वज्ञ[2]प्रतिषेधगोचरे किञ्चित्-किमपि चारुबुद्ध्या-निपुणाभोगरूपया कृत्वा सुभाषितम् । यदस्या अनादरणीयत्वेऽपि मतिशालिनेत्याद्यभिहितं तत्तथाविधजनानुवृत्तिप्रधानतयेति ॥४३८॥ सुभाषितमेव दर्शयति-

**[3]ज्ञानवान्मृग्यते कश्चित्, तदुक्तप्रतिपत्तये ।**
**अज्ञोपदेशकरणे, विप्रलम्भनशङ्किभिः ॥४३९॥**

ज्ञानवान्-विचारकः मृग्यते कश्चिन्निपुणाध्यापकादिः । तदुक्तप्रतिपत्तये

---

१. सत्तादिसा-A; २. प्रतिषिद्धगोचरे-A; ३. श्लोकचतुष्कं प्रमाणवार्तिके १/३२-३३-३४-३५

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वेदोक्तार्थप्रतीतिनिमित्तं कैरित्याह अज्ञोपदेशकरणे-अज्ञप्रज्ञापकोपदिष्टार्थकरणे विप्रलम्भनशङ्किभिः-व्यभिचारभीरुभिर्वेदाध्यायिभिः-पुम्भिरिति ॥४३९॥

**तस्मादनुष्ठानगतं, ज्ञानमस्य विचार्यताम् ।**
**कीटसंख्यापरिज्ञानं, तस्य नः क्वोपयुज्यते ॥४४०॥**

तस्माद्-अज्ञोपदेशकरणे विप्रलम्भनशङ्कादोषाद्धेतोः अनुष्ठानगतं-अनुष्ठीयमानाग्निहोत्रादिगोचरं ज्ञानं, अस्य सर्वज्ञस्य विचार्यताम् । विपर्यये दोषमाह 'कीटसंख्यापरिज्ञानं'-समुद्रादिगतमत्स्यकच्छपादिप्राणिपरिगणन-लक्षणं, तस्य-सर्वज्ञस्य नो-अस्माकं क्वोपयुज्यते ? तत्परिज्ञानस्यास्माकमत्य-न्तानुपयोगेन निष्फलत्वात् ॥४४०॥ तस्मात्-

**हेयोपादेयतत्त्वस्य, साभ्युपायस्य वेदकः ।**
**यः प्रमाणमसाविष्टो, न तु सर्वस्य वेदकः ॥४४१॥**

हेयोपादेयतत्त्वस्य-हातुमुपादातुं वा योग्यभावरूपस्य साभ्युपायस्य-निजोपाययुतस्य वेदको-ज्ञाता यः-पुमान्, प्रमाणं-प्रवृत्तिनिवृत्तिहेतुः असौ-सर्वज्ञः इष्टो मतः । व्यवच्छेद्यमाह न तु-न पुनः, सर्वस्य-अनुपयोगिनोऽपि वस्तुनः वेदक इति ॥४४१॥

नन्वनुपयोगिनोऽनिष्टदूरासन्नादिभेदस्य वस्तुनो दर्शनेन परैः सर्वज्ञः प्रतिपन्न इति कथमिष्टार्थदर्शनेन सर्वज्ञः स्यादित्याशंक्याह-

**दूरं पश्यतु वा, मा वा, तत्त्वमिष्टं तु पश्यतु ।**
**प्रमाणं दूरदर्शी चेदेत गृध्रानुपास्महे ॥४४२॥**

'दूरं'-व्यवहितं 'पश्यतु वा' 'मा वा पश्यतु' तत्त्वमिष्टमर्थं तु-धर्मादिकं पश्यतु, प्रमाणं सर्वज्ञो दूरदर्शी चेद्-यदि मन्यध्वे, [1]एत-आगच्छत यूयं येन समवायमाधाय-गृध्रान् पक्षिविशेषान् उपास्महे-[2]वरिवत्स्यामः । "ते हि किल नभसि प्रसारितपक्षाः सञ्चरन्त आ योजनशतादामिषं पश्यन्तीति" ॥४४२॥

अत्र प्रतिविधत्ते-

---

१. एतागच्छत-A.B.C.; २. वरिवस्यामः(?) -A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवमाद्युक्तसन्नीत्या, हेयाद्यपि च तत्त्वतः ।**
**तत्त्वस्यासर्वदर्शी न वेत्त्यावरणभावतः ॥४४३॥**

एवमादि-मतिशालिसुभाषितं असारं इत्यनुवर्तते । कथमित्याह उक्तसन्नीत्या-*"ज्ञो ज्ञेये कथमज्ञः स्यात्"* (श्लोक. ४३२) इत्यादिरूपया। अत्रैव हेत्वन्तरमाह 'हेयाद्यपि च'-हेयमुपादेयं च वस्तु तत्त्वतः [१]निरवद्याचारवृत्त्या तत्त्वस्य जीवादिलक्षणस्य 'असर्वदर्शी'-सर्वं तत्त्वमद्रष्टुंशीलः न वेत्ति-बुध्यते । कुत इत्याह 'आवरणभावतः'-ज्ञानावारककर्मभावात् ।

इह हि यो यदपेक्षः स्वरूपं लभते स तत्परिज्ञान एव ज्ञातो भवति, यथा ह्रस्वो दीर्घो वा, हेयपदार्थराशिस्वरूपापेक्षश्च सर्वोपादेयार्थराशिः, तस्माद्धेयपरिज्ञानाधीनविज्ञानोऽसाविति न हेयस्यापरिज्ञाने पुष्कलमुपादेयवेदनमुपपद्यत इति सर्वहेयोपादेयवस्तु[२]परिज्ञाता कश्चिज्ज्ञानिविशेषोऽभ्युपगन्तुं युक्त इति ॥४४३॥ इत्थं मीमांसकमतमपाकृत्य सांख्यमतनिराकरणायाह-

**बुद्ध्यध्यवसितं यस्मादर्थं चेतयते पुमान् ।**
**इतीष्टं चेतना चेह, संवित्सिद्धा जगत्त्रये ॥४४४॥**

बुद्ध्यध्यवसितं-बुद्धिविषयीभूतं यस्मादर्थं शब्दादिकं चेतयते-परिच्छिनत्ति पुमान्-पुरुषः इत्येवं इष्टं सांख्येन चेतना चेह संविद्-अर्थसंवित्संज्ञा सिद्धा-प्रतिष्ठिता जगत्त्रये ॥४४४॥

**चैतन्यं च निजं रूपं, पुरुषस्योदितं यतः ।**
**तत आवरणाभावे नैतत्स्वफलकृत् कुतः ॥४४५॥**

चैतन्यं च निजं-स्वकीयं रूपं पुरुषस्योदितमुक्तं यतः, तत आवरणाभावे-प्रकृतिविरहलक्षणे स्वयमेव मुक्त्यवस्थायां प्रतिपन्ने न-नैव एतच्चैतन्यं स्वफलकृदर्थपरिच्छेदलक्षण[३]स्वीयकार्यकारि कुतः-कस्मात्कारणात् ॥४४५॥

**न निमित्तवियोगेन, तद्ध्यावरणसङ्गतम् ।**
**न च तत्तत्स्वभावत्वात्, संवेदनमिदं यतः ॥४४६॥**

अथ परः-न नैवार्थविषयं विज्ञानं मुक्तौ निमित्तवियोगेनाऽन्तःकरणरूप-

---

१. निरवकरवृत्त्या-A.B.C.; २. पविज्ञाता-A; ३. स्वकार्यकारि-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हेतुविरहेण । आचार्यः-'तद्धि' निमित्तं 'आवरणसङ्गतं' छद्मस्थकालभावि ज्ञानावरणाद्यपरनामकप्रकृतियुक्तं तदानीं तस्य प्रमातु[१]रथाप्यपरिनिष्ठित[२]विप्लवकरणापेक्षित्वात् । अथ संवेदनचैतन्ययोराचार्येणैकतया प्राक्प्रतिष्ठितयोर्निराकरणाय परः प्राह-न च-नैव तत्तत्स्वभावत्वात्-तस्यात्मनस्तत्स्वभावत्वात्-संवेदनरूपत्वात् संवेदनमिदं चैतन्यं यतः ॥४४६॥

**चैतन्यमेव विज्ञानमिति नास्माकमागमः ।**
**किन्तु तन्महतो धर्मः, प्राकृतश्च महानपि ॥४४७॥**

चैतन्यमेव-नापरं किञ्चित् विज्ञानं-संवेदनं इत्येवं न-नैव अस्माकं सांख्यानां आगमः-सिद्धान्तः, किं तु तद्विज्ञानं महतो-बुद्धितत्त्वस्य धर्मः-परिणामः, प्राकृतश्च प्रकृतिविकाररूपः पुनः महानपि । तथा च तत्सिद्धान्तः-*प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः । तस्मादपि षोडशकात्, पञ्चभ्यः पञ्च भूतानि* ॥ (सां. का. २२) इत्यादीति ॥४४७॥- अत्र प्रतिविधत्ते-

**बुद्ध्यध्यवसितस्यैवं, कथमर्थस्य चेतनम् ।**
**गीयते तत्र नन्वेतत्, स्वयमेव निभाल्यताम् ॥४४८॥**

बुद्ध्यध्यवसितस्य-बोद्धुं प्रतिपन्नस्य एवं चैतन्यस्याऽविज्ञानत्वे सति कथं केन प्रकारेण अर्थस्य-शब्दादेर्विषयस्य, चेतनं आत्मनो विज्ञानं गीयते तत्रागमे-"*बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयते*" इति वचनात्, यदि हि चैतन्यविज्ञानयोर्भेद एव तदा कथं 'बुद्ध्यध्यवसितमर्थं पुरुषश्चेतयत' इति भवद्भिः प्रतिपद्यते, "**चिती संज्ञाने**" इति वचनाच्चैतन्यविज्ञानयोरेकत्वस्यापत्रत्वात्, ननु इति परपक्षाऽक्षमायां, एतदस्मदुक्तं, स्वयमेव निभाल्यतां-प्रज्ञाचक्षुषा वीक्ष्यतामिति ॥४४८॥ अथ परः-

**पुरुषोऽविकृतात्मैव, स्वनिर्भासमचेतनम् ।**
**मनः करोति सान्निध्यादुपाधिः स्फटिकं यथा ॥४४९॥**

पुरुष आत्मा कीदृशः सन्नित्याह अविकृतात्मैव-सर्वतः स्वस्वरूपात्किञ्चिदप्रच्यवमानो नित्य एव सन्नित्यर्थः किमित्याह स्वनिर्भासं-स्वस्येवात्मन

---

१. रथापि-C.; २. विप्लवकवत्-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इव निर्भास आकारो यस्येति विग्रहस्तत्, प्रतिपन्नचेतनभावमित्यर्थः । अचेतनं प्रकृतिविकारतया चैतन्यशून्यं सत् मनो-बुद्धिलक्षणमन्तःकरणं कर्मतापन्नं करोति-विधत्ते । कुत इत्याह सान्निध्यात्-सन्निधानमात्रेण । निदर्शनमाह 'उपाधिः' उप-समीपे आधीयते धार्यत इत्युपाधिः पद्मरागजपाकुसुमादिः कर्ता तदवस्थः [1]एवं स्फटिकं-अर्कनिशाकरसम्पर्कोदीर्यमाणवैश्वानर[2]जलमश्मविशेषं, यथा-येन प्रकारेण, स्वनिर्भासमारूढस्वकीयरक्तपीत[3]नीलच्छायं करोतीति ॥४४९ ॥

यदि नामैवं ततः किमित्याह-

**विभक्तेदृक्परिणतौ, बुद्धौ भोगोऽस्य कथ्यते ।**
**प्रतिबिम्बोदयः स्वच्छे, यथा चन्द्रमसोऽम्भसि ॥४५०॥**

विभक्ता-बुद्धिप्रतिष्ठितत्वेनात्मनो विभागवर्तिनी, सा चासावीदृक्परिणतिश्च बुद्धिचैतन्याधानप्रधाना आत्मन एव प्रतिबिम्बोदयरूपा 'विभक्तेदृक्परिणतिः' तस्यां सत्याम् । कस्यामाधारभूतायामित्याह 'बुद्धौ'-अन्तःकरणलक्षणायां शब्दादिविषयरूपबहिरर्थाध्यवसाय[4]समर्थायां भोगो-विषयानुभवः सैवेदृक्परिणतिर्भोग इत्यर्थः अस्य-पुरुषस्य कथ्यते-प्रतिपाद्यत आसुरिप्रभृतिभिः । दृष्टान्तमाह प्रतिबिम्बोदयः-प्रतिबिम्बपरिणामः स्वच्छे पङ्कादिमलसम्पर्ककालुष्यविकले यथा-येन प्रकारेण, चन्द्रमसः-मृगलाञ्छनस्य वास्तवस्य अम्भसि उदके । इदमुक्तं भवति-यथा [5]स्वच्छमम्भः तथा स्वभावत एव निर्मलरूपा बुद्धिः, यथा च तत्र स्वप्रतिबिम्बोदयसम्पादनसामर्थ्यवान् स्वभावत एव चन्द्रमाः तथात्मापि बुद्धौ, यश्च तत्र बुद्धावात्मनः प्रतिबिम्बोदयः स एवास्य भोगः नान्यत्किंचिदिति ॥४५०॥ अत्र प्रतिविधत्ते-

**स्फटिकस्य तथानामभावे तदुपधेस्तथा ।**
**विकारो नान्यथासौ स्यादन्धाश्मन इव स्फुटम् ॥४५१॥**

स्फटिकस्य-सूर्यकान्तनाम्नोऽश्मविशेषस्य तथानामभावे तत्प्रकारपरिणामान्तरप्राप्तौ सत्यां तदुपधेः-स्फटिकोपाधिभूतस्य पद्मरागादेस्तथानामभावे 'तथा'

---

१. एव स्फटिकं-A.B.C.; २. 'जल' इतिपदं-A.B.C. प्रतिषु नास्ति; ३. नीलादिच्छायं-A.B.C.; ४. सामर्थ्यायाम्-B.C.; ५. च स्वच्छ-A; तत्स्वच्छ-B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति समुच्चये 'विकारो' रक्तपीतादिप्रतिबिम्बरूपः स्यात् । विपक्षे बाधामाह न-नैव अन्यथा-द्वयोरपि तथापरिणामाभावे असौ-विकारः स्यात् । दृष्टान्तमाह 'अन्धाश्मन इव'-अन्धपाषाणस्येव स्फुटं-प्रकटमेव[1] ॥४५१॥

एवं च सति किमित्याह-

**तथानामैव सिद्धैव, विक्रियाप्यस्य तत्त्वतः ।**
**चैतन्यविक्रियाप्येवमस्तु ज्ञानं च साऽऽत्मनः ॥४५२॥**

तथानामैव दृष्टान्तबलेन प्रकृतिपुरुषयोः सिद्धे सति सिद्धैव विक्रियापि विकारो, यो भवद्भिः कण्ठगतप्राणैरपि न प्रतिपद्यते, किं पुनस्तथानामेत्यपिशब्दार्थः । अस्यात्मनः तत्त्वतोऽनुपचारेण चैतन्यविक्रियाप्येवमात्मविक्रियायां अस्तु-भवतु ज्ञानं चार्थसंवेदनरूपं सा-चैतन्यविक्रिया अस्याऽऽत्मनः ॥४५२॥

अथ परमतमेवाशंक्य परिहरन्नाह-

**निमित्ताभावतो नो चेन्निमित्तमखिलं जगत् ।**
**नान्तःकरणमिति चेत्, क्षीणदोषस्य तेन किम् ? ॥४५३॥**

निमित्ताभावतः सहकारिकारणविरहाद् नो-नैव चेद्यदि ब्रूषे-मुक्तावस्थायामर्थविज्ञानं इति, अत्रोत्तरं-निमित्तं-हेतुः अखिलं-सकलं जगत्-चैतन्यविक्रियायाः, अथ न-नैव अन्तःकरणं हेतुस्तत्र इति एतावत् चेत् अत्राह क्षीणदोषस्य [2]मुक्तावस्थायां तेन अन्तःकरणेन किं ? न किंचिदित्यर्थः ॥४५३॥

एतदेव समर्थयते-

**निरावरणमेतद्यद्, विश्वमाश्रित्य विक्रियाम् ।**
**न याति यदि तत्त्वेन, न निरावरणं भवेत् ॥४५४॥**

निरावरणमेतच्चैतन्यं यद्यस्मात्ततो विश्वं-जगत्, आश्रित्यापेक्ष्य विक्रियां न याति यदि, तदा तत्त्वेन न-नैव निरावरणं भवेत्, आवरणस्यैव चैतन्यविक्रियाया बाधकत्वात् ॥४५४॥ पुनरपि पराभिप्रायमाशंक्य परिहरन्नाह-

१. तत्-C.; २. मुक्त्यवस्थायां-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**दिदृक्षा विनिवृत्तापि, नेच्छामात्रनिवर्तनात् ।**
**पुरुषस्यापि युक्तेयं, स च चिद्रूप एव वः ॥४५५॥**

दिदृक्षा-अनिवृत्तकौतुकत्वेन बाह्यानर्थान्द्रष्टुमिच्छा, विनिवृत्तापि [1]मुक्तावस्थायां न केवलमन्तःकरणाभाव इत्यपिशब्दार्थः 'निमित्ताभावे' इत्यनुवर्तते न-नैव । एतत्कुत इत्याह 'इच्छामात्रनिवर्तनात्' इच्छाया एव केवलाया न तु दर्शनस्य चैतन्यापरनामकस्य व्यावृत्तेः । तथा पुरुषस्याप्यात्मनो युक्तेयमात्मविषयदिदृक्षाविनिवृत्तिः, किं पुनर्बाह्यार्थविषयदिदृक्षाविनिवृत्तिरित्यपिशब्दार्थः । किमुक्तं भवति ? [2]मुक्तावस्थायामन्तःकरणाभावादात्मन आत्मानं द्रष्टुमिच्छाया अपि चैतन्याभिन्नप्रसाधितज्ञानहेतुत्वेन भवद्भिः परिकल्पिताया विनिवृत्तिः प्रसज्यते, ततस्तत्रात्मनः स्वविज्ञानं न स्यादिति । तर्ह्येतदेवास्तु को दोष इत्याह स च-आत्मा 'चिद्रूप एव' स्वविज्ञानरूप एव, वः-युष्माकम् ॥४५५॥ ततः—

**चैतन्यं चेह संशुद्धं, स्थितं सर्वस्य वेदकम् ।**
**तन्त्रे ज्ञाननिषेधस्तु, प्राकृतापेक्षया भवेत् ॥४५६॥**

चैतन्यं च-चैतन्यमेव केवलं इह-मुक्तौ, संशुद्धं-निरावरणं स्थितं सर्वस्य ज्ञेयस्य वेदकं तन्त्रे-आगमे । ज्ञाननिषेधस्तु-यः पुनर्ज्ञानप्रतिषेधो भणितो मुक्तौ, स प्राकृतापेक्षया-विकल्परूपमानसं ज्ञानमपेक्ष्य भवेत् ॥ अत्रैव युक्त्यन्तरमाह—

**आत्मदर्शनतश्च स्यान्मुक्तिर्यत्तन्त्रनीतितः ।**
**तदस्य ज्ञानसद्भावस्तन्त्रयुक्त्यैव साधितः ॥४५७॥**

आत्मदर्शनतश्चाऽऽत्मनैवात्मावलोकनादेव स्यान्मुक्तिर्यद्यस्मात् तन्त्रनीतितः शास्त्रयुक्तेस्सकाशात् तत्-तस्मात् अस्यात्मनः । ज्ञानसद्भावो-विषयग्राहकचैतन्यरूपः तन्त्रयुक्त्यैव-शास्त्रोपपत्त्यैव साधितो मुक्तावस्थायामिति ॥४५७॥

अथ बौद्धमतमधिकृत्याह-

**नैरात्म्यदर्शनादन्ये, निबन्धनवियोगतः ।**
**दोषप्रहाणमिच्छन्ति, सर्वथा न्याययोगिनः ॥४५८॥**

---

१. मुक्त्यवस्थायां-A.B.C.; २. मुक्त्यव-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नैरात्म्यदर्शनात्सर्वथैवात्माभावावलोकनात् अन्ये बौद्धाः निबन्धनवियोगतो-निमित्तविरहात् दोषप्रहाणं-तृष्णाहानिरूपं इच्छन्ति । कथमित्याह सर्वथा-सर्वैः प्रकारैः न्याययोगिनो-न्यायप्रधानयोगभाजः, न तु सांख्या इव शास्त्रमात्रशरणा इति ॥४५८॥

अथैत एव स्वमत[1]पुरस्कारार्थमाहुः-

**समाधिराज एतत्तत्, तदेतत्तत्त्वदर्शनम् ।**
**आग्रहच्छेदकार्येतत्, तदेतदमृतं परम् ॥४५९॥**

समाधिराजः-प्रधानः समाधिः, एतन्नैरात्म्यदर्शनं, तच्छास्त्रान्तरगीतं, तदेतत्तत्त्वदर्शनं परमार्थावलोकनं आग्रहच्छेदकारि-मूर्छाविच्छेददायि एतत् । तदेतदमृतं पीयूषं परं-भावरूपम् ॥४५९॥ एतदेव भाव्यते-

**तृष्णा यज्जन्मनो योनिर्ध्रुवा सा चात्मदर्शनात् ।**
**तदभावान्न तद्भावस्तत्ततो मुक्तिरित्यपि ॥४६०॥**

तृष्णा-लोभलक्षणा यद्यस्मात् जन्मनः-पुनर्भवस्य योनिर्हेतुः ध्रुवा-निश्चिता, सा च-सा पुनस्तृष्णा आत्मदर्शनात्-'अहमस्मि' इति निरीक्षणरूपात् । तथापि किमित्याह तदभावात्-आत्माभावात् न तद्भावः-तृष्णाभावः यतः, तत् तस्मात् ततः-नैरात्म्यदर्शनात् मुक्तिरित्यपि-मुक्तिः परम्परया अनन्तरभावेन च तृष्णाव्यवच्छेदः सम्पद्यत इत्यपिशब्दार्थः ॥४६०॥

एतदेव व्यतिरेकदोषदर्शनद्वारेण भावयति-

**न ह्यपश्यन्नहमिति, स्निह्यत्यात्मनि कश्चन ।**
**न चात्मनि विना प्रेम्णा, सुखकामोऽभिधावति ॥४६१॥**

न-नैव हिर्यस्मात् अपश्यन्-अनिरीक्षमाणः अहमित्युल्लेखेन स्निह्यति स्नेहवान् भवति आत्मनि-विषयभूते कश्चन बुद्धिमान् । न-नैव चः समुच्चये आत्मनि-विषये विना-ऽन्तरेण प्रेम्णा-प्रियत्वेन । सुखकामः-सुखाभिलाषी अभिधावति प्रवर्तते ॥४६१॥ ततः-

---

१. पुरस्करणार्थमाहुः-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सत्यात्मनि स्थिरे प्रेम्णि, न वैराग्यस्य सम्भवः ।**
**न च रागवतो मुक्तिर्दातव्योऽस्या जलाञ्जलिः ॥४६२॥**

सत्यात्मनि स्थिरे-स्थिररूपे, तथा प्रेम्णि स्थिररूप एव न-नैव वैराग्यस्य सम्भवस्तृष्णाभावरूपः, न च रागवतो जीवस्य मुक्तिः, तस्मादात्मदर्शिभिः[1] दातव्योऽस्या मुक्तेः जलाञ्जलिर्लोकप्रसिद्धः । आत्मदर्शनवज्रपातेन तस्या उपहतत्वात् ॥४६२॥ अत्र प्रतिविधीयते-

**नैरात्म्यमात्मनोऽभावः, क्षणिको वाऽयमित्यदः ।**
**विचार्यमाणं नो युक्त्या, द्वयमप्युपपद्यते ॥४६३॥**

अत्र हि द्वयी कल्पना, 'नैरात्म्यं' यद्दर्शनात्किल मुक्तिस्तत् आत्मनोऽभावः स्यादुत क्षणिको वा-क्षणमात्रस्थायी वायमात्मा ? इतिर्विकल्पद्वयसमाप्त्यर्थः । ततः किमित्याह अदः-एतत् विचार्यमाणं-चिन्त्यमानं नो-नैव युक्त्या-शुद्धहेतुप्रयोगरूपया द्वयमपि-द्विरूपितमपि विकल्पितं उपपद्यते-घटत इति ॥४६३॥ एतदेव भावयति-

**सर्वथैवात्मनोऽभावे, सर्वा चिन्ता [2]निरर्थका ।**
**सति धर्मिणि धर्मा यच्चिन्त्यन्ते नीतिमद्वचः ॥४६४॥**

सर्वथैव-द्वयरूपतयापि, आत्मनोऽभावे-विरहे किमित्याह सर्वा स्वर्गमोक्षादिफला चिन्ता-अनुष्ठानफलपर्या[3]लोचनरूपा [4]निरर्थका-फलभोक्तुः कस्यचित्कदाचिदभावात्, सति धर्मिणि-द्रव्यरूपे धर्मा विशेषाः यद्यस्मात् चिन्त्यन्त इति नीतिमद्वचो-नीतिधनपुरुषभाषितमिति । न हि वन्ध्यासुतादावेकान्तेनाविद्यमाने कश्चिद्विपश्चित्सुरूपकुरूपादीन्विशेषांश्चिन्तयितुमारभत इति ॥४६४॥ तथा-

**नैरात्म्यदर्शनं कस्य, को वाऽस्य प्रतिपादकः ।**
**एकान्ततुच्छतायां हि, प्रतिपाद्यस्तथेह कः ॥४६५॥**

नैरात्म्यदर्शनं कस्य-द्रष्टुः को वास्य-नैरात्म्यस्य प्रतिपादकः-प्रणेता एकान्ततुच्छतायामात्मनः हिः स्फुटं प्रतिपाद्यः- प्रज्ञापनीयः 'तथा' इति समुच्चये इह-नैरात्म्यप्रज्ञापनायां प्रकृतायां को-न [5]कश्चिदिति ॥४६५॥

१. दर्शिभिः वादिभि-A.B.; २. निरर्थिका-AC; ३. लोचरूपा-A; लोचफला .B.C.
४. निरर्थिका-A.C; ५. कश्चिदपीति-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ ज्ञानवादिमतमाशंक्य परिहरन्नाह–

**कुमारी सुतजन्मादिस्वप्नबुद्धिसमोदिता ।**
**भ्रान्तिः सर्वेयमिति चेन्ननु सा धर्म एव हि ॥४६६॥**

'कुमार्याः– अद्याप्यप्राप्तविवाहाया या सुतजन्मादिस्वप्नबुद्धिः तत्समोदिता–प्रतिपादिता भ्रान्तिः सर्वेयं प्रतिपाद्यप्रतिपादकादिरूपा' इत्येवम् चेद्यदि ब्रूषे हे ज्ञानवादिन् ? तथा चैतदार्षम्–" *यथा कुमारी स्वप्नान्तरेऽस्मिञ्जातं च पुत्रं विगतं च पश्येत् । जाते च हृष्टा, विगते च खिन्ना, तथोपमान् जानत सर्वधर्मान्* ॥१॥" अत्र प्रतिविधीयते–ननु इति परपक्षाक्षमायां सा–कुमारीसुतजन्मादिबुद्धिः धर्म एव हि–अवस्थाविशेष एव, नापरं किञ्चित् ॥४६६॥ कुत इत्याह–

**कुमार्या भाव एवेह, यदेतदुपपद्यते ।**
**वन्ध्यापुत्रस्य लोकेऽस्मिन्न जातु स्वप्नदर्शनम् ॥४६७॥**

कुमार्याः–कुमारीरूपायाः स्त्रियाः भाव एव–सत्तायामेव इह–जगति यद्यस्मात् एतत्प्रकृतं–स्वप्नदर्शनं, उपपद्यते । अत्रैव व्यतिरेकेण प्रतिवस्तूपमामाह वन्ध्यापुत्रस्य–प्रतीतरूपस्य लोकेऽस्मिन् न–नैव, जातु–कदाचित्, स्वप्नदर्शनम्, तथा कुमारीसमः कश्चिदवस्थित एवात्माभ्युपगन्तव्यः यस्येमे तत्त्वचिन्तादयो विशेषाः [1]सुतजन्मादिस्वप्नबुद्धिसमा भवद्भिः कल्प्यन्त इति ॥४६७॥ अथ द्वितीयपक्षमधिकृत्याह–

**क्षणिकत्वं तु नैवास्य, क्षणादूर्ध्वं विनाशतः ।**
**अन्यस्याभावतोऽसिद्धेरन्यथाऽन्वयभावतः ॥४६८॥**

क्षणिकत्वं तु एकक्षणस्थायित्वं पुनः नैवास्यात्मनो युज्यते । कुत इत्याह क्षणात्–स्वरूपलाभसमयलक्षणात् ऊर्ध्वं–उपरि विनाशतः–सर्वथोपरमात् अन्यस्य–अनन्तरलक्षणस्य अभावतः–अभावाद्वन्ध्यासुतादिप्रख्यात् असिद्धेः अनुत्पत्तेः, अन्यथा यदि भावादेव भावसिद्धिरभ्युपगम्यते तदा अन्वयभावतः अन्वयसम्भवा–त्पूर्वक्षणस्यैव कथञ्चिदभावीभूतस्यान्वयानुवृत्तिः कार्यतया [2]भवनादित्यर्थः तस्य

---

१. पुनर्जन्मादि–A; २ भावनादि–A; भावनमि– BC

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भावतः-सम्भवात् इदमुक्तं भवति-यदि सर्वथा क्षणिक एवायमात्मा, तदा तस्य द्वितीयक्षणे सर्वथोच्छेदेन हेतोरभावान्नोत्तरक्षणप्रसूतिः प्रसज्यते । अथोत्तरक्षणप्रसूतिरभ्युपगम्यते, तदा पूर्वक्षणस्यैव कथञ्चिदभावीभूतस्योत्तर-कार्यतया भवनेनान्वयः समाढौकत इति ॥४६८॥ एतदेव भावयति-

**भावाऽविच्छेद एवायमन्वयो गीयते यतः ।**
**स चानन्तरभावित्वे, हेतोरस्याऽनिवारितः ॥४६९॥**

भावाऽविच्छेद एव-सद्रूपताऽवित्रुटनमेव अयमत्व( ?मन्वय)सम्भवः प्राक्प्रतिपादितः अन्वयोऽनुवृत्तिः गीयते यतो यस्मात्सकाशात्, स च-स पुनरन्वयः अनन्तरभावित्वे-ऽव्यवहितोत्पादे, कुत इत्याह हेतोः-प्राच्यक्षणा-त्सकाशात् अस्य-कार्यस्य अनिवारितः-अप्रतिस्खलितः, हेतुस्वरूपानुकारिण एव कार्यस्योपलम्भात् । अपि च स क्षणिकोऽर्थः १ स्वनिवृत्तिस्वभावो २ अन्यजननस्वभावो ३ उभयस्वभावो वा स्यादिति तिस्रः कल्पनाः ॥४६९॥

ततः किमित्याह-

**स्वनिवृत्तिस्वभावत्वे क्षणस्य नापरोदयः ।**
**अन्यजन्मस्वभावत्वे स्वनिवृत्तिरसङ्गता ॥४७०॥**

स्वनिवृत्तिस्वभावत्वे क्षणस्य न-नैव अपरोदयः-उत्तरक्षणप्रसूतिरूपः स्यात्, तज्जनकस्य कस्यचिदभावात् । द्वितीयविकल्पमधिकृत्याह अन्यजन्मस्व-भावत्वे प्राच्यक्षणस्योत्तरक्षणजननैकस्वभावत्वे स्वनिवृत्तिरात्मोपरमलक्षणा असङ्गता अघटमाना, तस्यान्यजननैकस्वभावादिति ॥४७०॥

अथ तृतीयविकल्पस्याश्रयेण स्वमतमेव स्थापयन्नाह-

**इत्थं द्वयैकभावत्वे, न विरुद्धोऽन्वयोऽपि हि ।**
**व्यावृत्त्याद्येकभावत्वयोगतो भाव्यतामिदम् ॥४७१॥**

इत्थमुक्तप्रकारं द्वयं-स्वनिवृत्त्यपरजननलक्षणं तस्यैकभावत्वे-विवक्षि-तैकवस्तुरूपतायां सत्यां न विरुद्धो-अयुक्तः, 'अन्वयोऽपि हि' किं पुनः प्रकृतमेव द्वयमित्यपिशब्दार्थः । कुत इत्याह 'व्यावृत्तिः' स्वगता आदिशब्दाद-परजननं, तयोः 'एकभावत्वं' कथञ्चिदेकरूपत्वात् तद्योगतः भाव्यतां-मीमांस्य-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तामिति । उभयस्वभावत्वे हि यदेव [1]किञ्चिन्न प्रवर्तते तदेवापरजन्मस्वभावम-[2]परात्मभावस्वभावरूपं वर्तत इति बलाच्छब्दार्थान्यथानुपपत्त्याऽन्वयः सिद्ध इति ॥४७१॥ अथ प्रकृतयोजनामाह-

**अन्वयार्थश्च न आत्मा, चित्रभावो यतो मतः ।**
**न पुनर्नित्य एवेति, ततो दोषो न कश्चन ॥४७२॥**

अन्वयार्थस्योत्पादव्ययध्रौव्यलक्षणस्य वस्तुनो योऽन्वयरूपोंऽशः पुनः-ध्रौव्यनामा, नोऽस्माकं, आत्मा 'चित्रभावो'-नानाविधपरिणामो यतो 'मतो'ऽभिप्रेतः । व्यवच्छेद्यमाह 'न पुनर्नित्य एव' अप्रच्युता[3]नुत्पत्तिस्थिरैकरूपः पराभ्युपगतः । इतिः पादपरिसमाप्तौ । ततो नित्यत्वप्रतिषेधाद् दोषो बन्धमोक्षाद्यनुपपत्तिरूपो न कश्चनेति ॥४७२॥ परप्रयुक्तदूषणोत्तरायाऽऽह-

**न चात्मदर्शनादेव, स्नेहो यत्कर्महेतुकः ।**
**नैरात्म्येऽप्यन्यथाऽयं स्याज्ज्ञानस्यापि स्वदर्शनात् ॥४७३॥**

न चात्मदर्शनादेवाऽऽत्माऽवलोकनमात्रात् 'स्नेह' आत्मविषय एव । कुतः ? यत्-यस्मात्, कर्महेतुकः-चारित्रमोहनीयकर्मनिमित्तः स्नेहः । अत्रैव विपक्षे बाधामाह 'नैरात्म्येऽपि' पराभ्युपगते सति अन्यथा-कर्महेतुत्वानभ्युपगमे सति अयं-स्नेहः 'स्यात्'-भवेत् कुत इत्याह 'ज्ञानस्यापि'-क्षणमात्रस्थायिनः 'स्वदर्शनात्'-स्वसंवेदनप्रत्यक्षेण समवलोकनात् ॥४७३॥

**अध्रुवेक्षणतो नो चेत्, कोऽपराधो ध्रुवेक्षणे ।**
**तद्गता कालचिन्ता चेन्नासौ कर्मनिवृत्तितः ॥४७४॥**

अध्रुवेक्षणतो-ऽध्रुवस्यास्थिरस्यात्मन एवावलोकनात् नो चेद्यदि स्नेहः । आचार्यः पृच्छति-'कोऽपराधो ध्रुवेक्षणे' ध्रुवस्य-नियतस्यात्मनोऽवलोकने ? अथ परः, तद्गता-अनि( ?नि)त्यात्मविषया कालचिन्ता-'आगामिनि काले सुखप्राप्तिदुःखपरिहारौ कथं मे स्याताम्' एवंरूपा चेत्-यदि । आचार्यः-न-नैव असौ-चिन्ता, कुत इत्याह कर्मनिवृत्तितः सिद्धयोगानां योगिनामुप-प्लवहेतुकर्मह्रासात् ॥४७४॥ एतदेव भावयति-

---

१. किञ्चिन्निव प्रवर्तते-A.B.C.; २. परात्मलाभरूपं-A; २. नुत्पन्नस्थि-A.B.C.;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**उपप्लववशात्प्रेम, सर्वत्रैवोपजायते ।**
**निवृत्ते तु न तत्तस्मिन्, ज्ञाने ग्राह्यादिरूपवत् ॥४७५॥**

उपप्लववशात्-संक्लेशायत्ततया प्रेम-प्रतिबन्धः सर्वत्रैव-बाह्याभ्यन्तररूपे वस्तुनि उपजायते । निवृत्ते तु-निवृत्तिभाजि पुनः न तत्प्रेम तस्मिन्नुपप्लवे जायते । दृष्टान्तमाह 'ज्ञाने' तथागतसम्बन्धिन्युपप्लवव्यावृत्तौ भवन्मतेन 'ग्राह्यादिरूपवत्'[१] । तथा [२]च तव सिद्धान्तः *"ग्राह्यं न तस्य ग्रहणं न तेन, ज्ञानान्तरग्राह्यतयापि शून्यम् ॥ तथापि च [३]ज्ञानमप्य(य)प्रकाशः, प्रत्यक्षतस्तस्य तथाधि(वि)[४]रासीत् ॥१॥"* ॥४७५॥ एवं सति यत्सिद्धं तद्दर्शयति-

**स्थिरत्वमित्थं न प्रेम्णो, यतो मुख्यस्य युज्यते ।**
**ततो वैराग्यसंसिद्धेर्मुक्तिरस्य नियोगतः ॥४७६॥**

स्थिरत्वं-स्थिरभावलक्षणमात्मदर्शनद्वारेण परैरुद्भावितं इत्थमुपप्लवह्रासात् न 'प्रेम्ण' आत्मस्नेहलक्षणस्य यतो-यस्मात् मुख्यस्य-प्रधानस्य पुत्रकलत्रादिबाह्यार्थगोचर[५]स्नेहहेतुतया संसारकारणस्येत्यर्थः युज्यते-घटते, ततः प्रेम्णोऽस्थैर्यात् वैराग्यसंसिद्धेर्मुक्तिरस्याऽऽत्मनो नियोगतः-कथञ्चित्स्थिररूपस्यापि ॥४७६॥ अत्रैव युक्त्यन्तरमाह—

**बोधमात्रेऽद्वये तत्त्वे, कल्पिते सति कर्मणि ।**
**कथं सदास्या भावादि, नेति सम्यग्विचिन्त्यताम् ॥४७७॥**

बोधमात्रेऽत एव अद्वये-स्वव्यतिरिक्तकर्मादिविकले तत्त्वे-परमार्थे तदा कल्पिते-कल्पनामात्रविषये, सति कर्मणि शुभाशुभे । तथा च भवत्सिद्धान्तः- *"चित्तमेव हि संसारो, रागादिक्लेशवासितम् । तदेव तैर्विनिर्मुक्तं, भवान्त इति कथ्यते" ॥१॥* कथं सदा-सर्वकालं अस्या मुक्तेः भावादि भावोऽभावो वा न-नैव स्यात् ? इत्येतत्, सम्यग्विचिन्त्यतामिति । तथा च पठन्ति - *"नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् । अपेक्षातो हि भावानां, कादाचित्कत्वसम्भवः ॥१॥"* ॥४७७॥ अथ नित्यमतनिराकरणार्थमाह-

१. ग्राह्यरूपत्वात्-A; २. च भवत्सिद्धान्तः-A; ३. ज्ञानमया प्रकाशः-B.C.; ४. तथाविरासीत्-C.; ५. स्नेहैकहेतुतया-B.C

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**एवमेकान्तनित्योऽपि, हन्तात्मा नोपपद्यते ।**
**स्थिरस्वभाव एकान्ताद्, यतो नित्योऽभिधीयते ॥४७८॥**

एवं यथैकान्ततोऽनित्यः तथैकान्तनित्योऽपि हन्तात्मा नोपपद्यते । कुत इत्याह 'स्थिरस्वभावः-एकस्वरूपः, एकान्तात्-सर्वथा यतो नित्योऽभिधीयते भावः ॥४७८॥ यदि नामैवं, ततः किमित्याह-

**तदयं कर्तृभावः स्याद्, भोक्तृभावोऽथवा भवेत् ।**
**उभयानुभयभावो वा, सर्वथापि न युज्यते ॥४७९॥**

तत् तस्माद् अयं-नित्य आत्मा, कर्तृभावः [1]शुभकर्मकारकस्वभावः स्याद् भोक्तृभावः-प्राक्कृतकर्मवेदकस्वभावः अथवा भवेत् । तथोभयं कर्तृभोक्तृलक्षणममुभयं च तत्प्रतिषेधरूपं भावो यस्य स तथा 'वा' इति तृतीयचतुर्थविकल्पसूचकः । [2]ततः किमित्याह सर्वथापि-सर्वैरपि-विकल्पैः न युज्यते इति ॥४७९॥

इदमेव भावयति-

**एकान्तकर्तृभावत्वे, कथं भोक्तृत्वसम्भवः ।**
**भोक्तृभावनियोगेऽपि, कर्तृत्वं ननु दुःस्थितम् ॥४८०॥**

एकान्तकर्तृभावत्वे-कर्मकारकस्वभावत्वे, कथं भोक्तृत्वसम्भवो-भोक्तृभावः ? कर्तृत्वभोक्तृत्वयोर्विरोधसम्भवात् । भोक्तृभावनियोगेऽपि-भोक्तृत्वनियमलक्षणे किं पुनः कर्तृत्वैकरूपत्वे भोक्तृत्वाभाव इत्यपिशब्दार्थः, कर्तृत्वं ननु-निश्चितं दुःस्थितं-दुष्प्रतिष्ठितमिति ॥४८०॥

तर्हि भोक्तृत्वैकस्वभावः कर्तृत्वैकरूपो वा स्यादित्याशंक्याऽऽह-

**न चाकृतस्य भोगोऽस्ति, कृतं चाऽभोगमित्यपि ।**
**उभयानुभयभावत्वे, विरोधासम्भवौ ध्रुवौ ॥४८१॥**

न च-न पुनः अकृतस्य-कर्मणो भोगोऽस्ति । तथा कृतं च कर्म अभोगं भोगविकलमित्यपि नास्ति । अथ तृतीयचतुर्थौ विकल्पावाश्रित्याह-'उभयानुभयभावत्वे विरोधासम्भवौ ध्रुवौ'-उभयस्वभावत्वे ध्रुवो विरोधो

---

१. शुभाशुभकर्म-A; २. ततोऽपि किमि-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भवति परमताङ्गीकाररूपः, अनुभयस्वभावत्वे सम्भवो ध्रुवः, तादृशस्य वस्तुनो वन्ध्यासुतस्येवाभावात् ॥४८१॥ पुनस्तृतीयविकल्पमेवाधिकृत्याह-

**यत्तथोभयभावत्वेऽप्यभ्युपेतं विरुध्यते ।**
**परिणामित्वसङ्गत्या, न त्वागोऽत्रापरोऽपि वः ॥४८२॥**

यद्-यस्मात् तथोभयभावत्वेऽपि [1]सति, किं पुनः केवले कर्तृत्वे भोक्तृत्वे वाऽभ्युपगत इत्यपिशब्दार्थः, अभ्युपेतमैकान्तिकरूपत्वं 'विरुध्यते' कथमित्याह परिणामित्वसङ्गत्या-परिणामोऽवस्थितस्यैवावस्थान्तरप्राप्तिस्तद्वत्त्व-प्राप्त्या, न तु न पुनः आगः-अपराधः अत्र-अभ्युपगमे, अपरोऽपि कश्चित् वः-युष्माकम्, तस्मादुभयरूप एवात्माऽभ्युपगन्तुमुचित इति ॥४८२॥ अपि च-

**एकान्तनित्यतायां तु, तत्तथैकत्वभावतः ।**
**भवापवर्गभेदोऽपि, न मुख्य उपपद्यते ॥४८३॥**

एकान्तनित्यतायां तु-परेणाभ्युपगतायां पुनः, किमित्याह 'तत्तथैकत्वभावतः' तस्यात्मनस्तथैकान्तेनैकत्वभावतः कारणात् 'भवापवर्गभेदोऽपि' न केवलं कर्तृत्वभोक्तृत्वादीत्यपिशब्दार्थः न मुख्यः-अनुपचरितः उपपद्यते-घटते ॥४८३॥

कुत इत्याह-

**स्वभावापगमे यस्माद्व्यक्तैव परिणामिता ।**
**तयाऽनुपगमे त्वस्य, रूपमेकं सदैव हि ॥४८४॥**

स्वभावस्य-भवभाविनो मुक्तावपगमे यस्मात्कारणात् व्यक्तैव-स्फुटमेव परिणामिता प्राप्नोति । तया परिणामितया, अनुपगमे त्वस्य भवस्वभावस्य, किमित्याह 'रूपं' स्वलक्षणम् 'एकं सदैव हि' भवेऽपवर्गे च ॥४८४॥

**तत्पुनर्भाविकं वा स्यादापवर्गिकमेव वा ।**
**आकालमेकमेतद्धि, भवमुक्ती न सङ्गते ॥४८५॥**

तत्पुना रूपं 'भाविकं'-संसारभवं वा स्यादापवर्गिकमेव वा मोक्षानुगतं वा नित्यात्मनः । ततः किमित्याह आकालं-सर्वकालमपि एकं अनानारूपं एतत् रूपं हिर्यस्मात् । ततो भवमुक्ती-संसारमोक्षरूपे 'न सङ्गते', स्वभाव-

१. तत्प्रकारोभयस्वभावत्वे सति-A.B;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भेदाक्षेपकत्वात्तयोः ॥४८५॥ अत्रैवाभ्युच्चयमाह-

**बन्धाच्च भवसंसिद्धिः, सम्बन्धश्चित्रकार्यतः ।**
**तस्यैकान्तस्वभावत्वे, न त्वेषोप्यनिबन्धनः ॥४८६॥**

बन्धात्-कर्मसंचयरूपात् चः समुच्चये 'भवसंसिद्धिः'-संसारोपपत्तिः सम्बन्धश्चित्रो नानारूपः, चित्रकार्यतः-कार्यवैचित्र्यात्, न ह्यचित्रात्कारणाच्चित्र-कार्यप्रसूतिरिति । यदि नामैवं ततः किमित्याह तस्य आत्मनः, 'एकान्तैकभावत्वे'-सर्वथैकस्वभावतायां सत्यां, न त्वेषोऽपि चित्ररूपो बन्धः किं पुनर्भवमुक्ती इत्यपिशब्दार्थः अनिबन्धनः-निर्निमित्तश्चित्रपरिणामनिमित्तत्वात्तस्य ॥४८६॥ एवं च सति यत्सिद्धं तदाह-

**नृपस्येवाभिधानाद्यः, सातबन्धः प्रकीर्त्यते ।**
**अहिशङ्काविषज्ञाताच्चेतरोऽसौ निरर्थकः ॥४८७॥**

परे हि नित्येप्यात्मनि सङ्कल्पमात्रभेदादेव सातासातयोः सम्बन्धमभिमन्यते, तन्निराकरणार्थमुच्यते 'नृपस्येव' तथाविधनरपतेरिव अभिधानात् राजाऽयमिति भणनरूपात्, यः सातबन्धः-सुखसम्बन्धरूपः प्रकीर्त्यते-नित्यस्याप्यात्मनः परैः, अहिशङ्काविषज्ञातात्-अहिनाऽदष्टस्यापि तथाविधप्रघट्टकवशादहि-शङ्काविषमना अहमनेनाहिना दष्ट इत्येवंरूपं तदेव ज्ञातं दृष्टान्तस्तस्मात्, चः समुच्चये इतरो-ऽसातबन्धो यः प्रकीर्त्यते शुद्धसङ्कल्पवशादसौ 'निरर्थकः' एकान्तनित्यसङ्कल्पमात्रभेदस्याप्यसम्भवात् ॥४८७॥

**एवं च योगमार्गोऽपि मुक्तये यः प्रकल्प्यते ।**
**सोऽपि निर्विषयत्वेन, कल्पनामात्रभद्रकः ॥४८८॥**

एवं चास्मिंश्चार्थे सिद्धे सति 'योगमार्गोऽपि' किं पुनर्भवमुक्ती इत्यपिशब्दार्थः मुक्तये-मोक्षाय यः-परैः प्रकल्प्यते सोऽपि निर्विषयत्वेनैका-न्तनित्यत्वाभ्युपगमान्निर्गोचरत्वेन 'कल्पनामात्रभद्रकः'-न पुनः परमार्थस्वरूपः कश्चित् ॥४८८॥

**दिदृक्षादिनिवृत्त्यादि, पूर्वसूर्युदितं तथा ।**
**आत्मनोऽपरिणामित्वे, सर्वमेतदपार्थकम् ॥४८९॥**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दिदृक्षोक्तरूपा आदिशब्दाद्भवबीजं वासनाऽविद्या च तत्तद्वाद्यभिप्रेता गृह्यते तस्य-दिदृक्षादेरर्थस्य [1]निवृत्तिः, निवृत्तिः-उपरमः, आदिशब्दादवस्थान्तरे प्रवृत्तिश्च पूर्वसूरिभिः-पतञ्जलिप्रभृतिभिरुदितं 'तथा' इति समुच्चये आत्मनोऽ-परिणामित्वे-एकान्तेन नित्यत्वे सर्वमेतदुक्तरूपं अपार्थकं निष्फलमिति ॥४८९॥ यथा च योगमार्गादि घटते तथाह-

**परिणामिन्यतो नीत्या, चित्रभावे तथाऽऽत्मनि ।**
**अवस्थाभेदसंगत्या योगमार्गस्य सम्भवः ॥४९०॥**

परिणामिन्यतोऽस्मादपरिणामिन्यात्मनि [2]योगसम्भवाद्धेतोः नीत्याऽ-न्यथानुपपत्तिलक्षणया चित्रभावे-नानारूपपर्याये तथा इति प्राग्वत् आत्मनि किमित्याह अवस्थाभेदसङ्गत्या अपरापरावस्थाविशेषलाभेन योगमार्गस्य-अध्यात्मादिभेदस्य सम्भवः ॥४९०॥ कुत इत्याह-

**तत्स्वभावत्वतो यस्मादस्य तात्त्विक एव हि ।**
**क्लिष्टस्तदन्यसंयोगात्, परिणामो भवावहः ॥४९१॥**

तत्स्वभावत्वतस्तत्स्वाभाव्यनियमात् यस्मादस्य-परिणामिन आत्मनः 'तात्त्विक एव हि' निरुपचरित एव क्लिष्टो-ऽशुभः तदन्यसंयोगात स्वव्यति-रिक्तकर्मसंयोगात् परिणामो-ऽवस्थान्तररूपः भवावहः संसारहेतुः स्यात् ॥४९१॥

**स योगाभ्यासजेयो यत्, तत्क्षयोपशमादितः ।**
**योगोऽपि मुख्य एवेह, शुद्ध्यवस्थास्वलक्षणः ॥४९२॥**

स-भवावहः परिणामः योगाभ्यासजेयो यद्-यस्मात्, तत्क्षयोप-शमादितस्तस्य क्लिष्टपरिणामस्य ये क्षयोपशमोपशमक्षयास्तेभ्यः, योगोऽपि मुख्य एव इह-योगविचारे कीदृश इत्याह 'शुद्ध्यवस्थास्वलक्षणः' शुद्धिरूपावस्था स्वलक्षणं यस्येति विग्रहः ॥४९२॥

**ततस्तथा तु साध्वेव, तदवस्थान्तरं परम् ।**
**तदेव तात्त्विकी मुक्तिः, स्यात्तदन्यवियोगतः ॥४९३॥**

ततो योगात्, तथा त्वविरतसम्यग्दृष्ट्यादिगुणस्थानक्रमेण पुनः, साध्वेव

---

१. निवृत्यादिः, निवृत्तिः-A.B.C.; २. योगासम्भ-A.B.C.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सुन्दरमेव, तदवस्थान्तरं परं तस्यात्मनोऽवस्थान्तरं प्रकृष्टं यद्वर्तते तदेव तात्त्विकी निरुप[१]चरितत्वान्मुक्तिः स्यात् । तदन्यवियोगत आत्म[२]वि-च्छिन्नकर्मवियोगात् । न तु सांख्य[३]भवानामिव [४]तत्तदवस्थ एवात्मा, नापि सौगतानामिवैकेषां सर्वथा सन्तानोच्छेदोऽपरेषां पुनः शुद्धलक्षणोत्पाद इति ॥४९३॥

**अत एव च निर्दिष्टं, नामास्यास्तत्त्ववेदिभिः ।**
**वियोगोऽविद्यया बुद्धिः, कृत्स्नकर्मक्षयस्तथा ॥४९४॥**

अत एव चान्य[५]वियोगतो मुक्तेरात्मावस्थान्तरत्वाद्धेतोः निर्दिष्टं नामाभिधानम्, अस्या मुक्तेः तत्त्ववेदिभिः-शास्त्रकारैः। कथमित्याह वियोगः-विघटनम् अविद्यया वेदान्तिकानां, बुद्धिः सौगतानां, कृत्स्नकर्मक्षयः जैनानाम् । तथा इति प्राग्वत् ॥४९४॥ अथ यः कर्मक्षयतः समाधिरुत्पद्यते तं दर्शयति-

**शैलेशीसंज्ञिताच्चेह, समाधिरुपजायते ।**
**कृत्स्नकर्मक्षयः सोऽयं, गीयते वृत्तिसंक्षयः ॥४९५॥**

शैलेशीसंज्ञिताच्चोक्तरूपात्पुनः इह-जैनमते [६]समाधिः सकाशादुपजायते-प्रादुर्भवति । कृत्स्नकर्मक्षयः सोऽयं शैलेशीसंज्ञितः समाधिः, गीयते वृत्तिसंक्षयो योगविशेषराज(संज्ञ)इति ॥४९५॥

अथ योगावस्थान्तरत्वमेव मुक्तेर्भावयति-

**तथा तथा क्रियाविष्टः, समाधिरभिधीयते ।**
**निष्ठाप्राप्तस्तु योगज्ञैर्मुक्तिरेष उदाहृतः ॥४९६॥**

तथा तथा-तेन तेन प्रकारेण क्रियाविष्टस्तत्तत्कर्मक्षपणाय प्रवृत्तो योगः समाधिरभिधीयते । निष्ठाप्राप्तस्तु कर्मक्षपणापर्यन्तप्राप्तः पुनः योगज्ञैर-ध्यात्मादियोगविशारदैः मुक्तिरेष योगः उदाहृतो निरूपितः ॥४९६॥ अत्र हेतुः-

---

१. चरिता मुक्तिः-A.B.C; २. विभिन्नकर्म-B.C; ३. शैवानामिव-A.B.C; ४. 'तत्तदवस्थ एवात्मा, नापि' इत्यस्य स्थाने तदवस्था वात्मनोऽपि-B.C; ५. वियोगे-B.C; ६. समाधिः सकाशादुपजायते इत्यस्य स्थाने समाधिरुपजायते-इति C प्रतौ

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**संयोगयोग्यताऽभावो, यदिहात्मतदन्ययोः ।**
**कृतो न जातु संयोगो, भूयो नैवं भवस्ततः ॥४९७॥**

संयोगयोग्यताया अभावो, यद्-यस्माद् इह-निष्ठाप्राप्ते समाधौ, आत्मतदन्ययोर्जीवकर्मणोः, कृतो [1]निर्वर्तितः समाधिनैव, ततः किमित्याह न-नैव जातु-कदाचिदपि संयोगः जीवकर्मणोः भूयः- पुनरपि । ततोऽपि किमित्याह नैवं संयोगयोग्यताभावे सति भवः-संसारः 'ततः' तस्माद्धेतोरिति ॥४९७॥ अथ परमतमाशंक्य परिहरन्नाह-

**योग्यतात्मस्वभावस्तत्, कथमस्या निवर्तनम् ।**
**तत्तत्स्वभावतायोगादेतल्लेशेन दर्शितम् ॥४९८॥**

योग्यता[2]प्रस्तावात्प्रभवो जीवतदन्यसंयोगहेतुरात्मस्वभावो वर्तते, तत्कथमस्या आत्मस्वभावभूताया योग्यतायाः निवर्तनमुपरतिरिति परः, आचार्यः-तत् तस्या योग्यतायाः तत्स्वभावतायोगात्-निवर्तनस्वाभाव्यसम्बन्धात् युज्यत एव निवर्तनं सर्वसंवरलाभे। 'एतत्' स्वाभाव्यनिवर्तनं, 'लेशेन दर्शितं' अनन्तरमेव परिणामवादप्रतिष्ठायामिति ॥४९८॥ परः-

**स्वनिवृत्तिः स्वभावश्चेदेवमस्य प्रसज्यते ।**
**अस्त्वेवमपि नो दोषः, कश्चिदत्र विभाव्यते ॥४९९॥**

स्वनिवृत्तिरात्मनो निवर्तनं, चेद्यदिब्रूषे, एवमस्मिन्नभ्युपगमे अस्यात्मनः प्रसज्यते । आचार्यः-अस्तु-भवतु, 'एवमपि' स्वनिवृत्तिरपि नो-नैव दोषः-अपराधः कश्चिदत्र-स्वनिवृत्तौ विभाव्यते ॥४९९॥ एतदेव भावयति-

**परिणामित्व एवैतत्, सम्यगस्योपपद्यते ।**
**आत्माभावेऽन्यथा तु स्यादात्मसत्तेत्यदश्च न ॥ ५००॥**

परिणामित्व एवोक्तलक्षण एव एतत्स्वभावनिवर्तनं सम्यग्यथावत् अस्यात्मनः उपपद्यते । विपक्षे बाधामाह-आत्माभावेऽन्यथा तु-परिणामित्वाभावे पुनः स्यात् स्वभावनिवृत्तौ सत्यां कासावित्याह आत्मसत्ता-आत्मनो रूपमात्मभाव एतत्स्यादित्यर्थः इतिः [3]प्राग्वत् । एतदपि भविष्यतीत्याह-अदश्च न-एतच्च

---

१. निवर्तितः-A; २. 'योग्यताप्रस्तावात्प्रभवो' इत्यस्य स्थाने 'योग्यताप्रभावात्' इति-A प्रतौ, 'योग्यताप्रस्तावात्' इति-B.C प्रत्योः। ३. पूर्ववत्-B.C;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न युक्तं, भावाभावरूपत्वादात्मन इति ॥५००॥

परिणामित्व एव स्वभावनिवृत्तिरिति दृढयन्नाह-

**स्वभावविनिवृत्तिश्च, स्थितस्यापीह दृश्यते ।**
**घटादेर्नवतात्यागे, तथा तद्भावसिद्धितः ॥ ५०१॥**

स्वभावविनिवृत्तिश्च प्रस्तुता स्थितस्य-व्यवस्थितस्यापि इह-लोके दृश्यते घटादेरर्थस्य । अत्र हेतुः नवतात्यागे-नवत्वनिवृत्तिरूपे, 'तथा' निवृत्तनवतापर्यायत्वेन, तद्भावसिद्धितो-घटत्वोपलम्भाद् बालाबलादिभिरिति ॥५०१॥

**नवताया न चाऽत्यागस्तथा नातत्स्वभावता ।**
**घटादेर्न न तद्भाव, इत्यत्रानुभवः प्रमा ॥ ५०२॥**

तथा-नवताया न च-नैव अत्यागोऽहानिः, किन्तु त्याग एव, तथा न-नैव, अतत्स्वभावता-पुराणस्वभावता, न च इत्यनुवर्तते । ततो "द्वौ नञौ प्रकृतमर्थं गमयत" इति कृत्वा कथञ्चिदतत्स्वभावतैव, घटादेरर्थस्य तथा न तद्भावो-घटभावः प्राग्रूपपरित्यागोत्तररूपोत्पादयोः सतोरपि कथञ्चिद्घटभाव एव इत्यर्थः, इत्यत्रार्थे अनुभवो-लोकप्रतीतिरूपः प्रमा-प्रमाणम् ॥५०२॥

अथ प्रस्तुते योजयति—

**योग्यतापगमेऽप्येवमस्य भावो व्यवस्थितः ।**
**सर्वौत्सुक्यविनिर्मुक्तः, स्तिमितोदधिसन्निभः ॥५०३॥**

[1]योग्यतापगमेऽप्यन्यसंयोगयोग्यताया अपगमेऽपि अस्यात्मनो भावः-स्वसत्तालक्षणो व्यवस्थितोऽनुपरतः सर्वौत्सुक्यविनिर्मुक्तो निःशेषत्वराविरहितः । तथा स्तिमितोदधिसन्निभो-व्यावृत्तक्षोभसलिलनिधिनिभः ॥५०३॥

**एकान्तक्षीणसंक्लेशो, निष्ठितार्थस्ततश्च सः ।**
**निराबाधः सदानन्दो, मुक्तावात्माऽवतिष्ठते ॥५०४॥**

[2]तथा-एकान्तक्षीणसंक्लेशः-सर्वथोपरताविशुद्धिः निष्ठितार्थः-कृतकृत्यभूतः ततश्च तदनन्तरं पुनः, स सम्पन्नयोग्यतापगमः निराबाधः-सर्वव्यसन-

१. योग्यतेत्यादि - योग्यतापगमेऽ -A; २. एकान्तेत्यादि तथा-A;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विरहितः 'सदानन्दः' सर्वकालं सदाऽऽनन्दो यस्येति विग्रहः, मुक्तौ-निवृत्तौ, आत्माऽवतिष्ठते-आस्ते ॥५०४॥

**अस्यावाच्योऽयमानन्दः, कुमारीस्त्रीसुखं यथा ।**
**अयोगी न विजानाति, सम्यग्जात्यन्धवद् घटम् ॥५०५॥**

अस्य-मुक्तस्य अवाच्यो-वक्तुमशक्यः अयं-मुक्तिभाव्यानन्दः कुमारी-स्त्रीसुखं यथा-यथा कुमार्या अद्याप्यप्राप्तपुरुषसम्भोगायाः स्त्रियाः सुखं पुरुष-सम्भोगजन्यमन्ययाऽनुभूतरतसुखयाऽप्यप्रत्याय्यं [३]प्रत्याययितुमशक्यमित्यर्थः। अत एवाह अयोगी-अकेवली न विजानाति सम्यग् जात्यन्धवद्घटम् ॥ ५०५॥

**योगस्यैतत्फलं मुख्यमैकान्तिकमनुत्तरम् ।**
**आत्यन्तिकं परं ब्रह्म, योगविद्भिरुदाहृतम् ॥५०६॥**

योगस्य-प्रपञ्चितरूपस्य एतत्फलं-कार्यं मुख्यमनुपचरितं, ऐकान्तिकं-एकान्तेनैव भवनस्वभावं, अनुत्तरं-सर्वफलातिशायि आत्यन्तिकमत्यन्तभवं किमित्याह परं ब्रह्म-सिद्धत्वलक्षणं, योगविद्भिः शास्त्रकारैः उदाहृतम् ॥ ५०६॥ अथोपसंहरन्नाह-

**सद्गोचरादिसंशुद्धिरेषाऽऽलोच्येह धीधनैः ।**
**साध्वी चेत्प्रतिपत्तव्या, विद्वत्ताफलकाङ्क्षिभिः ॥५०७॥**

सद्गोचरादिसंशुद्धिरेषोक्तरूपा आलोच्या-विमृश्या इह-जने धीधनैः । साध्वी-सङ्गता चेद् यदि, प्रतिपत्तव्या-श्रद्धेया कीदृशैरित्याह विद्वत्ताफलका-ङ्क्षिभिः-पुम्भिः ॥ ५०७॥ यतः-

**विद्वत्तायाः फलं नान्यत्, सद्योगाभ्यासतः परम् ।**
**तथा च शास्त्रसंसार उक्तो विमलबुद्धिभिः ॥५०८॥**

विद्वत्तायाः फलं-पाण्डित्यस्य फलं नान्यत् कुतः सकाशादित्याह 'सद्योगाभ्यासतः'-गोचरादिशुद्धाद्योगाभ्यासात् परं-प्रकृष्टम् । एतत् समर्थनायैवाह तथा च शास्त्रसंसारः-शास्त्राण्येव संसारः, उक्तः निरूपितः, विमलबुद्धिभिः निर्मलप्रज्ञैः ॥ ५०८॥ एतदेव दर्शयति-

---

३. प्रत्यापयितु-A.B.C;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुत्रदारादिसंसारः, पुंसां सम्मूढचेतसाम् ।
विदुषां शास्त्रसंसारः, सद्योगरहितात्मनाम् ॥५०९॥[1]

पुत्रदारादिसंसारो भवभ्रमणहेतुत्वात् पुंसां-नृणां सम्मूढचेतसां-तत्त्वज्ञानरहितधियाम् । विदुषां-पण्डितानां शास्त्रसंसारः-शास्त्राण्येव संसारः, कीदृशानामित्याह सद्योगरहितात्मनां-शुद्धयोगाभ्यासवर्जितानाम् ॥ तस्मात्-

कृतमत्र प्रसङ्गेन, प्रायेणोक्तं तु वाञ्छितम् ।
अनेनैवानुसारेण, विज्ञेयं शेषमन्यतः ॥५१०॥

कृतमत्र-विचारे प्रसङ्गेन-विस्तरेण प्रायेण-बाहुल्येन, उक्तं तु वाञ्छितं वक्तुमिष्टं योगस्वरूपं पुनः । अनेनैवानुसारेण अनयैव नीत्या विज्ञेयं शेषं-यदिह नोक्तम्, अन्यतोऽन्यस्माद्योगशास्त्रात् ॥५१०॥

एवं तु मूलशुद्ध्येह, योगभेदोपवर्णनम् ।
चारुमात्रादिसत्पुत्रभेदव्यावर्णनोपमम् ॥५११॥

एवन्त्वस्मिंश्च परिणाम्यात्माभ्युपगमे सति मूलशुद्ध्या-गोचरादिशुद्धिरूपया इह-योगविचारे योगभेदोपवर्णनमध्यात्मादिभेदेन किमित्याह चारू जातिकुलशीलादिशुद्धौ यौ मात्रादि मातापितरौ ताभ्यां सकाशात्सन्तः सुन्दरा ये पुत्रस्य भेदा विशेषास्तेषां व्यावर्णनेनोपमा यस्य तत्तथा, सर्वत्र कारणशुद्धिपूर्वकत्वात्कार्यशुद्धेरिति ॥५११॥

अन्यद्वान्ध्येयभेदोपवर्णनाकल्पमित्यतः ।
न मूलशुद्ध्यभावेन, भेदसाम्येऽपि वाचिके ॥५१२॥

अन्यदुक्तरूपाद्विलक्षणं योगभेदोपवर्णनं वान्ध्येयभेदोपवर्णनाकल्पं निर्विषयमित्यर्थः इत्यतो यस्माद्धेतोः न नैव तत् वस्तु इति गम्यते, 'मूलशुद्ध्यभावेन'-गोचरादिशुद्धिविरहेण, भेदसाम्येऽप्यध्यात्मादिसंख्यारूपे वाचिके-वचनमात्रप्रतिबद्धे ॥ ५१२॥

यथेह पुरुषाद्वैते, बद्धमुक्ताऽविशेषतः ।
तदन्याऽभावनादेव, तदद्वैतेऽपि निरूप्यताम् ॥५१३॥

---

१. द्रष्टव्यं योगसारप्राभृते ७/४४

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यथेह–जगति पुरुषाद्वैते "पुरुष एवेदं ग्निं[1]सर्वं यद् भूतं यच्च भाव्यम्" इत्यादिवेदवचनाद्वेदान्तिकप्रतिपन्ने, बद्धमुक्तयोरविशेषादनानात्वात् वान्ध्येयभेदोपवर्णनकल्पं इत्यनुवर्तते । तथा तदन्यस्य [2]ज्ञात(न)रूपस्य पुरुषव्यतिरेकिणः कर्मणोऽभावादेव बौद्धमते, तद्द्वैतेऽपि–पुरुषार्थलक्षणे निरूप्यतामिति । अत्रापि बद्धमुक्ताऽविशेष इत्ययमेव हेतुः ॥५१३॥

अथैतदेव मतद्वयं क्रमेण विशेषतो दूषयन्नाह–

**अंशावतार एकस्य, कुत एकत्वहानितः ।**
**निरंश एक इत्युक्तः, स चाद्वैतनिबन्धनम् ॥५१४॥**

'अंशावतार' इहावयवानामवतरणरूपः एकस्य–परमब्रह्मणः सम्बन्धिनाम्, कुतः–[3]कस्मात् न कुतोऽपीत्यर्थः, एकत्वहानितः–एकरूपताविनाशाद् ब्रह्मणः । एतदपि कथमित्याह 'निरंशः'–निरवयवः एक इत्युक्तः स च–स [4]पुनरंशकः 'अद्वैतनिबन्धनम्', एकस्य निरंशस्याद्वैतत्वात् ॥ ५१४॥ तथा–

**मुक्तांशत्वे विकारित्वमंशानां नोपपद्यते ।**
**तेषां चेहाऽविकारित्वे, सन्नीत्या मुक्ततांशिनः ॥५१५॥**

मुक्तांशत्वे–मुक्तरूपपरमब्रह्मावयवत्वे विकारित्वं–कामक्रोधादिदोषत्वं अंशानामिहावतीर्णानां [5]नोपपद्यते, तदभिन्नत्वात् । तेषां च–तेषां पुनरंशानामिहावतीर्णानां सन्नीत्या मुक्ततांशिनः–परमब्रह्मणोऽभिन्नत्वादेव ॥५१५॥

अथ ननु तेंऽशास्ततोंऽशिनो भिन्ना अभिन्ना वा वर्तन्त इति पर्यनुयुक्तस्य यदुत्तरं ब्रह्मवादिनस्तन्निरस्यन्नाह–

**समुद्रोर्मिसमत्वं च, यदंशानां प्रकल्प्यते ।**
**न हि तद्भेदकाभावे, सम्यग्युक्त्योपपद्यते ॥५१६॥**

समुद्रोर्मिभिः समत्वं च, यथा हि समुद्रोर्मयो न समुद्रात्काश्चिद्भिन्नाःकिन्तु समुद्र एव ताः एवं परमब्रह्मणोऽप्यंशा इत्येवंरूपं पुनर्यदंशानां प्रकल्प्यते परैः न हि–नैव तत्समुद्रोर्मिसमत्वं भेदकाभावे सम्यग्युत्क्योपपद्यते । समुद्रोर्मयो

---

१. 'सर्वं' इति पदं–A.B.C प्रतिषु नास्ति; २. ज्ञानं रूपस्य–A.B.C; ३. कस्मात् स्यात्–A.B.C; ४. पुनरनंश एकोऽद्वैत–B.C; ५. विकारित्वेनोपपद्यते–A.B.C;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

हि भेदकस्य वायोर्भावे जायन्ते, न [1]चाद्वैतेनैतद् भेदकत्वमस्तीति ॥ ५१६ ॥ किञ्चाद्वैतवादिनाम्—

**सदाद्यमत्र हेतुः स्यात्, तात्त्विके भेद एव हि ।**
**प्रागभावादिसंसिद्धेर्न सर्वथाऽन्यथा त्रयम् ॥५१७॥**

सत्सत्त्वमाद्यं-शुद्धसङ्ग्रहाभिमतं सर्वं जगदशेषविशेषरहितं सत्त्वमात्रमेवेत्यर्थः अत्र हेतुः हेतुत्रयं नाम द्वे भिद्यमाने वस्तुनी तृतीयं च तद्भेदकमित्यस्य त्रयस्याभावे पुनः स्यात् । कुतः स्यादित्याह तात्त्विके-अनुपचरिते भेद एव हि सति, प्रागभावादिसंसिद्धेः-प्रागभावः प्रध्वंसाभाव इतरेतराभावोऽत्यन्ताभाव[2]श्चेत्यस्यैवा- भावचतुष्टयस्यासत्त्वरूपत्वेन सत्त्वप्रतिपन्थिनः संसिद्धेः । विपक्षे बाधामाह न-नैव सर्वथाऽन्यथा प्रागभावादिसंसिद्धिमन्तरेण त्रयं उक्तलक्षणम् ।

प्रागभावादिलक्षणं चेत्थमवसेयम् । *"क्षीरे दध्यादि यन्नास्ति, प्रागभावः स कथ्यते । नास्तिता पयसो दध्नि प्रध्वंसाभावलक्षणम् ॥१॥ गवि योऽश्वाद्यभावश्च, सोऽन्योन्याभाव उच्यते । शिरसोऽवयवा भिन्ना, वृद्धिकाठिन्यवर्जिताः ॥२॥ शशशृङ्गादिरूपेण, सोऽत्यन्ताभाव उच्यते ॥"* (*श्लो.* वा. अभावपरिच्छेदे) यदि हि प्रागभावाद्यपेक्षकमुक्तरूपं त्रयं नाभ्युपगम्यते, तदा सर्वं जगत्सत्त्वसामान्यमात्रमेव स्यात् । ततो यत्समुद्रोर्मिसमत्वमात्मांशानां परैः परिकल्प्यते तत्सर्वथा निरवकाशमेव स्यात् । तत्रापि तदभिप्रायेण समुद्रोर्मिवायुरूपस्य त्रितयस्याभावादिति ॥५१७॥ तथा-

**सत्त्वाद्यभेद एकान्ताद् यदि तद्भेददर्शनम् ।**
**भिन्नार्थमसदेवेति, तद्वदद्वैतदर्शनम् ॥५१८॥**

'सत्त्वाद्यभेदे' सत्त्वस्यादिशब्दात्सत्त्व[3]विशेषाणामभेदेऽनानात्वे [4]आद्ये सत्त्वमात्र एवेत्यर्थः एकान्ताद्यदि भवद्भिरभ्युपगम्यते, तद्भेददर्शनं-सत्त्वादिभेदप्रतीतिरूपं भिन्नार्थं-भिन्नालम्बनं, असदेवाऽविद्यमानं, द्विचन्द्रादिभ्रान्तितुल्यत्वात्, इत्येवम् । तद्वद्-भेददर्शनमिव 'अद्वैतदर्शनं' तत्प्रतिपन्नमसदेव

---

१. चाद्वैते तद्भेदक-A.B.C; २. चेत्यभावचतुष्टय-C; ३. विशेषाणां चाभेदे-A.B.C; ४. आद्यसत्त्व-A.B.C;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वप्नायमानावस्थायामपि तस्याप्रतिभासात्, सुतरामस्यासत्त्वमेवेत्यर्थः ॥५१८॥

**यदा नार्थान्तरं तत्त्वं, विद्यते किञ्चिदात्मनाम् ।**
**मालिन्यकारि तत्त्वेन, न तदा बन्धसम्भवः ॥५१९॥**

तथा-यदा नार्थान्तरं-भिन्नमित्यर्थः तत्त्वं-कर्मलक्षणं विद्यते किञ्चिदात्मनां-जीवानां मालिन्यकारि मलीमसभावविधायि तत्त्वेनाकल्पितेन रूपेण, न तदा बन्धसम्भवः बन्धहेतोः कस्यचिदभावाद् बौद्धानाम् ॥ ५१९ ॥ ततः-

**असत्यस्मिन् कुतो मुक्तिर्बन्धाभावनिबन्धना ।**
**मुक्तमुक्तिर्न यन्न्याय्या, भावेऽस्यातिप्रसङ्गिता ॥ ५२० ॥**

असत्यस्मिन् बन्धे, कुतो मुक्तिर्बन्धाभावनिबन्धना प्राक्संवृत्त-बन्धोपरमनिमित्ता । एतदपि कुत इत्याह 'मुक्तमुक्तिः' मुक्तस्य सतो मुक्तिः, न यत् यस्मात् न्याय्या, भावे मुक्तेः अस्य मुक्तस्य अतिप्रसङ्गिता-अतिव्याप्तिरूपेति ॥

**कल्पितादन्यतो बन्धो, न जातु स्यादकल्पितः ।**
**[1]कल्पितश्चेत्ततश्चिन्त्यो, ननु मुक्तिरकल्पिता ॥ ५२१ ॥**

तथा-कल्पितादुपचरितात् वासनादेः, बन्धो न जातु-कदाचित् स्याद-कल्पितः [2]कल्पितश्चेत्ततो बन्धः, [3]चिन्त्यो नास्त्येवेत्यर्थः, ननु इत्यक्षमायाम्, मुक्तिरकल्पिता मुख्यबन्धपूर्वकत्वात्तस्याः ॥ ५२१ ॥ तथा-

**नान्यतोऽपि तथाभावादृते तेषां भवादिकम् ।**
**ततः किं केवलानां तु, ननु हेतुसमत्वतः ॥ ५२२ ॥**

न नैव अन्यतोऽपि कर्मणोऽपि सकाशात् तथाभावात्स्वयमेव भवादिपरिणामात् ऋते-विना तेषामात्मनां नैयायिकादिमते 'भवादिकं' भवो भववतामपरपर्यायाश्च स्युरिति । एवं तथाभावाद्भवादिके प्रसाधिते परः प्राह-ततः तथाभावेन भवादिभावात् किं-कस्मात् केवलानां तु-एकाकिनामपि पुरुषाद्वैतवादिमते भवादिकं 'न स्यात्' इत्यनुवर्तते, ननु इत्यक्षमायाम् । कुत इत्याह हेतुसमत्वतः-हेतोस्तथाभावलक्षणस्य समत्वतः-तुल्यत्वात् । यथा हि

---

१. कल्पिता च ततश्चिन्त्या-A.B.C; २. कल्पिता च ततो-A.B.C; ३. चिन्त्या-A.B.C;

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सत्यप्यन्यस्मिन्नात्मनां तथाभावमन्तरेण न भवादिकमिति तथाभाव एव भवद्भिः प्रधानो हेतुः कल्प्यते, एवमन्य(न्या)भावेऽपि केवलानामप्यात्मनां पुरुषाद्वैतवादिमते सौगतमते वा तथाभावादेव भवादिकं भविष्यतीति ॥५२२॥

अत्र समाधिः-

**मुक्तस्येव तथाभावकल्पना यन्निरर्थका ।**
**स्यादस्यां प्रभवन्त्यां तु, बीजादेवाङ्कुरोदयः ॥५२३॥**

मुक्तस्येव-जन्तुविशेषस्यान्यसंयोगाभावे 'तथाभावकल्पना' भवादि[1]निबन्धना क्रियमाणापि यद्-यस्मात् निरर्थका-निष्फला भा(भ)वादिफलाभावात्, स्याद्-भवेत् । एतदेव प्रतिवस्तूपमया भावयति अस्यां-तथाभावकल्पनायां, प्रभवन्त्यां तु-प्रभवन्त्यामपि-समर्थायामपि 'बीजादेव' मुद्गादेर्न तु यतः कुतश्चिदुपलादेः, अङ्कुरोदयः, यथा हि तथाभावे कल्प्यमानेऽपि न बीजमन्तरेणाङ्कुरोदयः तथान्याभावे तथाभावकल्पनायामपि न भव इति । तस्मादन्यसंयोग एव तथाभावकल्पना फलवती स्यादिति ॥५२३॥ अथोपसंहरन्नाह-

**एवमाद्यत्र शास्त्रज्ञैस्तत्त्वतः स्वहितोद्यतैः ।**
**माध्यस्थ्यमवलम्ब्योच्चैरालोच्यं स्वयमेव तु ॥५२४॥**

'एवमादि' गोचरश्च स्वरूपं च फलं चेत्यादि निरूपितस्वरूपमेव अत्र योगविचारे शास्त्रज्ञैः-पुम्भिः तत्त्वतो-निश्चयवृत्त्या स्वहितोद्यतैः-स्वकल्याणाधानाधीनधीभिः माध्यस्थ्यमुक्तरूपं अवलम्ब्योच्चैरलं आलोच्यं-मीमांसनीयं, स्वयमेव त्वात्मनैव ॥५२४॥ कुतः ? यतः-

**आत्मीयः परकीयो वा, कः सिद्धान्तो विपश्चिताम् ।**
**दृष्टेष्टाबाधितो यस्तु, युक्तस्तस्य परिग्रहः ॥ ५२५॥**

आत्मीयो-जैनादिः, परकीयो वा शैवसौगतादिः को-न कश्चिदित्यर्थः सिद्धान्तो विपश्चितां-विदुषां, दृष्टेष्टाबाधितो-दृष्टेष्टाभ्यां वस्तुस्वरूपाभ्यां अबाधितोऽविरुद्धः, यस्तु-यः पुनस्तयोर्मध्ये, युक्तो-न्याय्यः तस्य परिग्रहोऽङ्गीकारः, तस्यैव [2]फलसिद्ध्यवञ्चकत्वात् ॥५२५॥ अथास्य योगशास्त्रविरचनस्य

---

१. निबन्धनभूता क्रिया-A.B.C; २. फलसिद्धाववञ्चकत्वात्-A.B.C;



Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रयोजनमुद्धारस्थानं स्वनाम च सूचयन् शास्त्रकार इदमाह-

**स्वल्पमत्यनुकम्पायै, योगशास्त्रमहार्णवात् ।**
**आचार्यहरिभद्रेण, योगबिन्दुः समुद्धृतः ॥ ५२६ ॥**

स्वल्पमत्यनुकम्पायै-तुच्छमतिजनानुग्रहाय योगशास्त्राण्येव तत्तत्तन्त्रान्तर-प्रसिद्धानि महार्णवो-महासमुद्रस्तस्मात् **आचार्यहरिभद्रेणेति** शास्त्रकृतो नाम किमित्याह **योगबिन्दुः** समुद्धृतः-पृथक्कृत इति ॥ ५२६ ॥

अथ शास्त्रकृदेव प्रणिधानमाह-

**समुद्धृत्यार्जितं पुण्यं, यदेनं शुभयोगतः ।**
**भवान्ध्यविरहात्तेन, जनः स्ताद्योगलोचनः ॥ ५२७ ॥**

समुद्धृत्योद्धारस्थानाविसंवादेन पृथक्कृत्य अर्जितमुपात्तं पुण्यं शुभकर्म, यद्विशिष्टस्वरूपं एनं-योगबिन्दुं, शुभयोगतः-परोपकाररूपशुभव्यापारा-त्प्रशस्तयोगात् भवान्ध्यविरहाद्रागद्वेषमोहलक्षणसंसारान्धभावस्य परिहारेण तेन-शुभकर्मणा सुकृतेन जनो-भव्यलोकः स्ताद्भवतु कीदृश इत्याह योगलोचनः-यथावस्थितवस्तुपरिज्ञानावन्ध्यकारणत्वाद्योग एव लोचनमक्षि यस्य स तथा ॥ ५२७ ॥

**विरह इति च भगवतः श्रीहरिभद्रसूरेः स्वप्रकरणाङ्कप्रद्योतक इति ॥**

**(समाप्ता चेयं श्री योगबिन्दुप्रकरणवृत्तिः ग्रन्थाग्र ३६२०)**

**॥ सविवरणः श्री योगबिन्दुप्रकरणग्रन्थः सम्पूर्णः ॥**

<<<<<0>>>>>

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# परिशिष्ट

## श्लोकानामकाराद्यनुक्रमणिका पृष्ठांकसहिता


| श्लोक | पृष्ठ | | |
|---|---|---|---|
| अकुसलकम्मोदय | ४३ | अत्राप्येतद्विचित्रायाः | १७१ |
| अक्षरद्वयमप्येतत् | १४८ | अत्वरापूर्वकं सर्वं | ८८ |
| अग्नेरुष्णत्वकल्पं | २७६ | अधिमुक्त्याशयस्थैर्य | २३३ |
| अणसणसुद्धीए इहं | ६३ | अध्यात्ममत्र परम | १५९ |
| अणिगूहणा बलम्मी | ३८ | अध्यात्मं भावना ध्यानं | १४६ |
| अणियत्ते पुण तीए | २६ | अध्रुवेक्षणतो नो चेत् | २८९ |
| अणुकंपा निव्वेओ | ८ | अनन्तरक्षणाभूति | १२३ |
| अणुभूयवत्तमाणो | ४७ | अनादिमानपि ह्येष | १९१ |
| अत एव च निर्दिष्टं | २९५ | अनादिरेष संसारो | १६१ |
| अत एव च योगज्ञै | १९५ | अनादिशुद्ध इत्यादि | २३६ |
| अत एव च शस्त्राग्नि | १८४ | अनाभोगवतश्चैत | १८९ |
| अत एव न सर्वेषा | १५६ | अनिवृत्ताधिकारायां | १७० |
| अत एवेदमार्याणां | २१० | अनीदृशस्य च यथा | १९९ |
| अत एवेह निर्दिष्टा | १६८ | अनीदृशस्य तु पुनर् | २५४ |
| अतस्तु भावो भावस्य | २५१ | अनुग्रहोप्यनुग्राह्य | १३८ |
| अतस्तु नियमादेव | ९० | अनेकयोगशास्त्रेभ्यः | १२७ |
| अतस्त्वयोगो योगानां | ७३ | अनेन भवनैर्गुण्य | २३० |
| अतः पापक्षयः सत्त्वं | २५५ | अनेनापि प्रकारेण | २८५ |
| अतीन्द्रियार्थसिद्ध्यर्थ | १०१ | अन्तर्विवेकसंभूतं | २१९ |
| अतोऽकरणनियमात् | २७१ | अन्यतोऽनुग्रहोऽप्यत्र | १३६ |
| अतोऽग्निः क्लेदयत्यम्बु | १०० | अन्यथात्यन्तिको | २७१ |
| अतोऽत्रैव महान् | १५८ | अन्यथा योग्यताभेदः | २२८ |
| अतोऽन्यथा प्रवृत्तौ तु | १४४ | अन्यथा सर्वमेवैतद् | १३९ |
| अतोऽन्यदुत्तरास्वस्मात् | ९२ | अन्यथा स्यादियं नित्य | १२५ |
| अतोन्यस्य तु धन्यादे | २०० | अन्यथैकस्वभावत्वा | १७१ |
| अतोऽपि केवलज्ञानं | २५७ | अन्यद्वान्ध्येयभेदोप | २९९ |
| अतोऽयं ज्ञस्वभावत्वात् | २७८ | अन्यसंयोगवृत्तीनां | २५७ |
| अत्थे रागम्मि उ अज्ज | ५१ | अन्येषामप्ययं मार्गो | २३६ |
| | | अन्योन्यासंश्रयावेवं | २४४ |


Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| अन्वयार्थस्य न आत्मा | २८९ | असद्व्ययपरित्याग : | १७८ |
| अपायमाहु: कर्मैव | २५९ | असमत्तीय उ चित्तेसु | ६१ |
| अपायदर्शनं तस्मा | ९२ | असम्प्रज्ञात एषोऽपि | २७२ |
| अपायशक्तिमालिन्यं | ९२ | असातोदयशून्योऽन्ध: | २५४ |
| अपुनर्बन्धकस्यायं | २५८ | असंमोहसमुत्थानि | १०७ |
| अपुनर्बन्धकस्यैवं | २२० | अस्थानं रूपमन्धस्य | २४१ |
| अपुनर्बन्धकादीनां | १६९ | अस्मादतीन्द्रियज्ञप्ति | २७५ |
| अपूर्वासन्नभावेन | ८५ | अस्मिन् पुरुषकारोऽपि | २७० |
| अपेक्षते ध्रुवं ह्येनं | २१६ | अस्याऽपि योऽपरो भेद | २३८ |
| अबाह्यं केवलं ज्योति: | ११५ | अस्याऽवाच्योऽयमानन्द: | २९८ |
| अभिमानसुखाभावे | २०० | अस्यां तु धर्ममाहात्म्यात् | ११७ |
| अभिसंधे: फलं भिन्नं | १०५ | अस्यैव त्वनपायस्य | २५८ |
| अभ्यासोऽस्यै विज्ञेय: | २५५ | अस्यैव सास्रव: प्रोक्तो | २५९ |
| अभ्युत्थानादियोगश्च | १७३ | अस्यैषा मुख्यरूपा स्यात् | १९५ |
| अमुख्यविषयो य: स्या | १४५ | अस्यौचित्यानुसारित्वात् | २४९ |
| अमुत्र संशयापन्न | १४८ | अहवा ओहेणं चिय | ५५ |
| अयमस्यामवस्थायां | २२६ | अहमेतानत: कृच्छ्राद् | २३१ |
| अयोगिनो हि प्रत्यक्ष | १५१ | अहिगारिणो उवाएण | २५ |
| अरिहंत चेइयाणं | ८ | अहिगारी पुण एत्थं | २५ |
| अर्थादावविधानेऽपि | २११ | आगमात् सर्व एवाऽयं | २१६ |
| अल्पव्याधिर्यथा लोके | ८४ | आगमेनानुमानेन | २७०...१०२ |
| अवज्ञेह कृताऽल्पाऽपि | १३१ | आचार्यादिष्वपि ह्येतद् | ८१ |
| अवस्था तत्त्वतो नो चेद् | १२६ | आणाए चिंतणम्मी | ५४ |
| अविद्याकल्पितेषूच्चै | २५६ | आत्मदर्शनतश्च स्या | २८४ |
| अविद्याक्लेशकर्मादि | २३८ | आत्मनां तत्स्वभावत्वे | २४० |
| अविद्यासङ्गता प्रायो | ९८ | आत्मसंप्रेक्षणं चैव | २६४ |
| अविशेषेण सर्वेषा | १७४ | आत्मा कर्माणि तद्योग: | २७० |
| अवेद्यसंवेद्यपदमपदं | ९३ | आत्मा तदन्यसंयोगात् | १३५ |
| अवेद्यसंवेद्यपदमान्ध्यं | ९७ | आत्मा तदभिलाषी | २१४ |
| अवेद्यसंवेद्यपदं यस्मा | ९२ | आत्माद्यतीन्द्रियं वस्तु | १५१ |
| अवेद्यसंवेद्यपदं विपरी | ९४ | आत्मानं पाशयन्त्येते | ९६ |
| असत्यस्मिन् कुतो मुक्ति | ३०२ | आत्मीय: परकीयो वा | ३०३ |


Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| आदरः करणे प्रीतिः | १०७ | उपप्लववशात् प्रेम | २९० |
| आदिकर्मकमाश्रित्य | २६१ | उपादेयधियाऽत्यन्तं | ८० |
| आद्यं यदेव मक्त्यर्थं | २०८ | उपायोपगमे चास्या | २६९ |
| आद्यान्न दोषविगमः | २०९ | उभयोस्तत्स्वभावत्वात् | १७१ |
| आद्यावञ्चकयोगाप्त्या | १२८ | उभयोस्तत्स्वभावत्वे | २४६ |
| आनन्दो जायतेऽत्यन्तं | २२९ | उभयोः परिणामित्वं | २३९ |
| आर्थ्यं व्यापारमाश्रित्य | २३४ | उवएसोऽविसयम्मी | ३९ |
| आलम्बणं पि एयं | १७ | उवओगो पुण एत्थं | ५४ |
| आविद्वदङ्गनासिद्धम् | १५४ | ऊहतेऽयमतः प्रायो | २०० |
| आसन्ना चेयमस्योच्चै | १९५ | ऋत्विग्भिर्मन्त्रसंस्कारै | १०५ |
| आस्रवो बन्धहेतुत्वाद् | २६० | ऋद्ध्यप्रवर्त्तनं चैव | २५६ |
| इक्किक्को य चउद्धा | ६ | एएण पगारेणं | ५९ |
| इत्थं चैतद्यतः प्रोक्तं | १८८ | एए य चित्तरूवा | ७ |
| इत्थं द्वयैकभावत्वे | २८८ | एएसिं णिय णियभूमि | ३२ |
| इत्थं सदाशयोपेतः | १० | एएसिं पि य पायं | ३३ |
| इत्यसत्परिणामानु | ९४ | एएसु जत्तकरणा | ४४ |
| इदानीं तु समासेन | १४७ | एक एव तु मार्गोऽपि | १०८ |
| इन्द्रियार्थाश्रयाबुद्धि- | १०६ | एक एव सुहृद्धर्मो | ९० |
| इयं चावरणापाय | ७७ | एकमेव ह्यनुष्ठानं | १८८ |
| इष्टापूर्त्तानि कर्माणि | १०५ | एकान्त कर्तृभावत्वे | २९१ |
| इष्यते चैतदप्यत्र | २२० | एकान्तक्षीणसंक्लेशो | २९७ |
| इहरा उ कायवासिय | १० | एकान्तनित्यतायां तु | १९२ |
| इहामुत्र फलापेक्षा | १८७ | एकान्तफलदं ज्ञेयं | २६४ |
| इहाऽहिंसादयः पञ्च | १२८ | एकान्ते सति तद्यत्नः | १४१ |
| इहैवेच्छादियोगानां | ६८ | एकापि देशनैतेषां | ११० |
| उक्तं च योगमार्गज्ञै | १५९ | एकैकं वर्धयेद् ग्रासं | १८० |
| उड्ढं अहिगगुणेहि | ४२ | एतच्च योगहेतुत्वात् | २०७ |
| उत्तरगुणबहुमाणो | ४३ | एतच्च सत्प्रणामादि | ८४ |
| उत्तुंगारोहणात् पातो | १८४ | एतच्चान्यत्र महता | १४१ |
| उत्साहान्निश्चयाद्धैर्यात् | २६९ | एतत्त्यागाप्तिसिद्ध्यर्थं | २५० |
| उपचारोऽपि च प्रायो | १३९ | एतत्त्रयमनाश्रित्य | ७३ |
| उपदेशं विनाप्यर्थ | २११ | एतत्त्रिधापि भव्यानां | २२५ |

| | | | |
|---|---|---|---|
| एतद्ध्युदग्रफलदं | २११ | एवं चापगमोऽप्यस्याः | १९३ |
| एतद्युक्तमनुष्ठानं | १८७ | एवं चिय अवयारो | ३४ |
| एतद्रागादिदं हेतुः | १९० | एवं ठियम्मि तत्ते | ८ |
| एतत्प्रधानः सच्छ्राद्धः | १०२ | एवं तु बंधमोक्खा | ४८ |
| एतत्प्रसाधयत्याशु | ११९ | एवं तु मूलशुद्ध्येह | २९९ |
| एतद्भावमले क्षीणे | ८२ | एवं तु वर्तमानोऽयं | २५३ |
| एतद्वन्तोऽत एवेह | ९५ | एवं पुण्णं पि दुहा | ५८ |
| एतन्मुक्तश्च मुक्तोऽपि | १२२ | एवं पुरुषकारस्तु | २४४ |
| एतस्य गर्भयोगेऽपि | २१७ | एवं पुरुषकारेण | २४९ |
| एतीए एस जुत्तो | ५७ | एवंभूतोऽयमाख्यातः | २२४ |
| एत्तोच्चिय कालेणं | २५ | एवं लक्षणयुक्तस्य | २०४ |
| एनां चाश्रित्य शास्त्रेषु | १९८ | एवंविधस्य जीवस्य | ८३ |
| एमाइ जहोइयभावणा | ५८ | एवं विचित्रमध्यात्मं | २६७ |
| एमाइ वत्थुविसओ | ३७ | एवं विवेकिनो धीराः | ११५ |
| एयम्मि परिणयम्मी | ३९ | एवं सामान्यतो ज्ञेयः | २२५ |
| एयम्मि मोहसागर | ११ | एवमणादी एसो | ४८ |
| एयस्स उ भावाओ | ५३ | एवमाद्यत्र शास्त्र | ३०३ |
| एयं खु तत्तणाणं | ६६ | एवमाद्युक्तसन्नीत्या | २८० |
| एयं चत्थालंबणं | ११ | एवमासाद्य चरमं | २७२ |
| एयं च पिइभत्ता | १६ | एवमूहप्रधानस्य | २०३ |
| एयं पुण णिच्छयओ | २८ | एवमेकान्तनित्योपि | २९१ |
| एयं विसेसणाण्णा | ३० | एसो चेवेत्थ कमो | ५५ |
| एवं अब्भासाओ | ५४ | एसो सामाइयशुद्धि | २९ |
| एवं कालादिभेदेन | २३२ | ऐदम्पर्यं तु विज्ञेयं | १४० |
| एवं च कर्तृभेदेन | १९० | औचित्यं भावतो यत्र | २५० |
| एवं च चरमावर्त्त | २४८ | औचित्याद्वृत्तयुक्तस्य | २५५ |
| एवं च तत्त्वतोऽसारं | २७८ | औचित्यारम्भिणोऽक्षुद्राः | २१८ |
| एवं च तत्त्वसंसिद्धे | १५८ | अंशतस्त्वेष दृष्टांतो | २७७ |
| एवं चरमदेहस्य | २६० | अशांवतार एकस्य | ३०० |
| एवं च योगमार्गोऽपि | २९३ | कण्टकज्वरमोहैस्तु | २५९ |
| एवं च सर्वस्तद्योगाद् | २०२ | कम्मं च चित्तपोग्गल | ४७ |
| एवं चानादिमान्मुक्तो | १९२ | कयमित्थ पसंगेणं | १५ |


Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| करणं परिणामोऽत्र | २२४ | केचित्तु योगिनोप्येतद् | २७४ |
| करुणादिगुणोपेतः | २३१ | केवलस्यात्मनो न्यायात् | १३६ |
| करोति योगबीजानां | ७८ | कोशपानाद्दते ज्ञानो | १०० |
| कर्तुमिच्छोः श्रुतार्थस्य | ६८ | क्रोधाद्यबाधितः शान्त | २०० |
| कर्मणा कर्ममात्रस्य | २४५ | क्षणस्थितौ तदैवास्य | १२४ |
| कर्मणोप्येतदाक्षेपे | २४७ | क्षणिकत्वं तु नैवास्य | २८७ |
| कर्मणो योग्यतायां हि | १३९ | क्षाराम्भस्तुल्य इह च | ९० |
| कर्मानियतभावं तु | २४६ | क्षाराम्भस्त्यागतो यद्वत् | ९० |
| कल्पितादन्यतो बन्धो | ३०२ | क्षीणदोषोऽथ सर्वज्ञः | १२१ |
| काञ्चनत्वाऽविशेषेऽपि | १३७ | क्षीणव्याधिर्यथा लोके | १२७ |
| कान्तकान्तासमेतस्य | ८८ | क्षुद्रो लाभरतिर्दीनो | ९४-१६५ |
| कान्तायामेतदन्येषां | ११६ | क्षेत्ररोगाभिभूतस्य | १७० |
| कायकिरियाए दोसा | ५७ | खद्योतकस्य यत्तेजः | १३१ |
| कायपातिन एवेह | २२६ | गमणाइएहिं कायं | ४० |
| कालादिसचिवश्चाय | १६३ | गुणप्रकर्षरूपो यत् | २३४ |
| किरिया उ दंडजोगेणं | ३१ | गुणाधिक्यपरिज्ञानाद् | १७७ |
| किं चान्यद्योगतः स्थैर्यं | १५२ | गुरवो देवता विप्रा | ११३ |
| कुकृत्यं कृत्यमाभाति | ९५ | गुरुकुलवासो गुरु | ३८ |
| कुण्ठीभवन्ति तीक्ष्णानि | १४८ | गुरुणा लिंगेहिं तओ | ३३ |
| कुतर्केऽभिनिवेशस्तन् | ९८ | गुरुणो अजोगिजोगो | ३९ |
| कुदृष्ट्यादिवन्नो सन्तो | १११ | गुरुदेवयापणामं | ४९ |
| कुमारीसुतजन्मादि | २८७ | गुरुदेवयाहि जायइ | ४९ |
| कुमार्या भाव एवेह | २८७ | गुरुभक्तिप्रभावेन | ९१ |
| कुलादियोगिभेदेन | १२७ | गुरुविणओ सुस्सूसा | २४ |
| कुलप्रवृत्तचक्रा येत | १२७ | गुर्वादिपूजनान्नेह | १८७ |
| कुलादियोगिनामस्मात् | १३० | गोचरश्च स्वरूपं च | १३५ |
| कृतमत्र प्रसङ्गेन प्रकृतं | १६४ | गोचरस्त्वागमस्यैव | १०१ |
| कृतमत्र प्रसङ्गेन | ११४ | ग्रन्थिभेदे यथैवायं | २७१ |
| कृतमत्र प्रसङ्गेन, प्राये | २९९ | ग्रहः सर्वत्र तत्त्वेन | ११३ |
| कृत्येऽधिकेऽधिकगते | ८६ | ग्रहं सर्वत्र संत्यज्य | २४२ |
| कृतश्चास्या उपन्यासः | १९६ | ग्रैवेयकाप्तिरप्येवं | १८५ |
| कृत्स्नकर्मक्षयान्मुक्ति | १८२ | घडमाण-पवत्तणं जोगीण | ४६ |


Jain Education International For Personal & Private Use Only www.jainelibrary.org

घातिकर्माभ्रकल्पं तद् १२१
चउसरणगमणदुक्कड ४५
चतुर्थमेतत्प्रायेण १९१
चरमे पुद्गलावर्त्ते ७९
,, ,, १६०
चरमे पुद्गलावर्ते, यतो ८२
चारित्रिणस्तु विज्ञेयः २५८
चारिसंजीवनीचार १७५
चारु चैतद्यतो ह्यस्य २०६
चिइवंदण जइविस्सा ३६
चित्रस्यास्य तथाभावे १६२
चित्रा चाद्येषु तद्राग १०४
चित्राचित्रविभागेन १०४
चित्रा तु देशनैतेषां १०९
चिंतेज्जा मोहम्मी ७१
चिन्तयत्येवमेवैतत् २३१
चैतन्यमात्मनो रूपं २७५
चैतन्यमेव विज्ञान २८१
चैतन्यं च निजं रूपं २८०
चैतन्यं चेह संशुद्धं २८४
जइ तब्भवेण जायइ ६१
जन्ममृत्युजराव्याधि ९५
जपः सन्मन्त्रविषयः २६१
जह खलु दिवसब्भत्थं ६१
जह चेव मंतरयणा ५०
जातिप्रायश्च सर्वोयं ९९
जात्यकाञ्चनतुल्यास्तत् २१८
जात्यन्धस्य यथा पुंसः २३०
जिज्ञासायामपि ह्यत्र १७०
जिनेषु कुशलं चित्तं ७९
जिनोदितमिति त्वाहु १९०
जीयमाने च नियमा ९७
जे देसविरइजुत्ता ११
जोगाणुभावाओ च्चिय ५६
ज्ञाते निर्वाणतत्त्वेऽस्मि १०९
ज्ञानपूर्वाणि तान्येव १०७
ज्ञानवान् मृग्यते कश्चित् २७८
ज्ञायेरन् हेतुवादेन ११२
ज्ञो ज्ञेये कथमज्ञः स्या २७६
ठाणा कायनिरोहो ५०
ठाणुन्नत्थालंबण ४
णमिऊण जोगिनाहं २१
णाऊण ततो तव्विसय ४९
णाणं चागमदेवय ६२
तइयस्य पुण विचित्तो ३५
तग्गयचित्तस्स तहो ६५
तज्जुत्तकहापिईइ ६
ततः शुभमनुष्ठानं १९३
ततस्तथा तु साध्वेव २९४
ततस्तदात्वे कल्याणम् १७०
तत्कारी स्यात्स २१७
तत्तत्कल्याणयोगेन २३१
तत्तत्स्वभावता चित्रा २३३
तत्तत्स्वभावतां मुक्त्वा २३४
तत्त्वचिन्तनमध्यात्मम् २६१
तत्त्वं पुनर्द्वयस्यापि २४८
तत्त्वेन तु पुनर्नैका १६७
तत्थाभिसंगो खलु ४८
तत्पदं साध्ववस्थाना ९४
तत्पुनर्भाविकं वा स्याद् २९२
तत्प्रकृत्यैव शेषस्य १९७
तत्प्रणेतृसमाक्रान्त २१९
तत्र द्रागेव भगवान् १२१
तत्स्वभावोपमर्देऽपि १२३


Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| तत्स्वभावत्वतो यस्माद् | २९४ | तस्मादनुष्ठानगतं | २७९ |
| तथा च जन्मबीजाग्नि | १४७ | तस्मादवश्यमेष्टव्या | १९२ |
| तथा चान्यैरपि ह्येत | १६९ | तस्सासण्णत्तणओ | ३४ |
| तथा च तत्स्वभावत्व | २४६ | तह कायपाइणो ण पुण | ५८ |
| तथा च भिन्ने दुर्भेदे | २२९ | तह चेव एयबाहग | ६ |
| तथा चेहात्मनो ज्ञत्वे | २७५ | ता इय आणाजोगे | ६४ |
| तथा तथा क्रियाविष्ट | २९५ | तात्त्विकः पक्षपातश्च | १३० |
| तथात्मगुरुलिङ्गानि | २१३ | तात्त्विकोऽतात्त्विकश्चायं | १४६–२५७ |
| तथात्मपरिणामात्तु | १६३ | तात्त्विको भूत एव स्याद | १४६ |
| तथानामैव सिद्धैव | २८३ | ता सुद्धजोगमग्गो | ६२ |
| तथा भव्यत्वतश्चित्र | २३२ | तारायां च मनाक् | ८५ |
| तथायं भवकान्तारे | २५४ | तित्थस्सुच्छेयाइ | १२ |
| तदत्र परिणामस्य | २२६ | तीव्रपापाभिभूतत्वात् | १६५ |
| तदत्र महतां वर्त्म | ११३ | तुच्छं च तुच्छनिलया | २२१ |
| तदन्यकर्मविरहाद् | १९२ | तुल्य एव तथा सर्गः | १७२ |
| तदभावे च संसारी | १२४ | तुल्यत्वमेवमनयो | २४९ |
| तदभावेपि तद्भावो | २६८ | तृणगोमयकाष्ठाग्नि | ७४ |
| तदभिप्रायमज्ञात्वा | १११ | तृणादीनां च भावानां | १६८ |
| तदयं कर्तृभावः स्याद् | २९१ | तृतीयमप्यदः किन्तु | २०९ |
| तदासनाद्यभोगश्च | १७४ | तृतीयाद्दोषविगमः | २१० |
| तद्दृष्टाद्यनुसारेण | १४४ | तृष्णा यज्जन्मनो योनि | २८५ |
| तद्भङ्गादिभयोपेत | २६४ | तेषामेव प्रणामादि | १३० |
| तद्वत्कथाप्रीतियुता | १२९ | तैजसानां च जीवानां | १६८ |
| तन्नियोगान्महात्मेह | १२० | त्यागश्च तदनिष्टानां | १७३ |
| तपोपि च यथाशक्ति | १८० | त्रिधा शुद्धमनुष्ठानं | २०७ |
| तप्पोग्गलाण तग्गहण | २७ | थीरागम्मी तत्तं | ५१ |
| तल्लक्खणयोगाओ | ३२ | दत्तं यदुपकाराय | १७८ |
| तल्लक्षणाविसंवादा | १०९ | दार्वादेः प्रतिमाक्षेपे | २४७ |
| तस्मात्सदैव धर्मार्थी | २१२ | दिदृक्षादिनिवृत्त्यादि | २९३ |
| तस्मात्तत्साधनोपायो | १०५ | दिदृक्षाद्यात्मभूतं तन् | १२५ |
| तस्मात्सामान्यतो | १०३ | दिदृक्षा विनिवृत्तापि | २८४ |
| तस्मादचरमावर्त्ते | १६७ | दिदृक्षा भवबीजादि | १९३ |


Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| दिव्यभोगाभिलाषेण | १८९ | ध्यानप्रिया प्रभा प्रायो | ११८ |
| दीनान्धकृपणा ये तु | १७८ | न किंनरादिगेयादौ | २२१ |
| दुःखरूपो भवः सर्व | ८७ | न च सद्योगभव्यस्य | २१७ |
| दुःखितेषु दयात्यन्तं | ८३ | न चाकृतस्य भोगोऽस्ति | २९१ |
| दूरं पश्यतु वा मा वा | २७९ | न चात्मदर्शनादेव | २८९ |
| दृष्टबाधैव यत्राऽस्ति | १४३ | न चानुमानविषय | ११२ |
| दृष्टान्तमात्रं सर्वत्र | १०० | न चेयं महतोऽर्थस्य | १९४ |
| देवतापुरतो वापि | २६२ | न चेह ग्रन्थिभेदेन | २०५ |
| देवादिवन्दनं सम्यक् | २६५ | न चैतदेवं यत्तस्मात् | ११२....७० |
| देवान् गुरून् द्विजान् साधून् | १४९ | न चैतद्भूतसङ्घात | १५५ |
| देशादिभेदतश्चित्र | २५४ | न चैतेषामपि ह्येतद् | १५६ |
| देसे सव्वे य तहा | ४ | न चैवं तत्र नो राग | २२२ |
| दैवं नामेह तत्त्वेन | २४३ | न तत्त्वतो भिन्नमताः | १०२ |
| दैवं पुरुषकारश्च | १४२ | नत्वाद्यन्तविनिर्मुक्तं | १३३ |
| दैवं पुरुषकारश्च, तुल्या | २४२ | नत्वेच्छायोगतोऽयोगं | ६६ |
| दैवं पुरुषकारेण | २४५ | न देशविप्रकर्षोऽस्य | २७६ |
| दैवमात्मकृतं विद्यात् | २४४ | न निमित्तवियोगेन | २८० |
| दोसम्मि उ जीवाणं | ७० | न भवस्थस्य यत्कर्म | २४३ |
| द्विचन्द्रस्वप्नविज्ञान | १०१ | न भेद एव तत्त्वेन | १०४ |
| द्वितीयं तु यमाद्येव | २०८ | न यस्य भक्तिरेतस्मिन् | २१२ |
| द्वितीयाद्दोषविगमो | २०९ | न युज्यते प्रतिक्षेपः | १११ |
| द्वितीयाऽपूर्वकरणे | १२०/७१ | नवताया न चाऽत्यागः | २९७ |
| द्विधायं धर्मसंन्यासः | ७१ | नवनीतादिकल्पः | २६८ |
| धर्मबीजं परं प्राप्य | ९६ | न ह्यपश्यन्नहमिति | २८५ |
| धर्ममेघोऽमृतात्मा च | २७३ | न ह्यलक्ष्मीसखी लक्ष्मी | ११५ |
| धर्मरागोऽधिकोऽस्यैवं | २२२ | न ह्युपायान्तरोपेयम् | २१५ |
| धर्मस्यादिपदं दानं | १७८ | न ह्येतद्भूतमात्रत्व | १५० |
| धर्मादपि भवन् भोगः | ११५ | नात एवाणवस्तस्य | १९३ |
| धर्मार्थं लोकपंक्तिः स्यात् | १६६ | नान्यतोऽपि तथाभावाद् | ३०२ |
| धृतिः क्षमा सदाचारो | १५४ | ना भावो च्चिय | ५२ |
| ध्यानं च निर्मले बोधे | ११९ | नार्या यथान्यसक्तायाः | २०५ |
| ध्यानजं सुखमस्यां तु | ११८ | नास्ति येषामयं तत्र | १८३ |


Jain Education International For Personal & Private Use Only www.jainelibrary.org

नाऽस्माकं महती प्रज्ञा ८७
नास्मिन् घने यतः सत्सु ८४
नास्यां सत्यामसत्तृष्णा ८७
निच्छयओ इह जोगो २३
निजं न हापयत्ये २२३
निमित्तमुपदेशस्तु २५१
निमित्ताभावतो नो २८३
नियमात्प्रतिमा नात्र २४६
निययसहावालोयण ४०
निराचारपदो ह्यस्या १२०
निरावरणमेतद्यद् २८३
निवृत्तिरशुभाभ्यासात् २५५
निशानाथप्रतिक्षेपो १११
निश्चयेनात्र शब्दार्थ २६०
निश्चयोऽतीन्द्रियार्थस्य १११
निषिद्धासेवनादि यद् २६७
नृपस्येवाभिधानाद्यः २९३
नेदमात्मक्रियाऽभावे २४५
नैतद्विदस्त्वयोग्येभ्यो १३१
नैरात्म्यदर्शनं कस्य २८६
नैरात्म्यदर्शनादन्ये २८४
नैरात्म्यमात्मनोऽभावः २८६
नोदनापि च सा यतो १५०
पइरिक्के वाघाओ ५४
पठितः सिद्धिदूतोऽयं २१६
पडिसिद्धेसु अ देसे २९
पढमस्स लोगधम्मं ३३
परपीडेह सूक्ष्मापि ११३
परलोकविधौ शास्त्रात् २११
परार्थरसिको धीमान् २२७
परार्थसाधकं त्वेतत् १२९
परिणामिन्यतो नीत्या २९४
परिणामित्व एवैतत् २९६
परिष्कारगतः प्रायो ८९
परिसुद्धचित्तरयणो ६२
पर्वोपलक्षितो यद्वा २६२
पल्लवाद्यपुनर्भावो २६८
पात्रे दीनादिवर्गे च १७७
पापवत्स्वपि चात्यन्तं ११३
पापसूदनमप्येवं १८१
पापात्त्वस्येत्वरं कालं २२३
पापामयौषधं शास्त्रं २१२
पावं न तिव्वभावा कुणइ २८
पित्रोः सम्यगुपस्थानाद् १५५
पुण्यापेक्षमपि ह्येवं ११८
पुत्रदारादिसंसारः २९९
पुरुषः क्षेत्रविज्ञान १४०
पुरुषोऽविकृतात्मैव २८१
पुष्पैश्च बलिना चैव १७४
पूजनं चास्य विज्ञेयं १७३
पूर्वसेवा तु तन्त्रज्ञै १७२
प्रकृतेरा यतश्चैव २०६
प्रकृतेर्भेदयोगेन २०१
प्रकृतेर्वानुगुण्येन २५२
प्रकृष्टपुण्यसामर्थ्यात् २७४
प्रक्रान्ताद्यदनुष्ठानात् २५१
प्रतिक्रमणमप्येवं २६६
प्रतिपत्तिस्ततस्तस्य १०२
प्रतिपातयुताश्चाद्या ७७
प्रत्यक्षेणानुमानेन १४३
प्रथमं यद्गुणस्थानं ८५
प्रदीर्घभवसद्भावाद् १६१
प्रयाणभङ्गाभावेन ७८
प्रलापमात्रं च वचो १५१

प्रवृत्तचक्रास्तु पुनर् १२८
प्रवृत्तिरपि चैतेषां २११
प्रशान्तवाहितासंज्ञं ११९
प्रस्तावे मितभाषित्वं १७९
प्राकृतेष्विह भावेषु १०८
प्राणायामवती दीप्रा ८९
प्राणेभ्योऽपि गुरुर्धर्म: ८९
प्रोल्लसद्भावरोमाञ्चं २६६
फलवद्द्रुमसद्बीज २१९
फलावञ्चकयोगस्तु १३०
बडिशामिषवत्तुच्छे ९७
बन्धाच्च भवसंसिद्धिः २९३
बालधूलीगृहक्रीडा ११५
बीजं चास्य परं सिद्ध- ९८
बीजश्रुतौ च संवेगात् ८२
बीयस्स उ लोगुत्तर ३४
बुद्धिपूर्वाणि कर्माणि १०७
बुद्धिर्ज्ञानमसंमोह १०६
बुद्ध्यध्यवसितं यस्मा २८०
बुद्ध्यध्यवसितस्यैवं २८१
बोधमात्रेऽद्वये तत्त्वे २९०
बोधरोग: शमापाय: ९८
बोधाम्भ:स्रोतसश्चैषा ८८
ब्रह्मचर्येण तपसा १५५
भयं नातीव भवजं ८६
भव एव महाव्याधि १२२
भवंश्चाप्यात्मनो यस्मा २३५
भवत्यस्यां तथाच्छिन्ना ८६
भवभावानिवृत्ताव- १२५
भवाभिनंदिदोषाणां १९५
भवाभिनंदिन: प्राय १६५
भवाभिनंदिनो लोक १६६
भवाभिष्वङ्गभावेन १८७
भवाम्भोधिसमुत्तारात् ९१
भवोद्वेगश्च सहजो ८१
भावणसुयपाढो तित्थ ४६
भावनादित्रयाभ्यासाद् २६८
भाववृद्धिरतोऽवश्यं २५३
भावाविच्छेद एवायं २८८
भिन्नग्रन्थेस्तु यत्प्रायो २०५
भिन्नग्रन्थेस्तृतीयं २२५
भेदोपि चास्य विज्ञेयो २३०
भोगतत्त्वस्य तु पुनर् ११७
भोगाङ्गशक्तिवैकल्यात् १९१
भोगात्तदिच्छाविरतिः ११६
भोगान् स्वरूपतः पश्यन् ११७
भोगिनोऽस्य स दूरेण २२३
भ्रान्तिप्रवृत्तिबन्धास्तु १४०
मग्गणुसारी सद्धो २८
मग्गेणं गच्छन्तो २५
मण्डूकभस्मन्यायेन २७३
मलिनस्य यथात्यन्तं २१३
मलिनस्य यथा हेम्नो १४८
महामोहाभिभूताना १८३
माता पिता कला १७२
माध्यस्थ्यमवलम्ब्य २३५
मायामरीचिगन्धर्व ११४
मायाम्भस्तत्त्वतः ११७
मासोपवासमित्याहु १८१
मित्रा तारा बला दीप्रा ७३
मित्रायां दर्शनं मन्दं ७८
मिथ्याचारपरित्याग २६२
मिथ्याविकल्परूपं तु १९१
मीमांसाभावतो नित्यं ११८


Jain Education International For Personal & Private Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| मुक्खेण जोयणाओ | १ | यदा नार्थान्तरं तत्त्वं | ३०२ |
| मुक्तस्येव तथाभाव | ३०३ | यद्वा तत्तत्रयापेक्षा | ११० |
| मुक्तांशत्वे विकारित्व | ३०० | यमादियोगयुक्तानां | ७६ |
| मुक्ताविच्छापि यच् | २०९ | यश्चात्र शिखिदृष्टान्तः | २१८ |
| मुक्तिमार्गपरं युक्त्या | १६९ | यस्य त्वनादरः शास्त्रे | २१३ |
| मुक्तौ दृढानुरागश्च | २५० | यस्य येन प्रकारेण | ११० |
| मुक्तो बुद्धोऽर्हन् वापि | २३६ | यादृच्छिकं न यत्कार्यं | १६२ |
| मुक्त्वातो वादसङ्घट्टं | १६० | युज्यते चैतदप्येवं | १९७ |
| मुख्यतत्त्वानुवेधेन | १४५ | ये योगिनां कुले जाता | १२८ |
| मुख्ये तु तत्र नैवासौ | १४५ | येषामेवं न मुक्त्यादौ | १८६ |
| मुख्योऽयमात्मनोऽनादि | १२२ | योगक्रियाफलाख्यं य | ८३ |
| मुत्तूण लोगसन्नं | १४ | योगः कल्पतरुः श्रेष्ठो | १४७ |
| मुत्तेणममुत्तिमओ | ४७ | योगस्यैतत्फलं मुख्यं | २९८ |
| मुनीन्द्रैः शस्यते तेन | २६३ | योगाः कायादिकर्माणि | २६४ |
| मूलं च योग्यता ह्यस्य | २६९ | योगिज्ञानं तु मानं चेत् | १२६ |
| मैत्रीप्रमोदकारुण्य | २६७ | योगिनो यत्समध्यक्षं | १५१ |
| मोक्षहेतुत्वमेवास्य | १३५ | योगेभ्यो जनवादाच्च | २६३ |
| मोक्षहेतुर्यतो योगो | १३४ | योग्यता चेह विज्ञेया | २२८ |
| मोहान्धकारगहने | २३० | योग्यतात्मस्वभावस्त | २९६ |
| यः श्राद्धो मन्यते | २१२ | योग्यतापगमेऽप्येवं | २९७ |
| यतो विशिष्टः कर्तायं | १९० | योग्यतामन्तरेणास्य | १३७ |
| यत्तथोभयभावत्वे | २९२ | योग्यतायास्तथात्वेन | १३८ |
| यत्नेनाप्यनुमितोऽर्थः | ११२ | योग्येभ्यस्तु प्रयत्नेन | १३१ |
| यत्सम्यग्दर्शनं बोधि | २२७ | योजनाद्योग इत्युक्तो | २०४ |
| यथा कण्डूयनेष्वेषां | ९५ | रत्नादिशिक्षादृग्भ्योऽन्या | १२० |
| यथाप्रतिज्ञमस्येह | २६३ | रत्नोपलम्भतज्ज्ञान | १०६ |
| यथाप्रवृत्तकरणे | ८५ | रयणाइलद्धीओ | ५७ |
| यथाभव्यं च सर्वेषा | ११० | रागादिभिरयं चेह | १०६ |
| यथाशक्त्युपचारश्च | ८६ | रागो दोसो मोहो | ४७ |
| यथेह पुरुषाऽद्वैते | २९९ | रोग-जरा-परिणामं | ५१ |
| यथैवैकस्य नृपते- | १०३ | लाभान्तरफलश्चास्य | ८६ |
| यथोदितायाः सामग्र्या | २७४ | लिङ्गं मार्गानुसार्येष | २५३ |


Jain Education International For Personal & Private Use Only www.jainelibrary.org

लेखना पूजना दानं ८२
लेसाय वि आणाजोगओ ६४
लोकपंक्तिमतः प्राहु १६७
लोकशास्त्राविरोधेन १४२
लोकाचारानुवृत्तिश्च १८०
लोकापवादभीरुत्वं १७९
लोकाराधनहेतोर्या १६६
वचनादस्य संसिद्धि १४३
वणलेवोवम्मेणं ५६
वरबोधिसमेतो वा २२७
वरबोधेरपि न्यायात् २२९
वरं वृन्दावने रम्ये १८३
ववहारओ उ एसो २४
वशिता चैव सर्वत्र २५६
वंदणमाइ उ विही ४२
वादांश्च प्रतिवादांश्च १५९
वापीकूपतडागानि १०५
वासीचंदणकप्पं ६०
वासीचंदणकप्पो ३१
विद्वत्तायाः फलं नान्यत् २९८
विधाने चेतसो वृत्ति २६२
विनिवृत्ताग्रहत्वं च १५४
विपक्षचिन्तारहितं १२९
विपश्चितां न युक्तोयं २३९
विभक्तेदृक्परिणतौ २८२
विरोधिन्यपि चैवं स्यात् २०३
विवेकिनो विशेषेण २६७
विशेषं चास्य मन्यन्त २३४
विशेषस्तु पुनस्तस्य १०३
विशेषस्यापरिज्ञानाद् २३६
विषं गरोऽननुष्ठानं १८८
विषं लब्ध्याद्यपेक्षात १८९
विषयात्मानुबन्धैस्तु २०७
विस्रोतोगमने न्याय्यं २६५
वृथा कालादिवादश्चे १६३
वेद्यं संवेद्यते यस्मिन् ९३
वेद्यसंवेद्यपदतः ९३
वेलावलनवन्नद्या २०४
व्रतस्थाः लिङ्गिनः पात्र १७७
व्याधितस्तदभावो वा १२६
व्याधिमुक्तः पुमान् लोके १२२
व्यापारमात्रात्फलदं २४४
शक्तेर्न्यूनाधिकत्वेन २२४
शान्तोदात्तत्वमत्रैव १९८
शान्तोदात्तः प्रकृत्येह १९८
शास्त्रयोगस्त्विह ज्ञेयो ६९
शास्त्रसंदर्शितोपाय ६९
शास्त्रे भक्तिर्जगद्वन्द्यै २१३
शिरोदकसमो भावः २५२
शुध्यल्लोके यथारत्नं १९७
शुभयोगसमारम्भे ८९
शुभात्ततस्त्वसौ भावो २४८
शुभैकालम्बनं चित्तं २५६
शुश्रूषा धर्मरागश्च २२१
शैलेशीसंज्ञिताच्चेह २९५
श्रद्धालेशान्नियोगेन १४९
श्रवणे प्रार्थनीयाः स्यु १३१
श्रुतधर्मे मनो नित्यं ११७
श्रुताभावेऽपि भावेऽस्याः ८८
श्रूयन्ते च महात्मानः १५८
श्रूयन्ते चैतदालापाः १८२
स एव न भवत्येतत् १२३
संयोगयोग्यताभावो २९६
संवरणिच्छिड्डत्तं ३८

| | | | |
|---|---|---|---|
| संविग्नो भवनिर्वेदा | २३२ | समाधिराज एतत्तत् | २८५ |
| संसारातीततत्त्वं तु | १०८ | समाधिरेष एवान्यैः | २७२ |
| संसारादस्य निर्वेद | २५० | समुद्धृत्यार्जितं पुण्यं | ३०४ |
| संसारिषु हि देवेषु | १०४ | समुद्रोर्मिसमत्वं च | ३०० |
| संसारिणां हि देवानां | १०४ | समेघामेघरात्र्यादौ | ७३ |
| संसारी तदभावो वा | १२६ | सम्यग्घेत्वादिभेदेन | ९१ |
| संक्लेशाऽयोगतो भूयः | १९७ | स योगाभ्यासजेयो यत् | २९४ |
| संक्षेपात्सफलो योग | २६० | सरणं गुरु उ एत्थं | ४४ |
| सकृदावर्तनादीनाम् | २५८ | सरणं भए उवाओ | ४३ |
| स क्षणस्थितिधर्मा चेद् | १२४ | सर्वं परवशं दुःखं | ११८ |
| सच्चेष्टितमपि स्तोकं | १८६ | सर्वं सर्वत्र चाप्नोति | १०१ |
| सच्छ्रद्धासंगतो बोधः | ७६ | सर्वज्ञ तत्त्वाऽभेदेन | १०३ |
| सज्ज्ञानादिश्च यो मुक्ते | १८४ | सर्वज्ञपूर्वकं चैतद् | १०९ |
| सण्णाणं वत्थुगओ | २३ | सर्वज्ञो नाम यः कश्चि | १०२ |
| स तत्रैव भवोद्विग्नो | ११७ | सर्वत्र निन्दासंत्यागो | १७९ |
| सति चास्मिन् स्फुरद्- | २०६ | सर्वत्र शमसारं तु | १२९ |
| सतोऽसत्त्वे तदुत्पाद- | १२४ | सर्वत्र सर्वसामान्य- | २७७ |
| सत्क्षयोपशमात् सर्वम् | २५२ | सर्वत्राऽद्वेषिणश्चैते | १२८ |
| सत्त्वाद्यभेद एकान्ताद् | ३०१ | सर्वथा तत्परिच्छेदात् | ७० |
| सत्प्रवृत्तिपदं चेहा | ११९ | सर्वथा योग्यताऽभेदे | २२८ |
| सत्यात्मनि स्थिरे प्रेम्णि | २८६ | सर्वथैवात्मनोऽभावे | २८६ |
| सत्साधकस्य चरमा- | १९४ | सर्वमेवेदमध्यात्मं | २६५ |
| सदाद्यमत्र हेतुः स्यात् | ३०१ | सर्वान्देवान्नमस्यन्ति | १७५ |
| सदाशिवः परं ब्रह्म | १०८ | सर्वेषामेव सत्त्वानां | १६१ |
| सदपायश्च नाध्यात्माद् | १६० | सर्वेषां तत्स्वभावत्वात् | २४० |
| सदुपायाद्यथैवाप्ति- | १६० | सर्वेषां योगशास्त्राणा | १३३ |
| सद्गोचरादिसंशुद्धि- | २९८ | सहजं तु मलं विद्यात् | १९१ |
| सत्तेसु ताव मेत्तिं | ५५ | सांसिद्धिकं च सर्वेषां | २४० |
| सद्धम्माणुवरोहा | ३५ | सांसिद्धिकमदोऽप्येवम् | २४१ |
| सद्भिः कल्याणसम्पन्नैः | १२९ | सांसिद्धिकमलाद्यद्वा | २०२ |
| सन्तापनादिभेदेन | १८१ | सांसिद्धिकमिदं ज्ञेयं | २२७ |
| समाधिनिष्ठा तु परा | ११९ | साकल्यस्यास्य विज्ञेया | १४१ |


Jain Education International For Personal & Private Use Only www.jainelibrary.org

साक्षादतीन्द्रियानर्थान् २७४
सागरोपमकोटीनां २२६
साधु चैतद्यतो नीत्या २३१
सामग्र्याः कार्यहेतुत्वं १६४
सामान्यवद्विशेषाणां २७८
सामान्येन तु सर्वेषां १५७
साराणां च यथाशक्ति १७३
सास्रवो दीर्घसंसार- १४६
साहारणो पुण विही ५६
सिद्धाख्यपदसम्प्राप्ति ६१
सिद्ध्यन्तरं न संधत्ते २१५
सिद्ध्यन्तरस्य सद्बीजं २१४
सिद्ध्यन्तराङ्गसंयोगात् २१५
सिद्धेरासन्नभावेन १९४
सुखासनसमायुक्तं ८७
सुस्सूसधम्मराओ १४
सुहसंठाणा अण्णे ४१
सो एस वंकओ चिय १२
स्थानकालक्रमोपेतं २६६
स्थितः शीतांशुवज्जीवः १२१
स्थिरत्वमित्थं न प्रेम्णो २१०
स्थिरायां दर्शनं नित्यं ११४
स्थूरसूक्ष्मा यतश्चेष्टा २६८
स्फटिकस्य तथानाम २८२
स्वभावोत्तरपर्यन्त ९९
स्वभावोस्य स्व भावो १२३
स्वतन्त्रनीतितस्त्वेव २२१
स्वनिवृत्तिस्वभावत्वे २८८
स्वनिवृत्तिः स्वभावश्चेद् २९६
स्वप्नमन्त्रप्रयोगाच्च १५०
स्वप्ने वृत्तिस्तथाभ्यासाद् १५७
स्वभावविनिवृत्तिश्च २९७
स्वभाववादापत्तिश्चेद् १६२
स्वभावापगमे यस्माद् २९२
स्वरूपं निश्चयेनैतद् २४३
स्वरूपं संभवं चैव १४६
स्वल्पमत्यनुकम्पायै ३०४
स्वाराधनाद्यथैतस्य १८४
स्वौचित्यालोचनं २६३
हस्तस्पर्शसमं शास्त्रं २४२
हेतुभेदो महानेव २२२
हेतुमस्य परं भावं २७१
हेयोपादेयतत्त्वस्य २७९


**પૂ. આ. શ્રી અભયશેખરસૂરિ મ. સા. લિખિત ઉપદેશાત્મક સાહિત્ય**

1. હંસા ! તું ઝીલ મૈત્રી સરોવરમાં... (ગુજ.+હિન્દી=૪૫૦૦૦ નકલ)
2. હૈયું મારું નૃત્ય કરે
3. હું કરું હું કરું એ જ અજ્ઞાનતા
4. કર પડિક્કમણું ભાવશું
5. અવિકખા અણાણંદે
6. હું છું સેવક તારો રે
7. હા ! પસ્તાવો વિપુલ ઝરણું...
8. મિચ્છામિ દુક્કડં
9. ટાળિયે દોષ સંતાપ રે...

Jain Education International For Personal & Private Use Only www.jainelibrary.org



# યોગ એટલે ?

સમ્યગ્દર્શન-જ્ઞાન-ચારિત્રરૂપી મોક્ષમાર્ગ એ જ વસ્તુતઃ યોગ છે. આની યથાર્થ આરાધના જ ઈચ્છા-પ્રવૃત્તિ વગેરે ચાર યોગરૂપે, ઈચ્છા-વચન વગેરે ત્રણ યોગરૂપે, અધ્યાત્મ-ભાવના વગેરે પાંચ યોગરૂપે, મિત્રાદિ ૮ દૃષ્ટિરૂપે કે પ્રીત્યાદિ ચાર અનુષ્ઠાનરૂપે પરિણમે છે. માટે આ મોક્ષમાર્ગમાં જ આત્મહિતના લક્ષપૂર્વક વધુ ને વધુ ઉદ્યમશીલ બનવું એ હિતકર છે.




ભરત ગ્રાફીક્સ, ... ૭૬, મો. ૯૯૨૫૦૨૦૧૦૬

146562

Jain Education International For Personal & Private Use Only www.jainelibrary.org